CC-0. In Public Domain. Digitization by eGangotri

ऋतम्भरा

RITAMBHARA

वर्ष ६, अङ्कः १

महेन्द्र - संस्कृत - विश्वविद्यालयः

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

महेन्द्रसंस्कृतविश्वविद्यालयीयानुसन्धानकेन्द्रस्य अनुसन्धानप्रधाना
चातुर्मासिकी त्रैभाषिकी पत्रिका

ऋतम्भरा

RIṮAMBHARĀ

वर्ष:६, अङ्क:१

संरक्षक:
शिक्षाध्यक्ष:

सम्पादकसन्दोह:
प्रा.डा. श्रीवेणीमाधवढकाल: - संयोजक:
सहप्रा. श्रीध्रुवप्रसादज्ञवाली - सदस्य:
उपप्रा. श्रीध्रुवप्रसादभट्टराई: - सदस्य:

प्रकाशकम्
महेन्द्रसंस्कृतविश्वविद्यालयस्य
अनुसन्धानकेन्द्रम्
काष्ठमण्डपस्थम्

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

प्रकाशकम्

अनुसन्धानकेन्द्रम्
महेन्द्रसंस्कृतविश्वविद्यालयः
वसन्तपुरम्, काष्ठमण्डपः

प्रकाशनम्

वर्षः - ६ अङ्कः - ९, २०६० वैक्रमाब्दस्य पौषमासस्य सप्तविंशे दिवसे

प्रकाशितपत्रिकाप्रतिरूपाणि - १०००

मूल्यम् - रू.

सुसाङ्गचटङ्कनम्

क्वालिटी लेजर प्रिन्ट, बागबजार,
दूरभाषसङ्ख्या (फोन नं.) ४२४२६५६

मुद्रकः

बगलामुखी अफसेट प्रेस, कुपण्डोल ललितपुर,
दूरभाषसङ्ख्या (फोन नं.) ५५२००९९

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

The Quarterly Research Magazine in three languages of
Mahendra Sanskrit University.

RITAMBHARĀ

ऋतम्भरा

Year 6th Volume 9th

Patron

The Rector of M.S.U.

Board of Editors

Prof. Dr. Veni Madhav Dhakal - Co-Ordinator
Reader Dhruva Prasad Gyawali - Member
Lecturer Dhruva Prasad Bhattarai - Member

Published by

The Research Center of Mahendra Sanskrit University,
Basantapur, Kathmandu

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

Publisher :

The Research Center of Mahendra Sanskrit University,

Basantpur, Kathmandu

Publishing Date :

Year 6th Volume 9th

11 January 2004

Published Copies :

1000

Price : Rs.

Computer :

Quality Laser Print

Bag Bazar, Ph. No. 4242656

Printed at :

Bagalamukhi Offset Press

Kupondole, Lalitpur, Ph. No. 5520099

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

- सरस्वती नः सुभगा मयस्करत् -

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri



ऋतं निगूढं सुरवाङ्महोदधौ
गवेषयन्ती च विवेचयन्त्यसौ ।
ऋतम्भरा मूर्तिमती महीयताम्
प्रबोधयन्ती च सतामृतम्भराम् ॥



Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

फोन नं. : ४२२१५१०
४२१६२९०

महेन्द्र-संस्कृत-विश्वविद्यालय
MAHENDRA SANSKRIT UNIVERSITY

काठमाण्डौ कार्यालय, बसन्तपुर
पो.व.नं. ५००३

Kathmandu Office, Basantapur
P.O.Box No. 5003

शुभाशंसा

ऋतम्भराया ऋतम्भरता विश्रुता विद्वत्तल्लजेषु । अस्या नवमोङ्कः प्रकाश्यमान इति श्रुतिगोचरीकृत्य प्रसीदति मदीयं हार्दम् । पौरस्त्यचिन्तनानां ज्ञानविज्ञानमयीं दीप्तिं प्रकाश्य कुशिक्षयाऽशिक्षया च धूसरितमानसानां मानसप्रक्षालनक्षमा एषा ऋतम्भरा वेदवेदाङ्गधर्मशास्त्रदर्शनायुर्वेदादिविषयेषु साभिरुचि जनप्रवर्तने संसारसरणौ सदाचारसुन्दरव्यक्तित्वनिर्माणविधौ च जनानभिप्रेरयन्ती वर्तत इति विगताङ्केषु प्रकाशितानां विषयव्यूहानां परिशीलनाद् विज्ञायते ।

संस्कृतशिक्षा नाम असन्निराकृत्य सतःस्वागताय, तमः पराजित्य ज्योतिषः सभाजनाय, मृत्युं न्यक्कृत्य अमृतस्य चाधानाय विना विभेदं सार्वकालिकान् सार्वदेशिकान् जनान् सञ्चारयन्ती अनेकदोषदूषिते पुष्ययुगेऽपि सुधाकलशं धृत्वा देदीप्यमाना वर्तत इति न भवेत् कस्यचन विमतिः ।

युगजन्यप्रभावशाद् विषाक्तमानसा जना एतस्या विश्वरूपत्वममृतरूपत्वञ्चात्मसात्कर्तुमक्षमाः स्वान् क्षमाभाररूपान् साधयन्तीति विषयोऽयं नितरामुद्वेजकः। साम्प्रतमेकतः संसारस्य समृद्धेषु राष्ट्रेषु संस्कृतवाङ्मयस्य नानाविधानां विधानां वैज्ञानिकमध्ययनं गभीरं विश्लेषणञ्च जायमानमिति श्रुतिगोचरीक्रियते चेदपरतः संस्कृतभाषायाः स्रोतोभूमौ भारतीयोपमहाद्वीपे संस्कृतशिक्षाया नित्यं ह्रासोन्मुखताऽनुभूयते, कीदृशीयं विडम्बना ? एतद् वीक्ष्य सज्जनानां दूयन्ते मानसानि । सन्दर्भेऽस्मिन् कुत्र वर्ततेऽस्मद्दोषः, प्रबन्धने, पाठ्यक्रमेऽथवा शिक्षणे ? इति सम्यग्विवेचनीयं प्रतिभाति सम्प्रति ।

शेमुषीमतां सतां विपश्चितां वैदुष्यगर्भिताभिः शेमुषीभिः समलङ्कृता ऋतम्भरेयमृतस्यामृतस्य सत्यस्य तथ्यस्य च द्वारोद्घाटनं कुर्वती नेपालराष्ट्रमिदं संस्कृतशिक्षाकेन्द्रत्वेन प्रतिष्ठापयितुं गुर्वीं भूमिकामङ्गीकुर्यात्, अस्या ज्योतिर्मयं भविष्यद् भवेदिति च भावयन् भगवन्तं पञ्चमुखं पशुपतिनाथं प्रार्थये प्रह्वेन चेतसा ।

पर्यन्ते चास्याः पत्रिकाया नवमाङ्कस्य विशिष्टस्वरूपसम्पादननिदानभूताय सम्पादकसमूहस्य संयोजकाय विदुषे प्रा.डा. वेणीमाधवढकालमहोदयाय कार्तज्ञ्यं प्रकाशयन् विद्वद्भ्यां सम्पादकाभ्यां सहप्रा. श्रीध्रुवप्रसादज्ञवाली-उपप्रा. श्रीध्रुवप्रसाद-भट्टराईमहोदयाभ्यां साधुवादान् समर्पयामि । तथैवास्याऽङ्कस्य मुद्रणप्रकाशनादिक्रियाकलापेषु व्यापृतेभ्यः सर्वेभ्य एव सहयोगिजनेभ्यः साधुवादान् ज्ञापयन् विरमामि ।

{ आचार्यः पूर्णचन्द्रढुङ्गेलः }
उपकुलपतिः
महेन्द्रसंस्कृतविश्वविद्यालयः

२०६० श्रावणमासस्य पञ्चमे दिवसे

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

फोन नं. : ४२२१५१०
४२४७४४५

महेन्द्र-संस्कृत-विश्वविद्यालय

MAHENDRA SANSKRIT UNIVERSITY

काठमाण्डौ कार्यालय, बसन्तपुर
पो.व.नं. ५००३

Kathmandu Office, Basantapur
P.O.Box No. 5003

प्रकाशकीय

महेन्द्र संस्कृत-विश्वविद्यालय, अनुसन्धान केन्द्रद्वारा प्रकाशन हुँदै आएको अनुसन्धानप्रधान पत्रिका ऋतम्भराको नवौं अङ्क शास्त्रमर्मज्ञ विद्वत्समुदायसमक्ष पुऱ्याउन पाउँदा अत्यन्त हर्षको अनुभूति भएको छ । यस पत्रिकाले संस्कृतवाङ्मयमा निहित धर्म, दर्शन, साहित्य, व्याकरण, औषधिविज्ञान, पुरातत्त्व, इतिहास आदिजस्ता विभिन्न विधाका प्रामाणिक र तथ्यपरक सामग्रीहरूलाई जिज्ञासु पाठक र अनुसन्धाताहरूका अगाडि प्रस्तुत गर्दै आएको छ । संस्कृत, अङ्ग्रेजी र नेपाली तीनवटै भाषामा लेखिएका शोधपरक लेखहरू समावेश गरेर यसलाई अन्तर्राष्ट्रियस्तरको अनुसन्धान पत्रिका बनाउने लक्ष्य विश्वविद्यालयले लिएको छ । यसर्थ पनि विश्वविद्यालयको अनुसन्धानका क्षेत्रमा यस पत्रिकाको महत्त्व र वैशिष्ट्य अद्वितीय छ भन्ने कुरा घामजत्तिकै छर्लङ्ग छ । यसलाई अझै प्रामाणिक, तथ्यपरक र उच्चस्तरीय बनाउनका लागि अध्ययन-अनुसन्धानमा समर्पित सम्पूर्ण प्राज्ञहरूबाट नवीन चिन्तन र दृष्टिकोणका साथै तुलनात्मक पद्धति अवलम्बन गरी तयार गरिएका शोधखोजपूर्ण लेखहरूको अपेक्षा गरिन्छ ।

यस अङ्कमा संस्कृतवाङ्मयका मूर्धन्य विद्वान् सुकृतिदत्त पन्तको जीवनपरिचय र उनीद्वारा लिखित 'कार्तवीर्योदय महाकाव्य'का विषयमा लेखिएका खोजपूर्ण सामग्री समाविष्ट छन् र ती अति नै महत्त्वपूर्ण छन् । त्यस्तै गत वर्ष दिवङ्गत हुनुभएका नेपालका तीनजना विशिष्ट वाङ्मयसाधकहरू क्रमश योगी नरहरिनाथ, पं. नयराज पन्त र लैनसिंह बाङ्देलको व्यक्तित्व र कृतित्वसँग सम्बद्ध सामग्री पनि यसमा सङ्कलित छन् । यसरी नेपालको ऐतिहासिक, पुरातात्त्विक, धार्मिक, सांस्कृतिक आदि क्षेत्रमा अद्वितीय योगदान गर्ने योगीवर नरहरिनाथ, स्वाध्यायलाई नै जीवनको एकमात्र उद्देश्य बनाएर प्रामाणिक इतिहासको अन्वेषण र भास्कराचार्यद्वारा प्रतिपादित ज्यौतिष सिद्धान्तको युक्तिपूर्वक व्याख्या गर्ने इतिहासकार एवम् ज्यौतिषविद्यानिष्णात नयराज पन्त र कलासाहित्यका क्षेत्रमा सुविख्यात लैनसिंह बाङ्देलजस्ता स्वनामधन्य व्यक्तित्वहरूलाई समेटिएकाले पनि यस अङ्कको वैशिष्ट्य अझ बढेको छ ।

आफ्ना अमूल्य लेखरचनाहरू उपलब्ध गराएर यस पत्रिकाको प्राज्ञिक गौरवको अभिवृद्धिका लागि महनीय योगदान पुऱ्याउनुहुने समस्त विद्वज्जनप्रति सश्रद्धा कृतज्ञता व्यक्त गर्नु म आफ्नो कर्तव्य ठान्दछु । यस अङ्कलाई परिश्रमपूर्वक सम्पादन गरी पठनीय र सङ्ग्रहणीय बनाउन योगदान गर्नुहुने सम्पादक-मण्डलका संयोजक प्रा.डा. वेणीमाधव ढकाल तथा सदस्यहरू सहप्रा. ध्रुवप्रसाद ज्ञवाली र उपप्रा. ध्रुव भट्टराईलाई शतशः धन्यवाद प्रदान गर्दछु।

प्रा. नारायणकुमार आचार्य
शिक्षाध्यक्ष
महेन्द्र संस्कृत विश्वविद्यालय

२०६० पौष २७ गते

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

सम्पादकीयम्

(*EDITORIAL*)

I

अमन्दानन्दमयसंस्कृतवाङ्मयपीयूषपानप्रमुदितमानसाः
पुण्ययुगेऽपि संस्कृतवाङ्मयसंरक्षणसंवर्धनसाहसाः
कीर्तनीयचरिता महामनसः !

महेन्द्रसंस्कृतविश्वविद्यालयान्तर्गतस्य अनुसन्धानकेन्द्रस्य मुखपत्ररूपाया ऋतसत्यामृतवाहिन्याः पीयूषनवनीतप्रतिस्पर्धितयाऽऽविर्भूताया अक्षय्यस्य निराकारस्य शब्दब्रह्मणः साकाररूपाया **ऋतम्भराया** नवमोऽङ्कः पाठककरकमलेषु सामोदं समर्प्यते ।

यथा नवाङ्को व्यापकस्याखण्डस्य नित्यस्य ब्रह्मणः परिचायकस्तथा ऋतम्भरयाऽनयाऽऽत्मसात्कृतो नवाऽङ्कोऽपि पाठकान् नित्यतत्त्वस्य गवेषणायै प्रेरयन् नेपाले ऋतम्भरायाः प्रज्ञाया अखण्डप्रवाहस्य, ऋतम्भरायाः पत्रिकायाश्च अखण्डस्यास्तित्वस्य, अव्याहतस्य सञ्चारस्य, महनीयस्य गौरवस्य च प्रतिष्ठायै निदानतां कलयिष्यतीति विभावयामो वयम् ।

सम्प्रति संसारे संसरन् सार्ससंज्ञितो व्याधिविशेषो **युक्ताहारविहार०** इति श्रीमद्भगवद्गीतया सङ्केतितस्य वचनामृतस्य मननाय प्रेरयति संसाराऽधिवासिनो जनान् । भक्ष्याभक्ष्यविचारेण, सात्त्विकेनाहारेण, संयमसुन्दरेण विहारेण, निरहङ्कारेण व्यवहारेण, सत्यशिवसुन्दरशंसिना सदाचारेण, गुरुजनमहापुरुषदेवतासत्कारेण, मनसा निर्विकारेण, लोकहितप्रचारेण, सद्भावसौजन्यसञ्चारेण, आत्मना च विस्फारेण संसारं स्वर्गमिव साधयितुम्, पूर्णं जीवनं जीवितुं जीवयितुम्, त्रिविधं तापमपि सन्तापयितुम्, सत्यामृतं पातुं पाययितुम्, संसारविकारं सुखेन निःसारयितुम्, नैजं जीवं जागरयितुम्, परमात्मतत्त्वञ्च प्रकाशयितुं प्रभवतीति संस्कृतवाङ्मयं यदुपदिशति तत्र कियती मूल्यवत्ता कीदृशी महत्ता चेति संविदा साक्षात्कर्तुं शक्यते सदाचारसदाहारसद्व्यवहारपथच्युतस्य, पाशविकस्वभावस्यूतस्य, स्वधर्मबहिर्भूतस्य, साङ्कर्यप्रदूषितस्य, कुशिक्षाकुत्सितस्य, हिंसाहत्यातङ्कान्तर्भूतस्य, द्रव्यपिशाचपरिभूतस्य, रागद्वेषेर्ष्यादुराग्रहपूर्वाग्रहपक्षपातादिभिर्हेतुभिर्जीवन्मृतस्य च वर्तमानसंसारस्य दर्शनेन नूनं केनापि जनेन । इत्थमृतम्भरेऽयं सदाचारसद्व्यवहारसच्चिन्तनदिग्दर्शनेन ऋतमेव, अमृतमेव, सत्यमेव सन्दिशतीति नात्र संशयलेशः।

तन्मे मनः शिवसङ्कल्पमस्तु इति वैदिकी प्रार्थनेयं नैहिकं नामुष्मिकं सुखं सन्दिशति अपि तु शाश्वतं सुखमेव प्रशंसति । भोगान्धानां मोहान्धानाञ्च विकृतिविसङ्गतिमलिनेन व्यवहारेण समुद्भूता सर्वजीवनिकायसन्त्रासिनी छिन्दिभिन्दित्राहिपाहीतिमहारावनिनादिनी हत्याहिंसातङ्कवादिनी राष्ट्रव्यापिनी अशान्तिरधुना स्मारयति - **द्यौः शान्तिरन्तरिक्षꣳशान्तिः०** इत्यादि वैदिकं मङ्गलज्ञानम् । नियतिवशात् सम्प्रति राष्ट्रेऽस्मिन्नशान्तिर्विजृम्भते परमेश्वरकृपया यथाशीघ्रमिह शान्तिः, सौमनस्यम्, सौभ्रातृत्वम्, सौहार्दञ्च जनानां मिथो विकासमाप्नुयुरिति वयं कामयामहे । पदाधिकारं प्राप्य कृतैर्दुराचरणैराविष्कृतः प्रकृतिप्रकोपः कियान् भीषणो भवितुमर्हतीति विदितं सम्प्रति दुराचारिभिरपि । एषा संवित्तिः चिरस्थायिनी स्याद् ऋतम्भराया अनुगमनेनेति विज्ञापयामो वयम् ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

विगतवर्षे नैकविधाभिर्दुर्घटनाभिराविष्कृतया पीडया सह ऋतामृतपरिपूतजीवनानां सारस्वतानां नेपालावनिनन्दनानां योगिनरहरिनाथ-प्रा. नयराजपन्त- प्रा. लैनसिंहबाङ्देलमहानुभावानां परलोकप्रस्थानवेदनया राष्ट्रमिदं मर्माहतं जातम् । एकस्याः शताब्दीतोऽनेकशताब्दीपर्यन्तं नैतादृशाः सरस्वतीपुत्रा यस्मिन् कस्मिन्नपि राष्ट्रे सुलभा भवन्ति । विद्याविद्योतितान्तःकरणानां निजैर्मूल्यवद्भिर्योगदानैर्गुणगरिम्णा च सदा संस्मरणीयानां पुण्यश्लोकानां तेषां चिरमात्मशान्तिं कामयमाना वयं तेभ्यः श्रद्धाकुसुमाञ्जलिं समर्पयामः ।

विगतवर्षे नेपालावनिसत्पुत्रेण महाकविना सुकृतिदत्तपन्तेन प्रणीतस्य **कार्तवीर्योदयमहाकाव्यस्य शास्त्रीयं साहित्यिकञ्च विश्लेषणं तथा ग्रन्थिभेदनम्** इतिशीर्षके म.सं.वि. वाल्मीकि विद्यापीठान्तर्गतसाहित्यशिक्षणविभागेन भगवत्याः सरस्वत्याः परमानुकम्पया समायोजितायां कार्यशालागोष्ठ्यां प्रस्तुतानि कियन्ति विचारपत्राणि, कार्यशालापत्राणि, ग्रन्थिभेदननिष्कर्षपत्राणि चास्याः संस्कृतखण्डे समावेशितानि सन्ति । गोष्ठीसमायोजनाया मधुरफलरूपाणि तानिच्छात्राणां प्राध्यापकानामनुसन्धायकानाञ्च कृते परमोपयोगीनि भवितुमर्हन्तीति वयं सादरं विनिवेदयामः ।

ऋतम्भराया नवमाङ्कस्य कृते लेखरचनाप्रदानेन अस्याः पत्रिकाया गौरवाधानहेतुभूतेभ्यो विद्वज्जनेभ्यः कृतज्ञतां प्रकाशयन्तो वयं पुनरपि तान् सारस्वतयोगदानाय सविनयमभ्यर्थयामः । अस्याः पत्रिकायाः सम्पादनविधौ सर्वात्मना सहानुभूतिपूर्वकं सहयोगप्रदायकेभ्यो महेन्द्रसंस्कृतविश्वविद्यालयस्योपकुलपतये आचार्यपूर्णचन्द्रढुङ्गेलमहोदयाय, शिक्षाध्यक्षाय प्राध्यापकाय नारायणकुमाराचार्यमहोदयाय, कुलसचिवाय प्राध्यापकाय नीलमणिढुङ्गानामहोदयाय च वयमाभारितां प्रकाशयामः। एवमेवास्याः पत्रिकायाः सम्पादनावधौ कार्यरताय तात्कालिकशिक्षाध्यक्षाय प्रा. माधवशरणोपाध्यायमहोदयाय, तात्कालिक-कुलसचिवाय प्रा. स्थानेश्वरगौतममहोदयाय च कृतज्ञतां ज्ञापयामः ।

पर्यन्ते चास्याः पत्रिकायाः सम्पादनप्रकाशनादिकार्यजातेषु आत्मीयतया संपृक्तेभ्यः सर्वेभ्य एव साधुवादान् व्याहृत्य भारतीपदपङ्कजसंस्मरणपुरःसरं वाग्व्यापाराद् विरमामः ।

II

प्रबुद्ध पाठकवृन्द !

करिब आठ वर्ष लामो हिंसाको चपेटाबाट देशले दीर्घकालिक शान्तिको अनिवार्यता अनुभव गरिरहेको छ । मानवजातिको कल्याणका लागि गरिने जुनसुकै काम पनि शान्तिको अभावमा सम्भव हुँदारहेनछन् भन्ने वस्तुसत्यलाई यस अवधिमा हामीले गरेको तिक्तानुभूतिले प्रमाणित गरिदिएको छ । भौतिक-आत्मिक विकास र राजनीतिक स्थिरताका लागि पनि शान्ति पहिलो आवश्यकता हुने मान्यतासमेत हाम्रो देशको सन्दर्भमा स्थापित हुनपुगेको छ । देशको यही वर्तमान परिस्थितिमा बौद्धिक वर्गले स्थायी शान्तिका लागि प्रयास प्रारम्भ गर्नु सामयिक सन्दर्भ नै ठहरिनेछ । अहिले त्यस्तो शान्तिका लागि प्रयास आवश्यक छ जसले सबै नेपालीको भाग्य र भवितालाई सुखमय र ज्योतिर्मय बनाउन सकोस् ।

वर्तमान मानव विश्वपरिवारमा परिवेष्टित छ । राष्ट्र-राष्ट्रबीचको सम्बन्धविस्तार र विज्ञान-प्रविधिको तिलस्मी विकासले एउटा देश वा जातिले देखाएका प्राप्ति-अप्राप्तिसँग संसारको कुनै पनि कुनामा बसेको मानिस परिचित हुन्छ र त्यसबाट प्रभावित पनि बन्दछ । वर्तमान विश्वका लागि आधिभौतिक आतङ्क बनेको सार्स (प्राणघातक निमोनिया) लाई गहिरिएर विचार गर्दा मान्छेले प्रकृतिप्रति देखाएको उपेक्षा र उदासीनताकै परिणतिका रूपमा हेर्न सकिन्छ । आर्ष वाङ्मयले परिदर्शन गराएको **वनस्पतयः शान्तिः** भन्ने पदावलीलाई मात्र पनि मनन गरेर तदनुरूपको आचरण र व्यवहार गरेको भए वर्तमान युग र सन्ततिले यस्ता समस्याबाट मुक्ति पाउने थिए भन्नु संस्कृतप्रति अतिशय भावुकता मानिनेछैन। प्रकृति र संस्कृतिबाट विमुख जातिको स्थायी सुख-समृद्धि कहाँ पो सम्भव देखियो र !

संस्कृतको कुरा गर्दा केही समयपहिले सरकारले साधारण विद्यालयको निम्न माध्यमिक तहमा राखिएको संस्कृतलाई हटाउन गरेको निर्णय विवादास्पद विषय बन्न पुग्दछ । कसैको त्रास र प्रभावमा परेर अथवा कुनै वर्गविशेषको

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

सन्तुष्टिका लागि राष्ट्रको यथार्थता र आवश्यकतालाई उपेक्षा गरी कुनै पनि विषयमा निर्णय गर्नु सरकारको दूरदर्शी कदम हुन सक्दैन । संस्कृत नेपाल र सबै नेपालीका लागि हो भन्ने यथार्थता नबुझ्नु वा बुझेर पनि बुझ पचाउनु निर्णायक र नीतिनिर्माताहरूको थोरै भए पनि अमर्षको अभिव्यक्ति हो । संस्कृत राख्दा राज्य र जनतालाई के हानि भयो र हटाउँदा के लाभ भयो भन्ने वस्तुगत तर्क र निष्कर्षसमेत प्रस्तुत गर्न नसकी निर्णय गर्दा एकातिर सरकारको कमजोरी देखा पर्दछ भने अर्कातिर उसको अस्तित्वमा पनि प्रश्न उठ्न सक्छ । सरकारको यस निर्णयको विपक्षमा देशका धर्म, संस्कृति र राष्ट्रियताका पक्षधर सबै वर्गबाट व्यक्त बौद्धिक-वैचारिक ऐक्यबद्धताबाट पनि संस्कृतको राष्ट्रिय आवश्यकता प्रमाणित भइरहेको छ । संस्कृत नासेर-मासेर नासिने-मासिने विषय होइन । संस्कृतप्रति द्वेष र पूर्वाग्रह राख्नेहरू आफै बरु समाप्त भएर जान्छन् तर संस्कृतभाषा सृष्टि रहेसम्म संसारमा रहने ज्योतिर्मय र नित्यतत्त्व हो भन्ने यथार्थताको बोध नहुनु बिडम्बना नै हो ।

कुनै पनि संस्थालाई सुचारु ढङ्गबाट सञ्चालन गर्न त्यसका अधिकारीहरूबीच मेल र सामूहिकरूपमा संलग्न अन्य सदस्यहरूमा एकता र इमान्दारी पहिलो शर्त हो । त्यसो हुन नसक्दा संस्था, त्यसमा संलग्न सदस्य र उनीहरूका लागि निर्दिष्ट उद्देश्य अस्तव्यस्त, अराजक र अपूर्ण बन्न जाने खतरा रहन्छ । महेन्द्र संस्कृत विश्वविद्यालयले यस वास्तविकताप्रति पर्याप्त सावधानी देखाउँदै संस्कृत वाङ्मयको सुदृढीकरण र विकास तथा ऐनद्वारा निर्दिष्ट उद्देश्यप्राप्त गर्न कदम चाल्नुपर्ने देखिन्छ ।

गत वर्ष हामीले देशको धर्म-संस्कृति, इतिहास तथा साहित्य र कलाक्षेत्रमा अनुलनीय योगदान दिने तीन जना राष्ट्रिय प्राज्ञिक प्रतिभालाई गुमायौं । ती प्रतिभाहरूले आ-आफ्ना क्षेत्रमा देखाएको नयाँ मोड र मार्ग सबैका लागि प्रेरणाको स्रोत बनेको छ । उनीहरूको व्यक्तित्व र कृतित्वलाई यथासम्भव प्रकाशित गर्नु पनि उनीहरूप्रति देखाइने सम्मान र श्रद्धाञ्जलि नै हो भन्ने ठानेर यस अङ्कमा विशेष आलेख समावेश गरेका छौं । यसबाट विद्वद्जन र विद्यार्थीवर्गका लागि अलिकति भए पनि सहायता पुग्ने आशा गरिएको छ ।

गत अङ्कहरूमा जस्तै यस अङ्कको प्रकाशनका लागि पनि आदरणीय विद्वाद्वृन्दबाट वैदुष्यपूर्ण लेख-रचनाहरू प्राप्त भएका छन् । वस्तुतः उहाँहरूकै लेख-रचनाहरूबाट छोटो अवधिमै पत्रिकाको गरिमा र स्तरीयता स्थापित हुनसकेको तथ्य जगजाहेर छ । हामी उहाँहरूप्रति कृतज्ञ छौं ।

ऋतम्भराको यस अङ्कका लागि महेन्द्र संस्कृत विश्वविद्यालयका उपकुलपति आचार्य पूर्णचन्द्र ढुङ्गेलज्यूबाट शुभकामना र निर्देशन प्राप्त भएको छ । यसैगरी शिक्षाध्यक्ष प्रा. नारायणकुमार आचार्य तथा कुलसचिव प्रा. नीलमणिढुङ्गानाबाट रचनात्मक सहयोग पाएकोमा हामी उहाँहरूप्रति कृतज्ञ छौं । यस पत्रिकाको सम्पादनकालमा कार्यरत तात्कालिक शिक्षाध्यक्ष प्रा.डा. माधवशरण उपाध्याय र कुलसचिव प्रा. स्थानेश्वर गौतमबाट पर्याप्त सहयोग प्राप्त भएको विषय संस्मरण गर्दै उहाँहरूप्रति कृतज्ञता व्यक्त गर्दछौं । लगनशील भई टङ्कण र मुद्रणमा रातो दिन संलग्न हुने सहयोगीहरूको गुन पनि हामीले बिर्सेका छैनौं । उहाँहरूसमेत धन्यवादका पात्र हुनुहुन्छ।

ऋतम्भरा विद्वद्वर्गबाट प्राप्त रचनात्मक टीका –टिप्पणी र अमूल्य सुझावको सधैं स्वागत गर्दछ । पत्रिकालाई अझ बढी स्तरीय, उपयोगी र अनुसन्धानमूलक बनाउन त्यस्ता टीका-टिप्पणी र सुझावहरू मार्गदर्शक हुने मान्यतामा यसको विश्वास छ । स्रष्टाको सर्जनका लागि द्रष्टाको दर्शन प्रौढता र परिष्कारको आधार बन्दछ भन्ने उदार चिन्तन यहाँ पनि स्थापित छँदैछ । अन्त्यमा, आगामी अङ्कका लागि पनि विशिष्ट विद्वान्, अनुसन्धाता र लेखकहरूबाट गहन लेख-रचनाहरूको अपेक्षा गर्दछौं ।

सम्पादकहरू

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

Dear Scholar Readers,

Peace is the first and foremost expectation of all people in the world, and we also are not an exception to this fact. Every effort out forward for the welfare of mankind is in vain without peace and political stability, which has been proved in a short period of time. So, it is a duty of scholars and intellectuals also at present to help establish peace in the nation.

Environmental pollution is one of the main problems of the present world. Nepal also is not free from this problem. One of the current results of human negligence to nature is the worldwide terror of epidemic SARS. Though our nation has not been affected so far, but if we think about it seriously, we will come to a vivid conclusion. Men would not have been affected by such fatal disease if they had been conscious of their environment.

The government has decided to teach Sanskrit at school level as an optional subject. It is not a farsighted step. Any decision, made by the government under the pressure of any group or for the pleasure of any class may not bring a good result. In reality, it is an ignorance of the decision-makers. Sanskrit is the source of knowledge which can push the nation towards prosperity. The question being raised by people time and again against the government decision concerning Sanskrit education is genuine and considerable.

The team spirit among the high level officials is essential for any organization or institution to operate it smoothly. Without unity, it will not be successful in achieving its goal, and it causes displeasure among the members of it. Mahendra Sanskrit University, no doubt, will be moving ahead gradually as it is aware of the saying संघे शक्तिः कलौ युगे (Unity is strength), We hope, we will reach the goal.

We have been greatly shocked by the demise of the three renowned national personalities who have made great contributions in the field of religion, culture, history and literature. The articles, highlighting their personalities and works have been included in this volume, which we think, will be much useful specially for the scholars and students.

We express due thanks to Acharya Poornachandra Dhungel, the Vice-Chancellor, Prof. Narayan Kumar Acharya, the Rector and Prof. Neelmani Dhungana, the Registrar of M.S.U. for their help and motivation. The valuable advice of then Rector Prof. Dr. Madhavsharan Upadhyaya, and Registrar Prof. Sthaneshwar Gautam is unforgettable for us in this publication.

We are thankful to the contributors, and to those who typed and printed it.

Valuable comments and creative advice from scholars and readers are always welcome as they make this journal more useful, standard and research-oriented.

Finally, articles related to the various fields of learning are always expected as here, from the distinguished scholars for the coming issues also of this journal.

Thanks.

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

विषयसूची
(Contents)

संस्कृतखण्डः

१. वेदान्तदर्शनस्य परमसारता – आचार्यः पूर्णचन्द्रढुङ्गेलः १

२. आत्रेयकृतं शिवस्तोत्रम् – डा. विष्णुराज आत्रेयः ४

३. चन्द्रप्रभासौन्दर्यसमीक्षणम् – डा. वेणीमाधवढकालः ५

विशेषप्रभागः

कार्तवीर्योदयमहाकाव्यस्य - शास्त्रीयं साहित्यिकञ्च विश्लेषणम्

४. कार्तवीर्योदयमहाकाव्ये दार्शनिकं चिन्तनम् – प्रा. डा. दुर्गाप्रसाददवाडी १६

५. कार्तवीर्योदयमहाकाव्यस्य तन्त्रदृष्ट्याऽवेक्षणम् – प्रा. विद्यानाथ उपाध्यायः २६

६. कार्तवीर्योदय-महाकाव्य-निहितशब्दस्मृति-विषयकानुसंहिति-सृतिः – डा. *टीकारामपन्थी* ३३

७. कार्तवीर्योदयस्थविषयाणां पौराणिकसन्दर्भाः – प्रा.डा. वावुरामपोखेलः ४०

८. सुकृतिदत्तपन्तस्य जीवनवृत्तं संस्कृत-वाङ्मयाभिवृद्धाववदानञ्च – प्रा.डा. माधवशरण उपाध्यायः ५०

९. कार्तवीर्योदयमहाकाव्ये ज्योतिषस्य प्रभावः – प्रा.डा. साम्बराज आचार्यः ५९

१०. कार्तवीर्योदयमहाकाव्यस्य प्रबन्धविधानम् – प्रा. नीलमणिढुङ्गानाः ६४

११. कार्तवीर्योदयमहाकाव्ये धर्मशास्त्रीयविषयाणां स्थानम् – प्रा.डा. रामचन्द्रगौतमः ७२

१२. कार्तवीर्योदयमहाकाव्ये वैदिकसंस्कृतेः प्रभावः – प्रा.डा. हरिप्रसादगौतमः ७७

१३. कार्तवीर्योदयमहाकाव्यस्य भावपक्षपरिशीलनम् – प्रा. डा. टीकारामोऽधिकारी ८६

१४. सुकृतिदत्तकृतकार्तवीर्योदयमहाकाव्यस्थ-चित्रकाव्यविमर्शः – प्रा.डा. दुर्गादत्तशर्मा उपाध्यायः ९४

१५. कार्तवीर्योदयमहाकाव्ये प्रतिबिम्बिता सनातनसंस्कृतिः – उपप्रा. ध्रुवप्रसादज्ञवाली १०६

कार्यशालागोष्ठीप्रभागः

कार्तवीर्योदयमहाकाव्यस्य - शास्त्रीयं साहित्यिकञ्च विश्लेषणं ग्रन्थिभेदनञ्च

१६. ग्रन्थिभेदनकार्यशालापत्राणि ११२

१७. 'क'समूहेन कृतं ग्रन्थिभेदनम् ११९

१८. 'ख'समूहेन कृतं ग्रन्थिभेदनम् १२७

नेपाली-खण्ड

१. उपासना पद्धति – प्रा. माधवराज गौतम १३५

२. सरदार रुद्रराज पाण्डेको व्यक्तित्व र योगदान – प्रा.डा. केशवप्रसाद उपाध्याय १५३

३. महानायकका चरणतलमा – बमबहादुर थापा 'जिताली' १५६

४. हाम्रा पुराण र सिद्धिहरू – प्रा.डा. विष्णुप्रसाद शर्मा देवकोटा १५७

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

५. पाणिनीय व्याकरणमा व्यावहारिक दृष्टि – सहप्रा. मुरलीमोहन बाँस्तोला १६२
६. सुकृतिदत्त पन्तको कार्तवीर्योदय महाकाव्य : नेपाली प्रतिभाको अनुपम दिग्विजय – सहप्रा. रामहरि दाहाल १६६
७. नेपाली साहित्यमा साहित्यिक हवाई पत्रिका – धनराज भट्टराई १७४

नरशिखित्रयी-स्मृतिसन्दर्भ

८. कीर्तिर्यस्य स जीवति – सम्माननीय डा. स्वामी प्रपन्नाचार्य १८१
९. प्रा. नयराज पन्तको जीवनी र रचनात्मक योगदान – अलका शर्मा (चालिसे) १९५
१०. लैनसिंह बाङ्देलको व्यक्तित्वका केही पाटा – ध्रुवप्रसाद भट्टराई २३१

English - Section

1. Art and Society - Lect. Mohan Raj Gouli 241
2. Literacy development and educational status in Nepal - Lect. Shantikrishna Adhikaree 244
3. Stone - Walls - Assist. Lecturer Shiva Subedi 250

परिशिष्टखण्ड:

म.सं.वि. अनुसन्धानकेन्द्रस्य क्रियाकलाप:

१. विद्यावारिधिकार्यक्रम: २५५
२. विशेषानुसन्धानकार्यक्रम: २५५
३. अम्बिका-लोकशोधवृत्ति: २५५
४. विद्यावारिध्युपाधिप्रदानम् २५५

म.सं.वि. वार्ता:

१. उपकुलपतेरखिलभारतीयवेदवेदाङ्गसम्मेलने सहभागिता २५६
२. वाल्मीकिविद्यापीठसाहित्यविभागेनायोजिता कार्तवीर्योदयमहाकाव्यसम्बद्धा कार्यशालागोष्ठी २५६
३. प्रा.डा. दुर्गाप्रसाददवाडीमहोदयस्याभिनन्दनम् २७९
४. म.सं.वि. शैक्षिकव्यवस्थापकीयसमस्यासमाधानविषयिणी विचारगोष्ठी २७९
५. संस्कृतनाट्यविषयिणी विचारगोष्ठी २८०
६. प्राज्ञं प्रति श्रद्धाञ्जलिसमर्पणम् २८१
७. महायज्ञस्य समुद्घाटनम् २८१
८. कालिकामाध्यमिकविद्यालयस्य वार्षिकोत्सवसमुद्घाटनम् २८१
९. वाल्मीकिविद्यापीठसाहित्यशिक्षणविभागेनायोजिता संस्कृतभाषाविज्ञान-गोष्ठी २८२
१०. वाल्मीकिविद्यापीठसाहित्यशिक्षणविभागेनायोजिता अनिवार्यसंस्कृतविषयककार्यशालागोष्ठी २८६
११. वाल्मीकिविद्यापीठन्यायशिक्षणविभागेनायोजिता न्यायविषयिणी कार्यशालागोष्ठी २९८
१२. 'नेपाले संस्कृतशिक्षाया महत्त्वम्' इति विषयाधृता विचारगोष्ठी ३०३
१३. 'नेपाले ब्राह्मणेतरमनीषिणां संस्कृतवाङ्मयसंवर्धने योगदानम्' इति विषयाधृता विचारगोष्ठी ३०३

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

संस्कृतखण्डः

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

ॐ

ॐ सहनाववतु सह नौ भुनक्तु सह वीर्यं करवावहै ।
तेजस्वि नावधीतमस्तु मा विद्विषावहै ॥
ॐ शान्तिः शान्तिः शान्तिः ॐ

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

वेदान्तदर्शनस्य परमसारता

- आचार्यः पूर्णचन्द्रढुङ्गेलः
उपकुलपतिः, महेन्द्रसंस्कृतविश्वविद्यालयः, नेपालः

वेद्यन्ते ज्ञायन्ते सर्वविषया यैस्ते वेदाः, वेदानामेतेन व्युत्पत्त्यनुसारेण ज्ञानविज्ञाननिचया वेदाः सन्तीति परिज्ञायते। वेदानामन्तो वेदान्तो भवति वेदानां शिरोभागः । एतद्वेदान्तनायकेन वेदानां शिरोभागद्वारा प्रतिपाद्यं सर्वोत्कृष्टं तत्त्वं ब्रह्म, वेदान्तविद्याया विषयोऽस्ति । तेन वेदान्तो ब्रह्मविद्यानाम्नाऽपि प्रसिद्धोऽस्ति । दर्शनमिदं शारीरकमीमांसाशब्देनाऽपि व्यवह्रियते । इदमेव दर्शनं **पाराशर्यशिलालिभ्यां भिक्षुनटसूत्रयोः** इति महर्षिपाणिनिसूत्रानुसारेण भिक्षुसूत्रञ्च कथ्यते। दर्शनमिदं सर्वदर्शनमूर्धन्यं ज्येष्ठं श्रेष्ठं वरिष्ठञ्च विद्यते ।

अस्य महाशास्त्रस्य प्रणेता महर्षिर्व्यासोऽस्ति । अस्य रचना महाभारतात्पूर्वमेव जाता । अस्मिन् दर्शने सर्वास्तिवाद-विज्ञानवादयोरपि स्थितिसत्त्वात् केचन आचार्या एतस्य पूर्वोक्तरचनाकाले संशेरते, परन्तु वेदविद्भिः स्मरणीयं यत् तादृशाः सिद्धान्ताः खलु बुद्धस्योदयात् पूर्वमेव समुत्पन्ना आसन् ।

ब्रह्मसूत्रस्य भाष्यकारेषु तत्तन्मतप्रतिष्ठापकेषु अग्रे नीयमाना आचार्या वेदान्तदर्शने प्रसिद्धाः सन्ति ।

आचार्यनाम	भाष्यनाम	मतम्
१. आचार्यशङ्करः	शारीरकभाष्यम्	अद्वैतम्
२. आचार्यभास्करः	भास्करभाष्यम्	भेदाभेदम्
३. आचार्यो रामानुजः	श्रीभाष्यम्	विशिष्टाद्वैतम्
४. आचार्यमध्वः	पूर्णप्रज्ञभाष्यम्	द्वैतम्
५. आचार्यनिम्बार्कः	वेदान्तपारिजातभाष्यम्	द्वैताद्वैतम्
६. आचार्यश्रीकण्ठः	शैवभाष्यम्	शैवविशिष्टाद्वैतम्
७. आचार्यश्रीपतिः	श्रीकरभाष्यम्	वीरशैवविशिष्टाद्वैतम्
८. आचार्यवल्लभः	अणुभाष्यम्	शुद्धाद्वैतम्
९. आचार्यविज्ञानभिक्षुः	विज्ञानामृतम्	अविभागाद्वैतम्
१०. आचार्यबलदेवः	गोविन्दभाष्यम्	अचिन्त्यभेदाभेदम्

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

ब्रह्मसूत्रग्रन्थस्याऽध्ययनेन ज्ञायते यद् भगवतो व्यासादपि प्राक्तना अनेकश आचार्या वेदान्तशास्त्रं विचारितवन्तः, परन्तु कालस्य दुर्विपाकात् तेषां ग्रन्थानां प्राप्तिरद्य न जायते । महर्षिव्यास एव स्वकृतौ वेदान्तदर्शने तेषामाचार्याणां पुण्यानि नामानि गृहीतवान् । ते खलु क्रमशोऽत्र दीयन्ते- १. स्वामिनः फलश्रुतेरित्यात्रेयः २. अभिव्यक्तेरित्याश्मरथ्यः ३. संपत्तेरिति जैमिनिस्तथा हि दर्शयति ४. उक्तमिष्यत एवं भावादित्यौडुलोमिः ५. चारणादिति चेन्नोपलक्षणमिति कार्ष्णाजिनिः ६. अवस्थितेरिति काशकृत्स्नः ७. अनुस्मृतेर्बादरिः, आचार्यप्रवरशङ्करप्रणीतेष्वपि ग्रन्थेषु अनेकेषां वेदान्तविषयकाणामाचार्याणामादर्शनामानि प्राप्यन्ते, तेषु गौडापादाचार्यभर्तृप्रपञ्चोपवर्षद्रविडाचार्यसुन्दरकाण्ड्यब्रह्मदत्तादीनि मुख्यानि सन्ति।

आचार्यशङ्करस्य मतमद्वैतं ब्रह्मात्मिकामेवैकां सत्यां सत्तां मनुते, प्रतीयमानं हि सम्पूर्णं जगदसत्यं प्रतिपादयति । द्वयोर्भावो द्विता, द्वितैव द्वैतं न द्वैतमद्वैतमिति इदमद्वैतमभेदशब्देन च व्यवह्रियते । अभेदमेव लक्ष्यीकृत्य प्रवृत्तं शास्त्रमद्वैतमिति। यद्यपि अद्वैतदर्शनस्य विरोधीनि अन्यान्यपि नवविधानि पूर्वोक्तानि दर्शनानि सन्ति, तथाऽपि प्रातःस्मरणीयानामाचार्यपादानां शङ्करसुरेश्वरपद्मपादत्रोटकहस्तामलकसर्वज्ञात्ममुनिवाचस्पतिमिश्रप्रकाशात्माऽद्वैतानन्दचित्सुखामलानन्दाखण्डानन्दमधुसूदनसरस्वतीप्रभृतीनां ग्रन्थानां व्याख्यानानाञ्च महिम्ना अद्वैतदर्शनस्य दृढमूलता, दृढतमप्राणवत्ता, सर्वश्रेष्ठता, ज्येष्ठता, वरिष्ठता च सर्वैस्तत्त्वबुभुत्सुभिः परिज्ञायते । इदं दर्शनमन्यदर्शनाऽपेक्षया विशालतमञ्च वर्तत इयं वस्तुस्थितिः। अद्वैतदर्शनविषयकस्य सिद्धान्तस्य ख्यातिः सर्वत्र प्रसृताऽस्ति । वेदान्त इत्यनेन शब्देन शीघ्रतया अद्वैतदर्शनस्य बोधो जायते । अद्वैतवादस्य सर्ववादेषु मुख्यत्वाच्च जीवो जगच्चेति द्वौ पदार्थौ सूक्ष्मदृष्ट्या विचार्यमाणौ सन्तौ आत्मा इत्येक एव पदार्थः ।

अत्र दर्शनेऽनेकानि सामानाधिकरण्यानि वाक्यानि मिलन्ति, यथा **अयमात्मा ब्रह्म, प्रज्ञानं ब्रह्म, तत्त्वमसि, अहं ब्रह्माऽस्मि, सर्वं खल्विदं ब्रह्म, ऐतदात्म्यं सर्वम्,** इत्यादीनि श्रुतिवाक्यानि जीवब्रह्मणोर्जगद्ब्रह्मणोश्चैक्यं प्रतिपादयन्ति। अत्र विचार्यते- सामानाधिकरण्यं वाक्यं तदस्ति, यत्र वाक्ये भिन्नभिन्ननिमित्तवन्ति पदानि एकस्यैवार्थस्य कृते प्रयुक्तानि भवन्ति । व्याकरणमहाभाष्यकारो महर्षिः पतञ्जलिः कथयति- भिन्नप्रवृत्तिनिमित्तानां पदानामेकस्मिन्नर्थे वृत्तिः सामानाधिकरण्यमिति ।

अग्निर्यथैको भुवनं प्रविष्टो रूपं रूपं प्रतिरूपो बभूव ।
एकस्तथा सर्वभूतान्तरात्मा रूपं रूपं प्रतिरूपो बहिश्च ।।

इत्यादिश्रुतिभिः प्रतिपादितं ब्रह्म निर्विकल्पकं सविकल्पकञ्च भवति । निर्विकल्पकमेव ब्रह्म निरुपाधिकं निर्विकारं निर्गुणं चाऽस्ति । सगुणं ब्रह्म तु मायाविशिष्टं सत् सकलजगतः कर्तृ पालयितृ संहर्तृ च भवति ।

मायां विना पूर्वोक्तानि त्रीणि कर्माणि न सङ्घटन्ते । तदुक्तं शङ्कराचार्येण –

अव्यक्तनाम्नी परमेशशक्तिरनाद्यविद्या त्रिगुणात्मिका या ।
कार्यानुमेया सुधियैव माया यया जगत्सर्वमिदं प्रसूयते ।।

निर्विशेषं ब्रह्म मायावच्छिन्नं यदा भवति तदैव जगत्सृष्टिः सर्वविधः प्रपञ्चश्च संभवति । मायेयं भगवतो ब्रह्मणोऽव्यक्तशक्तिरस्ति। आत्मा खलु विश्वमूलं भूतभव्यभवत्प्रभुरस्ति, अत एवाचार्यशङ्करः कथयति- 'सर्वो हि आत्माऽस्तित्वं प्रत्येति न नाऽहमस्मीति, यदि हि नात्मत्वसिद्धिः स्यात्तदा सर्वो लोको नाऽहमस्मीति प्रतीयात्' आत्मा हि स्वतः सिद्धः विभुः पदार्थः, तत्सिद्ध्यर्थं प्रमाणान्तरं नापेक्ष्यते, आत्मैव सूर्यवत् सर्वं प्रकाशयति । आत्मना आत्मानं जानातीत्यत्र आत्मैव कर्ता कर्म च ।

अत्र दर्शने वस्तूनां सत्ता त्रिविधाऽस्ति, प्रातिभासिकी, व्यावहारिकी तथा पारमार्थिकी च । शुक्तौ रजतस्य सत्ता प्रातिभासिकी जगतः सत्ता व्यावहारिकी ब्रह्मणः सत्ता पारमार्थिकी अस्ति । एवं स्वीकारे सर्वत्र सामञ्जस्यं भवति ।

दर्शनेऽस्मिन् मोक्षः परमपुरुषार्थोऽस्ति, बहुमूल्यं मानवजीवनं प्राप्यापि यो मनुष्यो मोक्षार्थं न यतते स खलु

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

नियतमात्महा वर्तते । उक्तञ्च–

यः स्वात्ममुक्तौ न यतेत मूढधीः स ह्यात्महा स्वं विनिहन्त्यसद्ग्रहात् ।

आचार्यशङ्करो ज्ञानं विना मोक्षो न भवतीति कथयन् दिव्यज्ञानार्जने बलं ददाति । आत्मनो ज्ञानरूपत्वञ्च प्रतिपादयति यथा–

ज्ञानं नैवात्मनो धर्मो न गुणो वा कथञ्चन ।
ज्ञानस्वरूप एवात्मा नित्यः सर्वगतः शिवः ।।

मुक्तिर्मोक्षो वा ज्ञानात्मनो ब्रह्मतत्त्वस्य ज्ञानादेव भवतीत्यपि तत्कथनं समाद्रियते विद्वद्भिः –

मुक्तिस्तु ब्रह्मतत्त्वस्य ज्ञानादेव न चान्यथा ।
स्वप्रबोधं विना नैव स्वस्वप्नो हीयते यथा ।।

भेदाभेदवादिनो भास्कराचार्यस्य, विशिष्टाद्वैतवादिनो रामानुजाचार्यस्य, द्वैतवादिनो मध्वाचार्यस्य, द्वैताद्वैतवादिनो निम्बार्काचार्यस्य, शैवविशिष्टाद्वैतवादिनः श्रीकण्ठाचार्यस्य, वीरशैवविशिष्टाद्वैतवादिनः श्रीपतेराचार्यस्य, शुद्धाद्वैतवादिनो वल्लभाचार्यस्य, अविभागाद्वैतवादिनो विज्ञानाचार्यभिक्षोः, अचिन्त्यभेदाभेदवादिनो बलदेवाचार्यस्य भाष्याणि सर्वाण्यपि सांसारिकाध्यात्मिकवस्तुतत्त्वपरिज्ञानाय सुतरां क्षमन्ते, तथाऽपि अद्वैतः पन्थाः सर्वाणि सांसारिकाध्यात्मिकतत्त्वानि एकस्मिन्नेव सूत्रे ग्रथ्नाति सर्वान् प्रपञ्चाँश्चोन्मूलयतीति सर्वं विशदम् ।

गुरुपूर्णिमा, २०६०



Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

आत्रेयकृतं शिवस्तोत्रम्

- डा. विष्णुराज आत्रेयः
प्राध्यापकः, महेन्द्रसंस्कृतवश्वविद्यालयः

सदैव गौरीशिखरे सलीलं रममाणयोः ।
किरातवेषयोर्नौमि पादौ गौरी-गिरीशयोः ।।१।।
नमः पशूनां पतये राष्ट्रदेवाय धीमहि ।
ज्योतिर्लिङ्गस्वरूपाय तन्नो रुद्रः प्रचोदयात् ।।२।।
धराननगराधीशदन्तकालीसुसेवित ! ।
पिण्डेश्वर ! नमस्तुभ्यं विद्या-बुद्धिप्रदो भव ।।३।।
अपुत्रिणां पुत्रदस्त्वं पौत्रदश्चैव पुत्रिणाम् ।
महादेव ! नमस्तेऽस्तु हलेसी-पर्वतस्थित ! ।।४।।
लभन्ते पितरो मुक्तिं यस्य स्मरणमात्रतः ।
गोकर्णेश्वरदेवाय श्रद्धारूपाय ते नमः ।।५।।
महोत्तरीजनपदे पातालस्थलवासिने ।
जलेश्वराय देवाय नमो वृष्टिकराय ते ।।६।।
पुरा शाक्यैस्तुतस्त्वं हि बाणगङ्गा-जलप्रिय ! ।
महालिङ्ग ! नमस्तेऽस्तु तौलेश्वर ! सदाशिव ! ।।७।।
पालपारिब्दिकोटस्थं लिङ्गं जलेश्वराभिधम् ।
श्रीरामस्थापितं वन्दे सर्वसिद्धिप्रदायकम् ।।८।।
जलधाराभिषिक्तोऽसि ॐ वँ मन्त्रेण नित्यशः ।
नमामि त्वं महादेव ! पर्रोहापरमेश्वर ! ।।९।।
सोम-रावण-कण्वैश्च स्तुत! सिद्धातटस्थित ! ।
सोमेश्वर ! नमस्तेऽस्तु नर्तनाचलनर्तक! ।।९।।
प्यूठानमण्डलेशाय स्वर्गद्वारीजुषेऽनिशम् ।
स्वाहा-स्वाध्यायतुष्टाय महादेवाय ते नमः ।।१०।।
नेपालस्य प्रतीच्यां यो वैद्यनाथाभिधः शिवः ।
सर्वरोगहरस्तस्मै भिषजां पतये नमः ।।११।।
नेपालदेशविदितानि सुपूजितानि
लिङ्गानि यानि प्रथितानि महेश्वरस्य ।
श्रीविष्णुराजसुधिनेह च संस्तुतानि
स्मृत्वैव तान्यखिलपापप्रणाशनानि ।।१२।।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

चन्द्रप्रभासौन्दर्यसमीक्षणम्

- डा. वेणीमाधवढकालः
प्राध्यापकः, म.सं.वि.वाल्मीकिविद्यापीठम्
काष्ठमण्डपः

१. संस्कृतसौरभम्

अगाधस्योत्तुङ्गस्य सर्वात्मना समृद्धस्य संस्कृतवाङ्मयस्य वेद-वेदाङ्ग-धर्मशास्त्र-दर्शन-पुराण-रामायण-महाभारत-तन्त्र-योगादयो विधा यत्र हृद्यकुसुमाकुलितवल्लर्य इव विभान्ति तत्रैव संस्कृतसाहित्यं नाम सकलविधानां पुञ्जीभूतं सौरभमिव चकास्ति महीतले नूनम् ।

कालिदासेन ललितमधुरया काव्यकलया कमनीयतामापादितम्, भवभूतिना विभूत्याधानेन विशिष्टीकृतम्, भारविना प्रतिभाजनितार्थोत्कर्षेणोदात्तीकृतम्, माघेन निजयाऽप्रतिमया मनीषया महनीयतामापादितम्, कविताकामिन्या हर्षेण श्रीहर्षेण सच्चिदानन्दहर्षितैर्भावैरुज्ज्वलीकृतम्, अन्यैश्च तैस्तैः स्वनामधन्यैः सारस्वतैः सर्वाङ्गसम्पन्नतां नीतं तदेतत् संस्कृतसाहित्यं सम्प्रत्यपि विश्वस्मिन् विश्वेऽमन्दानन्दसन्दोहजनकतया विभाति निजेनातुलनीयेन वैभवेन । यस्य साहित्यसागरस्य नेपालवाहिनिर्मलप्रवाहस्य हिमवच्छुभ्रा दीप्तिर्देदीप्यते सुतराम् ।

२. नेपालगौरवम्

हिमालयवक्षसि सानन्दं शयाने निसर्गसुषमारमणीये नेपाले वैदिककालादेव संस्कृतसंरक्षणसंवर्धनशुभ्राः क्रियाकलापा जागरूका आसन् । किरातकाले किरातैः कविभिः प्रणीतानि गुणवन्ति संस्कृतकाव्यानि सर्वेषां गौरवास्पदा-न्यासन्- **एषा किरातकविना कविनायकेन पुण्यास्तुतिः पशुपते रचिता हिमाले** इति पद्यांशः किरातकालस्य संस्कृतसंस्कृतां संस्कृतिं प्रत्याययति । लिच्छविकालिकैर्मूर्धन्यैः कविभिः सम्पादितमुदात्तं कर्म तदानीन्तनेष्वभिलेखेषु विद्योतमानं सद् विश्वाधिवासिनो जनान् विस्मापयति। मल्लकालस्य संस्कृतसाहित्यसाधना सम्प्रत्यपि शताधिकनाटककाव्य-महाकाव्यादिषु प्रतिबिम्बिता नेपालस्यातीतकालिकं विश्वगुरुत्वं ख्यापयति । शाहकालिकं शास्त्रीयं काव्यात्मकञ्च विपुलाकारं संस्कृतवाङ्मयं नैपालकजनजीवनस्य संस्कृतप्राणतां परिचाययति । अस्मिन् गौरवगरिमान्विते नेपालखण्डे वंशमणि-काशीनाथ-यज्ञसूरि-सुकृतिदत्तपन्तप्रभृतयो महाकवयः, आशुकवयः, सूरयश्च संस्कृतवाङ्मयरत्नागारं विपुलयाञ्चक्रुः, कुलचन्द्रगौतम-पूर्णप्रसादब्राह्मण-कृष्णप्रसादघिमिरेप्रभृतयः सुकवयो निजै रचनाप्राणैः कर्मभिः सुरभारतीं ज्योतिर्मयीमकार्षुः। तामेव सुरभारतीं कविताकामिनीटीकारूपाः श्रीटीका-रामाधिकारिसदृशाः सरस्वतीपुत्रा निजनिर्मिताभिः कलाकोमलाभिः संस्कृतकृतिभिर्विशेषयन्ति सम्प्रत्यपि । अतः संस्कृतनिष्ठायां परम्परागतसंस्कृतौ ऋतम्भरा धन्येयं नेपालवसुन्धरा ।

३. कवित्ववैदुष्यमनोहारी सुकविः श्रीटीकारामोऽधिकारी

देव्या विश्वेश्वर्याः प्रसादात् पितुर्देवीप्रसादाज्जनिमाप्य विश्वेश्वरनगर्यां वाराणस्यां विद्यानाथं भगवन्तं विश्वेश्वरं समाराधयन्नसौ तदीययाऽसीमयाऽनुकम्पया साहित्यविद्यां तदनु जीवनसाहित्याय सहृदयां प्रीतिपावनां मिष्टभाषिणीं विदुषीं जीवनसहचरीं श्रीविश्वेश्वरीमवाप्य विद्योतमानः साहित्यवधूटीकारूपः श्रीटीकारामोऽधिकारी शुभ्रैः

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

साहित्यिकक्रियाकलापैर्नेपालवसुन्धरामलङ्कुर्वन् साहित्यविद्यासौन्दरीं समेधयति नूनम् ।

कास्कीमण्डलान्तर्गतगोर्जेग्रामाभिजनः, सदा साहित्यपाथोधिमज्जनः, निजाभिः सरसाभिः कृतिभिः सहृदय-हृदयरञ्जनः साधनासिद्धाभिः सूक्तिभिः शुष्कहृदयजनानां नीरसतागञ्जनः शिष्याज्ञानप्रभञ्जनो वपुर्वयोवेषवैभव-विद्याभिरामः श्रीटीकारामः काश्यपः सान्दीपनिः काश्य इव सुशोभते शिष्यमण्डलपरिवृतो हन्त ! ।

शुक्लाया गण्डक्याः शुचिभिर्जलकणिकाभिः, अन्नपूर्णाभिधस्य हिमशृङ्गस्य धवलाभिर्हिमकणिकाभिश्च जन्मनैव शुक्लीकृतः, गण्डकीक्षेत्रगतकलासाहित्यसंस्कृतिसंस्कारसुसंस्कृतो निजाभिः शुक्लाभिः कृतिभिर्देदीप्यमानो महेन्द्रसंस्कृतविश्वविद्यालयस्य साहित्यशास्त्रनिष्णातेषु प्राध्यापकेष्वेकतमः, सुललितसरससंस्कृतकाव्यरचनापूर्वकं मातृभाषासाहित्यसमेधकेषु प्राध्यापकेषु प्रथमः सोऽयं प्रतिभाशाली कविः श्रीटीकारामो विश्वेश्वरभक्तेन बाणेन प्रतिष्ठापितस्य भगवतो बाणेश्वरस्य नगरे नवे बानेश्वरेऽर्धाङ्गिन्या श्रीमत्या विश्वेश्वर्या साकं सम्प्रति सुमधुरं स्पृहणीयञ्च दाम्पत्यसौख्यमनुभवन्नुदात्तैः कर्मभिः काव्यभारतीमाराधयतीति महतः सौभाग्यस्य विषयः ।

क) कृतयः

निजे साहित्यिकसाधनासरसे जीवने श्रीटीकारामाधिकारिणा संस्कृतभाषायां नैकाभिः स्फुटरचनाभिः साकं **गोविन्दगौरवाभिधं खण्डकाव्यम्, चन्द्रप्रभानामकमैतिहासिककाव्यम्, उत्तरमहाभारतस्य** नेपालखण्डे गण्डकीप्रवाहक्षेत्रमहत्त्वमादाय कतिपयेऽध्यायाः, **कुलचन्द्रगौतमस्य संस्कृतकृतीनां समीक्षणात्मक-मध्ययनमिति** लघुशोधप्रबन्धः, **पण्डितराजरङ्गनाथपौड्यालस्य व्यक्तित्वस्य कृतीनाञ्च समीक्षात्मकमध्ययनमिति** विद्यावारिधिप्रयुक्तः शोधप्रबन्धश्चेति काव्यात्मका गवेषणापूर्णाश्च ग्रन्थाः प्रणीताः सन्ति। सर्वा एव ताः सुरवाग्गुम्फिता रचनाः सुरभारतीभाण्डागारसमृद्धये नेपालस्य विशिष्टावदानरूपाः सन्तीति न भवेदत्र विपश्चितां काऽपि विमतिः ।

नेपालीभाषायामस्य सुकवेः **'दुःखको आवाज** (पीडाया अभिव्यक्तिः)', **'पहाडी गुनासो** (पार्वत्यदुःखनिवेदनम्)', **'कविता सङ्गम** (प्रणयप्रवास-प्रतिसंस्कारेति खण्डत्रयात्मकः कवितासङ्ग्रहः)', **'पं. कुलचन्द्र गौतम र उनको साहित्य साधना** (कुलचन्द्रगौतमस्तदीया साहित्यसाधना च)' इत्यभिधो-ऽनुसन्धानग्रन्थश्च समुल्लेखनीयाः सन्ति । **'महाकवि कालिदास** (महाकविः कालिदासः)' इति मनोविज्ञानप्रधानो ग्रन्थः कवेरस्य सूक्ष्मां विश्लेषणक्षमतां प्रकाशयति । इत्थमेवास्य कवेर्नेपालीभाषायां पञ्चाशदधिकेषु शीर्षकेषु प्रणीतानि विविधसाहित्यिकपत्रिकासु प्रकाशितानि स्फुटकाव्यानि सन्ति । तथैव विभिन्नपत्रपत्रिकासु प्रकाशिताश्चत्वारिंशदधिकाः शास्त्रीया मनोवैज्ञानिकाः साहित्यिकाश्च उच्चस्तरीया निबन्धाः कवेरस्य विशिष्टं वैदुष्यं प्रमाणयन्ति ।

ख) प्रवृत्तयः

सरलः शान्तः समन्दहासो निर्मलमानसः प्रियभाषी पूर्वभाषी च सुकविरधिकारी ललितकविर्वर्तते। स्नेहस्य, अनुरागस्य, प्रीतेः, वात्सल्यस्य, सौहार्दस्य, श्रद्धायाश्च सङ्गमरूपोऽसौ कविर्निजेषु काव्येषु प्रीतितत्त्वं प्राधान्येन पुरस्करोति, प्रणयेऽन्तर्लीनो भवति, प्रवासचित्रणे पात्रैः साकं विलपति, निजाभिः सरलाभिः सारगर्भिताभिः, सङ्गीतधर्मानुप्राणिताभिः कविताभिश्चासौ वियोगचित्रणाऽवसरे पाषाणानपि द्रावयति । तीव्रा चमत्कृतिरस्य काव्यानां कवितानाञ्च वैशिष्ट्यम् । नेपालीभाषायां प्रणीतः कवितासङ्गमः कवेरस्य सर्वामेव प्रवृत्तिं प्रकाशयति । सुकवेरस्य काव्यप्रवृत्तिमादाय नेपालीभाषाया **महाकविः - माधवघिमिरेः** कथयति- 'मनोहरं प्रकृतिचित्रणम्, अनघो राष्ट्रियताभावः, स्वजनेषु निःस्वार्था प्रीतिप्रवृत्तिः, काव्येषु रसपरिपाकप्रवीणता, आध्यात्मिकं चिन्तनञ्चेति तत्त्वानि श्रीटीकारामकवेः काव्येषु माङ्गल्याधानं

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

कुर्वन्ति । साहित्याचार्य एष कविर्निजया नैसर्गिकरचनाप्रवृत्त्या भरतराजपन्त-भरतराजमन्थलीय-डमरुवल्लभपौड्यालसदृशानां साहित्याचार्याणां सुकवीनां परम्परायां भावयित्र्या कारयित्र्या च प्रतिभया समलङ्कृतो वर्तते' इति ।

प्रा. अम्बिकाप्रसादोऽधिकारी कथयति – 'श्रीटीकारामकवेः कवितासङ्ग्मान्तर्गतानां सर्वासामेव कवितानां मयाऽऽस्वादनं कृतम् । सर्वा एव कविता मया तीक्ष्णया धिया समीक्षिताः, स्पृहया विमृष्टाः, एताः सन्ति सौन्दर्यानुप्राणिताः, सरसाः, मधुराः समुचितसुललितपदसन्निवेशविशिष्टाश्च' इति ।

चन्द्रप्रभानामकं प्रकृतं संस्कृतकाव्यमधिकृत्य **प्राज्ञः डा. टीकारामपन्थी** कथयति – 'चन्द्रप्रभाभिधे काव्ये शिल्पपक्षेण सह भावपक्षः प्रदीप्तोऽस्ति । कवेरन्तर्हृदयनिःसृता आस्थामयी भावधारा सरलमधुरया गिराऽभिव्यक्ता वर्तते। अत्र कविना राष्ट्रनिर्माणे नारीचरित्रोत्कर्षः स्फुटमभिव्यक्तः काव्यकलात्मकभाषया।'

उपर्युक्ताः सर्वा एव अभिव्यक्तयः कवेरस्य ललितमधुरपदसन्निवेशनैपुण्यं प्रकाशयन्तीति सिद्धमस्य ललितकवित्वम् । तत्परिचायकमेकं पद्यं यथा –

समाश्रयन्तोऽखिलपापहन्त्रीं तां गण्डकीमेव तरङ्गतन्त्रीम् ।
बभूवुरानन्दतचेतसस्ते भागीरथीतीरधराजुषोऽन्ते ।। (च.प्र.श्लो. ४५०)

कवेः शान्तं सरलं स्वभावम्, निश्चिन्तां मनोवृत्तिम्, सततं मनोविज्ञानप्रधानकाव्यरचनाप्रवृत्तिञ्चानुभूया-ऽनुमातुं शक्यते यदसौ कविर्निरन्तरं कामपि विशिष्टव्यक्तित्वनिर्माणनिमित्तीभूतां साधनां सम्पादयतीति ।

वस्तुतो वाराणस्यां छात्रजीवनमतिवाहयताऽनेन कविनाऽध्ययनेन साकं विदुषां कवीनां साधकानां महात्मनाञ्च सान्निध्यमधिगतम् । तेषु विशिष्टो विद्वान् महान् साधकश्चासीत् काशीमनोविज्ञानशालायाः संस्थापकोऽध्यक्षः **स्व. लालजीरामशुक्लमहाभागः** । आध्यात्मिकमनोविज्ञान-नवीनमनोविज्ञान-शिक्षामनोविज्ञानाभिधानानां ग्रन्थरत्नानां स्रष्टा एष काशीहिन्दूविश्वविद्यालये मनोविज्ञानविभागस्य प्राध्यापक आसीत् । एतेषु पुस्तकेषु शुक्लमहोदयेन मानसिकशिथिलीकरणविधिः, आनापानसतिविधिः, साक्षिभावानुशीलनविधिः, मैत्रीभावाभ्यासविधिश्चेत्यादयो विषयाः सटिप्पणं पारदर्शिन्या पद्धत्या प्रकाशिताः सन्ति ।

उक्तग्रन्थरत्नानुसारेण ज्ञायते मानवीयमनसोऽपरिमितशक्तिमत्ता । मनो द्विविधं भवति – अचेतनं चेतनञ्च । मनसि अचेतनताया मात्रा सप्तभागाधिका भवति चेत् चेतनताया मात्रा केवलमेकभागात्मिका। चेतनं मनः सांस्कृतिकं नैतिकं सत्यसङ्कल्पञ्च भवति चेदचेतनं मनः पाशविकं चेतनविरोधि च । अतोऽचेतनमनसः शुद्धीकरणेन साकं चेतनेन सह तस्य समन्वयाय कुशलाः प्रयतन्ते । सफले प्रयासे ते सत्यसङ्कल्पा आत्मवन्तः सन्तुष्टाः सम्पन्नाश्च भवन्तीति विषयः श्रीशुक्लमहाभागेन तत्र तत्र प्रमाणितो वर्तते । कविः श्रीटीकारामोऽधिकारी शुक्लमहाभागस्य सान्निध्यं लब्ध्वा उक्तविधीनामनुशीलनं प्रयोगञ्च कृतवान् बहुकालपर्यन्तम् ।

शुक्लसौजन्यशुक्लात्मनः सुकवेरस्यान्तर्मुखी मनोवृत्तिः सौमनस्यमहिता व्यवहतिश्च एतदीयमसाधारणं व्यक्तित्वं व्यञ्जयतो नूनम् । नैष सज्जनः कदाचन साहङ्कारया वाचा परमर्माणि निकृन्तति, नापि पूर्वाग्रहदूषितान् द्वेषमलिनान् विचारान् प्रकटीकरोति, न च कदाचन रोषरक्तनयनो गर्जनं तर्जनं वा कुरुते, नापि कदाचित् विषोल्बणाभिर्दृष्टिभिर्विलोकयति स्वासहमतान्, अपि तु विपञ्चीसंवादिन्या वाचा सम्मोहयति सकलान् । नाप्येष वंशागतं पैतृकं वा महत्त्वं ख्यापयन् गृहे शूर इव विचरति, न च सर्वानेव मूर्खानिव भावयन् आत्मानं पण्डितं मन्यमानो मिथ्याडम्बरेण आवृणोति मानसपटलम्। लाभे हानौ जये पराजये च समानया मनोवृत्त्या व्यवहरन् सस्मितं विलोकयन् मधुरं वदन् कार्यक्षेत्रे कर्मक्षेत्रे चाविरतं काव्यभारतीं समाराधयन्

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

विद्योतमानो निर्विकारः सत्यसङ्कल्पश्चासौ मनीषी निजाभिर्भद्राभिः प्रवृत्तिभिः कृतिभिश्च स्वजन्मावनिमलङ्करोति।

४. चन्द्रप्रभाचारुबिम्बम्

सुकविना प्राध्यापकेन डा. टीकारामाधिकारिणा रूपिता **'जयतु संस्कृतम्'** इति संस्थया २०५८ तमे वैक्रमाब्दे प्रकाशिता शरद्व्योम्नि समुदिता चन्द्रप्रभेव चन्द्रप्रभाभिधाना काऽपि नवीना संस्कृतकाव्यकृतिर्निजेन सौन्दर्येण सुरसरस्वतीसौन्दर्यसागरावगाहसादराणां सरसहृदयानां सारस्वतानां हृदयानि सम्मोहयति सुतराम् । इतिहासानुरूपाऽनेकशीर्षकान्विता, राजनायिकायाश्चन्द्रप्रभाया उज्ज्वलैर्गुणैरादीपितान्तरा, प्रकृतिसुषमयोतप्रोता, सूक्तिहृद्या, नीतिनियमिता, वीर्यशौर्यप्रकाशनोद्धुरा, बडामहाराजाधिराजस्य पृथ्वीनारायणशाहस्य राष्ट्रनिर्माणयज्ञारम्भशंसिनी, नेपालस्यैतिहासिकगौरवप्रकाशिनी चन्द्रप्रभानाम्नी कृतिरैतिहासिककाव्यरूपाऽपि चारुताधिका वर्तते ।

'चन्द्रप्रभा' श्रीटीकारामकवेरैतिहासिकं काव्यम् । वस्तुतश्चन्द्रप्रभा नरभूपालशाहस्य ज्येष्ठा पट्टमहिषी पृथ्वीनारायणशाहस्य च सापत्नजननी । नरभूपालवंशगौरवाय समर्पितेयं पालपापालकस्य गन्धर्वसेनस्य पुत्र्या दक्षिणकुक्षितो जातं बालकं पृथ्वीनारायणशाहं सपत्नीकुक्षिप्रादुर्भूतमपि स्वीयं पुत्रं मत्वा पालयति, पोषयति, वर्धयति, शिक्षयति, निरन्तरं राष्ट्ररक्षायै लघुराष्ट्राणामेकीकरणेन नेपालाख्यमहाराष्ट्रनिर्माणाय चाभिप्रेरयति । तस्या एव त्यागस्य, सत्यसङ्कल्पस्य, सत्प्रेरणायाश्च परिणामो यदिदानीं मेचीतो महाकालीपर्यन्तं स्फीतं नेपालराष्ट्रमस्मद्राष्ट्रत्वेन विश्वस्मिन् विश्वे देदीप्यते । एतदेवैतिहासिकं विषयमादाय डा. टीकारामाधिकारिणा निर्मितं चन्द्रप्रभाकाव्यं विशुद्धमैतिहासिकं काव्यं सदपि कविकौशलेन समुत्पन्नैः काव्यतत्त्वैरलङ्कृतमेतदैतिहासिकान् काव्यरसिकाँश्च समकालमेव तोषयति सम्मोहयति च नितराम् ।

एतस्मिन् काव्ये न सन्ति सर्गाः, नाध्यायाः, न विरामाः, न निःश्वासाः, नोल्लासाः, नैव च परिच्छेदा अपि तु तत्स्थानापन्नानि वर्ण्यविषयानुसारीणि विलसन्ति ६४ सङ्ख्यकानि शीर्षकाणि । एतेषु शीर्षकेषु सन्निहितानि ५९१ सङ्ख्यकानि पद्यानि चन्द्रप्रभाया योगदानपरिचायकानि, नेपालराष्ट्रस्यातीतकालिकगौरवकागाथायामाधारितानि च सन्ति, न तु कविकल्पनाप्रसूतानि । परं कविना कविधर्ममनुसृत्य काव्यशैल्या प्रकाशितानामेतेषामनल्पं महत्त्वम् ।

५. चन्द्रप्रभाकाव्यगतं विषयवस्तु

चित्तौरस्य शासको मीरसिंहः कारणवशात् चित्तौरं विहाय हिमवत्खण्डान्तर्गतं नेपालमागत्य खाँचीराज्यस्य शासको जातः, स एव कालान्तरे खाँचीराजवंशस्य प्रवर्तकोऽपि । तस्मिन्नेव वंशे समुत्पन्नो दलशाहः, यदीया पुत्री वर्तते प्रकृतकाव्यस्य राजनायिका चन्द्रप्रभा । गोर्खाराजवंशस्य विशिष्टः पूर्वपुरुष आसीद् रामशाहः, यस्मिन् वंशे नरभूपालशाहः समुत्पन्नः । तेनैव खाँचीभूपतेर्दलशाहस्य पुत्र्याश्चन्द्रप्रभायाः पाणिग्रहणं कृतम् । इत्थं खाँचीराजवंशगोर्खाराजवंशयोरनघः सम्बन्धो नवनेपालनिर्माणस्य कारणतां गतः ।

कृतेऽपि प्रयत्नशते निःसन्ताना खाँचीराजकुमारी चन्द्रप्रभा गोर्खाराजवंशनैरन्तर्याय पालपापालकस्य गन्धर्वसेनस्य पुत्रीं कौशल्यां स्वयं ययाचे । ततो नरभूपालशाहस्य द्वितीयो विवाहः सम्पन्नः । पालपाराजकुमारी कौशल्या नरभूपालस्य द्वितीयराजमहिषी एव गोर्खाराजवंशस्य तन्तुप्रस्तारहेतुभूताऽपि संवृत्ता । या कालान्तरे सूर्यवर्चसं बालं पृथ्वीनारायणाभिधं जनयामास।

बालजनने सति खाँचीराजकुमारी चन्द्रप्रभा सापत्नं द्वेषं विस्मृत्य बालकस्य पालनपोषणशिक्षणसंस्काराधानादिसर्वमेव कृत्यं सस्पृहं सम्पादितवतीति चन्द्रप्रभाव्यक्तित्वस्य एतद् वैशिष्ट्यमेवास्य काव्यस्य चन्द्रप्रभेतिनामकरणे बीजम् । चन्द्रप्रभया राजकुमाराय पृथ्वीनारायणाय प्रत्तो नीत्युपदेशो हि अस्य काव्यस्य प्राणतत्त्वं वर्तते । पृथ्वीनारायणस्य मकवानपुरराजवंशे सम्पन्नं प्रथमं विवाहं वर्णयित्वा विवादवशाद् विफले इव तस्मिन् संवृत्ते

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

तदीयो द्वितीयो विवाहः काशीराजस्य अहिमानसिंहस्य पुत्र्या नरेन्द्रलक्ष्म्याः साकं संवृत्त इति वर्णयता कविना चन्द्रप्रभैव ज्येष्ठराजमहिषी वधूवरौ नरेन्द्रलक्ष्मीपृथ्वीनारायणौ सन्मार्गे प्रावर्तयदिति सम्यक् प्रतिपादितम् ।

ततो नरभूपालशाहे स्वर्गवासाय प्रस्थिते राजमाता चन्द्रप्रभैव पृथ्वीनारायणस्य राज्याभिषेकं सम्पाद्य धर्मसंस्कृतिसंरक्षणसुशासनराज्यविस्तारकर्मसु नवभूपालं पृथ्वीनारायणं प्रावर्तयदिति निरूप्य कविना नुवाकोट-कीर्तिपुर-कान्तिपुर-भक्तपुर-ललितपुरादिषु राज्येषु जातेषु विजयाभियानेषु पृथ्वीनारायणस्य विजयं प्रस्तुत्य काव्यमेतत् समापितम् ।

६. काव्यतत्त्वदृष्ट्या चन्द्रप्रभाकाव्यम्

राजतरङ्गिणीकारस्य कल्हणस्य परम्परायां नैकविधानि ऐतिहासिककाव्यानि कविभिः प्रणीतानि । नेपालेऽपि पशुपतिझाप्रणीतं नेपालसाम्राज्योदयमहाकाव्यम्, भरतराजमन्थलीयनिर्मितं महेन्द्रोदयमहाकाव्यम्, हरिप्रसादाचार्य-परिकर्मितं गोरक्षशाहवंशमहाकाव्यञ्च समुल्लेखनीयतां बिभ्रति । तस्यामेव परम्परायां कविना श्रीटीकारामाधिकारिणा चन्द्रप्रभाकाव्यं प्रणीतम् । निजर्निर्मितेषु अन्येषु काव्येषु प्रीतितत्त्वस्य गायकः, मनोविज्ञानस्य प्रवर्तकः कविरेष इतिहाससदृशं शुष्कं विषयमादाय कथमस्मिन् कर्मणि प्रवृत्त इति जिज्ञासा जागर्ति मानसपटले । चन्द्रप्रभाकाव्यगतानि कृतज्ञतावचनानि पुष्पिकावाक्यानि च विलोक्य कथयितुं शक्यते यदेष कवी राजभक्तिराष्ट्रवादाभ्यामभिप्रेरितः सन् एतच्चन्द्रप्रभाकाव्यं प्रणीतवानिति । कृतज्ञताशब्दाः इति शीर्षके तेनोक्तम् –

चन्द्रप्रभापालनपोषणेन नेपालनिर्माणकलाप्रवीणः ।
प्रीतः स मे स्याच्च परत्र पृथ्वीनारायणोऽस्मत्पृथिवीधुरीणः ।।
नेपालपालैर्विविधैर्नृपालैः सुरक्षितेयं श्रितकूटजालैः ।
सदाऽस्तु नेपालमही च धन्या चन्द्रप्रभाकीर्तिकलावदान्या ।।

एषा एव दिव्या भावना कविवरमेनं मौलिककाव्यप्रणयनरूपरमणीयराजमार्गं विहाय ऐतिहासिककाव्य-प्रणयनात्मकशैलमार्गारोहणे प्रवृत्तं समपादयदिति प्रतीयते ।

चन्द्रप्रभाकाव्यमिदं नरभूपालशाहस्य पट्टमहिष्याम्, तत्सापत्नसूनौ पृथ्वीनारायणे, गोरक्षराजपरम्परायाञ्च कवेर्हार्दस्य भक्तिभावस्य परिचायकमिति भावप्रधानमिति कथनं सर्वथा सुसङ्गतं सदपि भावकेन्द्रीयतायां रसानामा-विर्भावतिरोभावयोरस्वीकारो न हि केनापि कर्तुं पार्यते । अत एव प्रबन्धरसतयाऽङ्गिरसतया वा उत्साहस्थायिकस्य वीररसस्य स्थितिरस्मिन् काव्ये। तदङ्गतया अन्ये वात्सल्यरौद्रादयो रसा अङ्गीकार्या भवन्ति । उदाहरणैरिह किञ्चित्तद् विषये प्रपञ्च्यते । कवेश्चन्द्रकलाविषयिणीं रतिमाश्रित्य निष्पन्नस्य भावस्योदाहरणम् –

रराज काचिद् भुवि गोरखायां वीराङ्गनाऽनेकनृपैः श्रितायाम् ।
चन्द्रप्रभा चन्द्रकलेव नाम्ना ररक्ष पृथ्वीं सदयं स्वधाम्ना ।। (श्लो. १)

अस्मिन् काव्ये इत्थमेव महापुरुषदेवादिविषयिण्या रतेः परिचायकानि सन्त्यनेकानि पद्यानि ।

वीररसो यथा –

सा कालिका गोरखनाथसिद्धो दधौ च तेषां गणसन्निधिं सः ।
तेषाममूर्तोऽपि स शौर्यराशिरपूर्वमूर्त्यैव तदाविरासीत् ।। (श्लो. ५०४)

वत्सलरसो यथा –

जातः स बालोऽखिलदर्शनीयस्तेजोमयो निर्जरवत् सुरूपः ।
चातुर्यवान् सत्प्रतिभाभिरामो रामो यथाऽपूर्वगुणोऽमिताभः ।। (श्लो. २९४)

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

रौद्ररसो यथा -

जामाताऽसौ मातृवर्गस्य दोषं श्रुत्वा खेदं प्राप्तवान् तत्र शीघ्रम् ।
पत्नीतातं वक्रदृष्ट्या निरीक्ष्य वीरैः साकं गोप्यवार्तां चकार ।। (श्लो. ३६०)

शृङ्गाररसो यथा -

बालाश्च काश्चिच्चपलाः सुखस्थास्ताश्चन्द्रवक्त्रोच्चकुचास्तरुण्यः ।
वधूवरद्वन्द्वमुखं निरीक्ष्य द्विरेफवत् पुष्परसे निलीनाः ।। (श्लो. २२७)

करुणरसो यथा -

रुरोद राजा सुतशोकदग्धः प्रजाश्च हाहेति विषादभाजः ।
माता च शुष्यद्वदनाम्बुजश्रीः खिन्ना यथाऽजायत गोरखाऽपि ।। (श्लो. १४३)

इत्थमत्र प्राधान्येन भावो गौणतया वीरवत्सलरौद्रशृङ्गारकरुणादयो रसाः प्राप्तपरिपाकाः सन्ति ।

काव्यस्य ऐतिहासिकी प्रकृतिः, पात्रचरित्रोत्कर्षं विनैव घटनापरिचायनमुद्दिश्य कवेस्त्वरितगामिता चेति हेतुद्वयेन नेह रसानां तादृशः परिपाको वर्तते, यादृशोऽपेक्षितः । कविना चन्द्रप्रभानरभूपालयोः, कौशल्यानरभूपालयोः, नरेन्द्रलक्ष्मी-पृथ्वीनारायणयोश्च प्रीतिमधुरं दाम्पत्यमुपेक्षितम् । तत्र पाठकाः प्रीतितत्त्वस्य पल्लवनं समीहन्ते, परं कविरत्र नैव दृश्यते सावधानः । पृथ्वीनारायणप्रयुक्तेषु अनेकेषु समरेषु वीरस्य, रौद्रस्य, भयानकस्य च परिपाकं काङ्क्षन्ति पाठकाः, परं कविरत्रापि घटनायाः संसूचनेनैव कृतार्थ इव प्रतिभाति । किन्तु यत्र तत्र भावपरिपाकविधौ कविः सफलो वर्तते ।

गुणदृष्ट्या विचारणायामत्र ओजोगुणस्य प्राधान्ये सत्यपि ओजस्वितायाः कुर्वद्रूपता न प्रतीयते । नापि विभाति गौडीयरीतेरौज्ज्वल्यम् । तद्वैपरीत्येन वैदर्भी एव विद्योतते । गुणेषु माधुर्यप्रसादयोः साम्राज्यम् ।

अलङ्कारदृष्ट्या विलोकने कविनाऽत्र शब्दालङ्कारेषु अनुप्रासस्य, अर्थालङ्कारेषु उपमारूपकोत्प्रेक्षासन्देहादीनां विच्छित्तिराविष्कृता । सन्देहालङ्कारो यथा -

श्रीरामसेना भुवि याति किं वा श्रीकृष्णसेनाऽतुलनीयरूपा ।
पुरःस्थितेयं कथमस्मदीयैर्द्रष्टुं न शक्या नयनैः प्रभाढ्या ।।
सेनाखिला वाऽभिनयाय याति किं राशिरेवं महसां चकास्ति ।
इति स्वचित्तभ्रमजालवश्यैर्जनैर्न किं वा विषयीकृतस्तैः ।। (श्लो. ४६४-४६५)

अनुप्रासोपमारूपकाणां सहभावो यथा -

स पुत्रशोकोऽस्तमियाय शीघ्रं सूर्योदये तस्य तमस्विनीव ।
ननर्त भूपस्य मनोमयूरी तेने सुखं सा मनुजेषु भूरि ।। (श्लो. ५१)

पात्रप्रकृतिविषये वीक्षितेऽत्र चन्द्रप्रभाया नरभूपालशाहस्य पट्टमहिष्या त्यागमयमौदार्यमयं निर्विकारं स्वभावं प्रदर्श्य नेपालराष्ट्रस्य एकीकरणे तन्निष्ठप्रयासस्य हेतुमत्तां निरूपयितुं त्वरमाणेन कविना पालपानरेशस्य पुत्र्याः पृथ्वीनारायणस्य साक्षान्मातुः सौभाग्यवत्याः कौशल्याया नितान्तमेवोपेक्षा कृता । चन्द्रप्रभया साकं नरभूपालशाहस्य विवाहे विधीयमाने वरयात्रायाश्चन्द्रप्रभामातृदेशस्य खाँचीप्रदेशस्य च निरूपणे कविर्यथा साग्रहं प्रवृत्तो न तथा कौशल्यायाः मातृभूमेः पालपाया वर्णने, तदीयवैवाहिकोदन्तोदीरणे, कौशल्याया दाम्पत्यजीवनविशिष्टीकरणे, तदीयमनोभावानां प्रकाशने च । यदीयौरससूनुरेव बडामहाराजाधिराजः पृथ्वीनारायणशाहो वर्तते, सा पालपानन्दिनी गन्धर्वसेनपुत्री, तदीया मातृभूमिर्विश्वविश्रुतसौन्दर्या पालपा, मुकुन्दसेनादियशस्विभूपतिगणैरनुपमः तदीयः पितृवंशश्चेति सर्वमेतत् कविना ज्ञात्वापि विस्मृत्य गौरवशालिसेनवंशमुपेक्ष्य खाँचीराज्येन सह धूर्कोटराज्यादीनां यन्निरूपणं कृतं

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

सर्गाभिरुचि तत्र कारणान्वेषणे सामान्यतो न किमपि प्रतीयते, तथापि कवेरत्र काव्यनिर्मिनकालिकः कश्चन स्वकीयोऽभिप्रायो भवेदित्यलं जिज्ञासया ।

छन्दोनियोगमादाय समीक्षिते चन्द्रप्रभाकाव्येऽस्मिन् कविर्गेयात्मकानां छन्दसां प्रयोगे आग्रहवान् प्रतिभाति। वीररसानुकूलानां शार्दूलविक्रीडितादीनां छन्दसां प्रयोगं विहाय कविरिन्दिरा-शालिनी-वसन्ततिलका-शिखरिणी-स्रग्विणी-स्वागता-तोटकप्रभृतीनां कोमलभावप्रकाशकानां छन्दसां बाहुल्येन प्रयोगं कृतवान् । एतेन विषयानुकूलतया वृत्तविनियोगे शैथिल्यं यदनुभूयते तत्र कवेर्निजा नैसर्गिकी शान्ता कोमला च प्रकृतिरेव कारणम् ।

मधुरललितपदसन्निवेशमनोहरेऽस्मिन् काव्ये व्यङ्ग्यव्यञ्जकभावापेक्षया वाच्यवाचकभावस्य प्रधानं स्थानमस्ति। आगामिनि समये कविगतायां संस्कृतरचनाधर्मितायां प्राप्तप्रकर्षायां तदीयरचनासु अभ्यासव्युत्पत्तिवशात् सूक्ष्मतायाः सञ्चारो भविष्यतीति अनुमातुं शक्यते । तथापीदानीमस्मन्नयनाभ्यां गोचरीक्रियमाणेयं चन्द्रप्रभा कवेरनुपमं सहजोच्चार्यसुकोमलपदविन्याससामर्थ्यं प्रमाणयति नितराम् । अस्मिन् काव्ये यथा कौशल्यायामेवान्यायः कृतः कविना नान्यपात्रेषु । तथापि पृथ्वीनारायणस्य यथोर्जस्वलं व्यक्तित्वं शब्दतूलिकया चित्रणीयमासीत्र तथा चित्रितमित्यपि स्मरणीयो विषयः । तथात्वेऽपि काव्यमिदं सहृदयजनाह्लादकारि वर्तते निजैः कैश्चन विशेषैः ।

७. प्रकृतिवर्णनम्

अस्मिन् काव्ये कविना यत्र तत्र नगरीणां शैलानां वनानां ग्रामाणां नद्यादीनाञ्च हृद्यं वर्णनं कृतम् । पोखराया विषये स कथयति –

तां कर्मदां शीघ्रमतीत्य भद्रामवाप रम्यां वरयात्रिवर्गः ।
तां पोखराख्यां नगरीं पुराणीं विलोलशुक्लाजलजातहर्षः ।।
तामन्नपूर्णादिहिमालयश्रीसमाकुलां नेत्रवतीं सरोभिः ।
विलोक्य नारीमिव तैर्विलोलैः शुक्लातरङ्गैश्च चलत्कटाक्षाम् ।। (श्लो. १९६-१९७)

इत्थमेवात्र स्याङ्जा-सतहुँ-भीरकोट-ढोर-गोर्खा-रिडी-खाँचीप्रभृतीनां स्थानानां वर्णनानि विलसन्ति । पुनश्चात्र काशी-विन्ध्याचल-देवघट्ट-हरिहरक्षेत्र-पाटलिपुत्रादीनां स्थानानामपि रुच्यं वर्णनं विभाति । काशीमधिकृत्य कविरुक्तवान् –

तां शङ्खघण्टारवपूर्णकर्णां श्रीविश्वनाथाश्रितसर्ववर्णाम् ।
विलोक्य काशीं स च पुण्यराशिर्हृष्टस्तदा शौर्यधनो नृपोऽयम् ।। (श्लो. ४५७)

अत्र काव्ये कविना प्रकृतिवर्णनविधौ गोरक्षभूमिवर्णने, गण्डकीचपलतरङ्गविलासनिरूपणे, पोखरानगरीवर्णने, काशीदेवघट्टविन्ध्याचलखाँचीप्रदेशादिसौन्दर्यचित्रणविधौ च निजा सूक्ष्मा प्रकृतिनिरीक्षणशक्तिराविष्कृता वर्तते ।

८. सूक्तिसौन्दर्यम्

चन्द्रप्रभाकाव्येऽस्मिन् वर्तमानं हृद्यं सूक्तिसौन्दर्यं पाठकान् नितरां प्रमोदयति । कवेष्टीकारामाधिकारिण एष पक्षो नितरामनुशंसनीयो वर्तते । अध्ययनसंस्कारोद्बुद्धानां स्वानुभूतिप्रादुर्भूतानाञ्च सूक्तीनां राशिरिह प्रवहति पाठकान्- असतो सद्गमने तमसो ज्योतिर्गमने, मृत्योरमृतगमने प्रेरयन्निव । जीवनरीतिसूचकैर्दैवशक्तिव्यञ्जकै राजकर्तव्यनिर्देशकैर्महापुरुषपरमेश्वरमहिमव्यञ्जकैश्च सूक्तिवाक्यैर्यथा कवेरधिकारिणो विचारसरणिर्बोधविषयीक्रियते तथैव पाठका अपि अस्याः सरणेरङ्गीकारायाभिप्रेर्यन्ते । वस्तुत एतानि सूक्तिवाक्यानि सूक्तिरत्नान्येव सन्ति । येषां हृदयस्थाने नित्यं विभूषणतया धारणेन मानवव्यक्तित्वमनितरसाधारणं सम्पद्यते ।

जीवने सुखदुःखयोर्नैरन्तर्यं न भवति संसारे सुखानन्तरं दुःखम्, दुःखानन्तरं सुखमिति प्रतिपादयति

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

कविर्यथा–

न दुःखमात्रं मनुजोपभोग्यं सञ्जायतेऽस्यां भुवि वा सुखञ्च ।
स्वभावतस्तत्परिवर्तनञ्च कर्मानुसारं ह्यनुभूयते च ।। (श्लो. ४७)

सांसारिकः परिग्रहो वस्तुतो दुःखमूलो हरिभक्तिरेव परमसौभाग्यप्रदायिनीति कथयति कविः –

परिग्रहोऽयं विपदो हि मूलं स्त्री स्यात् पुमान् वा प्रियदैवतः स्यात् ।
तुच्छेषु कामेषु सदातुरत्वं विहाय लोको हरिभक्तिमान् स्यात् ।। (श्लो. ६४)

उत्तमं नारीचरितं विश्वगौरवभूतं भवतीति वदति कविः –

वीराङ्गनानां महनीयकीर्तिः सदा धरायां भजते प्रतिष्ठाम् । (श्लो. ७०)

पुत्रकलत्रमित्रभृत्यादिचिन्तनेषु अत्यासक्तिर्न विधेयेति प्रतिपादयति कविः –

न मोहभावं मनुजः श्रयेत स्वपुत्रपुत्र्यादिविचिन्तनेन । (श्लो. ७२)

ईश्वरकृपा सर्वविपत्तिनाशिनीति निरूपयति कविः –

लभ्येत लक्ष्मीशकृपाऽमला चेद् विपत्तिभागत्र भवेन्न कोऽपि । (श्लो. ७४)

दैवाधीनं जगत् सर्वमिति तथ्यं प्रकाशयति कविर्यथा –

सुखञ्च दुःखञ्च पराभवश्च सर्वेऽपि दैवायतना भवन्ति ।
दैवं विनाऽस्यां भुवि सम्भवेयुः श्रेयांसि नृणाञ्च कथं महान्ति ।। (श्लो. १०५)

महान्तः परोपकारपरायणा भवन्तीति सूचयति कविः –

परोपकारव्यसना भवन्ति जना महान्तोऽखिलवैभवैः स्वैः ।। (श्लो. १२७)

गुणा एव सम्मानहेतवो भवन्तीति प्रतिपादयति कविः –

गुणानुसारेण नरा भवन्ति सम्मानपात्राणि च भूतलेऽस्मिन् । (श्लो. १४०)

शीलस्य महत्तां प्रतिपादयति स यथा –

को नाम लोके सति शीलयोगे भवेन्मनुष्यो न सुखप्रवीणः । (श्लो. २४०)

शास्त्रस्य प्रामाण्यं प्रतिपादयन् कविः कथयति –

कार्याकार्यज्ञाननिर्धारणेऽपि शास्त्रं सर्वं सर्वदा स्याद् हितैषि । (श्लो. २८९)

पूज्येषु श्रद्धाभावो मानवानां समुन्नतिकारणमिति प्रतिपादयति कविः –

ते बुद्धिमन्तो भुवि सौख्यभाजो भवन्ति पूज्येषु हि भक्तिभाजः । (श्लो. ३८२)

पतिव्रताया माहात्म्यं निरूपयति कविः –

स्वश्रेयसे स्यान्न सतीविरोधः । (श्लो. ३९३)

राष्ट्रकल्याणमेव सर्वोपरि धनमिति निरूपयति कविर्यथा –

महद्धनं राष्ट्रहितं हि भूमौ । (श्लो. ४०८)

प्रजाहिताधानतत्परा राजान एव लोके शोभन्ते इति निरूपयति कविः –

प्रजाहिता भूपतयो हि भान्ति । (श्लो. ४१८)

इत्थं कविना श्रीटीकारामाधिकारिणा निजे काव्ये सूक्तिसौन्दर्यं सर्वाधिकतया समादृतमिति संवित्तिर्जायते नूनम्।

९. शास्त्रीयं सांस्कृतिकं सामाजिकञ्च चिन्तनम्

चन्द्रप्रभाकाव्ये वेदध्वनेराह्लादकं निरूपणं विलसति (३१) । रावणतपःस्थलस्य नर्तनाचलस्य

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

पुराणप्रमाणितस्य काव्यात्मकं वर्णनं पाठकान् प्रमोदयति (४)। गङ्गासादृश्येन सम्मानिताया बाणगङ्गायाः श्रद्धामयं वर्णनमत्र विभाति (२३)। अस्मिन् काव्ये ज्योतिषशास्त्रस्य(१९४), रामायणमहाभारतयोः शुक्रनीतेः कामन्दकीय-नीतेश्च (३८२), गणितविद्यायाः(२९०), गीतायाः, उपवेदानाम् (२३), ईश्वरभक्तेः (६४), शास्त्रबोधस्य (२९५), आराधनायाः (४५१), तीर्थयात्रायाश्च (४४७) निरूपणं सञ्जातमस्ति । तथैवात्र सदाचारस्य (३०), धर्मस्य (१०९), संस्काराणाम् (१८२), व्रतोपवासादीनाम् (२५२), दुर्गाप्रधानानां कुलदेवीनाम् (५९), मन्दिरादिनिर्माण-जनितपुण्यस्य (६३), धर्मार्थकाममोक्षाभिधपुरुषार्थानाम् (६०), सङ्गीतस्य (३०), साहित्यस्य (३८३), कलायाः (३२४), धनुर्वेदस्य (४६८) च विषया अत्र स्थले स्थलेऽनुस्यूताः सन्ति । पुनश्चात्रैव कविना भक्तिमहिमा(२८२), विशदीकृतः, शक्तिपातः (२७८) च सविशेषं प्रकाशितः ।

काव्यमिदं नीतिशास्त्रस्य स्रोत इव प्रतिभाति । वीराङ्गनया चन्द्रप्रभया पृथ्वीनारायणाय प्रत्तो नैतिकोपदेशोऽस्य काव्यस्य नीतिनिष्ठतां प्रकाशयति । ४१२ तमात् पद्यात् आरभ्यः ४३० तमं पद्यं यावत् वर्तमानश्चन्द्रप्रभोपदेशो मूल्यवान् विभाति। यदनुसारेण सिंहासनासीनो राजा लोकहिताय श्रियं समर्पयेत्, मित्रशत्रुविवेकं विधाय व्यवहरेत्, स्वराज्यरक्षायै सुयोग्यजनचयनं विदध्यात्, शास्त्रधर्मं कुलधर्मञ्च विचार्य कर्तव्यपालनं कुर्यात्, लोकशास्त्राभिज्ञानां विदुषां नियुक्तिं विदध्यात्, प्रजामतं निर्धार्य कर्तव्यनिर्धारणं कुर्यात्, विभवेषु आसक्तिं विहाय राष्ट्ररक्षां कुर्वन् परमेश्वरे भक्तिं कुर्यात् । प्रजाहिताधानपरा भूपतय एव विजयिनो भवन्ति, राजा यौवनस्य, धनस्य, वैभवस्य, पदस्य चाभिमानं विहाय राष्ट्ररक्षां कुर्यात् । स्वार्थसिद्धये दुर्जनाः स्तुतिं कुर्वन्तीति विविच्य दुर्जनसङ्गं परित्यजेदित्यादयो नीतिसम्बद्धा विषयाः कविना यथाप्रसङ्गं समायोजिताः सन्ति । उदाहरणार्थमेकं पद्यम् –

मतं गृहीत्वा निखिलप्रजानां कर्तव्यनिर्धारणमत्र साध्यम् ।
धर्म्याणि कर्माणि यथाविधानं विधाय दानञ्च बुधेषु देयम् ।। (४१७)

लघुकलेवरेऽपि अनेकविषयसम्पन्नेऽस्मिन् काव्ये नेपाले गोरक्षशाहवंशीयभूपतीनामुदयस्य, नैपालैकीकरणस्य च इतिहासः सुस्पष्टं प्रकाशितो वर्तते । पृथ्वीनारायणं तद्वंश्यान् चाश्रित्य कविना लक्ष्मणेन कवितानिकषोपलम्, ललितावल्लभेन भक्तविजयकाव्यम्, पृथिवीन्द्रवर्णोदयञ्च शक्तिवल्लभेन जयरत्नाकरनाटकम्, हास्यकदम्बकञ्च विरचय्य ऐतिहासिककाव्यधाराप्रवर्तने यद् योगदानं कृतं तथैव कविना श्रीटीकारामाधिकारिणापि चन्द्रप्रभाविनिर्मित्या तस्यां परम्परायां गत्याधानं कृतम् ।

अस्मिन् काव्ये अर्घाखाँचीतः प्रारभ्य मकवानपुरपर्यन्तं वर्तमानानामैतिहासिकघटनाधारभूतानां स्थानानां स्थले स्थले नामानि लभ्यन्ते । तेषु खाँची-रिडी-पाल्पा-स्याङ्जा-पोखरा-तनहुँ-लमजुङ-गोरखा-नुवाकोट-देवघट्ट-काष्ठमण्डप-कीर्तिपुर-भक्तपुर-ललितपुर-मकवानपुरप्रभृतीनि नामानि मुख्यानि सन्ति । प्रतिवेशिराष्ट्रगतानि च पाटलिपुत्र-हरिहरक्षेत्र-वाराणसी-विन्ध्याचलप्रभृतीनि स्थानानि वर्णितानि सन्ति ।

काव्येऽस्मिन् स्थले स्थले समाजसंरक्षणस्य, समाजविकासस्य, राष्ट्रियतायाः, जनकल्याणस्य च चर्चा कृता कविना । खाँचीकोटादारभ्य काष्ठमण्डपपर्यन्तं वर्तमाना ये विषयाः कविनाऽत्र वर्णितास्तत्र हिमवत्संस्कृतिरिव सुशोभते । अत्र कविना वर्णाश्रमधर्मस्य विशुद्धं कल्याणकारि च स्वरूपं प्रकाश्य सनातनसंस्कृतेर्मूल्यभाजो विचाराः संगृहीताः सन्ति ।

इत्थं कविना खण्डकाव्यमयेऽस्मिन् चन्द्रप्रभाकाव्ये शास्त्रीयाणां सांस्कृतिकानां सामाजिकानाञ्च विषयाणां समुल्लेखनेन नैपालकजनजीवनस्य शास्त्रानुप्राणिता संस्कृतिसौम्या सुषमा प्रकाशिता वर्तते ।

१०. पर्यन्तकथनम्

चन्द्रप्रभानामकमैतिहासिकं काव्यमिदं काव्यतत्त्वानामैतिहासिकविषयाणाञ्च समन्वयेन निष्पन्नमिति संग्रहणीयं

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

मननीयं प्रशंसनीयञ्च वर्तते । तथापि अस्मिन् काव्ये मनुजो श्रयेत (७२), गायन् स्मरन्(८७), जेष्ठं कुमारम्(८७), जेष्ठस्य पुत्रस्य च – जेष्ठपुत्रे(१६५), स बादशाहाय ददौ धनञ्च(३३५), हन्मञ्जूषां दर्शकाणाञ्च यूनोः (३५१), इत्यादिप्रयोगेषु अनुभूयमानाः सामान्यास्त्रुटयः पुनर्मुद्रणे परिहरणीया इति परामृश्यते गुणदृष्ट्या ।

कविना श्रीटीकारामाधिकारिणा विनिर्मितेयमैतिहासिकाव्यरूपा चन्द्रप्रभानाम्नी कृतिर्मौलिककल्पनाराहित्येऽपि साहित्यिकस्य विदुषः सुकवेर्निर्मितित्वाद् यत्र तत्र काव्यसौन्दर्यं साक्षात्कारयति, हिमानीशुभ्रां हिमवत्संस्कृतिं प्रकाशयति, नेपालराष्ट्रस्य गौरवमयमितिवृत्तं बोधयति, राष्ट्रियताभावनाञ्च जागरयतीति संस्कृतसाहित्यागारे सेयं काचनाभिनवा प्राप्तिरिति नात्र विसंवादः ।

कविवर एष सत्यामिच्छाशक्तौ, सति च सत्यसङ्कल्पे नूतनं महाकाव्यं रचयितुं संप्रभुरिति मदीया प्रतीतिः। सैषा प्रतीतिः कार्यरूपे परिणता स्यादिति हार्दिकीं शुभाशंसां प्रकाशयन् शुक्लायाः सरस्वत्याश्चरणारविन्दयोः संस्मरणपूर्वकं वाग्व्यापाराद् विरमामि ।

जयतु संस्कृतम् ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

विशेषप्रभागः

कार्तवीर्योदयमहाकाव्यस्य - शास्त्रीयं साहित्यिकञ्च विश्लेषणम्

महेन्द्रसंस्कृतविश्वविद्यालयस्य विश्वविद्यालयानुदानायोगस्य च सहयोगे वाल्मीकि-विद्यापीठस्थसाहित्यशिक्षणविभागद्वारा समायोजितायां वाल्मीकिविद्यापीठे, काष्ठमण्डपे वि.सं. २०५९ सौराषाढस्य २ - ६ दिनेषु सम्पन्नायाम्

कार्तवीर्योदयमहाकाव्यस्य शास्त्रीयं साहित्यिकञ्च

विश्लेषणं तथा ग्रन्थिभेदनम्

इत्यभिधानायां कार्यशालागोष्ठ्यां विभिन्नेषु अधिवेशनेषु विद्वद्भिः प्रस्तुतानि कानिचन विचारपत्राण्यत्र समावेशितानि ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

श्रीगणेशाय नमः

वागीशाद्याः सुमनसः सर्वार्थानापुपक्रमे ।
यं नत्वा कृतकृत्याः स्युस्तं नमामो गजाननम् ।।

कार्तवीर्योदयमहाकाव्ये दार्शनिकं चिन्तनम्

- प्रा. डा. दुर्गाप्रसाददवाडी

परिचयः

कार्तवीर्योदयमहाकाव्ये दार्शनिकचिन्तनविवेचनावसरे कः कार्तवीर्यः, कश्चोदयः, किञ्च महाकाव्यम्, किञ्च दर्शनम्, कथञ्च दार्शनिकत्वमित्यादिकं परिचेयमापद्यते । तथा च कृतवीर्यस्यापत्यं पुमान् कार्तवीर्य इत्यपत्यत्यार्थेऽणि निष्पद्यते ।

कृतमिति कृञ्धातोः क्तप्रत्यये सिद्ध्यति । वीरशब्दश्च वीरविक्रान्तावित्यस्माच्चौरादिकादचि वीर इति भवति। अथवा विशेषेण ईरयति ईर्तेवा वीरः, विपूर्वकाद् ईरगतावित्यस्मात् कप्रत्यये वीरः । अथवा अजति क्षिपति शत्रूनिति वीरः। अज इत्यस्मात् स्फायितञ्चिवञ्चीत्याद्युणादिसूत्रेण रकि अजेर्वीभावे वीरः । वीरे साधु वीर्यम् । तत्र साधुरिति यत्प्रत्यये वीर्यमिति भवति । वीरस्य भावो वीर्यमपि भवितुमर्हति । अतिशक्तिमानुत्साहः प्रभावो वा वीर्यम् । अग्निः सनोति वीर्याणि विद्वान्त्सनोति वाजममृताय भूषन् । सवो देवी एह वहा पुरुक्षो ।।(ऋग्वेदे ३/२५/२) । वीर्यशब्दो दृश्यते। तस्य विवृत्तिं करोति सायणो विद्वान् कर्माभिज्ञो योऽग्निर्वीर्याणि पशुपुत्रादिसम्पद्रूपाणि सामर्थ्यानि सनोति यजमानाय ददाति । यश्चाग्निर्भूषन् स्वतेजसा सर्वं जगद् भूषयन् अलङ्कुर्वन् अमृताय मरणधर्मरहितायेन्द्रादिदेवाय वाजं हविर्लक्षणमन्नं सनोति प्रयच्छति । हे अग्ने सः तादृशस्त्वं न अस्माकं सम्बिन्धिनि इह अस्मिन् यज्ञे देवान् यजनीयान् देवान् आ वह आह्वय । तथा च कृतं वीर्यं पशुपुत्रादिसम्पद्रूपं सामर्थ्यं येन सः कृतवीर्यः । यदुवंशे सञ्जातो महावीरो राजा । यथा चोक्तं हरिवंशे –

बभूवुस्तु यदोः पुत्राः पञ्च देवसुतोपमाः ।
सहस्त्रदः पयोदश्च क्रोष्टा नीलोऽञ्चिकस्तथा ।।
सहस्त्रदस्य दायादास्त्रयः परमधार्मिकाः ।
हैहयश्च हयश्चैव राजन् वेणुहयस्तथा ।।
हैहयस्याभवत् पुत्रो धर्मनेत्र इति स्मृतः ।
धर्मनेत्रस्य कार्तस्तु साहञ्जस्तस्य चात्मजः ।।
सहञ्जिनी नाम पुरी येन राज्ञा निवेशिता ।
आसीन्महिष्मतः पुत्रो भद्रश्रेण्यः प्रतापवान् ।।
वाराणस्याधिपो राजा कथितः पूर्वमेव तु ।
भद्रश्रेण्यस्य पुत्रस्तु दुर्दमो नाम विश्रुतः ।।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

दुर्दमस्य सुतो धीमान् कनको नाम वीर्यवान् ।
कनकस्य तु दायादाश्चत्वारो लोकविश्रुताः ।।
कृतवीर्यः कृतौजाश्च कृतवर्मा तथैव च ।
कृताग्निस्तु चतुर्थोऽभूत् कृतवीर्यात् तथार्जुनः ।।
यस्तु बाहुसहस्रेण सप्तद्वीपेश्वरोऽभवत् ।
जिगाय पृथिवीमेको रथेनादित्यवर्चसा ।। (हरिवंशे, हरिवंशपर्वणि १/९)

कृतवीर्यस्यान्यत्रोल्लेखः

कार्तवीर्यः कृतवीर्यस्यापत्यमिति विग्रहेऽपत्येऽणि सिद्ध्यति । कृतवीर्यश्च राजा आयुर्वेदज्ञ आसीदिति विज्ञायते। सुश्रुतसंहितायां गर्भस्योत्पत्तिः कथं भवतीति विचारप्रसङ्गे 'गर्भस्य खलु संभवतः पूर्वं शिरः संभवतीत्याह शौनकः शिरोमूलत्वात् प्रधानेन्द्रियाणाम्, हृदयमिति कृतवीर्यो बुद्धेर्मनसश्च स्थानत्वात्' (सुश्रुतसंहितायां शारीरस्थाने ३/३२)। अयं कृतवीर्यः सोमवंशोत्पन्नस्याहंयातेः श्वशुर आसीत्, तस्मै तेन कृतवीर्येण स्वकीया तनया भानुमती दत्तेति महाभारताज्ज्ञायते– 'अहंयातिः खलु कृतवीर्यदुहितरमुपयेमे भानुमतीं नाम तस्यामस्य जज्ञे सार्वभौमः ।' (महाभारते आदिपर्वणि ९५/१५) अयं कृतवीर्यः कार्तवीर्यस्य पिता वेदज्ञानां भृगुवंशोत्पन्नानां ब्राह्मणानां यजमानः, तेन यज्ञे भृगुभ्यो बहुतरं धनं दत्तमिति महाभारतादेव ज्ञायते–

कृतवीर्य इति ख्यातो बभूव पृथिवीपतिः ।
याज्यो वेदविदां लोके भृगूणां पार्थिवर्षभ ।।
स तानग्रभुजस्तात धान्येन च धनेन च ।
सोमान्ते तर्पयामास विपुलेन विशाम्पतिः ।। (महाभारते १/१७७/११-१३)

कृतवीर्ये स्वर्याते तत्कुलजातानां द्रव्यकार्यमुपस्थितम् । भृगूणां सन्निधावस्मत्पूर्वजदत्तं धनमस्तीति ज्ञात्वा ते राजानो याचिष्णवो भार्गवानभिजग्मुः । तत्र केचिद् भृगवो धनं भूमौ निदधुः, केचित्तु क्षत्रियतो भयं ज्ञात्वा यथेप्सितं ददुः।

कार्तवीर्यः

कृतवीर्यस्य पुत्रः कार्तवीर्यः । अस्य नाम तु अर्जुनः, सहस्रबाहुत्वात् सहस्रबाहुः, सहस्रार्जुन इत्यादीनि च नामानि । तस्य महत्त्ववर्णनम् –

स हि वर्षायुतं तप्त्वा तपः परमदुश्चरम् ।
दत्तमाराधयामास कार्तवीर्योऽत्रिसम्भवम् ।।
तस्मै दत्तो वरान् प्रादाच्चतुरो भूरितेजसः ।
पूर्वं बाहुसहस्रन्तु प्रार्थितं सुमहद् वरम् ।।
अधर्मे वर्तमानस्य सद्भिस्तत्र निवारणम् ।
उग्रेण पृथिवीं जित्वा स्वधर्मेणानुरञ्जनम् ।।
संग्रामान् सुबहून् कृत्वा हत्वा चारीन् सहस्रशः ।
संग्रामे वर्तमानस्य वधं चाप्यधिकाद् रणे ।।
तस्य बाहुसहस्रन्तु युध्यतः किल भारत ।
योगाद् योगेश्वरस्येव प्रादुर्भवति मायया ।। (हरिवंशे, हरिवंशपर्वणि ३३/१०-१४) ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

आपवशापः -

एतस्मिन्नेव काले तु कृतवीर्यात्मजो बली ।
अर्जुनो नाम तेजस्वी क्षत्रियो हैहयाधिपः ।।
दत्तात्रेयप्रसादेन राजा बाहुसहस्त्रवान् ।
चक्रवर्ती महातेजा विप्राणामाश्वमेधिके ।
ददौ स पृथिवीं सर्वां सप्तद्वीपां सपर्वताम् ।
स्वबाह्वस्त्रबलेनाजौ जित्वा परमधर्मवित् ।।
तृषितेन च कौन्तेय भिक्षितश्चित्रभानुना ।
सहस्त्रबाहुर्विक्रान्तः प्रादाद् भिक्षामथाग्नये ।।
ग्रामान् पुराणि राष्ट्राणि घोषाँश्चैव तु वीर्यवान् ।
जज्वाल तस्य बाणाग्राच्चित्रभानुर्दिधक्षया ।। (महाभारते शान्तिपर्वणि १४९/३५-३९)

एवं कार्तवीर्यस्य प्रभावेणाग्निर्वायुना प्रेरितः पवनर्षेराश्रमपदमपि ददाह । तेन रुष्ट आपवस्तु रोषादर्जुनं शशाप - त्वया ममेदं वनं न वर्जितम्, तस्माद् रणे परशुरामो बाहूँस्ते छेत्स्यत इति ।

अस्मिन् काव्ये अर्जुनस्य (कार्तवीर्यस्य) केवलं राज्यशासनपर्यन्तमेव वर्णनं विद्यते । कार्तवीर्योऽर्जुनो रावणं जित्वा कारागारे स्थापितवान् यज्ज्ञात्वा पुलस्त्यनामा महर्षिः स्वपौत्रं रावणं मोचयामासेति हरिवंशे वर्णितम्-

श्रुत्वा तु बद्धं पौलस्त्यं रावणं त्वर्जुनेन तु ।
ततो गत्वा पुलस्त्यस्तमर्जुनं ददृशे स्वयम् ।।
मुमोच रक्षःपौलस्त्यं पुलस्त्येनानुयाचितः ।। (हरिवंशे हरिवंशपर्वणि ३३/३५)

रावणस्य पराजयो महाकविनाऽत्र काव्ये सम्यग् विहितः, तथा सहस्त्रबाहुरर्जुनो विष्णोश्चक्रस्यावतार इत्यपि कथितम् । कार्तवीर्यस्य नामकीर्तनं प्रायः सर्वैः प्रातः प्रातः क्रियते -

कार्तवीर्यार्जुनो नाम राजा बाहुसहस्त्रवान् ।
तस्य स्मरणमात्रेण गतं नष्टञ्च लभ्यते ।। इति ।

किञ्च तस्य नामानि परमपवित्राणीत्यपि मन्यते

कार्तवीर्यः खलद्वेषी कृतवीर्यसुतो बली ।
सहस्त्रबाहुः शत्रुघ्नो रक्तवासा धनुर्धरः ।।
रक्तगन्धो रक्तमाल्यो राजा स्मर्तुरभीष्टदः ।
द्वादशैतानि नामानि कार्तवीर्यस्य यः पठेत् ।
सम्पदस्तस्य जायन्ते जनास्तस्य वशे सदा ।।

कविकुलगुरुः कालिदासोऽपि कार्तवीर्यस्य वीर्यं सङ्क्षेपेणेत्थं प्रस्तौति -

सङ्ग्रामनिर्दिष्टसहस्त्रबाहुरष्टादशद्वीपनिखातयूपः ।
अनन्यसाधारणराजशब्दो बभूव योगी किल कार्तवीर्यः ।।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

अकार्यचिन्तासमकालमेव प्रादुर्भवँश्चापधरः पुरस्तात् ।
अन्तःशरीरेष्वपि यः प्रजानां प्रत्यादिदेशाविनयं विनेता ।।
ज्याबन्धनिष्पन्दभुजेन यस्य विनिःश्वसद्वक्त्रपरम्परेण ।
कारागृहे निर्जितवासवेन लङ्केश्वरेणोषितमाप्रसादात् ।। (रघुवंशे ६/३८-४०)

अस्य राजर्षेः प्रभावो वायुपुराणेऽपि दर्शितः । किञ्चिन्निदर्शनम् -

तस्य राज्ञो जगौ गाथां गन्धर्वो नारदस्तथा ।
चरितं तस्य राजर्षेर्महिमानं निरीक्ष्य च ।।
न नूनं कार्तवीर्यस्य गतिं यास्यन्ति मानवाः ।
यज्ञैर्दानैस्तपोभिश्च विक्रमेण श्रुतेन च ।।
द्वीपेषु सप्तसु स वै खड्गी वरशरासनी ।
रथी राजाऽप्यनुचरोऽन्योऽगाच्चैवानुदृश्यते ।।
अनष्टद्रव्यश्चैवासीन्न शोको न च विभ्रमः ।
प्रभावेण महाराज्ञः प्रजा धर्मेण रक्षतः ।।
पञ्चाशीतिसहस्राणि वर्षाणां स नराधिपः ।
स सप्तद्वीपवान् सम्राट् चक्रवर्ती बभूव ह ।।
स एष पशुपालोऽभूत् क्षेत्रपालस्तथैव च ।
स एव वृष्ट्या पर्जन्यो योगित्वादर्जुनोऽभवत् ।।
स वै बाहुसहस्रेण ज्याघातकठिनेन च ।
भाति रश्मिसहस्रेण शारदेनेव भास्करः ।।
स हि नागसहस्रेण माहिष्मत्यां नराधिपः ।
कर्कोटकसमां जित्वा पुरीं तत्र न्यवेशयत् ।। (वायुपुराणे ९४/१९-२६)

महाकाव्यादिव्युत्पत्तिः

एवंविधस्य पुण्यश्लोकस्य कार्तवीर्यस्योदयोऽस्मिन् महाकाव्ये महाकविनोपस्थापितः । कविश्च कवते सर्वं जानाति, सर्वं वर्णयति, सर्वं गच्छति, सर्वतो गच्छति वा कविः, कवृ वर्णे इत्यस्मादिनि सिद्ध्यति । कवेरिदम्, कवेर्भावः कर्म वा काव्यम् । तल्लक्षणञ्च -

वाक्यं रसात्मकं काव्यं दोषास्तस्यापकर्षकाः ।
उत्कर्षहेतवः प्रोक्ता गुणालङ्काररीतयः ।। (साहित्यदर्पणे प्रथमपरिच्छेदे)

महच्च तत्काव्यम् - महाकाव्यम् । तल्लक्षणञ्च -

सर्गबन्धो महाकाव्यं तत्रैको नायकः स्मृतः ।
सद्वंशः क्षत्रियो वाऽपि धीरोदात्तगुणान्वितः ।।

इत्यादि साहित्यदर्पणोक्तं स्मर्तव्यं भवति । अस्मिन् महाकाव्ये लक्षणानि सर्वाण्येवोपपन्नानीति कथयितुं शक्यते ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

दार्शनिकं चिन्तनम्

अत्र महाकाव्ये दार्शनिकं चिन्तनं कीदृशं वर्तत इति तु विवेचनीयमेव । पाश्चात्यदृष्ट्यनुसारं दर्शनं न परमपुरुषार्थाय किन्तु मानसिकबौद्धिकतार्किकशक्तिप्रदर्शनाय । दर्शनस्य कृते तत्र फिलोसोफीशब्दः प्रयुज्यते तस्य चाशयो बौद्धिकज्ञानं प्रति प्रेमा बुध्यते । वस्तुतस्तु सर्व एव मानवा दार्शनिकतां त्यक्तुं न शक्नुवन्ति । जीवनविषये तत्त्वविषये सर्वेषामेव काचिद् दृष्टिर्भवत्येव । यदा च परलोकादिकममन्यमानो देहमेव सर्वं मन्यमानो लौकिकसुखार्थमेव चेष्टते तदाऽपि स लोकायतः सञ्जातो दार्शनिक एव । यद् वा तद् वा भवतु, कविस्तु दार्शनिक एव काव्यप्रयोजनविषये मम्मटस्योक्तिरस्ति-

काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये ।
सद्यः परनिर्वृतये कान्तासम्मितयोपदेशयुजे ।।

शिवेतरक्षतिरित्यनेन **शिवः** = कल्याणम् - सुखम्, **तस्मादितरम्** = शिवेतरम्, दुःखम् तस्य **क्षतिः** = नाशः, ध्वंसः, दुःखनाशो दुःखप्रागभावः काव्यस्योद्देश्यम् । तदेवोद्देश्यं दर्शनस्यापीति कविर्दार्शनिक एव । सद्यः परनिर्वृतिश्च आत्यन्तिकं सुखम्, यच्च वेदान्तदर्शनस्योद्देश्यम् । सद्यः परनिवृतिर्नाम मम्मटशब्देष्वेव **सकलप्रयोजनमौलीभूतं समनन्तरमेव रसास्वादनसमुद्भूतं विगलितवेद्यान्तरमानन्दम्** । तथा च - **आनन्दं ब्रह्मणो विद्वान् न बिभेति कुतश्चन** । आन्दस्वरूपं ब्रह्म प्राप्तं भवतीति बुध्यते । दुःखनिवृत्तिः सुखं वा काव्यस्य मुख्यं प्रयोजनं बुध्यते । यशोधनादिकन्तु सुखार्थमेवेष्यते। कविर्दार्शनिको भवतीत्यत्र प्रमाणन्तु कविकुलगुरुः कालिदास एव । रघुवंशे काव्ये पार्वतीपरमेश्वरयोर्वन्दनां कुर्वन् कविः शिवशक्त्योः सामरस्यरूपां शैवदृष्टिमेवोपस्थापयति । किञ्च चिद्गगनचन्द्रिकाग्रन्थेनाऽपि कालिदासस्य दार्शनिकताऽभिव्यज्यते। किञ्च -

रम्याणि वीक्ष्य मधुराँश्च निशम्य शब्दान् पर्युत्सुको भवति यत्सुखितोऽपि जन्तुः ।
तच्चेतसा स्मरति नूनमबोधपूर्वं भावस्थिराणि जननान्तरसौहृदानि ।।

इति शाकुन्तलश्लोकेन चित्ते वासनानां सूक्ष्मरूपेणावस्थानम्, समये च प्राप्ते तासामभिव्यक्तिर्भवतीति प्रतिपादयन् **ततश्च तद्विपाकानुगुणानामेवाभिव्यक्तिर्वासनानाम्** (योगसूत्रे ४/८) इति योगसूत्रोक्तं दर्शनमुपस्थापयति ।

महाकाव्यमिदं कवेर्दुःखात्मिकामुक्तिमुपस्थापयद् दुःखत्रयाभिघाताद् दर्शने प्रवृत्तिर्भवतीति मन्तव्यं द्रढयति। तथा च तस्योक्तिः -

कविते भवितेह को नु मे सरसोक्तेरनुरागभाजनम् ।
इति मास्म तपस्तपोबलात् सुकृतेः कोऽपि जनिष्यते तथा ।। (१७/२६) ।

किञ्च स पुनः कथयति -

अथवास्ति सुतो बृहस्पतिः परिचर्याकुशलस्तवाधुना ।
भविता शिशुपद्मनामकोऽवरपुत्रोऽपि कियद्दिनैरलम् ।। (तत्रैव १७/२७) ।

कविः पुनः पुनर्दुःखं प्रकटयन् कथयति -

पुत्रस्यास्य कनीयसो मम पुनः काव्याभिधानस्य च
ज्येष्ठाभ्यां मयि तारिणीपदगते दायः प्रदेयो ध्रुवम् ।
नित्यावेक्षणदुष्टतानिरसनाविघ्नप्रचारादिको
भूयाद् वां कुशलं सदाप्यविकलं सौभ्रात्रभाजोरिति ।। (१७/२८)

इत्थं स्वकीयां मानसीं वेदनां प्रकटयन् प्रपञ्चस्यास्य दुःखमयतां प्रदर्शयन् कविः साङ्ख्यदर्शनानुयायी प्रतीयते।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

बौद्धा अपि 'दुःखम्, दुःखसमुदयः, दुःखनिरोधः, दुःखनिरोधगामिनी प्रतिपदिति' चत्वारि आर्यसत्यानि स्वीकुर्वन्तः 'सर्वं दुःखम्, सर्वं क्षणिकम्' इति मन्यन्ते । बौद्धानामाशयः – सर्वं सत् क्षणिकम्, यथा जलधरपटलम्, यथा वा दीपार्चिः । यदि वस्तूपत्त्यनन्तरं न नश्येत् द्वितीयक्षणेऽपि तिष्ठेत्तर्हि द्वितीयक्षणेऽपि क्षणद्वयस्थायित्वात् पुनरपरक्षणद्वयमवतिष्ठेत् । एवमेव तृतीयक्षणेऽपि तत्स्वभावत्वान्नैव नश्येत् । ततः सर्वं नित्यमेव स्यादतः क्षणभङ्गवादः स्वीकर्तव्य इति । यथा चोक्तं शान्तरक्षितेन –

तत्र ये कृतका भावास्ते सर्वे क्षणभङ्गिनः ।
विनाशं प्रति सर्वेषामनपेक्षतया स्थितेः ।। (तत्त्वसङ्ग्रहे ३५३)

एतच्च मतं न महाकविसम्मतम् । यथोक्तम् –

स्मराम्यहं तत्पुरतोऽनुभूतं कृतं मया चेत्यनुसन्दधानः ।
वैनाशिको नासिकया विहीनस्त्रपां न धत्तेऽनुभवापलापी ।। (का.म. १६/८७)

कवेराशयोऽयं यत्क्षणभङ्गस्वीकारे चत्वारो दोषाः – कृतप्रणाशदोषः, अकृतकर्मभोगदोषः, भवभङ्गदोषः, मोक्षभङ्गदोषश्च। पूर्वपरमाणूनां निरन्वये नाशे कृतस्य कर्मणो भोगो न जात इति कृतप्रणाशदोषः, उत्तरपरमाणुभिस्तस्य भोगः कृत इत्यकृतकर्मभोगदोषः, इत्थञ्च संसारस्य कर्मफलभोगहेतुत्वाद् येन कर्म कृतं तस्याभावात् भवभङ्गदोषः, येन कर्म कृतं तस्य भोगो न जात इति मोक्षोऽपि न भवेदिति मोक्षभङ्गदोषः, एते दोषाः सञ्जायन्ते इति कवेराशयः प्रतिभाति। एवञ्च दुःखस्य सत्ता वर्तते, दुःखान्मुक्तेरुपायः कर्तव्यस्तत्त्वज्ञानं कर्तव्यमित्यत्र तु नास्ति विवादः परं क्षणिकवादस्तु न तर्काऽनुकूल इति कवेराशयः प्रतिभाति ।

साङ्ख्यदर्शनं पञ्चविंशतिस्तत्त्वानि स्वीकृत्य चतुर्विंशतिरचेतनानि तत्त्वानि पुरुषस्तु चेतन इति कथयति । चतुर्विंशतितत्त्वेषु प्रथमं तत्त्वं प्रधानं प्रकृतिः कथ्यते । प्रकृतितोऽन्यानि महदादितत्त्वानि क्रमरूपेण जायन्ते । तथा च सूत्रम् – **सत्त्वरजस्तमसां साम्यावस्था प्रकृतिः, प्रकृतेर्महान्, महतोऽहङ्कारः, अहङ्कारात् पञ्चतन्मात्राण्युभयमिन्द्रियं तन्मात्रेभ्यः स्थूलभूतानि पुरुष इति पञ्चविंशतिर्गणः ।** (साङ्ख्यसूत्रे १/६१) ।

अस्मिन् दर्शने सत्कार्यवादः स्वीकृतस्तथा च सूत्राणि – **नासदुत्पादो नृशृङ्गवत्** (१/११४), **उपादाननियमात्** (१/११५), **सर्वत्र सर्वदा सर्वासम्भवात्** (१/११६), **शक्तस्य शक्यकरणात्** (१/११७) **कारणभावाच्च** (१/११८) एतेषां सङ्ग्रहः सांख्यकारिकयेत्थं कृतः –

असदकरणादुपादानग्रहणात् सर्वसम्भवाभावात् ।
शक्तस्य शक्यकरणात् कारणभावाच्च सत् कार्यम् ।।

अस्य साङ्ख्यदर्शनस्यात्र महाकाव्येऽनेकत्रोल्लेखो लभ्यते । यथा प्रथमसर्गे–

सङ्ख्यावतां साङ्ख्यविचारभाजां प्रधानमादाय समस्तकार्यम् ।
आत्मावगाहिप्रमितिश्च वृत्तिः परेति वादो द्विविधोऽपि यत्र ।। (का.म. १/३०)

तथैव षोडशसर्गेऽपि सत्कार्यवादस्योल्लेखो वर्तते । यथा –

सतः सदुत्पत्तिरितीह मार्गः सतोऽसदुत्पत्तिरिति त्वमार्गः ।
सर्वत्र सर्वार्थिजनाप्रवृत्तेस्तैलस्य यत्नात् सिकतास्वलाभात् ।।
उत्पादिका यत्र च यस्य शक्तिस्तदेव तत्कारणमुच्यते चेत् ।
स्याच्छक्तिशक्तिश्च ततोऽनवस्था सत्कार्यवादो यदि नैव सा स्यात् ।।

(१६/७७–७८)

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

किञ्च शैवाद्वैतवादः काश्मीरशैवदर्शनस्य मुख्यसिद्धान्तो वर्तते, शक्तिशक्तिमतोरभेदः । यथोक्तं सोमनाथेन -

न शिवः शक्तिरहितो न शक्तिर्व्यतिरेकिणी ।
शिवः शक्तस्तथा भावानिच्छया कर्तुमर्हति ।।
शक्तिशक्तिमतोर्भेदः शैवे जातु न वर्ण्यते । (शिवदृष्टौ ३/२-३) ।

एष एव चार्थः सुकृतिदत्तेनेत्थं प्रकटितः -

शक्तिर्न भिन्ना समवायिहेतोः पृथङ् न केनाऽप्यनुभूयते सा ।
पृथङ् न भातङ्कथमस्तु भिन्नं तद्व्यक्तिभेदो न हि तत्र लोके ।।
श्रुतिप्रसिद्धा विविधाऽस्ति शक्तिस्त्रिलोकगेहस्थपतौ परेशे ।
एकत्वमप्यागममार्गरूढं विरुध्यते नोक्तपथानुसारात् ।। (का.म. १६/७९-८०)

अत्र च -

न तस्य कार्यं करणं न विद्यते, न तत्समश्चाभ्यधिकश्च दृश्यते ।
परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च ।।
(श्वेताश्वतरोपनिषदि ६/८)

इति श्रुतेरपि सङ्केतो वर्तते । किञ्च -

श्रुतिस्मृतिभ्यां प्रतिकूलगामी तर्कोऽप्रतिष्ठां लभते निकृष्टः ।
तत्सम्मतार्थप्रतिशोधहेतुस्तर्को विशिष्टां लभते प्रतिष्ठाम् ।। (का.म. १६/८१)

अस्मिन् श्लोके तर्काऽप्रतिष्ठानादप्यन्यथानुमेयमिति चेदेवमप्यविमोक्षप्रसङ्गः (ब्रह्मसूत्रे २/१/११) इत्यस्य सूत्रस्याशयः प्रकटितः ।

किञ्च अपक्वो मृद्घटः श्यामोऽग्नौ पक्वो रक्तो जायते । तत्र वैशेषिकमतानुसारेण पाकायाग्नौ स्थापितः श्यामघटः परमाणुपर्यन्तं नश्यति । रक्तरूपे परमाणूनां पाको जायते । ततश्च द्व्यणुकादिसंयोगक्रमेण घट उत्पद्यतेऽतो घटो रक्तो जायते । अयं वादः पीलुपाकवादः । पीलुर्नाम परमाणुस्तस्य पाकः । यदि रक्तो घटो भिद्यते चेत्तस्य सर्वेऽवयवा रक्ता दृश्यन्तेऽतः परमाणुपर्यन्तमेव पाको मन्तव्यः । यद्यपि तत्र रक्तघटोत्पत्तौ कर्ता न दृश्यते तथाऽपि प्राणिनामदृष्टवशादीश्वर एव तत्र कर्ता कल्प्यते, क्रियायाः शीघ्रतया सम्पन्नत्वेन तत्र निर्माणप्रक्रिया न दृश्यते । नैयायिकास्तु पीठरपाकवादिनः । तदनुसारेणानष्टस्यैव श्यामघटस्य पाकः । घटस्य मध्ये छिद्रा भवन्ति ततोऽग्निरन्तः प्रविश्य सम्पूर्णघटमेव रक्तं सम्पादयति। अनयोर्वादयोरुल्लेखो यथा -

निरंशपील्वोर्यदि योग इष्टो विलक्षणः स्याद् द्व्यणुकः प्रपञ्चः ।
अथांशवत्त्वं यदि पीलुजातेर्गतावतास्याः परमाणुताऽपि ।।
गुणस्तु शुक्लादिरुपैति कार्ये पीलोः प्रमाणान्नहि का च युक्तिः ।
निर्युक्तिकोऽयं परमाणुवादः परेऽपि वादाः सदृशा अनेन ।। (का.म.१६/८५-८६)

बौद्धा अपि परमाणुखण्डने परमाणुद्वयसंयोग एव न सम्भवति, कथं संयोगपरम्परया द्व्यणुकाद्युत्पत्तिः स्यादिति कथयन्ति -

न तदेकं न चाऽनेकं विषयः परमाणुशः ।
न च ते संहता यस्मात् परमाणुर्न सिद्ध्यति ।।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

षट्केन युगपद्योगात् परमाणोः षडंशता ।
षण्णां समानदेशत्वात् पिण्डः स्यादणुमात्रकः ।।

(विज्ञप्तिमात्रतासिद्धौ विंशतिकारिकायाम् ११,१२)

द्वयोः परमाण्वोः प्राच्यादिचतुर्दिक्षूर्ध्वमधश्च संयोगः स्यात् । षट्सु देशेषु संयोगात् परमाणोः षडंशा जाता । परमाणोरंशा न भवन्तीति कथनमेव प्रलापसदृशं जातमिति तत्राशयः । बौद्धानां क्षणिकवादोऽप्ययमुष्मै कवये न रोचते । तत्खण्डनं तु पूर्वमेवोक्तम् । तथैव लोकायत (चार्वाक) दर्शनस्याऽपि खण्डनमनेन कविना कृतम् -

अप्रत्यक्षन्न प्रमाणं वदन्तः प्रामाण्यञ्च स्वोक्तिषु स्थापयन्तः ।
शोकामोदौ पत्रिकातो दधाना वृद्धोक्षास्ते नैव सम्भाषणीयाः ।। (१६/८८)

विवर्तवादो वैयाकरणानां शब्दाद्वैतवादिनां वेदान्तिनां ब्रह्माद्वैतवादिनाञ्चेति । यथोक्तं वाक्यपदीये -

अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम् ।
विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः ।। (वाक्यपदीये १/१/१)

स च कवेरस्याभिमत एव । यथोक्तम् -

विवर्तमानञ्जगदीश्वरे तदनाद्यविद्याकृतविभ्रमेण ।
विद्याविलासेन विचार्यमाणमाभात्यधिष्ठानविशेषरूपम् ।।
सन्तः पुरूषार्थचतुष्टयं यद् वदन्ति तत्राऽप्यमृतं प्रधानम् ।
उत्कर्षनाशाप्रतियोगितायास्तत्सिद्धये तत्प्रयतेत विद्वान् ।। (का.म.१६/८९-९०)

तथा -

अस्त्येकमेवाऽखिललोकवल्लीकन्दं पदन्नात्र विवादमार्गः ।
अशक्यनिर्माणमिदं यदन्यैस्त्रैलोक्यपस्त्यं परिपश्यतैव ।।
नानाऽपि तन्नो यदनेककर्तृ जगद् यदि स्यान्नियतं न हि स्यात् ।
स्पर्द्धाविवादैरथवाऽनवस्था जायेत लोकस्य तथाऽव्यवस्था।। (तत्रैव १६/६८-६९)

मीमांसादर्शनन्तु कर्मैवेश्वरः कथयति । कर्मेति मीमांसका इति लोकोक्तिर्वर्तते । कर्मणाऽपूर्वरूपेण सर्वमभीष्टं स्वर्गं (मोक्षञ्च) लभन्ते जनाः, नास्ति कोऽपीश्वर इत्यादिकं मन्यन्ते केचिन्मीमांसकाः । मीमांसकसिद्धान्ते स्वमतभिन्नतां प्रकटयतः कवेरयमाशयो यत् कर्म जडम्, चेतनं विना जडं कर्म कथं प्रवर्तेत । जडस्य यानस्य कश्चिच्चेतनश्चालको भवति । तथा च कथं जडं कर्म प्रवर्तेत, कथञ्च फलं दातुं प्रभवेत् । किञ्च श्रुतिषु सृष्टिरीक्षणपूर्विका प्रतिपादिता - **सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम्, तदैक्षत बहु स्याम प्रजायेय** (छान्दोग्योपनिषदि ६/२/१) । तथा - **आत्मा वा इदमेक एवाग्र आसीन्नान्यत् किञ्चन मिषत् । स ईक्षत लोकान्नु सृजा इति** (ऐतरेयोपनिषदि १/१)। एतादृशीषु श्रुतिषु सतीष्वचेतनं कर्म करोतीति कथनं तथा सृष्टिप्रलयौ न स्तः, अनादिरेवाऽयं संसार इति कथनमनुपपन्नमेवेति कवेराशयः प्रतिभाति -

अचेतनन्तद् यदि वित्थ सृष्टिर्विशः कृमीणामिव चेतनानाम् ।
ईक्षान्वितां सृष्टिमुदाहरन्ती युक्तिः श्रुतिश्चाऽपि विरुध्यतेऽद्धा ।।
अचेतनं कर्म तथा प्रधानं पिल्वादि वा कर्तृ ततो न वित्थ ।
कियानसौ विक्रियते निरंशः कियान् प्रकृत्येति तु तुल्यदोषः ।। (१६/७०-७१)

गीतायां साङ्ख्ययोगदर्शनयोः समत्वमुक्तम् । साङ्ख्ये प्रकृतिरेव कर्त्री, ईश्वरो न स्वीक्रियते, योगे तु स्वीक्रियते

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

इत्येव भेदोऽन्यथा तु पञ्चविंशतिस्तत्त्वानि उभयोः स्वीकृतानि । तथा च -

साङ्ख्ययोगौ पृथग् बालाः प्रवदन्ति न पण्डिताः ।
एकमप्यास्थितः सम्यगुभयोर्लभते फलम् ।।
यत्साङ्ख्यैः प्राप्यते स्थानं तद् योगैरपि गम्यते ।
एकं साङ्ख्यञ्च योगञ्च यः पश्यति स पश्यति ।। (गीतायाम् ५/४-५)

एवञ्च साङ्ख्यस्योल्लेखेन योगदर्शनमपि गतं मन्तव्यम्, परमनेन कविना योगदर्शनस्याऽपि पृथग् विमर्शो विहितः। **योगश्चित्तवृत्तिनिरोधः** इति योगलक्षणं सूत्रे निहितम् । चित्तवृत्तिनिरोधरूपयोगस्य विमर्शाय कविरित्थमुपस्थापयति -

योगे वियोगे विपुलार्थराशेरहीनवाचः पुरुषा रमन्ते ।
यत्र स्थिताः किन्तु न चित्तवृत्तिः प्रपञ्चताद्या न विकल्पवादाः ।। (१/३१)

दुःखपङ्कनिमग्नस्य जगत उद्धारायाष्टादशविद्यास्थानेष्वभ्यर्हितस्यान्वीक्षिकीत्यपरनामधेयस्य न्यायशास्त्रस्य निर्माणमकरोत् परमकारुणिको मुनिर्गोतमः । तत्र च प्रथमसूत्रे **प्रमाणादीनां तत्त्वज्ञानान्निःश्रेयसाधिगमः** इति प्रतिपादयन् प्रमाणाधीना सर्वेषां व्यवस्थितिरिति प्रमाणतत्त्वस्य प्रथमं विवेचनं विहितं तेन मुनिवरेण । न्यायशास्त्रं तावद् द्विधा विभक्तुं शक्यते - प्रमेयप्रधानम्, प्रमाणप्रधानञ्च । पूर्वं वैशेषिकदर्शनन्यायदर्शनयोः प्रमेयप्रधानत्वं मन्तव्यम्, पश्चाद् गङ्गेशोपाध्यायेन प्रमाणप्रधानस्य न्यायशास्त्रस्य प्रवर्तनं विहितम् ।

गङ्गेशोपाध्यायस्य तत्त्वचिन्तामणिग्रन्थस्तदाश्रिताश्चान्ये न्यायशास्त्रस्य ग्रन्थाः प्रमाणप्रधाना एव । प्रमाणप्रधानो ग्रन्थराशिर्नव्यन्यायशब्देन व्यवह्रियते । तथा च प्राचीनन्यायदर्शने **प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि** इत्यस्मिन् सूत्रे निर्दिष्टानां प्रमाणानां चतुर्विधत्वं स्वीकृत्याचार्यवरेण गङ्गेशोपाध्यायेन प्रत्यक्षानुमानोपमानशब्दखण्डैर्मण्डितस्तत्त्वचिन्तामणिर्नाम ग्रन्थो रचितः । प्रमाणानां प्रामाण्यमनुमानेनैव साध्यमित्यनुमानस्यैव विस्तृतो गहनो विचारो विहितः ।

व्याप्तिविशिष्टपक्षधर्मताज्ञानमनुमितिस्तत्करणमनुमानम् इति कथयन् गङ्गेशः साधने साध्यस्य व्याप्तिज्ञानमेवानुमानमित्याशयं स्वीकरोति । तथा चानुमानज्ञानं व्याप्तिज्ञानाश्रितमिति बुध्यते । व्याप्तेः पञ्च लक्षणानि तत्त्वचिन्तामणौ पूर्वं निर्दिष्टानि तानि च विद्वत्समांजे व्याप्तिपञ्चकनाम्ना पञ्चलक्षणीनाम्ना च प्रसिद्धानि । तथा चानुमाने प्रतिज्ञाहेतूदाहरणोपनयनिगमानां पञ्चावयवानां प्रयोगो भवति । तत्र च पक्षसाध्यसाधनानां ज्ञानमपेक्षितं भवति । यथा - पर्वतो वह्निमान् धूमादित्यनुमाने साध्यो वह्निः, पक्षः पर्वतः, साधनम् धूमः । तत्र च साध्यसाधनयोर्व्याप्यव्यापकभाव आवश्यक इत्यनुमाने व्याप्तिसाध्यसाधनपक्षादीनां ज्ञानमावश्यकं भवति । किञ्च हेतोः पक्षसत्त्वम्, सपक्षसत्त्वम्, विपक्षासत्त्वमप्यनुमानायावश्यकम् ।

एवञ्च महाकविरयं सुकृतिदत्तः पण्डितो न केवलं न्यायदर्शनस्य किन्तु नव्यन्यायस्याऽपि धुरन्धरो विद्वानिति प्रतिभाति। यतस्तेन स्वकीयेऽस्मिन् महाकाव्ये उक्तम् -

आन्वीक्षिकी पण्डितमन्दिरेषु व्याप्तिप्रसङ्गेन वितायमानैः ।
वादैः ससाध्यैरपि वाद्यसाध्यैः सहेतुपाशैरपि हेतुमद्भिः ।।
त्रिधा सपक्षैश्च तथा विपक्षैः सपूर्वपक्षैस्सहमुख्यपक्षैः ।
या चन्द्रशालासु विनाद्यमाना पुरी सदाभ्यस्यति किन्नु तर्कम् ।। (का.म.१/२५-२६)

तथा च नव्यन्यायशास्त्रस्य मन्थनं विधाय तस्य सारभूतोंऽशः प्रत्युपस्थापितोऽत्रेति कथयितुं शक्यते ।

तथा चास्य काव्यं मधुवर्षि दार्शनिकचिन्तनैश्चास्य दीप्तिमत्वम् । अनेन कविना अजरामरताऽवश्यं प्राप्ता, कुशलवसुताऽप्यधिगतेति वक्तुं शक्यते यद्यपि बहुवक्तव्यं किन्तु विस्तरभयादत्रैव विरम्यते । ॐ शमिति ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

सन्दर्भसूची

१. कार्तवीर्योदयमहाकाव्यम् - सम्पादकः - डा. स्वामिप्रपपन्नाचार्यः (ने.रा.प्र.प्र.) ।

२. तत्त्वसङ्ग्रह - सम्पादकः - स्वामी द्वारिकादास शास्त्री, बौद्धभारती, वाराणसी ।

३. स्याद्वादमञ्जरी - लेखकः - मल्लिषेणसूरिः, भाण्डारमरप्राच्यविद्यासंशोधन, मन्दिरम् ।

४. भारतीयदर्शनम् - लेखकः - आचार्यबलदेवोपाध्यायः, शारदामन्दिरम्, काशी ।

५. साङ्ख्यप्रवचनभाष्यम् ।

६. साङ्ख्यतत्त्वकौमुदी - ईश्वरकृष्णः, वाचस्पतिमिश्रः, चौखम्भा संस्कृत सीरीज ।

७. योगसूत्रम् ।

८. वैशेषिकसूत्रोपस्कारः - शङ्करमिश्रः (आचार्यढुण्डिराजशास्त्री), चौखम्भा संस्कृत सीरीज ।

९. न्यायदर्शनम् - वात्स्यायमुनिकृतभाष्यसहितम् (जीवानन्दविद्यासागर, कोलकाता) ।

१०. वेदान्तपरिभाषा - वेङ्टाध्वरिः ।

११. ब्रह्मसूत्रशाङ्करभाष्यम् - परिमलकल्पतरुभामतीसहितम् - श्रीकृष्णदास संस्कृत सीरीज ।

१२. पञ्चदशी ।

१३. काव्यप्रकाशः - टीकाकारः - श्रीशिवराजाचार्यः, मोतीलाल बनारसी दास ।

१४. साहित्यदर्पणम् - खेमराज श्रीकृष्णदास, मुम्बई ।

१५. नैषधमहाकाव्यम् - चौखम्भा अमर भारती, वाराणसी ।

१६. रघुवंशमहाकाव्यम् - कालिदासग्रन्थावली, काशी हिन्दू वि.वि. ।

१७. हरिवंशपुराणम् - गीता प्रेस, गोरखपुर ।

१८. महाभारतम् - गीता प्रेस, गोरखपुर ।

१९. सुश्रुतसंहिता - सत्यभामाबाई पाण्डुरङ्ग निर्णयसागरमुद्रणालय, मुम्बई ।

२०. भगवद्गीता - गीता प्रेस, गोरखपुर ।

२१. श्वेताश्वतरोपनिषद् - गीता प्रेस, गोरखपुर ।

२२. ऋग्वेदसंहिता (भाष्यसहिता) वैदिक संशोधनमण्डलम्, पुने ।

२३. वायुपुराणम् - (आनन्दाश्रसंस्कृतग्रन्थावली, ४९) ।

२४. वाक्यपदीयम् - रघुनाथशर्मा (सं.सं.वि.वि., वाराणसी) ।

२५. विज्ञप्तिमात्रतासिद्धिः - सं.सं.वि.वि., वाराणसी ।

२६. शिवदृष्टिः - काश्मीरसंस्कृतग्रन्थावली (५४), काश्मीर, श्रीनगर ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

कार्तवीर्योदयमहाकाव्यस्य तन्त्रदृष्ट्याऽवेक्षणम्

- *प्रा. विद्यानाथ उपाध्यायः*

विद्वत्कुलतिलकैः पण्डितवर्यैः पन्तोपनामभिः श्रीसुकृतिदत्तपन्तमहोदयैर्विरचितस्य कार्तवीर्योदयमहाकाव्यस्य तन्त्रदृष्ट्यावेक्षणं हि प्रकृतप्रवृत्तेः प्रकृष्टं प्रयोजनं पुरतः समुपस्थाप्यते यथामति विद्यानाथोपाध्यायेनेति निवेदनम् ।

श्रीकृतवीर्यसूनोः कार्तवीर्येतिनाम्नातिप्रसिद्धस्य वीरातिवीरस्य अर्जुनदेवस्य चरितस्य वर्णनं समुद्दिश्य विरचितस्य कार्तवीर्यमहाकाव्यस्य प्रणेतारः पण्डितवर्याः स्वनामधन्याः पन्तकुलावतंसाः श्रीसुकृतिदत्तमहोदयास्तन्त्रशास्त्रस्य वेत्तारो भगवत्याः श्रीतारिणीदेवतायाः समुपासकास्तत्कृपालेशाधिप्राप्त्यै परमातुराश्चासन्निति तैर्महाकाव्यस्य प्रारम्भ एव विहिताभ्यां मङ्गलवाक्याभ्यां स्पष्टमवगम्यते ।

कृपापारावारोल्लसदमलकल्लोलसुभगा-
श्चतुर्वर्गस्तोमार्पणपणकृतामोङ्कृतिकलाः ।
हरब्रह्मादीनां प्रतिदिनमलङ्काङ्क्षिततराः
कटाक्षास्तारिण्या मम विदधतां विघ्नशमनम् ।। (१/१)

ग्रन्थादौ, ग्रन्थमध्ये, ग्रन्थान्ते च मङ्गलमाचरणीयमिति श्रुतिचोदिता अविगीतशिष्टाचारपरम्परा । समाप्तिकामो मङ्गलमाचरेदिति विधिवाक्यञ्च सदाचारपरम्परापरिप्राप्तकर्तव्यताकमित्यत्र लौकिकानां परीक्षणञ्च दृष्टिसाम्यम् । **प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्तते** इति दर्शनात् मङ्गलस्य द्विविधं फलमैहिकं दृष्टं सुखादिकम्, आमुष्मिकं चादृष्टं स्वर्गादिकम् । दृष्टे फले सम्भवति अदृष्टफलकल्पनाया अन्याय्यत्वाद् दृष्टफलान्वेषणमेव प्रकृतानुसरणम् । दृष्टं फलं चात्र ग्रन्थकर्तुः स्वारब्धग्रन्थस्य निर्विघ्ना परिसमाप्तिरेवेति तत्र विघ्नशङ्कया तच्छमनाय मङ्गलाचरणं देवतानमस्कारात्मकं तदाशीर्वादयाचनात्मकञ्च । यतो हि अविगीतशिष्टाचारविषयं मङ्गलमेव समापितफलकं विघ्नध्वंसद्वारकमिति निश्चप्रचम्। तदेवाविगीतशिष्टाचारमनुसरन्तो ग्रन्थकृतः श्रीसुकृतिदत्तपन्ताः स्वकीयग्रन्थस्य कार्तवीर्योदयमहाकाव्यस्य परिसमाप्तिकामनया विघ्नशमनाय मङ्गलमाचरन्ति - **कटाक्षास्तारिण्या मम विदधतां विघ्नशमनम्** । इति ।

विघ्नाधिप इति नाम्ना दुरितध्वंसायातिप्रथितः श्रीगणेशो लोके यद्यप्युपास्यस्तथापि श्रीतारायाः कृपाकटाक्षा मम विघ्नशमनं विदधतामिति ग्रन्थकर्तारस्तन्त्रदेवतां प्रार्थितवन्त इति तेषां तन्त्रदीक्षादीक्षितत्वं तान्त्रिकपरम्पराधिष्ठितत्वञ्च पुष्यते ।

तारा हि धर्मार्थकाममोक्षाख्यपुरुषार्थचतुष्टयप्रदायिनीति ब्रह्मोपेन्द्रमहेश्वरादिभिर्मन्त्रद्रष्टृभिः ऋषिभिश्च देवतासिद्धमानुषैः सदा साधितेति तन्त्रशास्त्रसिद्धान्तः । तदेवोच्यते ग्रन्थकर्तृभिः स्वकीयग्रन्थादौ विहिते मङ्गलवाक्ये ।

चतुर्वर्गस्तोमार्पणपणकृतामोङ्कृतिकलाः, हर-ब्रह्मादीनां प्रतिदिनमलङ्काङ्क्षिततरास्तारिण्याः कटाक्षा इति । श्रीताराया एव करुणापरिपूरितकृपाकटाक्षं विघ्नशमनाय संप्रार्थ्य प्रारब्धस्य स्वकीयमहाकाव्यस्य परिसमाप्तावपि पुनर्ग्रन्थकृद्भिर्देव्याः करुणयैव स्वकाव्यं परिपूर्णमिति निवेदितं काव्योपान्ते -

नागेन्द्रनेत्रनवभूमितविक्रमाब्दे वैशाखमासि सितपक्षतृतीयतिथ्याम् ।
श्रीकार्तवीर्य्यचरितोदितकाव्यमेतत् श्रीतारिणीकरुणया परिपूर्णमासीत्।। (१७/३५)

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

अथ च तैः स्वकाव्यं किञ्चित्प्रशस्य नानाविधकाव्योचितगुणौघैरलङ्कृता कार्तवीर्योदयाख्या कृतिः श्रीताराया एव चरणकमलयोः समर्पिता । यथा –

ब्रह्मोपेन्द्रगिरीशमुख्यविबुधैराराधिताङ्घ्रिद्वये
तारे शुद्धसुवर्णनिर्मितमिदं रीत्यादिसङ्गस्थितम् ।
उन्मीलन्मधुरध्वनि प्रतिपदं स्यूतं गुणौघैरलं
काव्यन्ते चरणेऽर्पयामि तदिदन्मञ्जीरवद् राजताम् ।। (१७/३३)

इत्येषाऽपि श्रीसुकृतिदत्तपन्तानां तन्त्रसाधनासाधकत्वेन तदीयकृतेः कार्तवीर्योदयमहाकाव्यस्य तन्त्रसाधनाप्रभाव-प्रभावितत्वञ्चेति विश्वासभूमिः ।

श्रीतारा, श्रीतारिणी वा द्वितीयमहाविद्यात्वेन साधकैर्मनीषिभिः, ब्रह्मादिदेवताभिः वशिष्ठादिमहर्षिभिः, सिद्धैश्चानेकैः सूपासिता इति तत्कृपाकटाक्षलेशेन सिद्धिस्तोममवाप्य इह लोके सुखं परत्र च कैवल्यं प्राप्तवन्तस्तत्साधनतत्पराः साधका इति तन्त्रवचनम् ।

श्रीताराया माहात्म्यं कुब्जिकातन्त्रे प्रकाशितम् –

कलौ कृष्णत्वमासाद्य शुक्लाऽपि नीलरूपिणी ।
लीलया वाक्प्रदा चेति तेन नीलसरस्वती ।।
तारकत्वात्सदा तारा तारिणी च प्रकीर्तिता । इति ।

तथैव अन्यत्र च प्रतिपादितम् –

दासगेहे च योत्पन्ना सती नाम्नेति कीर्तिता ।
कैवल्यदायिनी यस्मात्तस्मादेकजटा स्मृता ।।
तारकत्वात् सदा तारा लीलया वाक्प्रदानतः ।
नीलसरस्वती प्रोक्ता उग्रत्वादुग्रतारिणी ।। इति ।

श्रीताराया वाक्प्रदातृत्वं संसाराब्धितारकत्वं महद्वैशिष्ट्यञ्च संलक्ष्यैव सा ग्रन्थकृद्भिः स्वकाव्यादौ मङ्गलवाक्ये संस्तुता–

इन्दीवरच्छदकदम्बकसुन्दराङ्गं दोर्भिश्चतुर्भिरभिराजितमस्तभीति ।
ताराभिधानममलं हृदये चकास्तु त्रैलोक्यतापशमने प्रथितं महस्तत् ।। (१/२)

'उग्रापत्तारणाय स्वयं फलरूपा उग्रतारा माता नीलसरस्वती मेरोः पश्चिमे कूले चोलनाख्ये महति ह्रदे जज्ञे' इति स्वतन्त्रतन्त्रवचनम् । इत्थं भूतैस्तन्त्रवचनैः श्रीताराया उग्रापत्तारकत्वं वाक्प्रदत्वं कैवल्यदायकत्वं च प्रकाश्यते । तदेवोक्तं ताराभक्तिसुधार्णवेऽपि –

लीलया वाक्प्रदा चेयं तेन नीलसरस्वती ।
तारकत्वात्सदा तारा सुखमोक्षप्रदायिनी ।।
उग्रापत्तारिणी यस्मादुग्रतारा प्रकीर्तिता । इति ।

परब्रह्मस्वरूपिणी एकैवाद्वितीया भगवती श्रीतारा उपासकभाववैचित्र्यादेव साधकानां हितार्थाय अष्टधा प्रकाशिता। तच्चोक्तम् –

तारा चोग्रा महोग्रा च वज्रनीला सरस्वती ।
कामेश्वरी भद्रकाली इत्यष्टौ तारिणी स्मृता ।। इति ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

अङ्गभेदाश्च तस्या आगमरहस्ये प्रतिपादिताः –

आदौ तु स्पर्शतारा स्यात्ततश्चिन्तामणिः स्मृतः ।
ततः सिद्धिजटा प्रोक्ता उग्रतारा ततः परम् ।।
हंसतारा ततो देवि ! निर्वाणरूपिणी कला ।
महानीला महेशानि ! नीलशाम्भवरूपिणी ।।

तारादेव्या उपासना पूर्व–दक्षिण–पश्चिमोत्तरोर्ध्वाम्नायपञ्चके एव तन्त्रोक्तरीत्या विधीयते । तत्रापि आम्नायभेदेन तस्या मूर्त्तिभेदश्चिन्त्य एव ।

यथा **पूर्वाम्नाये** – स्पर्शतारा, चन्द्रघण्टा, घण्टिका, त्रैलोक्यविजया चेति । **दक्षिणाम्नाये** – चिन्तामणिः, सिद्धजटा, क्रूरमालिका, क्रूरचण्डा, महाचण्डा, वज्रतारा, मणितारा, ब्रह्मतारा, नारसिंही, चतुर्वेदोदरी चेति । **पश्चिमाम्नाये**– उग्रतारा, अष्टाविंशतिभेदान्विता हंसतारा चेति । **उत्तराम्नाये** – अष्टतारा । **ऊर्ध्वाम्नाये** – महोग्रतारा, महानीला, शाम्भवतारा, महानीला सरस्वती, चीनसरस्वती, नीलसुन्दरी, महानीलसरस्वती चेति श्रीताराया मूर्त्तिभेदा नामभेदाश्च सन्ति । अथ च **अधराम्नाये** – अत्रापि विशेषतो बौद्धैर्वज्रेश्वरी तारेश्वरीत्यादिनामभिः सदैव तारा उपास्यते इति श्रीतारायाः षडाम्नायसाध्यत्वं प्रकाश्यते तन्त्रशास्त्रेण ।

स्वयं चतुर्भुजो महाविष्णुः, श्रीताराया उपेक्षया महद्दुःखमवाप्य पश्चात्तदुपासनयैव स्वरूपमधिगतवान् । महर्षेर्वशिष्ठस्य श्रीताराया एव कारुण्येन तत्कृपालेशवशात् सिद्धिलाभः । देवतानामैश्वर्यप्राप्तिः ।

विशेषतः श्रीतारा हि –

वाचामीश्वरी भक्तकल्पलतिका सर्वार्थसिद्धीश्वरी ।
गद्यप्राकृतपद्यजातरचनासर्वार्थसिद्धिप्रदा ।।

इति विविधवैशिष्ट्यसंयुता भगवती तारा । 'तदुपासनेन साधकः कवितां विद्यां यथेच्छं लब्ध्वा सर्वशास्त्रार्थविद् भवेत्' इति तन्त्रशास्त्रवचनात् प्रकृतेऽपि कार्तवीर्योदयमहाकाव्यप्रणेतारः श्रीसुकृतिदत्तपन्ताः स्वाभीष्टकृतौ कार्तवीर्योदयमहाकाव्यस्य रचनायां सहस्रार्जुनचरितोद्गाने महत्साफल्यमवाप्तवन्त इति तन्त्रग्रन्थकृतां गद्यपद्यमयी वाणी मुखरिता सर्वेषामाह्लादकरी सञ्जातेति नात्र सन्देहलेशोऽपि ।

उक्तञ्च ताररहस्ये –

ब्रह्मा विष्णुरुमापतिस्त्रिभुवने सृष्टिं स्थितिं प्रालयं
ध्यात्वैनां जगदम्बिकां वितनुते मोक्षप्रदां तारिणीम् ।
भक्त्या तद्गतमानसो यदि जनस्तारां भजेद् यत्नतः
स क्षेमङ्करमेतदेव लभते तत्त्यागतो यात्यधः ।। इति ।

महाकविभिः सुकृतिदत्तपन्तमहाभागैरस्मिन् काव्ये यत्र तत्र भगवत्यास्तारायाः स्तुतिव्याजेन तदीयो महिमा प्रकाशितः। ब्रह्मविष्णुमहेश्वरवन्दितं तारायाश्चरणयुगलं मनोगतमन्धकारं नाशयतु इति याचमानाः कवयो वदन्ति –

लक्ष्मीपतीश्वरविरञ्चिकिरीटशाणप्राप्तप्रकाशनखरत्नविराजमानम् ।
स्वान्तान्तरालतिमिरं मम सन्धुनोतु श्रीतारिणीपदयुगं दययाऽवतीर्णम् ।। (१०/१)

महाकविभिः सुकृतिदत्तपन्तमहाभागैर्द्वादशसर्गे मङ्गलाचरणक्रमे निगमशीर्षसञ्चारिणी, समस्तभीतिविनाशिनी, दुःखत्रयविनाशिनी, परमात्मविहारिणी, जटामुकुटधारिणी, भुजगभारभारिणी, भगवती तारा प्रार्थिता, तदीयगुणाः प्रकाशिताः,

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

तदीयं स्वरूपञ्च समुन्मीलितम् -

पुरो भवतु तारिणी निगमशीर्षसञ्चारिणी
समस्तभयहारिणी निखिलदुःखसन्दारिणी ।
परेश्वरविहारिणी भवपयोधिसन्तारिणी
जटामुकुटधारिणी भुजगसम्भारभारिणी ।। (१२/१)

ब्रह्मविष्णुमहेश्वरसेविता विघ्ननाशिनी तेजोमण्डलमयी भगवती तारा महाकविभिरन्यत्र वन्दिता -

चतुर्भुजचतुर्वक्त्रपञ्चवक्त्रादिसंयुतम् ।
प्रत्यूहपटलच्छेदि महस्ताराभिधं नुमः ।। (१३/१)

शिवादिसेवितं तारिणीचरणपङ्कजं हृदि स्मृतमात्रं पापराशिविदारकं भवतीति ताराया वैशिष्ट्यं प्रकाशयन्तः कविवरास्तामित्थं प्रार्थयामासुः -

तारिणीपदपयोजमुज्ज्वलं सेव्यमानमनिशं शिवादिभिः ।
दुस्तराद्दुरितवारिराशितस्तारकं भवतु नः स्मृतं हृदि ।। (१४/१)

विघ्नव्यूहविदारिण्यः तारायाश्चरणकमलपरागकणिका मम शिरसि समासतामिति कविवराः प्रार्थितवन्तः -

श्रीताराचरणाम्भोजपरागकणिका मम ।
प्रत्यूहव्यूहशातिन्यो मध्येमौलि समासताम् ।। (१५/१)

महाकविभिरैहिकजीवनस्यावसानेऽहं तारिणीपदं प्राप्स्यामीति दृढो विश्वासोऽभिव्यक्तः -

पुत्रस्यास्य कनीयसो मम पुनः काव्याभिधानस्य च
ज्येष्ठाभ्यां मयि तारिणीपदगते दायः प्रदेयो ध्रुवम् ।
नित्यावेक्षणदुष्टतानिरसनाविघ्नप्रचारादिको
भूयाद्वां कुशलं सदाप्यविकलं सौभ्रात्रभाजोरिति ।। (१७/२८)

एतेन तेषां कविवराणां तारिणीसमुपासकता प्रमाणिता भवति । पुनश्च यथाऽहं महता परिश्रमेण महाकाव्यमिदं रचितवान् तथैवायासेनास्य परिशीलनकर्तरि जनेऽपि भगवत्याः तारायाः करुणादृष्टिपातः स्यादिति कामयन्ते कवयः -

मयीव परिशीलनश्रमयुतेऽस्य मर्त्यान्तरे
पतन्तु करुणादृशो भुवनतारिकाया द्रुतम् ।। (१७/३६)

स्वाभीष्टकृतिं महाकाव्यं समाप्य स्वसाफल्यं च तत् श्रीताराया एव करुणाकटाक्षप्रयोज्यमिति विश्वसमाना लोककल्याणाय षोडशसर्गान्ते महाकवयः श्रीतारां प्रार्थितवन्तः ।

या दत्तेऽमृतमर्थिने बुधगणायायासलेशं विना
श्रोतद्भूरिरसान् नवाङ्कविकलान् नाम्नापि पुष्णाति या ।
या प्राप्ता फणिहारमौलिपदवीं यास्ते त्रिनेत्राश्रिता
श्रीतारेश्वरमूर्तिरस्तु जगतां क्षेमाय सा सर्वदा ।। (१६/१२४) ।
इति शशधरं प्रत्याम्नाताः परस्परभारतीः
प्रमुदिततरं शृण्वन्तौ तौ सुखेन हि दम्पती ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

ललितललिताञ्चान्यां वार्तामुदाररसोदयं
समभिदधतौ क्षेमं लक्षं समासु विजह्रतुः ।। (१६/१२४-१२५)

सप्तदशसर्गान्ते च महाकवयः काव्यगतसकलदोषनिवारणाय भगवतीं तारां प्रार्थितवन्तः -

संवेशेक्षितकुम्भिकुञ्जशकलश्यामभ्रमोक्तिर्यथा
त्वद्रूपाध्यसितेऽत्र दोषगुणगा चर्चा मुधा यद्यपि ।
पौरोभाग्यमभाग्यतो बहुबुधः कश्चित्तथाप्याचरेद्
जागर्य्याज्जननि! त्वदीयकरुणापाङ्गोऽत्र दोषच्छिदे ।। (१७/३४)

श्रीसुकृतिदत्तपन्तमहोदया ! स्वकाव्यं लोकान् रञ्जयत्विति कामनां चक्रुः -

चिरञ्जयतु रञ्जयत्वलमिदं सुकाव्यं बुधान्
मुदैव वसुधातले भवतु मिष्टमिष्टन्नृणाम् ।(१७/३६)

श्रीकालिदासादिकविवृन्दस्येव समुज्ज्वलां कीर्तिं कामयमानाः श्रीसुकृतिदत्तपन्ता जगदुः -

श्रीकालिदासभवभूतिमुरारिमाघश्रीहर्षभारविमुखाः कवयोऽधुनापि ।
तिष्ठन्ति कीर्तिवपुषेति ममैष यत्नः तिष्ठामि कल्पममुना वपुषेह विज्ञाः ।। (१७/३२)

मयेदं काव्यं निजबुद्धिविशोधनाय कृतमिति भावं प्रकाशयामासुः कविवराः श्रीसुकृतिदत्तपन्तमहाभागाः -

यन्नामवामगुणधामसुरामकीर्तिरद्यापि भूमिवलयं विमलीकरोति ।
तस्यार्जुनस्य चरितं महितं यथाधि सङ्कीर्तयामि निजबुद्धिविशोधनाय ।। (१/३)

भगवतः कार्तवीर्यस्य सर्वज्ञतां सर्वशरीरव्याप्तिश्च निरूपयन्तो महाकवयः कथयन्ति -

थूर्वप्रजानां हृदि जातमात्रं सर्वज्ञतासर्वशरीरताभ्याम् ।
अकार्य्यमेतत्क्षण एव तासां पुरोभवन् किल्विषवृन्दतोऽथूः ।। (७/३३)

सिंहासनगतस्य राजसिंहस्य भगवतः कार्तवीर्यस्य हनुमदादिपरिवेष्टितां महिमान्वितां स्थितिं निरूपयद्भिः कविवरैरुक्तम्-

हेमाद्रिशृङ्गमिव तुङ्गतरं विचित्रं सिंहासनं समधिरोहति राजसिंहे ।
वामे प्रभञ्जनसुतस्थितिमाप पार्श्वे दक्षे गुरुश्च पुरतः कनकप्रभा स्तः ।। (१६/६३)

कार्तवीर्यस्य भगवतोऽष्टासु दिक्षु क्षेमङ्करीप्रभृतिभिः शक्तिभिः सम्पन्ना वीरा विलसन्ति । बाह्यभावे च कार्तवीर्योदयं कामयमाना इन्द्रादयो देवा विराजन्ते इति वर्णयन्ति कवयः -

अष्टासु दिक्षु जयशब्दमघोषयन्तः क्षेमङ्करीप्रमुखशक्तियुताश्च वीराः ।
बाह्ये पुरन्दरमुखा विबुधास्सहास्त्राः श्रीराजराजशुभचिन्तनतो व्यराजन्।। (१६/६४)

परं सर्वमिदं विनिवेद्याऽपि महाकवयः श्रीकार्तवीर्यसहस्रार्जुनदेवस्य तन्त्रसाधनासाध्यत्वविषये किमपि नैवोचुरिति चिन्त्यम् । श्रीकार्तवीर्यार्जुनो नृपो भगवतो विष्णोः सुदर्शनचक्रांशभूत इति तन्त्रेषु निर्देशो लभ्यते । यथा -

सुदर्शनस्यांशभूतः श्रीकार्तवीर्यार्जुनो नृपः ।
यः सुदर्शनचक्रस्यावतारः क्षितिमण्डले ।।

इति मेरुतन्त्रवचनात् स्पष्टम् ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

'सर्वेष्टसिद्धये ध्यायेत्कार्तवीर्यार्जुनेश्वरम्' इति वचनात् सर्वाभीष्टप्रद इति श्रीअर्जुनदेवः -

चौरमदविभञ्जनो मारीमदविभञ्जनः ।
अरिमदविभञ्जनो दैत्यमदविभञ्जनः ।।
दुःखनाशो दुष्टनाशो दुरितामयनाशकः ।

इति ध्यानपुरस्सरं तत्साधना शास्त्रेषु वर्णिता । इत्थं कार्तवीर्यार्जुनदेवस्य साधनं तन्त्रेषु प्रशस्तम् ।
कार्तवीर्यार्जुनयन्त्रं हि -

स्तम्भने पार्थिवै रौप्यैः शान्तौ वश्ये च तैजसैः ।
उच्चाटने वायवीयैर्विद्वेषे चापि नाभसैः ।।
मारणे तैजसैः क्षान्तौ वातैः पुष्टौ च पार्थिवैः । पूज्यमिति बोध्यम् ।

तेन साधकः -

साधकश्च सदैव स्यात्पुत्रवान् रोगवर्जितः ।
यशस्वी दीर्घजीवी च सकलत्रानुरञ्जकः ।।
वाक्सिद्धश्चापि तेजस्वी प्रतापी विजितेन्द्रियः ।
शत्रूपद्रवमापन्ने ग्रामे वा पुटभेदने ।।
संस्थापयेदिदं यन्त्रं वैरिभीतिनिवृत्तये ।

इत्यादिमेरुतन्त्रवचनैः कार्तवीर्यार्जुनदेवसाधनस्य माहात्म्यातिशयः प्रकाशितः ।

नमो भगवते श्रीति कार्तवीर्यार्जुनाय च ।
सर्वदुष्टान्तकायेति तपोबलपराक्रमैः ।।

इत्यादिवचनैः श्रीकार्तवीर्यार्जुनदेवो दुष्टप्रशमनाय, अरिविमर्दनाय, बलपराक्रमप्रवर्द्धनाय च उपास्यत इति सिद्धम् ।
सर्वैश्वर्यविधायकञ्च ध्यानं श्रीकार्तवीर्यार्जुनदेवस्य -

माहिष्मत्यां मन्त्रिमध्ये समासीनमलङ्कृतम् ।
नानासुरस्त्रीप्रवृत्तं सिंहासनगतं सदा ।।
बाहुभिः शरचापासिगदामुद्गरशूलकान् ।
भुशुण्डीपाशखेटादीन् दधतं सुप्रसन्नकम् ।।
परचक्रस्तेनराजभयं ध्यानमुदीरितम् । इति ।

अथ च

त्रैलोक्ये भीषणं ध्यायेदयुताश्वरथस्थितम् ।
गर्जन्तं प्रतिशत्रूँश्च सहस्त्रार्कसमद्युतिम् ।।
दोर्दण्डमण्डलैर्बाणान् क्षिपन्तं तीव्रधारकात् ।
नानायुधधरैर्युक्तं रथिभिश्च पदातिभिः ।।
गजयूथैरश्ववाहैः कुण्डलद्योतिताश्वकम् ।
ध्यात्वैवं प्राङ्मुखो भूत्वा सहस्त्रं नाशयेद् भयम् ।। इति ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

तन्मन्त्रजपमात्रं हि मन्त्रवीर्यप्रवर्द्धनम् ।
मन्त्रस्यास्य जपाद्देवि ! नष्टं द्रव्यं च लभ्यते ।।
हताश्चौरा भविष्यन्ति हृतं द्रव्यं च सिध्यति । इति तन्मन्त्रमाहात्म्यम् ।

अपरं चाद्वितीयं प्रकृष्टं माहात्म्यं कार्तवीर्यार्जुनमन्त्राणाम् । यथा -

पश्चिमाम्नायमन्त्रास्तु प्रोक्ताश्चारब्वभाषया ।
अष्टौ शतान्यशीतिश्च येषां संसाधनात्कलौ ।।
पञ्च खानाः सप्त मीनाः नव शाहा महाबलाः ।
हिन्दूधर्मप्रलोप्तारो जायन्ते चक्रवर्त्तिनः ।।
पूर्वाम्नाये नवशतषडशीतिप्रवर्त्तिनः ।
फिरङ्गभाषया मन्त्रास्तेषां संसाधनाद् भुवि ।।
अधिपा मन्दराणाञ्च संग्रामेष्वपराजिताः ।
इङ्ग्रेजा नव गद्याश्च लण्डनेष्वपि भाविनः ।।

वामाचारेण सिद्धिदा अर्जुनमन्त्राः, दक्षिणाचारफलदः कार्तवीर्यार्जुनः, वामाचारेण शूद्राणां लोके फलप्रदश्च तन्मन्त्र इति कार्तवीर्यार्जुनसाधनायाः प्राशस्त्यम्। कार्तवीर्यार्जुनदेवस्य प्रसादाय दीपविधिरपि फलदः क्षेमङ्करश्च साधकानाम् । यथा-

नित्यमेवं तु यो दद्यात्कार्तवीर्याय दीपकम् ।
शत्रवस्तस्य नश्यन्ति नात्र कार्या विचारणा ।।
व्याधयश्चाधयश्चैव विलीयन्तेऽचिरादपि ।
जीवेद् वर्षशतं मन्त्री पापानि क्षयमाप्नुयुः ।। इति ।

तत्रापि दीपानां ऋजुत्वेन वक्रत्वेन च साधकस्य शकुनाशकुने च विचार्येते । किमधिकेन श्रीकार्तवीर्यसाधना नानेकफलदा, किन्तु तत्साधनं गुरोराज्ञयैव तन्त्रोक्तविधिना विधेयम्, नान्यथेति शास्त्रमर्यादा ।

प्रकृते पण्डितवर्यैः सुकृतिदत्तपन्तमहोदयैः श्रीकार्तवीर्यार्जुनदेवस्य प्रोज्ज्वलं वीर्यप्रदं चरितं वर्णितं तत्पराक्रमगाथा च गीता स्वकीये कार्तवीर्योदयमहाकाव्ये इति देवानां सिद्धानां गुणानुवर्णनमपि तदुपास्तिरेवेयं कार्तवीर्यार्जुनदेवतायाः तन्त्रसाधनावर्णननैयून्यमपाकुरुते । श्री उदयनाचार्यवर्यैर्न्यायकुसुमाञ्जलौ उक्तञ्च -

स्वर्गापवर्गयोर्मार्गमामनन्ति मनीषिणः ।
यदुपास्तिमसावत्र परमामा निरूप्यते ।। इति । शम् ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

कार्तवीर्योदय-महाकाव्य-निहितशब्दस्मृति-विषयकानुसंहिति-सृतिः

- डा. टीकारामपन्थी

१. उपक्रमः

कार्तवीर्योदय-महाकाव्यस्य रचयिता तत्रभवान् शाब्दिकधुरन्धरः कविकुलकमलप्रभाकरः सुकृतिदत्तपन्तः काव्यस्यान्तिमे सप्तदशे सर्गे प्रथितयशःसुधीन्द्र-सुशोभित-स्ववंशपरम्परां वर्णयन् स्वस्यापि परिचयं प्रास्तौत्। तत्सर्गस्य श्लोकत्रयेण (श्लो. ८-१०) कविना स्वपिता भवदत्तपन्तो व्याकरण-साहित्य-दर्शनशास्त्रविदिति वर्णितः ~**नागाधीशवचोविशारदः** इति प्राथम्येनाभिधाय वैयाकरणवरेण्य इति स्वपिताऽभिमतः । तस्मिन्नेव सर्गे स श्लोकत्रयेण (श्लो. १७-१९) स्वमतुलनीयवैदुष्यवन्तं शाब्दिकं दार्शनिकं कवीन्द्रञ्च संघुष्य आत्मनो महिमातिशयं प्रादर्शयत् । तत्र पातञ्जलमहाभाष्यविदुदयनाचार्यशास्त्रप्रवीणः स्मृतिज्ञो भरतशास्त्रपारङ्गतश्च बुधो मदीयं काव्यमिदं पठितुं शक्नोतीति सुकृतिः समाघुषत् (श्लो. १७) । पुनः स (श्लो. १८) आह- एतत्काव्यगत-कतिपयपदयोजनासु एव देवगुरुर्बृहस्पतिर्मम तुलामधिरोहतु, परन्तु गुरोः प्रसादात् प्राप्तवैदुष्यस्य मम निबन्धगाढबन्धे स वाचस्पतिर्मम सादृश्यं प्राप्तुं कदापि न शक्नोति । अथ स कविः सुकृतिः कलियुगभवानां किं वा स्वसमकाल-भवानामन्येषां कवीनां काव्यानि जीर्णशुष्कघासतुल्यानीत्युक्त्वा उच्चैरुपाहसत् -

कलियुगजनुषां गिरः कवीनां सुकृतिरसौ मनुते जरत्तृणानि ।। (१७/१९) ।

सत्यमेवायं प्रथमतो वैयाकरणः, ततोऽन्यशास्त्रवित्, ततश्च कविरिति बोद्धव्यमस्माभिः । अनेन नागेशभट्टस्य परिभाषेन्दुशेखरे **परिभाषेन्दुशेखर-क्रोडपत्र** नाम्नी टीका लिखिता, सा चापूर्णास्तीति कोविदेभ्योऽवगम्यते । सुकृतेरपरः शब्दस्मृतिग्रन्थः **वृद्ध्याद्यष्टकविवृतिः** वर्तते । अयं ग्रन्थोऽपूर्णः प्रारम्भिकचरणे परित्यक्तः । ग्रन्थोऽयं साकल्येन मयाऽधीतः । अत्र शीर्षकानुसारिणी विवृतिर्नास्ति । व्याकरणदर्शनविषये नागेशमतखण्डने प्रवृत्तोऽयं ग्रन्थः परिहृतशीर्षकाशयः **पोटलिकामुद्वहन् ठिमीं गतः** इति नैपाललौकिकाभाणकं चरितार्थयति । ग्रन्थकारो ग्रन्थं लिखन् कतिचिद् दिनानि यावत् कमपि अंशं विलिख्य निवृत्त इत्यनुभूयते। ग्रन्थोऽयं वैयाकरणविदुषा माधवशरणोपाध्यायेन सम्पादितः प्रकाशनोन्मुखो वर्तते । शाब्दिकधुरीणेन सुकृतिदत्तपन्तेनास्मिन् ग्रन्थे प्रस्तुता विचाराः, अभिव्यक्ता नूतनास्तर्कपूर्णाश्च समीक्षा गुणस्तरयुक्ता उल्लेखनीया वस्तुतथ्यप्रकाशनपराः सन्ति । अत्र यदस्ति तदेव प्रज्ञोत्कर्षसंसूचीति इदमवश्यं वक्तव्यम् - गतसहस्राब्द्यां नैपालको वैयाकरणो विद्वान् नान्यः कश्चित् सुकृतिदत्तपन्तसदृश उपलभ्यते इति । अथ प्रकृतमनुसृत्य कार्तवीर्योदयमहाकाव्ये कविना सुकृतिदत्तेन अभिव्यक्ता व्याकरणशास्त्रसम्बन्धिनो विषयाः प्रस्तूयन्ते ।

२. वर्णोपदेशः

सुकृतिदत्तस्य कवेः समये तदीयजन्मभूजनपदेऽक्षरारम्भं कुर्वतां बालकानां वर्णपठनप्रक्रमे प्रचलिता

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

समाजव्यवहृतिः 'कखगघेति (कखहरा) पठतिः' इत्याकाराऽऽसीत् । यद्यपि कखगघतः पूर्वम् 'अ आ इ ई आदिस्वरवर्णाः शिक्ष्यन्ते' तथाऽपि जनव्यवहारः 'कखगघ (कखहरा) पठतिः' इत्येवासीत् । अयमेव व्यवहारः कविना कार्तवीर्यस्य अक्षरशिक्षणविषये प्रदर्शितः ।

सारदा त्रिभुवनेऽपि शारदा सोऽपठीत् कखगघेति विस्मयः । (५/५२) ।
सोऽपठीत् कखगघेति यत्पुनर्लोकशिक्षणमृते किमास तत् ।। (५/५३)

कविना सुकृतिना सप्तमसर्गे आद्यश्लोकाद् ५१ तमश्लोकपर्यन्तमवर्णादि-ज्ञवर्णपर्यन्तानां वर्णानां 'अ आ इ ई उ ऊ ऋ ॠ ऌ ॡ ए ऐ ओ औ अं अः क ख ग घ ङ च छ ज झ ञ ट ठ ड ढ ण त थ द ध न प फ ब भ म य र ल व श ष स ह क्ष ज्ञ' इत्येषां एकपञ्चाशत्सङ्ख्यकानामुपस्थापना कृता, तत्र श्लोकादौ श्लोकान्ते च स एव वर्णो विन्यस्तः । एतेन कविसमये कविजनपदे च बालका अक्षरारम्भे मातृकापाठरूपेण इमान् ५१ वर्णान् पठन्ति स्म । उदाहरणप्रदर्शने कविना दीर्घस्य ॠकारस्य प्रथमाविभक्तौ धातोरनुकरणेन भट्टोजीदीक्षितवचनमनुसृत्य 'कॄः' इति तथा ऌकारस्य ह्रस्वस्यापि तथैव 'गम्ऌ' इति प्रदर्शयता 'ॡ' इत्यस्योदाहरणम् (दीर्घाभावात्) 'कुमारधाल्ॡ' इति निदर्शितम् । ऐकारादि (७/१२) पद्योत्तरार्धे - '**भावेन भावान्तरयोग उक्तः शब्दस्मृतिज्ञैरपि तर्कविज्ञैः**' इत्यभिदधता कविना पदार्थसम्बन्धे शाब्दिकतार्किकाणां समानं मतं प्रदर्शितम् । 'ङ' वर्णादिश्लोके (७/२१) कविर्वदति - ङित्त्वम् धातु - (मृङ्, डीङ् आदि) गतमात्मनेपदार्थं भवति, तदेव ङित्वम् अङ्प्रत्ययगतम् 'अदर्शत्' इत्यत्र गुणविधानप्रतिषेधं कर्तुमशक्नुवन् निष्फलं भवति । ञकारादि (७/२६) पद्ये कविना ञिदन्तस्य आद्युदातत्त्वं परस्यानुदात्तत्वं प्रदर्शितम् । ठकारादिश्लोकोत्तरार्धे (७/२८) कविर्वदति- '**मूर्धन्यवर्णेन समं सवर्णः प्रीत्या तमाह स्म स वेदकण्ठः**' इति । णकारादिपद्ये (७/३१) कविराशेते 'यथा शैवः, गाङ्गः' इत्यादिषु लुप्तोऽण्प्रत्ययणकारः 'शिव + अ, गङ्गा + अ' इत्यवस्थायां स्मृत एव वृद्धेर्निमित्तं भवति, तथैव काव्यनायकस्य कार्तवीर्यस्य प्रजानां चरितं स्मृतमात्रं वर्धतामिति ।

इत्थं मातृकापाठानुसारी वर्णोपदेशः कविना ५१ श्लोकैः प्रस्तुतः । व्याकरणशास्त्रानुसारी वर्णोपदेशः कविना साकल्येन न प्रस्तुतः, अवर्णोपदेश एव शब्दशास्त्रमार्गो दर्शितः । पाणिनीयव्याकरण इव इन्द्ररुद्रादिशाब्दिक-व्याकरणेष्वपि अवर्णो विवृत एवोपदिष्टः । मातृकापाठे प्रसिद्धं मन्त्रागमज्ञैः शिक्षाशास्त्रे स्वीकृतं जनसमुदायेनोच्चार्यमाणं संवृतमवर्णं निराकुर्वन्तो वैयाकरणाः शब्दशास्त्रे विवृतमवर्णमेव न्यदधुः । कविना सुस्पष्टमयमाशयः प्रदर्शितोऽत्र (१६/१४-१५) ।

३. विशिष्टपदयोजना

सुललितपदविन्यासपक्षे दीर्घसमस्तपदविन्याससन्दर्भे व्याकरणगत-प्रक्रियानुसारि-पदप्रयोगसम्बन्धे च काव्यमेतद् विलक्षणं वर्तते । वर्णसमुदायावृत्तिः शब्दालङ्कारप्रयोगो वा काव्यस्यैतस्य मौलिकी विशेषता । अत एव सुकृतिः कविराह- कतिपयपदयोजनासु बृहस्पतिर्मम तुल्यतामधिरोहतु, प्रगाढ- प्रबन्ध-गुम्फने, ओजोगुणसन्दर्भे दीर्घसमास-वत्पदप्रयोगे न बृहस्पतिर्मम सादृश्यमुपैतुं शक्नोतीति । काव्यस्य प्रारम्भे एव शब्दालङ्कारलालित्यमित्थं दृश्यते ।

अस्ति प्रशस्तैर्विभवैः समस्तैः समस्तभूमण्डलमण्डनं सा ।
वस्वोकसाराधिकशारशारा माहिष्मती नाम पुरी सुरीतिः ।। (१/९) ।

सर्वत्रैव पदयोजनात्मिका रीतिरीदृशी दृश्यते । यथा -

अधुना मधुनातिसाधुना विधुनामात्यवरेण सीधुना ।। (९/१०२) ।
वरुणोऽतरुणो न दारुणः करुणश्चारुणसारथिप्रभे ।। (११/१०२) ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

इह सञ्चितशालभञ्जिका प्रविशच्चित्तविषादगञ्जिका
नरनाथमनोनुरञ्जिका समितिः शिल्पपदार्थपञ्जिका । (९/३२) ।
एतन्नृपालकरवालकरालकालप्रोत्तालफालगतनालशिरोऽवजालः
युद्धान्तरालगतवैरिविशालवर्गो बालप्रवाल इव सम्मृदितश्चचाल । (१२/५२) ।

अत्र 'आल' इत्यस्य त्रयोदशावृत्तयः सन्ति ।

अथ कतिपय-प्रयोग-वैलक्षण्यं दर्श्यते । क्वचिद् दीर्घकायक्रियापदानि प्रयुक्तानि - संशमयाम्बभूवतुः (२/७), आत्मसात्संप्रचक्रे (४/६५), पलायाञ्चक्रिरे (७/७८) । यङन्तप्रयोगाः - नरीनृत्यते (१२/२७) , पोप्लूयते (१५/६०), पोप्लूयमानाः (१५/६२), दन्दह्यमानः (१६/५८), इत्यादयः । परिबम्भ्रमीति (७/४३), चरिकर्ति (८/१) इत्यादयो यङ्लुगन्तप्रयोगाः, तथा पुत्रीयिताः (८/८), समलीकयेथाः (८/६०), कलुषयिष्यति (८/ ८४), कवलयति (११/५१), तुलयति (११/११२), तरलयति (११/१११), शर्वायिता (१२/११२), नदयन्ति (११/४६) इत्यादयो नामधातुप्रयोगाः सन्ति । सन्नन्तात् कृत्प्रत्ययं विधाय निर्मिताः शब्दा उल्लेख्याः सन्ति - प्रसिसृक्षुः (९/१५), विजिहीर्षुः (९/८५), पिपासितस्य (१०/१०), रिरमयिषुः (११/१९) प्रोद्दिधीर्षुः (११/ ३७), रिरंसा (११/६३), शुश्रूषवः (१२/११३), दिदृक्षितवती (१३/४३) रिरंसुः (१५/५२) । कृदन्तप्रयोगे क्तिन्नताः क्तान्ताश्च शब्दा यत्र तत्र बाहुल्येन दृश्यन्ते - नीतिरीतिमतियुक्ति- (३/३७), तिरोहिति- (४/३७), उत्थितिः (५/२३) -निरीतिभीतिरुतिभिरित्यादयः (७/५२) । गर्जित- वितर्जित-शीर्ण-जीर्ण-स्नपित-प्रभाजित-परीताः (४/१९), इत्येकपद्ये सप्त क्तान्ताः शब्दाः सन्ति । विरचय्य (९/७१), प्रापय्य (१२/५), प्रशमय्य (२/ ८), जीवग्राहमगृह्णात् (१५/१३०) इत्यादयो रमणीयाः कृदन्तप्रयोगाः सन्ति ।

तद्धितान्ताः शब्दाश्च कविना बाहुल्येन प्रयुक्ताः सन्ति । तिङन्तात् तरप्प्रत्ययेन निर्मिता ईदृशाः शब्दाः सन्ति - विदधेतराम् (६/५६), राजतितराम् (१२/७५), रुरुचेतराम् (१५/१४६), मुमुदेतराम् (१६/२८), रेजेतराम् (१७/७) । क्वचित् समानरूपा भिन्नार्थेषु विहितेन यप्रत्ययेन युक्ताः तद्धितान्तशब्दा दृश्यन्ते-

वैन्यसच्चरितसैन्यवियोगाद् दैन्यमाप धरणी बहुकालम् ।। (३/९)

अत्र वैन्य-सैन्य-दैन्यशब्दा भिन्नार्थकतद्धितान्ताः । तद्धितान्तः 'अदसीय' शब्दो यत्र तत्र दृश्यते - (७/ १५, ८/३८, ८/५२, ९/५५, ९/६१, ९/६७, ९/७२, ९/९४, ११/९६, १२/१३७)

इतच्प्रत्ययान्तशब्दा बहुधा प्रयुक्ताः सन्ति - कुसुमित- (६/५७, ६/६६)-विधुरित-(६/६२), कुटिलित-(६/७३, ६/८२)-धवलित (८/४३), सिताभ्रित-(६/३४), पताकित- (६/४९), रोमाञ्चकञ्चुकित- (८/७६)-विचित्रित-(९/५), कण्टकित-(९/७७), पवित्रित-(१४/२३) प्रभृतयः ।

काव्यमिदमोजोगुणभरितं समस्तशब्दसागरायितं वर्तते । समस्तशब्दप्रयोगो वर्णनातीतोऽस्ति । केवलमेकं पद्यमुद्ध्रियते -

नृत्यद्वाजिसुराजिराजितखुरक्षुण्णक्षितिक्षोदभू-
रेणुव्यूहनिबद्धमेघपटलीच्छन्नान्तरालांशके ।
भूभृद्वन्धुरसिन्धुरोद्धुरतरप्रत्यर्थिभूमीधरे
शस्त्राशस्त्रिमहाहवे विजयते सोऽयं महेन्द्राधिपः ।। (१२/१२१) ।

अत्र पादद्वये एकं समस्तपदमष्टादशपदानां विद्यते । तृतीयपादे एकमेव समस्तपदं विद्यते ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

४. शब्दशास्त्रीयप्रकरणदर्शनविषयाः

कविना सुकृतिना काव्येऽस्मिन् व्याकरणं (पाणिनीयव्याकरणम्) समुद्दिश्य व्याकरण-नागाधीशवचः-फणिपतिभणिति-शब्दस्मृति-शब्दशास्त्र-शब्दप्रपञ्च-प्रभृतयः शब्दाः प्रयुक्ताः । आधिक्येनायं शब्दस्मृति-शब्दं प्रयुङ्क्ते । यथा वेदमूलकस्मृतिषु स्मृतिशब्दः स्मृतेर्वेदमूलकत्वमनाद्यनन्तत्वं नित्यत्वं सूचयति, तथैव शब्दस्मृतिशब्दोऽपि व्याकरणं शब्दब्रह्मतत्त्वमनाद्यनन्तमक्षरात्मकत्वं निश्चिनोत्तीत्येव कवेरभिप्रायोऽवगम्यते । अस्मिन् महाकाव्ये परिसंख्यालङ्कारप्रदर्शनप्रसङ्गे प्रसङ्गान्तरे च शब्दस्मृत्यादिशब्दप्रयोगपूर्वकं प्रस्तुता व्याकरणशास्त्रसम्बन्धिनो विषया अत्र सर्गश्लोकाङ्कान् प्रदर्श्य प्रस्तूयन्ते ।

क) प्रथमसर्गे श्लोकद्वयेन (श्लो. २७, २८), उभयत्र शब्दस्मृतिशब्दप्रयोगपूर्वकं कविराह – यथा शब्दस्मृतौ (व्याकरणे) अनेकेषां धातूनां तन्निर्मितशब्दानामाख्यातपदानां व्युत्पन्नानाञ्च सत्ता, तथैव माहिष्मत्यां नगर्यामपि स्वर्णरजतादीनां धातूनां तन्निर्मितवस्तूनाञ्च सत्ता विद्यते । यथा कृधातुतः करोति, कर्ता, कारकः, कर्तव्यः, कृतिः, क्रिया, कृत्रिमम्, कर्तृत्वम्, कारकत्वम्, इत्यादयः शब्दा भवन्ति । तथैव, माहिष्मत्यां नगर्यां सुवर्णतः कटक-कुण्डल-ललन्तिका-मुद्रिकादीन्याभूषणानि निर्मीयन्ते इत्युभयत्र बहुधातुरम्यत्वं समानम्। एवं सप्तविंशतितमश्लोकेन उभयत्र समानतां प्रदर्श्य, अष्टाविंशतितमश्लोकेन कविनैवं भिन्नता प्रदर्शिता - शब्दशास्त्रे हि वृद्ध्या गुणः प्रतिषिध्यते, माहिष्मत्यां तु न तथा प्रतिषेधः, यतस्तत्र दयादाक्षिण्यादयो गुणा अपि सन्ति, धनधान्यादिसम्पदां वृद्धिरपि वर्तते । एवं शब्दशास्त्रे संबुद्धिं निमित्तीकृत्य गुणे - हे हरे, हे शम्भो, इत्यादिषु, संबुद्धिनिमित्तके ह्रस्वे हे नदि ! हे वधु, इत्यादिषु च सम्बुद्धिर्लुप्यते, परन्तु माहिष्मत्यां नगर्यां दयादाक्षिण्यादिगुणसमुदये, शारीरिककार्श्यदौर्बल्यादिसमुद्भवे च संबुद्धेः (मानवीयविशिष्टबुद्धेः) नाशो नैव भवति ।

ख) कार्तवीर्यकाव्यस्य नायको राजकुमारः कार्तवीर्यः परम्परानुसारेण साङ्गं वेदमध्यैत (५/६२) । स च गुरुणा प्रकृतिप्रत्ययविभागपूर्वकं वैदिकशब्देषु उदात्तानुदात्त-स्वरित-स्वरानध्यापितः (५/६६) ।

ग) पञ्चमसर्गस्थश्लोकत्रयेण (श्लो. ७६, ७७, ७८) सुकृतिना कविना कार्तवीर्यस्य व्याकरणाध्ययनसन्दर्भः समुपस्थापितः । तत्र तेनाधीतविषयाः स्पष्टमुल्लिखिताः । कवेर्मतानुसारेण कार्तवीर्यार्जुनसमये ऐन्द्रव्याकरणं माहेश्वरव्याकरणञ्चास्ताम् । ते द्वे एव अगाधसागरायिते अपरिमिते कार्तवीर्योऽधीतवान् । अनयोरध्ययनेन सम्यग्ज्ञानेन मानवानां देवसायुज्य(मोक्ष)प्राप्तिः सुलभा । तदानीमपि सूत्राणां वार्तिकानां तदर्थसंग्रहा-(व्याख्याना)दीनामध्ययन-समीक्षण-विवेचनादिभिः सर्वविधशङ्कासमाधानं क्रियते स्म। स मार्गः कार्तवीर्येण समाश्रितः । कार्तवीर्यश्च नामाख्यातादिपदानामध्ययनं कृत्वा वाक्यव्याकरणं कारकं समधीतवान् । सम्भवतः तदानीं कारका(वाक्यव्याकरणा)ध्ययनमन्तिमं मन्यते स्म । ऐन्द्र-माहेश्वर-व्याकरणाध्ययनविषये, व्याकरण-शास्त्रस्य ईशसायुज्यप्रदत्वे च तत्र कविरेवमाह -

इन्द्ररुद्रमुखनिर्मितं हितं शब्दशास्त्रममितं स दृष्टवान् ।
यद्विदामिह नृणां न दुर्लभं देवतापदयुगं प्रकीर्तितम् ।। (५/७६)

घ) परिसङ्ख्यालङ्कारप्रयोगप्रसङ्गे कविर्वदति -

साहित्यशास्त्रविदुषि व्यभिचारिदृष्टिर्वृत्त्यर्थविग्रहगिरः खलु शब्दशास्त्रे । (८/६४)

विशेषगुणविशिष्टे सज्जने भूपे प्रशासके सति तस्य राज्ये वृत्त्यर्थविग्रहवाक्यानि व्याकरणशास्त्रे समासप्रकरणे भवन्ति, न तु जनसमाजे । समासे परार्थाभिधानं वृत्तिः, वृत्त्यर्थावबोधकं वाक्यं विग्रहः, इति रीत्याऽध्यापनं भवति । समाजे पुनर्वृत्तिर्जीविका, तन्निमित्तं विग्रहः कलहः, स न भवति । सर्वे

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

जनाः स्वोचितां वृत्तिं प्राप्नुवन्ति । संप्रति नेपाले लोकसेवा-तोकसेवेति चर्चा श्रूयते, मन्त्रिणो हि स्वजनेभ्यस्तोकसेवामार्गेण वृत्तीर्ददति, एवञ्च लोकसेवाप्रतीक्षिणां तोकसेवावद्भिः सह विग्रहो भवति । अयमेव हि लोके वृत्त्यर्थविग्रहः । कार्तवीर्यसुराज्यवर्णनेऽपि कविना परिसंख्यालङ्कारे तथैव वर्णनं कृतम् - **वृत्तिर्नृणां विग्रहयुक् च शास्त्रे** । (१६/१०)

ङ) कविना सुकृतिना '**सुहृद्-दुर्हृदौ मित्रामित्रयोः**' इति एकेनैव लक्षणेन सुहृद्-दुर्हृद्पदनिपातनकारिणां तथा उपसर्गवशाद् विप्रादिवर्णननिपातनपराणां शाब्दिकानामुपहास एकेन पद्येन कृतः -

ये दुर्हृदश्च सुहृदं युगपन्निपात्य विप्रादिवर्णमुपसर्गवशान्निपात्य ।
शब्दप्रपञ्चरसिका इह साधयन्ति मा स्म प्रभुर्जगति तादृशसाधुंतम्यै ।। (८/८८)

च) कविना नायकस्य कार्तवीर्यस्य विवाहसन्दर्भे उपमारूपेण व्याकरणसाध्यप्रकृतिप्रत्यययोगः सन्दर्शितः। यथा प्रकृतिप्रत्यययोगेन सार्थकं निजरूपसम्पद्युक्तं व्युत्पन्नं पदं विधिसूत्रेण सम्पाद्यते, तथैव दैवशासनेन वधूवरयोः सार्थकं साधुतायुक्तं निजस्वरूपसंपद्विशिष्टं सङ्गतिपूर्णं युग्मकं सम्पद्यते -

प्रत्ययप्रकृतिवद् युवां विधेः शासनं समधिगम्य सङ्गतौ ।
प्राप्नुतश्च निजरूपसम्पदा सार्थकत्वमनुभूतसाधुतम् ।। (१०/४५)

छ) **उभयी प्रकृतिः कामे सज्जेदिति मुनेर्मतम्**
अपवर्गे तृतीयेति भणतः पाणिनेरपि ।।

इत्येतन् महाकविश्रीहर्षपद्यं स्मरताऽभ्यसता च कविना सुकृतिना एकस्मिन् पद्ये द्वितीया-तृतीयापदयोः, द्वितीय-तृतीयपदयोश्चेति प्रयोगचमत्कारः प्रदर्शितः, तत्पद्यार्थबोधे मस्तिष्कञ्च चक्रायते -

मन्ये द्वितीयामहमद्वितीयं मित्रं तृतीयार्थपयोधिपारे
विना तृतीयां प्रकृतिं द्वितीया प्रिया न कस्यास्ति युगे द्वितीये ।। (१०/१६) ।

द्वितीयाम् = भार्याम्, **तृतीयार्थपयोधिपारे** = धर्मार्थकाममोक्षार्थेषु तृतीयार्थः, कामसमुद्रपारे । **तृतीयां प्रकृतिं** = क्षीवम् । **द्वितीये युगे** = बाल्यात् परे वयसि, यौवने ।

ज) वैयाकरणा हि शब्दसाधुत्वासाधुत्वे जानन्ति ।

ते विवेचयन्ति - इमे शब्दाः, इमे अपशब्दा इति । न केवलं नाम्ना, उपाधिना वा वैयाकरणोऽहमिति डिण्डिमघोषं कुर्वता साधवोऽसाधवश्च शब्दा विविच्यते, किन्तु शब्दस्मृतिविदा आप्तेनैव शब्दानां साधुत्वासाधुत्वे निश्चीयेते । अयमर्थः कविना एकस्मिन् पद्ये प्रदर्शितः -

न चक्लृपे नाप्यपशब्दशङ्का शब्दस्मृतिज्ञैस्सहिते सदस्यैः ।। (१६/४०) ।

५. सन्दिग्धप्रयोगाः

तत्र भवान् कविवरः सुकृतिः शाब्दिकधुरीणः । तस्य प्रयोगेषु क्वचिदसाधुताऽपि लभ्येत इति अस्मादृशैरल्पप्रज्ञैर्नैव कल्पनीयम् । तथापि तदीयेऽस्मिन् महाकाव्ये प्रयुक्तान् काँश्चन सन्दिग्धान् प्रयोगान् संवीक्ष्य आस्माकस्थूलबुद्धौ काचन शङ्का जागर्तीति त्रिचतुरास्तथाविधाः प्रयोगाः प्रस्तूयन्ते

क) **याचितोऽपि न भुनक्ति सादरं**
निर्दरं हरति चादनीयकम् ।। (५/४४)

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

अत्र काव्यनायकः कार्तवीर्यः क्रीडासक्तो बालकः प्रार्थितोऽपि भोजनं न करोतीति वक्तव्ये 'न भुनक्ति' इति प्रयोगः । 'भुजोऽनवने' इति पाणिनीयसूत्रानुसारेण 'भुङ्क्ते' इति आत्मनेपदप्रयोगः साधुर्भवति।

ख) **पुत्रं विनीतमपि शास्तुमनाः कदाचित् । (८/४६)**

अत्र 'शास्तुमनाः' इति अस्मादृशां स्थूलप्रज्ञां नाधिरोहति । 'शासितुमनाः' इति सेट्कशब्द एव स्थूलधीभिर्विज्ञायते । 'आगमशास्त्रमनित्यम्' इत्युच्यते चेदन्या वार्ता ।

ग) **सन्तः पुरूषार्थचतुष्टयं यद् । (१६/९०)**

अत्र 'रू' दीर्घः प्रयुक्तः । स च विचारणीयः ।

घ) **अनाहुतः स्वां पुरमाप जिष्णुः । (१४/१०२)**

'ह्वा' धातोः क्तप्रत्यये- 'अनाहूतः' इति साधुः। 'अनाहुतः' इति ह्रस्वप्रयोगः कथम् ? 'हु दानादनयोः' इति धातो रूपमिदमिति चेदास्ताम् ।

६. स्फोटवाद-शब्दब्रह्मवादः

कविवरः सुकृतिः काव्यमिदं दशमसर्गान्तपद्ये 'सत्स्फोटवादानुजम्' आघुषत् । शाब्दिकपरम्परायां स्फोटः सर्वशब्दार्थोभयरूपो निर्विकारो निरवयवो हृदयाकाशस्थः प्रणवरूपः शब्दब्रह्मात्मकः । शब्दब्रह्म एव सर्वप्रपञ्चकारणं विवर्तोपादानमनाद्यनन्तं निर्विकारमिति शाब्दिकाः । 'ओङ्कार एव सर्वा वाग्' इति श्रुतिः । ओमित्येतदक्षरमिदं सर्वम्' इति माण्डूक्योपनिषद् । 'अकार एव सर्वा वाग्' इत्यपि पाठः । तत्र अकारः परब्रह्मात्मको वाच्यरूपः, अकारोऽपरब्रह्मात्मको वाचकरूपः । एवमोङ्कारस्यैव वाच्यवाचकता वा अकारस्यैव वाच्यवाचकता कविना सुकृतिना स्वीकृता । वर्णमालाया आदिमोऽवर्णो वाचकः, तद्भिन्नः शब्दब्रह्मरूपः 'अः' वाच्य इति कवेर्मतं दृश्यते -

निराकृतो वर्णगणादवर्णः संस्थापितो मुख्यतयापि तत्र ।
विशेषविज्ञेन कथन्नृपेण मन्येऽक्षरत्वेन स शब्द्यते स्म ।। (१६/१४)

उत्पादविनाशरहितं शब्दब्रह्म यदक्षरं तदेव घटाद्यर्थरूपेण विवर्तते इति शब्दब्रह्मवादिनो वैयाकरणाः ।

अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम् ।
विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः।।

इति भर्तृहरिः । कार्तवीर्योदयमहाकाव्यस्य रचयिता कविः सुकृतिश्च विवर्तवादं स्वीकृतवान् । शब्दात्मकं वाग्रूपं ब्रह्म विवर्तते इति स्पष्टं तु नोक्तम्, जगदीश्वरविवर्तवादस्तेन समुल्लिखितः -

विवर्तमानञ्जगदीश्वरे तदनाद्यविद्याकृतविभ्रमेण ।
विद्याविलासेन विचार्यमाणमाभात्यधिष्ठानविशेषरूपम् ।। (१६/८९) ।

ब्रह्मविवर्तवादिभिर्वेदान्तिभिर्ब्रह्माद्वैतवादः स्वीक्रियते, शब्दब्रह्मविवर्तवादिभिः शाब्दिकैः शब्दब्रह्माद्वैतवादः स्वीक्रियते । सुकृतिश्च शाब्दिकः साधुरवगन्तव्यः ।

७. उपसंहारः

काव्यमिदं १९२८ तमवैक्रमाब्दे वैशाखमासे समापितमिति स्फुटमुक्तं कविना (१७/३५)। समाप्तेः पश्चात्

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

१२० वर्षेषु व्यतीतेषु २०५१ तमवैक्रमाब्दे स्वामिप्रपन्नाचार्यस्य संपादने नेपालराजकीयप्रज्ञाप्रतिष्ठानेनेदं प्रकाशितम्। लिप्यन्तरकरणे सञ्जाता अशुद्धयः साकल्येन न निःसारिता अत्र। अतोऽवशिष्टा वर्णपदसम्बद्धा अशुद्धयः शोधनीयाः, सति संभवे मल्लिनाथीयशैल्या व्याख्या विधेया । पुनर्मुद्रणं कार्यम् । भारतीयाः शर्मण्यादिदेशस्थाश्च संस्कृतविद्वांसः काव्यमिदं पठन्तु । एतत् काव्यमाकल्पं विद्वांसः पठिष्यन्ति, अहञ्च कीर्तिशरीरेण जीविष्यामीति कविः सुकृतिरवदत्- (१७/३२) । कवितां संबोध्य कविना काव्यान्ते स्वपुत्रो बृहस्पतिदत्तः कवितासेवाकुशलः संवर्णितः -

अथवास्ति सुतो बृहस्पतिः परिचर्याकुशलस्तवाधुना । (१७/२७)

कालिदास-भारवि-माघ-श्रीहर्षादिपुरातनकविशैलीतो भिन्नशैलीविशिष्टं विलक्षणं शब्दालङ्कारसंपद्विशिष्टमतुलनीयोजो-गुणसंपूर्णञ्चेदं काव्यं संस्कृतकाव्यप्रणयिनां सुधियां विश्वस्य कोणे कोणे स्थितानां पुरः प्राप्नोत्विति सर्वैरस्माभिश्चिन्तनीयं प्रयतनीयञ्चेति शम् ।



Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

कार्तवीर्योदयस्थविषयाणां पौराणिकसन्दर्भाः

- प्रा.डा. वावुरामपोख्रेलः

आमुखम्

वेदार्थादधिकं मन्ये पुराणार्थं वरानने ।
वेदाः प्रतिष्ठिताः सर्वे पुराणेष्वेव सर्वदा ।। (नारदीयपुराणे २/१४१०७)

कृष्णातटे नेपालस्य वाग्लुङजनपदे प्रादुर्भूतेन विलक्षणेन विचक्षणेन शास्त्रकविना सुकविना सुकृतिदत्तपन्तेन कार्तवीर्योदयाख्यं महाकाव्यं व्यरचीति विपश्चिद्भिर्विदितो विषयः । पौराणिकं कथावस्तु गृहीत्वा प्रणीतस्यास्य महाकाव्यस्य पुराणात्मकता स्वतः सिद्धा । पौराणिकधरातले प्रणीतं कार्तवीर्यसम्बन्धि नेदमेव एकं महाकाव्यम्, अपि तु कार्तवीर्यार्जुनावदानम्, कार्तवीर्यार्जुनचरितम्, कार्तवीर्यविजयप्रबन्धः, रावणार्जुनीयम्, कार्तवीर्योदयम्, हैहयविजयम्, अर्जुनाभ्युदयम्, कार्तवीर्यार्जुनविजयप्रबन्धश्चेत्यनेकानि महाकाव्यानि काव्यानि च पुराणधरातले सुकविभिर्निर्मितानि सन्ति । पुराणप्राणायामस्यां कृतौ आवश्यकानि जीवनतत्त्वान्यपि पुराणमयानि सन्ति । स्वयं कविना कथितम् - '**भरतवचनभारतोक्तिविज्ञो मम कृतिदर्शनमेतु विद्वान्**' इति ।

पुराणानि नाम मानवव्यक्तित्वविकासाय सारस्वतपुरुषैः प्रणीतानि सार्वकालिकसार्वदेशिकौचित्यसंवलितानि ग्रन्थरत्नानि। यत्र सदाचारपरिपाटीपुष्ट्यै विचारपरिपाटीसमृद्धये च भयङ्करमनोरञ्जकयथार्थकथागुणैरोतप्रोता विषयाः पुराणकारैः प्रस्तुता भवन्ति ।

कार्तवीर्योदयमहाकाव्ये पदे पदे पाठकचित्तद्रुतये पुराणैः प्रस्तुतानां कथापात्राणां प्राचीनघटनानाम्, स्थानविशेषाणां वस्तुविशेषाणाञ्च चर्चा लभ्यते । विचारपत्रेऽस्मिन् कार्तवीर्यस्य पौराणिकसन्दर्भाणां पूर्वसङ्केतेन साकं तेषां तत्तत्पुराणप्रसङ्गैः प्रमाणीकरणाय प्रयत्यते ।

१. मन्दाकिनी

यद्यपि सम्प्रति भारतस्योत्तराञ्चले वर्तमानाद् केदारतीर्थाद् रुद्रप्रयागपर्यन्तमागत्यालकनन्दया सहैक्यमाप्नुवन्ती नदी मन्दाकिनीति प्रसिद्धा । परं पौराणिकदृष्ट्या विलोकने गङ्गैव दिवि मन्दाकिनीति प्रथां लभते इति निश्चीयते ।

कार्तवीर्योदयमहाकाव्ये मन्दाकिनी कविनाऽधोनिर्दिष्टया दिशा संस्मृता वर्तते -

देवाङ्गनाकरलतापतिताश्च लाजा मन्दारजास्सुमनसश्च विशुद्धवर्णाः ।
मन्दाकिनीगलितनिर्झरसन्निकाशा भूमीपतेरधिगृहं युगपन्निपेतुः ।। (८/२९)

श्रीमद्भागवते सैव मन्दाकिनीत्थं वर्णिता वर्तते -

यस्यामलं दिवि यशः प्रथितं रसायां भूमौ च ते भुवनमङ्गलदिग्वितानम् ।
मन्दाकिनीति दिवि भोगवतीति चाधो गङ्गेति चेह चरणाम्बु पुनाति विश्वम् ।।

महाभारतेऽपि मन्दाकिनी- वनपर्वणि८५/५८, भीष्मपर्वणि ९/३६, अनुशासनपर्वणि च २५/२९ वर्णिता वर्तते।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

२. भागीरथी

कार्तवीर्योदयमहाकाव्ये रेवावर्णनविधौ भागीरथी कविना रेवामहत्त्वप्रदर्शनाय वर्णिता -

कथा भागीरथ्या जगति बहुपथ्यापि न तथा
सतां रथ्यामध्ये विलसति कलिन्दाचलभुवः ।
भवेद्वार्ता का वा हरदयितरेवास्तुतिपदैः
त्रिलोके संव्याप्तेऽर्जुनपुरि सदेयं विजयते ।। (१/२१)

पुनश्च सुकृतिना सुकविना कार्तवीर्योदयमहाकाव्यस्य द्वादशसर्गे पाटलीपुत्रवर्णनविधावपि गङ्गा नदी ब्रह्मद्रवत्वेन संस्मृता -

एतत्पुरीपरिसरं सुपरिष्करोति गङ्गाभगीरथरथानुपथप्रयाता ।
यां वेद वेदनिपुणो विधिरादरेण ब्रह्मेति सर्वजनतादयया द्रवात्तम् ।। (१२/८४)

श्रीमद्भागवते पञ्चमस्कन्धस्य सप्तदशेऽध्याये भागीरथ्या विवरणमुपलभ्यते । यथा - तत्र भगवतः साक्षाद्यज्ञलिङ्गस्य विष्णोर्विक्रमतो वामपादाङ्गुष्ठनखनिर्भिन्नोर्ध्वाण्डकटाहविवरणेनान्तः प्रविष्टा या बाह्यजलधारा तच्चरणपङ्कजावनेजनारुणकिञ्जल्को परञ्जिता .... । ततोऽनेकसहस्रकोटिविमानानीक-सङ्कुलदेवयानेनावतरन्तीन्दुमण्डलमावार्य ब्रह्मसदने निपतति ।

एवञ्च - नवमस्कन्धस्य नवमेऽध्याये राज्ञो भगीरथस्य चरिते गङ्गावतरणविवरणं चोपलभ्यते -

रथेन वायुवेगेन प्रयान्तमनुधावती ।
देशान् पुनन्ती निर्दग्धानसिञ्चत् सगरात्मजान् ।।

विष्णुपुराणे चतुर्थांशे सप्तमेऽध्याये - सोमवंशोद्भवेन राज्ञा जह्नुना कृतस्य गङ्गापानस्य कथोपलभ्यते ।

स्कन्दपुराणे - काशीखण्डस्य सप्तविंशतितमेऽष्टाविंशतितमे एकोनत्रिंशत्तमेऽध्याये च गङ्गामहिम्नः सविस्तरं वर्णनं विद्यते -

अलक्ष्मीः कालकर्णी च दुःस्वप्नो दुर्विचिन्तनम् ।
गङ्गागङ्गेतिजपनात् तानि नोपविशन्ति हि ।।
गङ्गा हि सर्वभूतानामिहामुत्रफलप्रदा ।

गरुडपुराणे ५४, ५५, ५६ अध्यायेषु द्वीपादिवर्णनप्रसङ्गे भागीरथ्या धूतपापेति अभिधानेन वर्णनं जातम् ।

३. मुचुकुन्दः

कार्तवीर्योदयमहाकाव्ये माहिष्मतीपुरीवर्णनप्रसङ्गे यादवशिरोमणिना मुचुकुन्देन एषा पुरी निर्मितेति वर्णनं जातम् -

ऋक्षवन्तमभितो धराधरं यादवाग्रमुचुकुन्दनिर्म्मिता ।
भूरिजिष्णुगुरुसौम्यसेविता सा पुरी विजयतेऽमरावतीम् ।। (१/२२)

श्रीमद्भागवतस्य दशमस्कन्धस्योत्तरार्द्धस्य एकपञ्चाशत्तमेऽध्याये इक्ष्वाकुकुलभूषणस्य मुचुकुन्दस्य राज्ञश्चरितं सविस्तरं वर्णितम् ।

४. कृतवीर्यः

कार्तवीर्योदयमहाकाव्ये माहिष्मतीपुराधीशत्वेन सुशासकत्वेन च राज्ञः कृतवीर्यस्य विस्तृतं वर्णनं जातम् ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

तादृशमेकं पद्यं यथा -

अथ तत्र समस्तवस्तुभिर्महितायाञ्जनताहिताशयः ।
कृतवीर्य इति प्रथाङ्गतो बहुवीर्यो धरणीश्वरोऽभवत् ।। (२/१)

पुराणेष्वपि विभिन्नस्थानेषु कृतवीर्यसम्बद्धानि विवरणानि लभ्यन्ते । यथा -

क) विष्णुपुराणस्य चतुर्थेऽशे एकादशेऽध्याये महाराजस्य कृतवीर्यस्योपाख्यानं समुपलभ्यते - '**...... कृतवीर्यादर्जुनस्सप्तद्वीपाधिपतिर्बाहुसहस्रो जज्ञे ।**'

ख) श्रीमद्भागवते नवमस्कन्धस्य पञ्चदशेऽध्याये परशुरामकर्तृकः कार्तवीर्यवधप्रसङ्गः प्राप्यते । तत्र कृतवीर्यपुत्रः कार्तवीर्यो हैहयकुलपतित्वेन वर्णितः ।

५ कार्तवीर्यचरितम्

कार्तवीर्योदयमहाकाव्यं स्वयं कार्तवीर्यस्य पावनेन चरितेन समनुप्राणितमिति एतच्चरितं महाकाव्यस्य मुख्यो विषयः । अस्य कार्तवीर्यस्य विषये विशेषेण ब्रह्माण्डपुराणस्य मध्यभागे उपोद्घातपादे वर्णनं लभ्यते ।

६. धार्तराष्ट्राः

कार्तवीर्योदयमहाकाव्ये प्रथमसर्गे माहिष्मतीवर्णनप्रसङ्गे महाभारतेन साकं माहिष्मत्या तुलनायां धार्तराष्ट्राणामुल्लेखो जातः । यथा -

कर्णान्तविभ्रान्तनितान्तकान्तकृष्णार्जुनाक्ष्युक्तिसुशोभमाना ।
सा धार्तराष्ट्रक्षयसूचिनी च सद्भारती भारतगेव भाति ।। (१/४१)

विभिन्नपुराणेषु विशेषेण महाभारते च धार्तराष्ट्राणां प्रभूता चर्चा लभ्यते -

क) श्रीमद्भागवतस्य तृतीयस्कन्धे प्रथमेऽध्याये धार्तराष्ट्राणां क्षयो वर्णितः । स एव प्रसङ्गः कार्तवीर्योदयकाव्यस्य प्रथमसर्गे सङ्केतरूपेणोद्धृतः ।

ख) महाभारतस्य आदिपर्वणि, सभापर्वणि, वनपर्वणि, कर्णपर्वणि तथा चान्येषु पर्वसु बहुत्र धृतराष्ट्रस्य दुर्योधनादिधार्तराष्ट्राणां च विस्तृतं वर्णनमुपलभ्यते । किं बहुना महाभारतं तु श्रीकृष्णस्य पाण्डवकौरवाणां चेतिहासः ।

७. धार्तराष्ट्रपदविषये भागवतेन साम्यम्

किञ्च कार्तवीर्योदयमहाकाव्यस्य पाञ्चालिकाकेशविकर्षिधार्तराष्ट्रातिरुष्यद्भरताग्रसंसत् इति पद्येन-

यदा सभायां कुरुदेवदेव्याः केशाभिमर्शं सुतकर्मगर्ह्यम् ।
न वारयामास नृपः स्नुषायाः स्वास्रैर्हरन्त्या कुचकुङ्कमानि ।। (भा.तृ.स्क. १/७)

इत्यस्य भागवतपद्यस्य साम्यं दृश्यते ।

८. दत्तात्रेयः

अत्रिपुत्रस्य दत्तात्रेयस्योपाख्यानं श्रीमद्भागवतैकादशस्कन्धस्य सप्तमेऽध्याये चतुश्चत्वारिंशतपद्यैः संस्तुतं विद्यते । महाकविना सुकृतिदत्तसूरिणा दत्तात्रेयस्योपाख्यानं पौराणिकं प्रसङ्गमादाय स्वकाव्ये -

नरपतिरभिपेदे दत्तनाम्नो महर्षेरखिलभुवनवन्द्यं क्षेममधामाश्रमं सः । इत्याकलितमनुमीयते ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

९. रामायणकथाप्रसङ्गः

कार्तवीर्योदयग्रन्थकारेण कविना स्वकीये काव्ये रामचरितस्य सङ्क्षिप्तः सङ्केतः कृतः ।

क) श्रीमद्‌भागवतस्य नवमस्कन्धस्य दशमाध्यायस्य रामचरितस्योपजीव्यतामादाय -

रामाभिख्याप्रतिपदलसत्पद्यका सद्वनान्त-
भ्रान्तश्रान्तप्रियवचनकृल्लक्ष्मणा सारसाद्या ।
कान्तारागस्थकथनपरा सर्गकाण्डातिचार्वी
वल्मीकाग्रप्रभवसुधियः सा कृतेः साम्यमाप्ता ।। (१/४४)

इति पद्यं रचितम् । पद्यञ्चैतदधोनिर्दिष्टस्रोतोभिः प्रभावितं दृश्यते ।

ख) विष्णुपुराणस्य चतुर्थांशस्य चतुर्थेऽध्याये वर्णितस्य श्रीरामस्य चरितमादाय,

ग) वाल्मीकीयं रामायणं तु रामचरितवर्णनपरक इतिहासः । तदीयं कथावस्तु आदाय,

घ) गरुडपुराणस्य पूर्वखण्डे वर्णितं रामकथाप्रसङ्गमादाय कविना सुकृतिदत्तपन्तेन कार्तवीर्योदयमहाकाव्ये श्रीरामचरितं सङ्केतितमित्यनुभूयते ।

१०. अत्रिः - अनुसूया च

कार्तवीर्योदयमहाकाव्येऽनुसूयाया अत्रेश्च श्रद्धासिक्तैर्वचनैर्वर्णनं कृतम् । यथा -

जन्मनः प्रभृति चानुसूयया तालितं हृदयहारि जन्मिनाम् ।
तस्य दर्शनमुपेयिवान्नृपो दण्डवत्प्रणिपपात पादयोः ।।
अत्रिजातशिशिरामलपादस्पर्शसौख्यमनुभूय महीन्द्रः ।
सोऽतिवेलमुदितो निजदेहे नो ममौ जलधिवच्च तदानीम् ।। (३/३-४)

अत्रेरनुसूयायाश्च विषये विभिन्नपुराणेषु वर्णनानि लभ्यन्ते महाकाव्यगतसम्बद्धचर्चायाः पोषकाणि । तानि क्रमशोऽत्र निर्दिश्यन्ते -

क) विष्णुपुराणस्य चतुर्थांशस्थषष्ठेऽध्याये ब्रह्मणो मानसपुत्रस्यात्रेर्वर्णनं विद्यते । '**अखिलजगत्स्रष्टुर्भगवतो नारायणस्य नाभिसरोजसमुद्भवस्याब्जयोनेर्ब्रह्मणः पुत्रोऽत्रिः ।**'

ख) श्रीमद्भागवतानुसारेणापि ब्रह्मणः पुत्रोऽत्रिरभवदिति ज्ञायते ।

ग) वाल्मीकीयरामायणस्यायोध्याकाण्डस्य ११७ तमे सर्गे अनुसूयाऽत्रिभ्यां कृतस्य सीतारामयोः सत्कारस्य रुचिरं वर्णनं विद्यते । अतो ग्रन्थकर्तुरुपाख्यानस्येमानि आधारस्रोतांसि ।

११. शिवचन्द्रयोः सम्बन्धः

कार्तवीर्योदयमहाकाव्ये तृतीयसर्गस्य एकोनचत्वारिंशत्तमे पद्ये -

श्रीहरेरभिधया घटिताख्यं धारयन् हरिणपोतमवाप ।
शम्भुशीर्षवसतिं द्विजराजस्त्वत्कुलप्रथमजो नृपवर्य्यः ।। (३/३९)

इत्यभिधाय शिवचन्द्रयोः प्रगाढः सम्बन्धः सूचितः ।

अस्मिन् विषये पुराणेषु सन्त्यनेकानि प्रमाणानि -

क) स्कन्दपुराणस्य काशीखण्डस्य चतुश्चत्वारिंशत्तमेऽध्याये काशीवर्णनप्रसङ्गे -

यदु दुग्धनिधिं निमथ्य देवैर्मृदुसारः समकर्षि पूर्णचन्द्रः ।
स बभूव कृशो वियोगतप्तेश्वरमूर्धोष्णपरिक्षरच्छशरीरः ।। (श्लो. ५) ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

इति शिवभाले विराजमानस्य पूर्णचन्द्रस्य वर्णनं जातम् ।

ख) हिमवत्खण्डस्य परिशिष्टे शिवसहस्रनाम्नामुल्लेखो वर्तते । तत्राष्टपञ्चाशत्तमे श्लोके शिवस्य शशिशेखरः इति नाम वर्तते । एतेन चन्द्रमौलेश्चन्द्रस्य च सम्बन्धः स्फुटीभवति ।

ग) चन्द्रचूडेति भगवतो महादेवस्यापरनामधेयम् । एकेन कविनाप्युक्तम् -

कश्चिन्नरक्षति नरं क्षतिमाप्नुवन्तं श्रीचन्द्रचूडचरणाद्विमुखं भवन्तम् ।

शिवस्य जटाजूटे गङ्गा, चूडायाञ्च चन्द्रमा विराजते इति पौराणिकी प्रसिद्धिः । अत्र कविनापि तथैव प्रतिपादितमित्युपर्युक्तपद्यपरिशीलनाद् ज्ञातुं शक्यते ।

१२. वेदव्यासः

कार्तवीर्योदयमहाकाव्ये सप्तदशसर्गे -

नलिनपुलिननाकुजन्मभाजोऽनवककवयो विहरन्तु देववाचा ।
कलियुगजनुषाङ्गिरः कवीनां सुकृतिरसौ मनुते जरत्तृणानि ।। (१७/१९)

इत्यभिधाय पुलिनजन्मनो वेदव्यासस्यानवककवित्वेन पावनं संस्मरणं कृतम् । - अष्टादशमहापुराणानां कर्तुः पराशरपुत्रस्य कृष्णद्वैपायनाख्यस्य भगवतो वेदव्यासस्य सर्वत्र पुराणेषु विशदं वर्णनं दृश्यते ।

क) अष्टादशपुराणानां कर्ता सत्यवतीसुतः इत्यादिभिर्वचनैर्वेदव्यासस्य पुराणकर्तृत्वं सिद्ध्यति । तथा च पुराणेषु सर्वत्र व्यासदेवस्य चर्चा प्राप्यते ।

ख) नारदीयपुराणे च व्यासोल्लेखः -

व्यासो लब्ध्वा ततश्चैतत् प्रभञ्जनमुखोद्गतम् ।
प्रमाणीकृत्य लोकेऽस्मिन् प्रावर्तयदनुत्तमम् ।।

सर्वेषां पुराणानां महाभारतस्य च व्यासकर्तृकत्वात् सर्वत्रैव व्यासस्य प्रविष्टिः । महाभारते श्रीमद्भागवतेऽन्यत्र च सत्यवतीनन्दनस्य वेदव्यासस्य श्रद्धासिक्तं वर्णनं लभ्यते । विषयोऽयं संस्कृतज्ञैर्विद्वद्भिर्हृदयतः साक्षात्कृत इति नाधिकमुच्यते ।

१३. वृन्दावनम्

कार्तवीर्योदयमहाकाव्ये महाकविना सुकृतिदत्तपन्तेन सश्रद्धं वृन्दावनचर्चाकृता स्वयंवरप्रसङ्गे । यथा-

वृन्दावने सुरभिसौरभलोभरिङ्गद् गुञ्जन्मधुव्रतसुमञ्जुनिकुञ्जभूमौ ।
अस्याङ्कदेशमधिशय्य विशालनेत्रे कामोत्सवैस्सफलयासु वयो नवीनम् ।।
(१२/२२)

पुराणेषु विशेषतः श्रीमद्भागवते, पद्मपुराणे, विष्णुपुराणे, गर्गसंहितायामन्येषु पुराणेषु च वृन्दावनसम्बद्धानि वर्णनानि सन्ति । तेषु केषाञ्चनेह सङ्क्षिप्तं निरूपणं क्रियते -

क) श्रीमद्भागवतदशमस्कन्धस्य पूर्वार्द्धः कृष्णचरितवर्णनपरकः । तत्र एकादशाध्यायतोऽष्टत्रिंशदध्यायपर्यन्तं वृन्दावनसम्बद्धा विषयाः सन्ति ।

ख) विष्णुपुराणस्य पञ्चमांशे षष्ठेऽध्याये उक्तम् -

वृन्दावनमितः स्थानात्तस्माद्गच्छाम मा चिरम् ।
यावद् भौममहोत्पातदोषो नाभिभवेद् व्रजम् ।। (श्लो. २४)

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

१४. कृष्णचरितम्

कार्तवीर्योदयमहाकाव्ये स्वयंवरागतराजवर्णनविधौ मथुरा-गोवर्धन-वृन्दावनादिव्रजभूमिगतक्षेत्राणां महत्त्वप्रकाशनप्रसङ्गे श्रीकृष्णलीलाया:श्रीकृष्णाराधनायाश्च बिम्बः कविना प्रकाशितः

स्नात्वा कलिन्दतनयासलिले सलीलं त्वं बाहुले बहुलपक्षसदृक्षकान्तिम् ।
राधापतिं बहुलपङ्करुहैः प्रपूज्य सद्धीषणे बहुलजन्मभिदां बधान ।। (१२/२५)

श्रीकृष्णचरित्रविषये श्रीमद्भागवते, विष्णुपुराणे, पद्मपुराणे, ब्रह्मवैवर्तपुराणे, महाभारते, गर्गसंहितायाम्, स्कन्दपुराणेऽन्येषु च पुराणेषु बहु निरूपितमस्ति । तादृशानि कानिचन स्थलानि दिग्दर्शनाय निर्दिश्यन्ते -

क) श्रीमद्भागवतस्य दशमस्कन्धे, आद्योपान्ता कृष्णलीला समनुवर्णिता । श्रीमद्भागवतस्य दशमं स्कन्धं विद्वांसः कृष्णचरितमेव वदन्ति ।

ख) विष्णुपुराणस्य पञ्चमोंऽशः सम्पूर्णमेव कृष्णचरितं प्रस्तौति ।

ग) महाभारते सभादिपर्वसु सविस्तरं कृष्णसम्बद्धान्युपाख्यानापि गुम्फितानि सन्ति ।

घ) ब्रह्मवैवर्तपुराणस्य कृष्णजन्मखण्डे ७० अध्यायेषु कृष्णचरितस्य विस्तृतवर्णनं लभ्यते ।

ङ) स्कन्दपुराणस्य वैष्णवखण्डेऽपि श्रीकृष्णलीला सादरं पुराणकारेण वर्णिता ।

च) गर्गसंहिता तु श्रीकृष्णलीलायाः प्रतिपादिका विशिष्टा कृतिर्वर्तते ।

छ) पद्मपुराणेऽपि भगवतः श्रीकृष्णस्य लोकपावना लीला निरूपिता वर्तते ।

इत्थं सर्वेष्वेव पुराणेषु न्यूनाधिकतया श्रीकृष्णलीला लभ्यते ।

१५. कच्छपावतारः

कार्तवीर्योदयमहाकाव्ये कृतवीर्यकृताया भगवदाराधनायाः प्रसङ्गे भगवतः कच्छपावतारस्य सूक्ष्मं निरूपणं जातम् । यथा - **स्वर्गावने कमठता.....** (४/१७) ।

पुराणेषु च कच्छपावतारस्य भगवतो वर्णनानि लभ्यन्ते -

क) श्रीमद्भागवतस्य प्रथमस्कन्धस्य तृतीयेऽध्याये (श्लो. १६), सप्तमस्कन्धस्य समुद्रमथनप्रसङ्गे च कच्छपावतारस्य चर्चा सञ्जाता ।

ख) कूर्मपुराणं तु कच्छपावतारविषयकमेव । तत्र कच्छपावतारस्य रहस्यं प्रयोजनं तस्मिन्नवतारे जातानां लीलानां च वर्णनमुपलभ्यते ।

१६. मत्स्यावतारः

कार्तवीर्योदयमहाकाव्ये भगवतो मत्स्यावतारस्य चर्चा जाता । यथा -

वेदोद्धृतौ कपटपाटवमीनरूपम् । (४/१७)

मत्स्यावतारस्य भगवतश्चर्चा विभिन्नेषु पुराणेषु लभ्यते -

क) श्रीमद्भागवतस्य प्रथमस्कन्धस्य तृतीयेऽध्याये (श्लो. १५), द्वादशस्कन्धस्य नवमेऽध्याये च ।

ख) मस्त्यपुराणे १८०-१८५ अध्यायपर्यन्तम् ।

१७. वाराहावतारः

कार्तवीर्योदयमहाकाव्ये वराहावतारस्य चर्चा अनेकेषु स्थलेषु लभ्यते । तत्र सर्वप्रथमं चतुर्थसर्गे सूक्ष्मरूपेण

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

चर्चा जाता । यथा -

भूमीतलोद्धृतिविधौ न च सूकरत्वम् । (४/१७)

पुनरष्टमसर्गे वराहावतारस्य चर्चा अनेन रूपेण जाता -

संवर्त्तवर्द्धितपयः पटगुण्ठनाप्तः क्षोणीसमुद्वहनसौख्यजडोरुकाण्डः ।
प्रालेयशैत्यमिषवारितधातृतर्को भव्यन्तनोतु गिरिराजवपुः किटिस्ते ।। (८/९१)

पुराणेषु विभिन्नप्रसङ्गेषु भगवतो वराहरूपस्य वर्णनानि लभ्यन्ते -

क) श्रीमद्भागवतस्य प्रथमस्कन्धस्य तृतीयेऽध्याये (श्लो. ७), तृतीयस्कन्धस्य त्रयोदशेऽध्याये च ।

ख) वाराहपुराणे (वराह-पृथ्वीसम्वादे) । तथा चान्यत्राऽपि ।

१८. वामनावतारः

कार्तवीर्योदयमहाकाव्ये चतुर्थसर्गे -

किं वा मनस्सुकरमासनवामनत्वम् । (४/१७)

इति वामनावतारस्य भगवतो निरूपणं जातम् ।

पुराणेष्वनेकेषु वामनसम्बद्धा चर्चा लभ्यते -

क) श्रीमद्भागवतस्य प्रथमस्कन्धस्य तृतीयेऽध्याये (श्लो. १९) , अष्टमस्कन्धे अ. १८, १९, २०, २१, २२, २३ अध्यायेषु ।

ख) अग्निपुराणस्य अवतारकथाप्रसङ्गे । तथैवान्यत्राऽपि ।

१९. नृसिंहावतारः

सुकृतिदत्तपन्तेन कार्तवीर्योदयमहाकाव्ये श्रद्धापूर्वकं भगवतो नृसिंहावतारो वर्णितः -

प्रह्लादभक्तिभरवश्यतयाप्यवश्यं कस्याप्यवश्यमुखरस्य विधिं विहस्य ।
कृत्वा मनुष्यमृगराजवपुः प्रपूर्वं तं पूर्वदेवनिवहे हतवान्पुरा त्वम् ।।
प्रोच्चण्डगर्जितवितर्जितशीर्णजीर्णधाराधररस्नपितपिङ्गसटाच्छटाकः ।
भव्याय नो भवतु दिव्यहरिः परीतो नेत्रप्रभाजिततडित्प्रभरोमराज्या ।।

(४/१८-१९)

पुराणेषु नृसिंहावतारस्य भगवतो निरूपणं बहुधा जातम् -

क) श्रीमद्भागवतस्य सप्तमस्कन्धे ८, ९, १० अध्यायेषु ।

ख) नृसिंहोपपुराणे ।

ग) विष्णुपुराणे षोडशेऽध्याये । तथैवान्यत्राऽपि ।

२०. ऋषभावतारः

कार्तवीर्योदयमहाकाव्ये कविना श्लेषपूर्वकमेकस्मिन्नेव पद्ये कृतवीर्यस्य, ऋषभदेवस्य, ब्रह्मणश्च वैशिष्ट्यं प्रकाशितम् -

निर्वर्ण्य नाभिभवमाश्रितसत्यवार्तं दक्षे सुते निहितलोकधुरं मुमुक्षुम् ।
संसेव्यमानमनिशङ्कविनायकेन त्वां संस्मरामि ऋषभाख्यनृपं विधिञ्च ।। (८/१७)

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

पुराणेषु ऋषभदेवस्य पावनं चरितं बहुषु स्थलेषु वर्णितं लभ्यते - श्रीमद्भागवतस्य पञ्चमस्कन्धे चतुर्थ-पञ्चम-षष्ठाध्यायेषु । अन्यपुराणेषु च ऋषभदेवस्य चरितं वर्णितमस्ति।

२१. पृथुचरितम्

कार्तवीर्योदयमहाकाव्ये उपमेयोपमालङ्कारोदाहरणप्रसङ्गे कविना भगवान् पृथुः संस्मृतः । यथा -

इत्युक्तवन्तममुमाह मुनीन्द्रवर्य्यो राजँस्त्वया व्यवसितं मम चेतसा किम् ।
धन्योऽसि पार्थिवकुले पृथुवत्प्रथिम्ना कीर्तेर्भवानिव पुरा प्रथते पृथुः सः ।।

(८/१२)

श्रीमद्भागवतस्य चतुर्थस्कन्धे १५, १६, १७, १८, १९, २०, २१ अध्यायेषु पृथुचरितं भगवता व्यासदेवेन साधु वर्णितम् । अन्यपुराणेष्वपि प्रातःस्मरणीयतया पृथोश्चर्चा लभ्यते ।

२२. आनन्दवनम् (आनन्दकाननम्)

कार्तवीर्योदयमहाकाव्ये वाराणसीवर्णनप्रसङ्गे आनन्दकानन्दपुरस्य वर्णनं कविना कृतम् । यथा -

चित्रं विमुक्तिमभिवाञ्छति पक्ष्मलाक्षि त्यक्त्वा न भूपतिरसावविमुक्तसङ्गम् ।
आनन्दकाननपुरेऽपि सुखोपलब्धिमानन्दकाननपुरेण तवायताक्षि ! ।। (१२/३६)

स्कन्दपुराणान्तर्गत-काशीखण्डे उत्तरार्धस्य ८६ तमेऽध्याये आनन्दकाननस्य सविस्तरं वर्णनमुपलभ्यते-

आनन्दकाननं हित्वा नान्यद् गच्छेत् तपोवनम् ।
तपोयोगश्च मोक्षश्च यतोऽत्रैव मदाश्रयात् ।। (श्लो. १३४)

२३. वाराणसी

कार्तवीर्योदयमहाकाव्ये कविना सश्रद्धं वाराणसी वर्णिता । यथा -

स्नात्वा प्रभातसमये मणिकर्णिकायां विश्वेश्वरं समभिपूज्य विशालभक्त्या ।
एतेन सौधशिखरे शिखराग्रदन्तिक्रीडारता सफलयाशु तनुर्वयश्च ।।
कामारिरत्र वसतीति कथं स कामः सेव्यो भवेदिति भयं सुभगे ! न याहि ।
सम्प्रार्थितो गिरिजया गिरिशः पुरेऽस्मिन्कामन्त्रणान्निवसतां विरुणद्धि नैव ।।
वाराणसीति गदिता किल मुक्तिसत्रं तत्रागताः सुकृतिदुष्कृतिनः समानम् ।।
कैवल्यभागमुपयान्ति शिवप्रसादात् साम्यं हि लिङ्गमुदितं परमेश्वरस्य ।।

(१२/३८-४०)

वाराणस्या वर्णनं पुराणेषु बहुत्र उपलभ्यते । यथा -

क) कूर्मपुराणस्य पूर्वभागे ।

ख) स्कन्दपुराणान्तर्गत काशीखण्डस्य पूर्वार्द्धे ३०, ४६ अध्याययोः, तथोत्तरार्द्धस्य ५५, ६०, ७३, ७९, ८३ अध्यायेषु विशेषतः काशीमहिमवर्णनं विद्यते, परं समग्रकाशीखण्डः काशीमहिमवर्णनपरको बोध्यः ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

२४. गोपी-वर्णनम्

कार्तवीर्योदयमहाकाव्ये गोपाङ्गनानां सङ्क्षिप्तं वर्णनं जातम् ।

गोपाङ्गनाभुजविलूननवप्रवाले विस्तीर्णमालशिशुशालनिरन्तराले ।

गोवर्द्धने मृदुलघासधराभिरामा रामे रमस्व रमणेन रमेव रम्ये ! ।। (१२/२३)

गोपीनां वर्णनं विशेषेण कृष्णपरकेषु महापुराणेषु जातम् । तेषां मध्ये कानिचन वर्णनसङ्केतानि अधो निर्दिश्यन्ते-

क) श्रीमद्भागवतस्य दशमस्कन्धपूर्वार्द्धे २१, २२, २९, ३०, ३१, ३२, ३३, ३९ अध्यायेषु गोपीभिः सह श्रीकृष्णस्य लीला वर्णिताः (गोपीगीतम्, वेणुगीतम्, भ्रमरगीतम्, युगलगीतमित्यादिप्रसङ्गेषु विशेषेण)।

ख) विष्णुपुराणस्य पञ्चमांशस्य १३, १८ अध्याययोर्गोप्युपाख्यानं लभ्यते ।

ग) ब्रह्मवैवर्तपुराणस्य कृष्णजन्मखण्डे कृष्णचरितवर्णनप्रसङ्गे राधादिगोपीनां साङ्गोपाङ्गवर्णनं जातम् ।

घ) अनेनैव प्रकारेण पद्मपुराणे, ब्रह्मवैवर्तपुराणे, गर्गसंहितायाञ्च गोपीनां वर्णनं लभ्यते ।

२५. गोवर्धनपर्वतः

कार्तवीर्योदयमहाकाव्ये गोवर्धनपर्वतस्य प्राकृतिकसौन्दर्यं कविना प्रकाशितम् -

गोवर्द्धने मृदुलघासधराभिरामा रामे रमस्व रमणेन रमेव रम्ये ! ।। (१२/२३)

पुराणेषु गोवर्धनपर्वतस्य महिमा विस्तरेण प्रकाशितः । यथा -

क) श्रीमद्भागवतस्य दशमस्कन्धस्य ३४, ३५ अध्याययोः ।

ख) विष्णुपुराणस्य पञ्चमांशस्य १०, ११ अध्याययोः ।

ग) स्कन्दपुराणस्य पूर्वार्द्धेऽष्टमेऽध्याये । तथैवान्यत्रापि गोवर्धनप्रसङ्गो लभ्यते ।

२६. राधा

कार्तवीर्योदयमहाकाव्ये कविना राधारमणस्य श्रीकृष्णस्य वर्णनप्रसङ्गे 'राधापतिम्' इति पदप्रयोगं कुर्वता राधाया अपि निरूपणमकारि ।

स्नात्वा कलिन्दतनयासलिले सलीलं त्वं बाहुले बहुलपक्षसदृक्षकान्तिम् ।

राधापतिं बहुलपङ्करुहैः प्रपूज्य सद्धीषणे बहुलजन्मभिदां बधान ।। (१२/२५)

पुराणेषु राधाया वर्णनानि लभ्यन्ते । यथा -

क) श्रीमद्भागवते राधायाः स्पष्टोल्लेखो नास्ति परं दशमस्कन्धस्य त्रिंशत्तमाध्यायस्याष्टाविंशे पद्ये - '**अनयाराधितो नूनं भगवान् हरिरीश्वरः**' इत्यत्र, '**निरस्तसाम्यातिशयेन राधसा.....**' इत्यत्र च राधायाः सङ्केतो विद्यते इति कथयन्ति भागवतमर्मविद आचार्याः ।

ख) ब्रह्मवैवर्तपुराणस्य श्रीकृष्णजन्मखण्डे कृष्णशक्तिरूपाया राधाया वर्णनं साङ्गोपाङ्गं प्रत्तमस्ति ।

२७. ब्रह्मा

कार्तवीर्योदयमहाकाव्ये कार्तवीर्यस्य दीप्तं तपो वीक्ष्य ब्रह्मा अपि मुखचतुष्टयतः श्वसितावलीं प्रकाशयामासेत्युक्तम्-

विधिरपि प्रसमीक्ष्य तपो महद्वरमयङ्क्तमञ्च समर्हति ।

इति निरन्तरचिन्तनयात्यजन् मुखचतुष्टयतः श्वसितावलीम् ।। (६/४४)

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

पुराणेषु ब्रह्मणः सृष्टिकर्तृत्वेन पितामहत्त्वेन प्रभूतानि वर्णनानि विद्यन्ते । तेषु केषाञ्चन दिग्दर्शनं क्रियते-

क) श्रीमद्भागवतस्य तृतीयस्कन्धस्य अष्टमेऽध्याये, सप्तमस्कन्धस्य तृतीयेऽध्याये, दशमस्कन्धस्य १३, १४ अध्याययोः ।

ख) पद्मपुराणस्य सृष्टिखण्डे, ब्रह्मखण्डे च !

ग) विष्णुपुराणस्य प्रथमांशस्य तृतीय-चतुर्थाध्याययोः ।

घ) स्कन्दपुराणस्य ब्रह्मखण्डे ब्राह्मसंहितायाम् ।

ङ) लिङ्गपुराणस्य सृष्टिप्रकरणे ।

च) ब्रह्माण्डपुराणस्यानुषङ्गपादे ।

छ) मार्कण्डेयपुराणस्य सप्तशत्याः प्रथमेऽध्याये ।

पर्यन्तवाक्यम्

कार्तवीर्योदयमहाकाव्यं कथावस्तुदृष्ट्या पुराणाधारितमस्ति । वाग्विलासदृष्ट्या च विच्छित्तिपूर्णा काव्यमयी रचनेति नात्र विसंवादः ।

पौराणिकसन्दर्भैः काव्यात्मकशैलीसमुद्दीपनार्थं कविना शताधिकस्थलेषु पौराणिकपात्राणां तदीयानुकरणीयचरितानाञ्च निरूपणं कृतम् । अस्य काव्यस्य पुराणप्रभावमादाय विशिष्टाध्ययनं भवितुमर्हति । मयाऽस्मिन् लघ्वाकारे विचारपत्रे कार्तवीर्योदयमहाकाव्ये प्रतिबिम्बितानामनेकेषां पौराणिकविषयाणां सारदोहनं कृत्वा प्रतिनिधिमूलकतया पात्राणां चरितानि सङ्केतितानि । यत् कृतं तत्केवलं स्थालीपुलाकन्यायेन दिग्दर्शनार्थमेव कृतम् ।

महाकाव्यमिदं पुनः सम्पादनेन टीकनेन चाविकलं रूपं कलयतु । अस्य काव्यस्य विश्वे प्रचारेण नेपालमातुर्हंसोज्ज्वला कीर्तिः प्रकाशिता स्यात् । भगवान् कार्तवीर्यः सर्वेषां शं विदध्यादिति कामयमानेन मया वाग्व्यापाराद् विरम्यते । इति शम्।

सन्दर्भग्रन्थाः

१. कार्तवीर्योदयमहाकाव्यम् ।
२. विभिन्नानि पुराणानि ।
३. पुराणपर्यालोचनपरा ग्रन्थाश्च ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

सुकृतिदत्तपन्तस्य जीवनवृत्तं संस्कृत-वाङ्मयाभिवृद्धाववदानञ्च

- प्रा.डा. माधवशरण उपाध्यायः

कार्तवीर्योदयमहाकाव्यस्य व्याकरण-न्याय-ज्यौतिषादिविविधविषयसम्बद्धानां ग्रन्थानां प्रणेता पण्डितवरेण्यः सुकृतिदत्तपन्तः स्वजन्मना नेपालदेशमलञ्चकारेति गौरवास्पदम् । तस्य विदुषो जीवनवृत्तविषये संस्कृतसाहित्ये तस्यावदानविषये चेयं गोष्ठी किमपि विचारयितुं प्रवृत्तेति महत् प्रमोदास्पदम् । यद्यपि डा. स्वामिरामकृष्णप्रपन्नाचार्येण कार्तवीर्योदयमहाकाव्यस्य सम्पादनप्रसङ्गे सुकृतिदत्तस्य जीवनवृत्तं बहुधा चर्चितम्, कृतीनाञ्चोल्लेखोऽपि विहितः, तथापि प्रमाणतुलायां तत्र भूमिकायां स्वामिवर्येणोपपादिताः कतिपये विषयाः पूर्वापरविरुद्धत्वेन दृष्टिपथमायाताः । अतः सुकृतिदत्तस्य प्रामाणिकं जीवनवृत्तं विद्वद्भिरेव निर्धारणीयमिति धिया विषयेऽस्मिन् गवेषणक्रमे मया यथानुभूतं तथैवोपस्थाप्यते ।

सुकृतिदत्तस्य जीवनवृत्तान्तं कविना भरतराजपन्तमहोदयेन स्वकीयजीवनवृत्तख्यापनप्रसङ्गे भरतराजनामके पुस्तके वि.सं. २०३८ वर्षे प्रकाशितम् । अनन्तरञ्च डा. स्वामिप्रपन्नाचार्येण भावामृतव्याख्यायाः सम्पादनप्रसङ्गे ग्रथितायां भूमिकायां वि.सं. २०४९ वर्षे, कार्तवीर्योदयमहाकाव्यस्य भूमिकायां स्वामिवर्येणैव २०५१ वर्षे विस्तृतं विवरणं प्रस्तुतम् । तदनु शर्मण्यदेशवास्तव्येन जोहान्नेस् श्नाइडरनामकेन शोधकर्त्रा ई.सं. १९९६ वर्षे स्वकीये शोधप्रबन्धे विस्तरेण कार्तवीर्योदय-महाकाव्यस्य विवेचनं सुकृतिदत्तस्य जीवनवृत्तञ्च चर्चितम् । उपरि चर्चितानां विदुषां मतान्यालोच्य प्रमाणान्तराणि च सङ्कलय्य मयापि स्वकीये शोधप्रबन्धे किमपि विचारितम्, तदनुसारेणैव सङ्क्षिप्य विदुषां मनोमोदाय विचारोद्भावाय च चर्च्यते ।

नेपालस्य वाग्लुङमण्डलान्तर्गतेषु ओखले-मूलपानी-गलकोट-गैरीगाऊँ-फलेवासादिग्रामेषु स्थितानां पन्तोपाह्वानां ब्राह्मणानां वसु-नाथु-भगि-सरमाख्याश्चतस्रः शाखाः प्रथिताः सन्तीति विचारकाणां मतम् । वसुपन्तवंशे पण्डितवरेण्यस्य सुकृतिदत्तस्य जन्म बभूवेति कार्तवीर्योदयमहाकाव्यस्य कविवंशवर्णनात्मकस्य सप्तदशसर्गस्याध्ययनेन ज्ञातुं शक्यते। प्रयागवास्तव्यस्येन्दुनामकस्य कवेः कनिष्ठपुत्रत्वेन जातस्य रमापतिपन्तस्यान्वये भार्गवीभवदत्तयोः कनिष्ठपुत्रत्वेन वि.सं. १८८० वर्षे सुकृतिदत्तो जात इति भावामृतव्याख्यायाः पुष्पिकाया अध्ययनेन सुकृतिरचितस्य महाकाव्यस्याध्ययनेन च निश्चेतुं शक्यम् । रमापतिपन्तेन बलेवानामके स्थाने कृष्णागण्डक्याः पावने पुलिने लक्ष्मीनारायणमन्दिरं निर्माय शिलालेखस्यापि स्थापना विहितेति शिलालेखस्थपद्यानामध्ययनेन ज्ञायते । तत्रत्यपद्यानि तु -

स्वस्तिश्रीमत्पन्तकुले निर्मलेऽजनि भूसुरे ।
प्रयागवसतिः साक्षादिन्दुः कविवरः सुधीः ।।१।।
नव तस्याभवन् पुत्रा विद्वांसः सर्व एव ते ।
तेषां कनीयान् पुत्रस्तु रमापतिरिति श्रुतः ।।२।।
रचितं सुचिरं तेन इन्दिरापतिमन्दिरम् ।
तदिदं तस्य सततं पुत्रैः पौत्रैः प्रपौत्रकैः ।।३।।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

पालनीयं प्रयत्नेन परमेश्वरतुष्टये ।
शुभं भवतु सर्वेषां नारायणप्रसादतः ।।४।। इति ।

(अस्य शिलालेखस्य प्रथमं प्रकाशनं भरतराजपन्तेन २०३८ वैक्रमाब्दे, टेकबहादुरश्रेष्ठेन २०४२ वैक्रमाब्दे, डा. स्वामिप्रपन्नाचार्येण २०५१ वैक्रमाब्दे विहितम्) सुकृतिदत्तेन रमापतिना निर्मितस्य मन्दिरस्य चर्चा कार्तवीर्योदये विहिता। तदित्थम् -

विद्याकुशेशयवनीचरराजहंसे संसत्सु वादिगणवादविहीनदंशे ।
कूर्माचलाऽभिजनके वसुपन्तवंशे जातो रमापतिरिति प्रथितस्सुधीन्द्रः ।।
कृष्णातटे प्रतिभटेऽमरविष्टपस्यागत्यैष पर्वतनरेन्द्रगुरुर्बभूव ।
अस्थापयच्च हृदि सौधवरेऽपि लक्ष्मीनारायणौ विपुलभावनया स विद्वान्।।
(कार्त. १७/१-२)

सुकृतिदत्तस्य पूर्वपुरुषाः - हरिरामशिवरामनामकौ रमापतिपन्तस्य द्वौ पुत्रौ । द्वयोरेव वैदुष्यं ग्रन्थप्रणयनपाटवं च स्वामिप्रपन्नाचार्येण हरिरामपन्तस्य वेदान्तपरिभाषायाष्टीकायाः कानिचन पत्राण्यधीत्य शिवरामस्य च व्यधिकरणजागदीश्याष्टीकायाः पत्राण्यधीत्यावगतमित्यस्ति प्रपञ्चितम् । सुकृतिदत्तेनापि हरिरामस्य शास्त्रार्थकौशलं शिवरामस्य च राजगुरुत्वेन ख्यातत्वं वर्णितं कार्तवीर्योदयमहाकाव्ये (द्र. कार्त. १७/३-४) । शिवरामपन्तस्य त्रयः पुत्रा आसन्, शिवदत्त-भवदत्त-रुद्रदत्ताभिधानाः । तेषु भवदत्तस्योत्कर्षः सुकृतिदत्तस्य पद्ये हीत्थं द्रष्टुं शक्यः -

नागाधीशवचोविचारविशदे गङ्गेश्वरोक्ताम्बुधौ
मन्थाद्रिप्रतिमे च तत्र युगले स्वान्तं समालम्बिते ।
साहित्यामृतकुण्डमीनसदृशे साङ्ख्यैकसङ्ख्यान्विते
नेपालक्षितिपालपूजितपदे का नेह विद्या स्थिता ।। (कार्त. १७/८) ।

भवदत्तस्य रचनानां कानिचित् पत्राणि स्वामिप्रपन्नाचार्यस्य सङ्ग्रहे सन्ति । अस्यानुजस्य रुद्रदत्त इति नाम, आसीत् । रुद्रदत्तस्य गुणोपसंहारनामकं नाटकं रचनाकौशलं विदुषोऽस्य प्रकटयति निदर्शनं स्वामिप्रपन्नाचार्यस्य भूमिकायां द्रष्टुं शक्यम् । पण्डितप्रकाण्डस्य भवदत्तस्य चत्वारः पुत्रा आसन् । तेषु ज्येष्ठो नैयायिको व्यासदत्तः, साहित्यशास्त्रनिष्णातः श्रीदत्तो द्वितीयः, ज्योतिर्वित्तृतीयो ज्वालादत्तः, चतुर्थस्तु सुकृतिदत्त एवेति सुकृतिनैवेत्थं प्रकटितम्-

ज्येष्ठो न्यायविदग्रणीः समभवच्छ्रीव्यासदत्ताभिधः
साहित्याम्बुधिपारगस्तदनुजः श्रीदत्तनामा कविः ।
ज्योतिश्शास्त्रविदांवरस्तदनुजो ज्वालादिदत्तो गुणै-
रुत्पत्त्यापि जघन्यजोऽस्मि सुकृतिस्तेषामतिस्वल्पधीः ।। इति (कार्त. १७/१२) ।

सुकृतिदत्तः

भार्गवीभवदत्तयोः कनिष्ठपुत्ररूपेण जातो नैकग्रन्थप्रणयनपटुः सुकृतिदत्तः । अस्य सुकीर्तिदत्तेति सुग्रीवदत्तेति च नामान्तरेऽप्युपलभ्येते । सुकीर्तिनाम्न उल्लेखः सुकृतिना स्वकीयासु रचनासु यत्र तत्र विहितः । सुग्रीवदत्तनाम्न उल्लेखस्तु वेङ्कटाचार्येण १९३० वैक्रमाब्दे वृन्दावनतः सुकृतिसन्निधौ प्रेषिते पत्रे दृश्यते (पत्रस्यास्य छायाप्रतिः स्वामिप्रपन्नाचार्यस्य सङ्ग्रहे विद्यते)। यद्यपि सुकृतिदत्तेन कार्तवीर्योदयमहाकाव्यस्य सप्तदशे सर्गे स्वकीयः परिचयोऽस्त्युपस्थापितः, तथापि जन्मतिथ्यादेरुल्लेखाभावात्तन्निर्धारणे काठिन्यमेव जातम् । जयदेवरचितस्य गीतगोविन्दाभिधानस्य काव्यस्याष्टपदीव्याख्यायाः पुष्पिकायां 'विंशतिवर्षदेशीयसुकृतिदत्तकविकृता वदसीत्याद्यष्टपदीव्याख्या समाप्तिमिता' इत्युल्लेखाद् व्याख्याया रचनासमयश्च-

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

बाणाङ्गवाजीन्दुमिते (१७६५) सुशाके समागतो विंशतिमाश्वकार्षीत् ।
सुकीर्तिदत्तो भवदत्तपुत्रः कृष्णातटे पर्वतनीवृतीदम् ।। (द्र. भावामृत. पृ. ३४) ।

इत्युल्लेखात् तस्मिन् समये च सुकृतिदत्तस्य विंशतिवार्षिकत्वमाधृतस्य १८८० वैक्रमाब्दे जन्मसमय आसीदिति वक्तुं शक्यते ।

सुकृतिदत्तस्याध्ययनं जीविका च

सुकृतिदत्तस्य प्रारम्भिकमध्ययनं स्वकीयाग्रजस्य श्रीदत्तस्य पार्श्वेऽभवदिति गुरुस्थानिकत्वेन श्रीदत्तस्य नामग्रहणादनुमीयते। शृङ्गारसङ्ग्रहस्य प्रारम्भिके पद्ये कविना श्रीदत्तस्य वर्णनं गुरुस्थानिकत्वेनेत्थं कृतम् –

श्रीदत्तसुप्रसादेन्दुविवृद्धमतिवारिधिः ।
सुकीर्तिदत्तशर्माहं कुर्वे शृङ्गारसङ्ग्रहम् ।। इति ।

सुकृतिदत्तस्य कृतीनामवलोकनेन न्याय-व्याकरण-साहित्य-दर्शन-तन्त्रागम-ज्योतिषादिविषयाणामध्ययनं तेषु विषयेषु प्रावीण्यञ्चानुमातुं शक्यम् । परं कस्य विषयस्याध्ययनं कस्मात् कुत्र च जातमित्यत्र सुकृतिदत्तेन स्पष्टतया किमपि नैवाभिहितम्। व्याकरणस्य क्रोडपत्रेषु **अचः परस्मिन् पूर्वविधौ** (पा.सू. १/१/५७) सूत्रव्याख्यानप्रसङ्गे सुकृतिदत्तेन स्वकीयस्य गुरोर्नाम निर्दिष्टम्, तेन रमानाथस्य गुरुरूपेणेत्थं चर्चा विहिता –

अचः परस्मिन्निति सूत्रशेखर क्रोडं कृतं सत्कृतिना सुकीर्तिना ।
श्रीमद्रमानाथगुरोः प्रसादाच्चिदस्थिमालाममलां गृहीत्वा ।।
(द्र. राष्ट्रियाभिलेखालयस्थ - अणुचित्रसं. ए. १२०४/४ सङ्ख्याङ्किते विवरणे)

स्वामिप्रपन्नाचार्येण नीलदेवपन्तः सुकृतिदत्तस्य गुरुरासीत्, सकलशास्त्राध्ययनं सुकृतिना तत एव कृतमित्यस्ति निर्दिष्टम् । (द्र. प्रपन्नाचार्यः २०५१, ६६) सुकृतिदत्तस्य जीविकादिविषये प्रामाणिकं तथ्यं नैवाधिगतम् । भरतराजपन्तद्वारा प्रदत्ते विवरणे राजगुरोर्विजयराजस्य प्रेरणया १९०३ वैक्रमाब्दे काष्ठमण्डपस्थे विद्यालये साहित्याध्यापकत्वेन नियोजितः सुकृतिदत्त इत्यवगम्यते । (द्र. भरतराजपन्तः, २०४९, ३-४) प्रपन्नाचार्येण जम्मूराज्यस्य पूर्वराजगुरोः काकारामशास्त्रिणः पिता सुकृतिदत्तस्य शिष्य आसीदिति निर्दिष्टम् । (द्र. प्रपन्नाचार्यः २०४९, झ) विषयेऽस्मिन्नधिकमन्वेषणमपेक्षितम्।

सुकृतिदत्तस्य पारिवारिकं विवरणम्

कार्तवीर्योदयमहाकाव्यस्य सप्तदशे सर्गे सुकृतिदत्तस्य पुत्रयोर्नामनी सुकृतिदत्तेनैव निर्दिष्टे । तदनुसारेण ज्येष्ठस्य बृहस्पतिः, कनिष्ठस्य च पद्मनाभ इति नाम आसीदिति ज्ञायते । पुत्र्याः पत्न्याश्च सामान्यतया परिचयः दत्तः[1]। स्वामिप्रपन्नाचार्येण

---

१. *सुकृतिदत्तदर्शितं विवरणम् –*

कविते भवितेह कोनु मे सरसोक्तेरनुरागभाजनम् ।
इति मास्म तपस्तपोबलात् सुकृतेः कोऽपि जनिष्यते तथा ।।
अथवास्ति सुतो बृहस्पतिः परिचर्याकुशलस्तवाधुना ।
भविता शिशुपद्मनाभकोऽपरपुत्रोऽपि कियद्दिनैरलम् ।। (कार्त. १७/२६-२७)

देवीस्तुत्यां तु –

त्यक्तो बन्धुजनोऽपि मित्रनिवहो दूरीकृतो दैवतः
पत्नीप्राणसमा सुतोऽति शिशुकः पुत्र्योऽपि दीनाननाः ।
त्यक्ता दैववशात् त्रिलोकजननि त्वत्पादपद्मं पुनर्-
मा त्यक्तं मनसास्तु तारिणि ! ततो मच्चित्तशान्तिर्भवेत् ।। इति (देवीस्तुतिः श्लो. १४) ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

तु गङ्गाकुमारी सुकृतिदत्तस्य पत्नी, श्रीविका च पुत्रीति निर्दिष्टम् । (द्र. प्रपन्नाचार्यः २०५१, ६४) सुकृतिपुत्र्याः सन्ततिरद्यत्वेऽपि ठमेलाख्ये स्थाने विद्यते । १९२२ वैक्रमाब्दे सुकृतिदत्तस्य पुत्रजन्म बभूवेति श्रीविश्वनाथपाण्डेयस्य सङ्ग्रहे स्थिते पञ्चाङ्गे 'दि. शेषघिटि १:४५ ल. ९:२७ सुकृतिपण्डीतपुत्रजन्म' इत्युल्लिखितत्वादवगतम् । पञ्चाङ्गानुसारेण १९२२ वैक्रमाब्दे भाद्रशुक्लचतुर्थ्यां सुकृतिदत्तस्य पुत्रजन्म बभूवेति निश्चेतुं शक्यम् । (विवरणमिदं प्रा. दिनेशराजपन्तमहोदयसौजन्येन यथाधिगतम्) सुकृतिपुत्रस्य बृहस्पतेः पुत्री पाण्डेयवंशे विवाहिता, तस्याः पुत्रः पं. तोयनाथपाण्डेयः, स्वर्गतः, तस्य पुत्रा अद्यत्वे काष्ठमण्डपे निवसन्ति । अनुश्रुत्यनुसारेणोपलब्धं विवरणं डा. स्वामिप्रपन्नाचार्येण निर्दिष्टम्, तत एवावगन्तुं शक्यम् । (द्र. प्रपन्नाचार्यः २०५१, ६३-६४, प्रपन्नाचार्यः २०४९, ८)

सुकृतिदत्तस्यान्तिमं जीवनम्

जीवनस्यान्तिमे भागे गुल्मरोगपीडितो रुग्णश्चासीदिति सुकृतिरचितानां पद्यानामध्ययनेनावगम्यते । रोगाक्रान्तेनापि कविना भगवत्यास्ताराया: कारुण्यपूर्णं वन्दनं विहितम्, देवीस्तुतिरूपेण स्वामिप्रपन्नाचार्येण सम्पाद्य प्रकाशितम् । मया शोधकार्यसम्पादनक्रमे डा. स्वामिप्रपन्नाचार्यस्य सङ्ग्रहे वर्तमानायाः पाण्डुग्रन्थात्मिकायाः कृतेरवलोकनं विहितम् । तत्रत्यमेकं पद्यं प्रस्तूयते -

हृदयतटविलोलं गुल्मशूलोरुवेगाज्-
जननि मदसुवृन्दं प्रस्थितं क्वापि यातुम् ।
तदनु हृदयमेतत् त्वत्पदाम्भोजभृङ्गो
भवतु किमिह तारे ! प्रार्थयाम्यद्य चान्यत् ।। इति ।

यद्यपि विदुषाऽनेन भौतिकं कलेवरं कदा त्यक्तमिति प्रत्यक्षतो ज्ञातुं न शक्यते, तथापि १९३० वैक्रमाब्दं यावदस्य वेङ्कटाचार्येण सह पत्रव्यवहारसत्त्वात् ततः पश्चादेवायमस्तं गत इत्यनुमीयते । नैषधीयक्रोडपत्रस्योपरितने भागे 'इतः पूर्वं पञ्चत्रिंशद्वर्षे आर्यघट्टे वाग्मतीतीरे पशुपतीश्वरसन्निधौ....' इत्यादिलिखितमुपलब्धम् । अत्र पञ्चत्रिंशद्वर्षोल्लेखात् सुकृतिः १९३५ वैक्रमाब्दे स्वर्गतो भवेदित्यनुमातुं शक्यन्नवेति विषयेऽस्मिन्नधिकतथ्यान्वेषणं पूर्वापरविषयसमीक्षणञ्चावश्यकं मन्ये।

सुकृतिदत्तस्य जीवनवृत्तविषये डा. स्वामिप्रपन्नाचार्येण प्रदर्शिते विवरणे किमपि विचारणीयमिति धिया विदुषां पुरतः किमपि निदर्शनं प्रस्तूयते ।

डा. स्वामिप्रपन्नाचार्येण सुकृतिदत्तस्य वंशवृक्षादिकं सङ्कलय्य भावामृतव्याख्यायां भूमिकाखण्डे, कार्तवीर्योदय-महाकाव्यस्य भूमिकाखण्डे च विशदं विवेचितम् । तत्र च पूर्वापरविरुद्धा विषया अपि समुपन्यस्ता इति तेषां विवेचनं वस्तुतथ्यप्रकाशनञ्चापेक्षितमिति मनसि निधाय किमपि विचार्यते । स्वामिवर्येण कार्तवीर्योदयस्य भूमिकायामेकत्र 'रमापतिपन्तस्य द्वौ पुत्रौ हरिरामशिवरामनामकौ' इति निर्दिष्टम् । (द्र. प्रपन्नाचार्यः, २०५१, ६) तत्रैवाग्रे द्वितीयो भवदत्त इत्यभिधाय द्वौ भवदत्तौ साधितौ । तत्रैवाग्रे रुद्रदत्तस्य परिचयनिरूपणावसरे 'गुणोपसंहारनाटककारः पं. रुद्रदत्त-पन्तः सुधीन्द्रतिलकस्य रमापतिपन्तस्य कनिष्ठः पुत्रः, हरिराम-शिवराम-भवदत्तस्य च कनिष्ठभ्रातृत्वेन जननसौभाग्यमनेन लब्धम्' इत्युक्त्वा रमापतिपन्तस्य चत्वारः पुत्राः साधिताः (द्र. प्रपन्नाचार्यः २०५१, ३१) । एवमेव भावामृतव्याख्याया भूमिकायां रमापतिपन्तस्य पौत्रस्थानिकत्वं शिवरामपन्तस्य प्रदर्शितम् (द्र. प्रपन्नाचार्यः २०४९, थ) । एवमेव पद्मपाणिर्धरासुरः कवितार्किकसिंहस्य महाकवेः सुकृतिदत्तस्य कनिष्ठपुत्र आसीदित्यपि स्वामिवर्येण निर्दिष्टम् (द्र. प्रपन्नाचार्यः २०५१. ३७) । तत्रैव चाग्रे पद्मपाणिनामकस्य विदुषः कृतेरुल्लेखोऽपि विहितः । तत्र च -

हरेश्चक्रावतारो यः कृतवीर्यात्मजो बली ।
मनोऽभीष्टप्रदो भूयान्मलैबम्बनृपाय सः ।।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

खरामरसभू (१६३०) शके भाद्रे हरिदिने सिते ।
तदर्थमेनमलिखत् पद्मपाणिर्धरासुरः ।।

इत्युल्लेखोऽपि निर्दिष्टः । एवञ्च १८८० वैक्रमाब्दे जातस्य सुकृतिदत्तस्य पुत्रः १६३० शकाब्दे स्वकीयां रचनां कथं प्रकटयितुं क्षम इति नैव विचारितं स्वामिवर्येणेति पूर्वापराऽसम्बद्धं विवरणं बहुधा तत्र चर्चितं बोध्यम् । कार्तवीर्योदय-महाकाव्यस्य भूमिकाखण्डे ६३ पृष्ठे रमापतिपन्तस्य चत्वारः पुत्राः, हरिरामः, शिवरामः, भवदत्तः, रुद्रदत्तश्च । तेषु रुद्रदत्तपुत्रस्य भवदत्तस्य पुत्रः सुकृतिदत्तो बभूवेत्यपि प्रतिपादयता स्वामिवर्येण सुकृतिदत्तेनोपन्यस्तस्य विवरणस्याप्युपेक्षा विहितेत्यपि प्रतिभाति । एवमेव सुकृतिदत्तस्य गुरुः क आसीदित्यस्मिन् विषयेऽपि नीलदेवपन्तेन सह सकलशास्त्राध्ययनं सुकृतिदत्तेन कृतम्, गुरुशिष्ययोर्मतभिन्नतया विवादः समजनि, तेन स्वकीयासु रचनासु सुकृतिदत्तेन गुरोर्नाम नैव निर्दिष्टमिति (द्र. प्रपन्नाचार्यः २०५१, ६६-६७, पादटिप्पण्याम्) यदभिहितम्, तस्यापि प्रामाण्यं परीक्षणीयमेव ।

संस्कृतवाङ्मयाभिवृद्धाववदानम्

पण्डितप्रकाण्डो निगमागमरहस्यवेत्ता न्याय-व्याकरण-मीमांसादिविविधविद्याविचक्षणो विविधग्रन्थप्रणयन-परायणः सुकृतिदत्तः संस्कृतवाङ्मयस्य विविधक्षेत्रेषु ग्रन्थप्रणयनपूर्वकं स्वकीयं पाण्डित्यप्रकर्षं द्योतितवान् । सुकृति-दत्तस्य कृतीनां विवरणप्रदर्शने द्विधा विभागः कर्तुं शक्यते । सुकृतिदत्तस्य कृतिषूल्लिखिता ग्रन्थाः, नेपालराष्ट्रियाभिलेखालये व्यक्तिगतसङ्ग्रहे चोपलब्धाश्च ग्रन्थाः । प्रथमतो विषयनिर्दर्शनपूर्वकं सुकृतिदत्तग्रन्थेषूल्लिखितानां ग्रन्थानां विवरणं प्रस्तूयते ।

१. व्याकरणे

- क) वृद्ध्यादिसूत्राष्टकविवृतिः ।
- ख) लघुशब्देन्दुशेखरटीका / क्रोडपत्रम्
- ग) परिभाषेन्दुशेखरः / क्रोडपत्रम् ।

२. न्याये

- क) शक्तिवादटिप्पणी
- ख) व्युत्पत्तिवादटिप्पणी
- ग) शब्दशक्तिप्रकाशिका टीका
- घ) गादाधरी टीका

३. साहित्ये

- क) अलङ्कारचूडामणिः
- ख) रत्नावली
- ग) रसिकरञ्जनी
- घ) रसमाला
- ङ) छन्दःप्रबन्धः
- च) रसगङ्गाधरटीका (मर्मभेदिनी)
- छ) कुवलयानन्दखण्डनम्
- ज) भावामृतव्याख्या

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

झ) नैषधीयक्रोडपत्राणि

ञ) शृङ्गारसङ्ग्रहः

ट) नेपालभूपालविरुदावली

ठ) देवीस्तुतिः (तारिणीवरिवस्या)

ड) कार्तवीर्योदयमहाकाव्यम्

ढ) मन्दारमाला

ण) गङ्गाप्रसादः

४. **तन्त्रे**

क) मकरन्दस्तुतिः

५. **दर्शने**

क) स्फोटवादः

ख) सिद्धान्तवादः

६. **ज्योतिषे**

क) ज्योतिषसारसिद्धान्तः

ख) मुहूर्तलाघवम् ।

उपरि चर्चितानां ग्रन्थानां सुकृतिकृतित्वेनोल्लेखः डा. स्वामिप्रपन्नाचार्येण, जोहान्नेस् श्नइडरनामकेन शोधकर्त्रा च विहितः । उपरितनग्रन्थेषु कतिपयग्रन्था एवाद्यत्वे समुपलभ्यन्ते । अवशिष्टानां सुकृतिदत्तकृतीनामन्वेषणमस्त्यपेक्षितम्।

उपरि निर्दिष्टेषु सुकृतिरचितग्रन्थेषु नेपालराष्ट्रियाभिलेखालये व्यक्तिगतसङ्ग्रहे चोपलब्धानां ग्रन्थानां प्रतिपाद्यं संस्कृतवाङ्मये तेषां वैशिष्ट्यञ्च संक्षिप्य चर्च्यते ।

१. **वृद्ध्यादिसूत्राष्टकविवृतिः**

नेपालराष्ट्रियाभिलेखालये मूलग्रन्थसंख्या – ५-३८७४, व्याकरणविषयसङ्ख्या- ५५७, अणुचित्रसङ्ख्या- ए ११९७/१० विवरणे ग्रन्थोऽयं द्रष्टुं शक्यते । प्रारम्भतोऽष्टासप्ततिपत्राणि (७८) ग्रन्थस्यास्योपलभ्यन्ते तेन ग्रन्थोऽयमन्त्ये खण्डितः । ग्रन्थे लिपिकरस्य लिपिविधानसमयस्य चोल्लेखाभावादैतिहासिकं विवरणं ग्रन्थतो नैवाधिगन्तुं शक्यम् । ग्रन्थस्य मङ्गलपद्यानि तु –

यामादिमायां रमणीस्वरूपां लसन्मणिद्योतितवर्म्मभाजम् ।
नानास्त्रविभ्राजिकरां स्तुवन्ति तारास्तु सा वाङ्मयदर्शिनी नः ।।१।।
नत्वा मुकुन्दचरणाम्बुजमादरेण गोनर्दजातभगवद्वचनानुसारात् ।
प्राचीननव्यपथपान्थ इमां सुकीर्तिः सूत्रेऽष्टके मुनिकृते विवृतिं करोति ।।२।।
भाष्यादूर्ध्वं कुणिप्रभृतिभिर्वामनाद्यैस्ततोऽर्वाक्
सूत्रे दाक्षीसुतमुनिकृते कल्पितैवास्ति वृत्तिः ।
न्यूनाधिक्यं किमपि मनसा तत्र सञ्चिन्त्य नूत्नां
वृत्तिं कुर्वे पृथुहितकरीमिष्टवाक्यादियुक्ताम् ।। (६/३)

इत्यादिकानि । ग्रन्थकृता चैकत्र 'अयं सर्वोऽपि प्रबन्धः पदपदार्थयोस्तादात्म्यमिति नागेशमतदूषणप्रस्तावे तदुक्तया

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

कोशस्थपदानामन्वयबोधरीत्या तन्मास्य विरोधमुद्भावयितुं सप्रासङ्गिकं प्रपञ्चित इति सुधियो विभावयन्तु' इत्युक्त्वा ग्रन्थस्य प्रतिपाद्यमपि वर्णितम्। माङ्गलिकेषु पद्येषु सम्पूर्णाया अष्टाध्याय्या व्याख्यानं चिकीर्षितं प्रतिभाति, किन्तूपलब्धे ग्रन्थे- संज्ञासूत्रत्वविचारः, शक्तिस्वरूपविचारः, अनुकरणविचारप्रकरणम्, पदपदार्थयोस्तादात्म्यनिराकरणम्, कोशस्थ-शब्दानां शब्दपरत्वमर्थपरत्वञ्चेति विचारः, यदागमपरिभाषार्थविचारः, अमरकोशस्थपरिभाषाया आशयनिरूपणम्, पदपदार्थयोस्तादात्म्यदूषणम्, लक्षणाविचारः (अपूर्णः)- चेत्यादयो विषयाः सन्ति निरूपिताः। मध्ये मध्ये प्रसङ्गतो नैयायिकानां नागेशानुयायिनां वैयाकरणानां मीमांसकानाञ्च मतानि सम्यगालोच्य नागोजीभट्टस्य मतानि बहुशः खण्डितानि सुकृतिदत्तेन । ग्रन्थस्यास्य मध्ये मध्ये- द्वन्द्वविषय एवैकशेष इति सिद्धान्तः निरूपयिष्यते चेदं सरूपसूत्रे (वृद्ध्यादि. १३१) इति, यथा चैतत् तथा निरूपयिष्यते 'तस्य भाव' इति सूत्रे (वृद्ध्यादि. ५०) इत्याद्युक्त्वा सम्पूर्णेऽपि पाणिनीयाष्टके विवृतिः सुकृतिना चिकीर्षितेति गम्यते । परमिदानीं यावदुपलब्धे ग्रन्थे, उपरि निर्दिष्टा एव विषयाः समुपलभ्यन्ते । मया च शोधप्रसङ्गे ग्रन्थस्य सम्पादनं विहितम्, परमद्यावधि ग्रन्थस्यास्य प्रकाशनं नैव जातम् ।

२. शेखरक्रोडपत्राणि

नागोजीभट्टरचिते शब्देन्दुशेखरे परिभाषेन्दुशेखरे च क्रोडपत्ररूपेण व्याख्या विहिता सुकृतिदत्तेनेति राष्ट्रियाभिलेखालये पाण्डुग्रन्थरूपेण स्थितानां क्रोडपत्राणामध्ययनेनावगम्यते । तत्राऽणुचित्रसङ्ख्या ए १२०४/४ विवरणे प्रकीर्णपत्ररूपेण विद्यमानेषु पत्रेष्वतिदेशसूत्रव्याख्यानं कर्तुं प्रवृत्तेन सुकृतिदत्तेनाधस्तनं मङ्गलपद्यं प्रस्तुतम्-

श्रीमत्पतञ्जलिपदाम्बुजमादरेण
चित्ते विचिन्त्य सुकृतिः कृतिनां कृतेऽद्य ।
किञ्चिद्विचारमतिदेशविधौ विधत्ते
दृष्टिं क्षिपन्तु विबुधा दययात्र सन्तः ।। इति ।

नैषधीयक्रोडपत्रे 'अत्र विस्तरो ङ्याप्सूत्रशेखरटीकायां मदीयायां विलोक्यः' इत्युल्लिखितत्वात् सुकृतिना सम्पूर्णेऽपि शेखरे टीका टीकितेति ज्ञायते । परमद्यावधि सा टीका नोपलब्धा, उपलब्धौ यत्न आवश्यकः ।

३. परिभाषेन्दुशेखरक्रोडपत्राणि

राष्ट्रियाभिलेखालये समुपलब्धेषु शब्देन्दुशेखरक्रोडपत्रेषु कतिपयपरिभाषाणां व्याख्यारूपाणि परिभाषेन्दु-शेखरस्य क्रोडपत्राणि सन्ति । परिभाषेन्दुशेखरस्य टीका सुकृतिरचनात्वेन राष्ट्रियाभिलेखालये मया नोपलब्धा । डा. स्वामिप्रपन्नाचार्येण सदाशिवभट्टरचितायाः परिभाषेन्दुशेखरटीकायाः सुकृतिकृतित्वेन विवरणं समुपन्यस्य पद्यमेकं समुपन्यस्तम्। सा टीका न सुकृतिरचिता, तस्याष्टीकायाः सुकृतिर्लिपिकर एवेति पाण्डुग्रन्थस्याध्ययनेनावगम्यते। यतो हि तस्य पाण्डुग्रन्थस्य २१ ख पृष्ठे सुकृतिदत्तेन ग्रन्थविषये स्वयमेवेत्थं निर्दिष्टम् -

सदाशिवोक्ते परिपूर्वशेखरव्याख्यानकेऽस्मिन्नतिदुष्टपुस्ते ।
यथाधि संशोध्य सुकीर्तिना कति लिपीकृताः सत्परिभाषिकाश्च ।।
दुरूहाणां पदार्थानां परिभाषेन्दुशेखरे ।
विकासयन्त्यां टीकायामस्यामज्ञो न खेलतु ।। इति ।

४. शक्तिवादटिप्पणी

गदाधरभट्टाचार्यरचिते शक्तिवादे सुकृतिना टिप्पणी कृतेति राष्ट्रियाभिलेखालयस्थानां न्यायविषयकाणां

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

पाण्डुग्रन्थानामवलोकनेन ज्ञायते । मूलग्रन्थसङ्ख्या ५-६६४३, न्यायविषयसं. ५६३, अणुचित्रसङ्ख्या बी. ५७/९ विवरणे व्युत्पत्तिवादे सुकृतिदत्तस्य टिप्पणी दृग्गोचरीकर्तुं शक्यते । विस्तरस्तु तत एवावगन्तव्यम् ।

५. शब्दशक्तिप्रकाशिकाटीका

जगदीशतर्कालङ्कारस्य शब्दशक्तिप्रकाशिकायां सुकृदित्तेन टीका रचितेति वृद्ध्यादिसूत्राष्टकविवृत्त्या अध्ययनेनावगतम् । तत्र हि 'अत एव भूमौ पङ्कजमुत्पन्नमित्यादौ कुमुदादिबोधोऽपि लक्षणयैव न्यायवार्तिककारेणाऽऽश्रितः । अत्राधिकमस्मत्कृतशब्दशक्तिप्रकाशिकाटीकायां विलोक्यम्' इत्याद्युक्त्वा सुकृतिटीकायाश्चर्चा विहिता। राष्ट्रियाभिलेखालये च - आद्यन्तखण्डिता शब्दशक्तिप्रकाशिकाटीका मूलग्रन्थसं. ५-५३०५, न्यायविषयसं. ५८१ (क), अणुचित्रसं. बी. ५७/१० विवरणे दृष्टिपथमवतरति । तत्र रचयितुर्नाम नास्ति, तेन सुकृतिदत्तस्यैवेयं रचनेति तु निश्चित्य वक्तुं न शक्यते । किन्तु तत्र 'व्युत्पत्तिवादस्य प्रथमाकारकटिप्पण्यां विस्तृतम्' इत्युक्त्वात्, व्युत्पत्तिवादे च सुकृतिना टिप्पणी रचितेति नैषधीयक्रोडपत्रस्याध्ययनेन वृद्ध्यादिसूत्राष्टकविवृत्त्या अध्ययनेन चावगम्यते । अतष्टीकाया अस्याः सुकृतिदत्तेन सम्बन्धो भवितुमर्हतीति धिया विषयेऽस्मिन् गवेषणमपेक्षितम् ।

६. नैषधीयक्रोडपत्राणि

श्रीहर्षरचिते नैषधीयचरितमहाकाव्ये सुकृतिना व्याख्या विहितेति क्रोडपत्राणामध्ययनेन ज्ञायते । २३ पृष्ठात्मिकाया व्याख्यायाः पाण्डुग्रन्थस्य सङ्कलनं डा. स्वामिप्रपन्नाचार्येण विहितम् । (द्र. प्रपन्नाचार्यः, २०५१, ७२-७३) । अस्यापि प्रकाशनमद्यावधि नैव जातम् । अत्र च सुकृतिदत्तस्य कतिपयकृतीनामुल्लेखादस्यैतिहासिकमपि महत्त्वं नाल्पम् ।

७. गोरक्षशाहविरुदावली

शाहवंशोद्भवानां राज्ञां विरुदावली रचिता सुकृतिदत्तेनेति पाण्डुग्रन्थस्याध्ययनेनावगम्यते। १६२ श्लोकात्मिकायां रचनायां कान्तिपुर्याः, पशुपतिनाथस्य, पञ्चश्रीसमन्वितपृथ्वीनारायणशाहतः पञ्चश्रीसमन्वितसुरेन्द्रशाहपर्यन्तानां राज्ञां वर्णनं दृग्गोचरीकर्तुं शक्यम् । अस्याञ्च विरुदावल्यां रचनासमयस्य निर्देशोऽपि कविना कृत इत्यैतिहासिकमहत्त्वमप्यस्ति अस्याः । रचनासमयादिबोधकं पद्यं तु -

संवद्भूमिवियन्नवेन्दुखमिते तापिच्छगुच्छछवि-
र्मासे कैरविणीशकान्तिविधुरे पक्षे दिने गीष्पतेः ।
श्रीगोरक्षधरातलेन्द्रविरुदावल्येकिका ? पूरिता
धीरश्रीभवदत्तसुनुसुकृतिः क्ष्मानिर्जरेणास्तु शम् ।।

उपरितनेन श्लोकेन १९०१ वैक्रमाब्दे भाद्रकृष्णद्वितीयायां गुरुवासरे विरुदावली रचितेति गम्यते । अस्या अपि प्रकाशनमवशिष्टमेव पाण्डुग्रन्थस्य छायापत्राणि स्वामिप्रपन्नाचार्यस्य सङ्ग्रहे विद्यन्ते ।

८. तारिणीवरिवस्या (देवीस्तुतिः)

सुकृतिदत्तस्य रचनासु तारिणीस्तोत्रस्यापि महत्त्वं नात्यल्पम् । इयं रचना सुकृतिदत्तस्यान्तिमा रचना भवितुमर्हतीति विभाव्यते । यतो हि सुकृतिनाऽत्र स्वकीयगुल्मरोगपीडायाः प्रमुखतया वर्णनं कृतम् । कविना ११० पद्यैः प्रथमं देव्याः स्तवनं विधाय गणेशस्य, शिवस्य, कृष्णस्य च विविधावतारसहितस्यापि स्तुतिः कृतेति स्तोत्रग्रन्थस्यास्याध्ययनेन ज्ञायते । स्तोत्रग्रन्थस्यास्य प्रकाशनं डा. स्वामिप्रपन्नाचार्येण २०५६ वैक्रमाब्दे विहितम्।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

९. शृङ्गारसङ्ग्रहः

शृङ्गारसङ्ग्रहस्य पत्रमेकं डा. स्वामिप्रपन्नाचार्यस्य सङ्ग्रहे विद्यते । तत्र –

श्रीदत्तसुप्रसादेन्दुविवृद्धमतिवारिधिः ।
सुकीर्तिदत्तशर्माहं कुर्वे शृङ्गारसङ्ग्रहम् ।।

इति पद्यमप्युपलभ्यते पद्य सम्पूर्णग्रन्थस्योपलब्धौ यत्नोऽपेक्षितो वर्तते । भावामृतव्याख्यायां शृङ्गारशतकस्योल्लेखो दृश्यते । मन्ये शृङ्गारसङ्ग्रहशृङ्गारशतकयोरैक्यमेव भवेत् ।

१०. भावामृतव्याख्या

जयदेवरचितगीतगोविन्दस्य दशमसर्गस्याष्टपद्या व्याख्या सुकृतिदत्तेन रचितेति ग्रन्थस्य पुष्पिकाया मङ्गल-पद्यस्य चाध्ययनेन ज्ञायते । अत्र च विविधरचनानामुल्लेखः सुकृतिना कृत इत्यपि महत्त्वमस्या व्याख्यायाः । डा. स्वामिप्रपन्नाचार्येण २०४९ वैक्रमाब्दे सम्पादनमस्य विहितम् । अस्य ग्रन्थस्य प्रकाशनञ्च खेमलालकोइरालाप्रभृतिभिः कृतम् ।

उपरि निर्दिष्टातिरिक्ताः कृतयो यत्र तत्रोद्धृताः साम्प्रतं यावदनुपलब्धाः, तासामुपलब्धौ प्रयासोऽपेक्षितः । उपरितनं विवरणं सङ्क्षेपेण निदर्शनमात्रम् । विस्तरस्तु मदीये शोधप्रबन्धे, डा. स्वामिप्रपन्नाचार्यस्य कार्तवीर्योदयमहाकाव्यस्य भूमिकायाम्, जोहान्नेस श्नाइडरनाम्ना शर्मण्यदेशवास्तव्येन विदुषा सम्पादितस्य शोधग्रन्थस्य भूमिकायाम्, सुकृतिदत्तस्य रचनासु चोपलब्धुं शक्यः । संस्कृतवाङ्मये महाकविना पण्डितवरेण्येन सुकृतिदत्तेन यदवदानं कृतं तस्य कृते विद्वांसः सदैव विदुषोऽस्य चर्चां विधास्यन्तीत्याशासे । इतोऽप्यधिकं विषयेऽस्मिन्नन्वेषणं भवत्विति धिया विषयोद्भावनाय मया किञ्चिन्निदर्शनमत्र प्रस्तुतमिति शम् ।



Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

कार्तवीर्योदयमहाकाव्ये ज्योतिषस्य प्रभावः

- प्रा.डा. साम्बराज आचार्यः

कार्तवीर्योदयमहाकाव्यस्य सम्पादनादिकार्यसमीक्षणम्

महाकविश्रीहर्षविरचितस्य नैषधमहाकाव्यस्य प्रौढशैल्यां निर्मितस्य कार्तवीर्योदमहाकाव्यस्य रचना तत्र भवता महाकविना सुकृतिदत्तपन्तमहाभागेन १९२८ तमे वैक्रमाब्दे कृता । अस्य महाकाव्यस्य सम्पादनं स्वामिना विद्यावारिधिना रामकृष्णप्रपन्नाचार्येण बहुना प्रयासेन विहितम् । एतस्य महाकाव्यस्य प्रकाशनं राजकीयप्रज्ञाप्रतिष्ठानात् २०५१ (एकपञ्चाशदुत्तरद्विसहस्रमिते) तमे वैक्रमाब्दे जातम् । अस्मिन् महाकाव्ये सप्तदश सर्गाः सन्ति । षोडशसु सर्गेषु मुख्य-विषयस्य प्रतिपादनरूपं वर्णनं दृश्यते चेत् सप्तदशे सर्गे कविवंशवर्णनमस्ति । नानाविधैश्छन्दोभिर्नानाविधैरलङ्कारैर्माधुर्यादिगुणैश्च सम्पन्नं काव्यमिदं नितरां मनोहरं महत्त्वपूर्णं नैपालकानां गौरवास्पदञ्च । अस्मिन् महाकाव्ये परमाणुवाद-पिलुवाद-विकल्पवाद-विवर्तनवाद-सत्कार्यवादादिदार्शनिकवादानां सिद्धान्तोल्लेखनैस्तथा नानाशास्त्रीयसिद्धान्तानामुल्लेखैश्च जाते काठिन्ये साधारणानां तु विदुषामपि काव्यस्य पूर्णतया तात्त्विकार्थावगमे तु काठिन्यानुभूतिर्भवत्येव । तथा च वैदिकयज्ञानामश्वमेधपौर्णमासवाजपेयादीनां यज्ञानां स्वरूपावगतिरपि पाठकस्य कृते काव्यस्यार्थावगमे आवश्यकीति ।

एकचत्त्वारिंशद्वारमाद्योपान्त्यं पठित्वा सम्पादितेऽपि अस्मिन् महाकाव्ये रिक्तस्थानानि यत्र तत्र दृष्टिपथमायान्ति। बहूनां जनानां सहयोगेन कृतस्याऽस्य सम्पादनकार्यस्य यथार्थमूल्याङ्कनं तु समये समये विद्वांस एव करिष्यन्ति । तथापि परस्परविरुद्धानां संशोधनीयानां परिमार्जनीयानाञ्च कतिपयेषां विषयाणामुल्लेखस्तु अत्र करणीय एव । यथा स्वामिना प्रपन्नाचार्येण लिखितायां प्रस्तावनायां सुकृतिदत्तपन्तः वि.सं. १८८० तमे वैक्रमाब्दे जात इति प्रस्तावनायाः६३ तमे पृष्ठे समुल्लिखितम् । तत्र प्रमाणं 'महाकविना स्वयमेव अष्टापदीव्याख्यायां लिखितमिति' दत्तम् । तत्र भवतः सुकृतिदत्तपन्तस्य पठनारम्भकालस्तु १८७० तमो वैक्रमाब्द इत्यपि ६६ पृष्ठेऽनुमितो दृश्यते । इत्थं स्वजन्मनो दशवर्षात् पूर्वमेव तत्र भवता पठनारम्भो विहित इति विरुद्धमपि घटनाक्रमं वर्णयित्वा लिखितं दृश्यते । अतोऽस्य महाकाव्यस्य सम्पादनादिविषये निष्पक्षधिया समीक्षाविमर्शादिकं तु विद्वद्भिर्नरन्तरर्येण अवश्यं करणीयमेवेति सिध्यति ।

नवमे परिशिष्टरूपे महाकाव्यस्य पद्यानामकारादिकाऽनुक्रमणिका दत्ता वर्तते । तत्र अकारादिक्रमस्य भङ्गो यत्र तत्र जातो दृश्यते, यथा – अजारजो वो विषये / अजरामरताऽपि, अथ विततताथक्ताः / अथ रत्नविचित्र, अर्थकामद्वयीवर्षे/ अर्काक्षरमाल्यवर, अलघुजघनभागात् / अलं ह्रिया बन्धुरगात्र, आत्मायमानन्दमय / आतेनिरे सर्वविशः, इत्थं सखीवाक्य/ इत्थं सखीरितवचः, उद्यच्छारदपार्वणा / उद्धूतधूमा, एवं समस्तवसुधा / एवं पुरोजन्यः, कर्णाभ्यर्णविकृष्टसृष्ट / कर्णान्तविभ्रान्त, गङ्गापगाभिर्जलधिम् / गङ्गातरङ्गा, गतवति निजनाथे / गजपाकप्रियः शाकः, घनघनाघनधीरतरध्वनि / घनघनाघनधीरतरध्वन, चित्रभानु / चित्रन्तु, तच्चेतनम् / तच्चारु, ततोऽचिरेण / ततस्समावृत्य, धारास्गरा / धात्रिका, नियमितकरणैषा / निमिष, पथि नरपतिः / पठन्ति यत्र, फाल्गुना प्रकृत / फलन्त्वलम्, बहुलकार्यवशात् / बन्धूक, मदमत्तमराल / मदनकेलि, यदमलाङ्घ्रि / यदपि, रोमाञ्चित / रोचनार, वाहिनीशत / वाङ्मात्रलभ्य, शूरोऽपि राजकर / शूरोऽपि नो, सत्यलोकादयो लोका / सत्यं वरोऽयम् इत्यादिषु अन्येष्वपि अनेकेषु स्थलेषु अकारादिक्रमभङ्गो जातो दरीदृश्यते । तेन बहुभिर्विद्वद्भिः सम्भूय अस्य ग्रन्थस्य साङ्गतासिध्यर्थं सम्पादनमवश्यं करणीमयेव । तत्र च वेदव्याकरणसाहित्यज्योतिषन्यायादीनां

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

शास्त्राणां मर्मज्ञैर्विशेषज्ञैः कर्तव्यनिष्ठतया सम्पादनं कृत्वा स्वामिना प्रपन्नाचार्येण प्रारब्धस्यातीवमहत्त्वपूर्णस्य कार्यस्य परिमार्जनं कृत्वा शुद्धं परिपूर्णं कार्तवीर्योदयमहाकाव्यं पुनः सम्पादनीयमेव ।

ज्योतिषशास्त्रस्य सर्वव्यापकत्वं सर्वशास्त्रोपयोगित्वञ्च

ज्योतिषं हि जनजीवनेन सह सम्बद्धं शास्त्रम् । ज्योतिषं विना न कोऽपि मनुष्यो व्यवहर्तुं शक्नोति । जन्मतो मृत्युपर्यन्तमेव मानवजीवने ज्योतिषशास्त्रस्योपयोगो भवति । कस्मिन् दिने कस्मिन् वारे कस्यां वेलायां जन्म जातम्, जन्मनः कति दिनानि व्यतीतानि, कतिवर्षवयस्को जातः, कदा नामकरणादिकं कर्म कार्यम्, कदा विवाहः कार्यः, कदा पुत्रपुत्र्यादयो जाताः । कदा च राजसेवायां प्रविष्टः, कदा निवृत्तः, कस्यां तिथौ मृतः, कस्मिन् दिने मृतस्य श्राद्धादिकं कर्म करणीयम्, इत्यादयो दैनिकाः, सांस्कृतिकाः, शास्त्रीयाः, व्यावहारिकाश्च विषया ज्योतिषशास्त्रेण सह सम्बद्धाः सन्ति, न केवलं सम्बद्धा अपितु तत्तच्छास्त्रनिर्धारितकर्मसम्पादनाय दिग्देशकाला ज्योतिषशास्त्रेणैव निर्धार्यन्ते च । किमाकारा भूमिः, कतिभिः क्षेत्रफलैर्युक्तेयं पृथिवी, ब्रह्माण्डस्य कस्मिन् भागे कस्यां दिशि स्थिता, कतिभिर्दिनै सूर्यं परित इयं भ्रमतीत्यादिकानां नानाविधानां विषयाणां व्यवहारे ज्योतिषशास्त्रान्तर्गतसङ्ख्याविभागः प्रयुज्यते तेन सर्वव्यापकत्वं सिध्यति ज्योतिषस्य । अत आह गणितसारसङ्ग्रहे महावीरः -

लौकिके वैदिके वापि तथा सामायिकेऽपि वा । व्यापारस्तत्र सर्वत्र सङ्ख्यानमुपयुज्यते ।।
कामतन्त्रेऽर्थशास्त्रे च गान्धर्वे नाटकेऽपि वा । सूपशास्त्रे तथा वैद्ये वास्तुविद्यादिवस्तुषु ।।
छन्दोऽलङ्कारकाव्येषु तर्क-व्याकरणादिषु । कलागुणेषु सर्वेषु प्रस्तुतं गणितं परम् ।।
सूर्यादिग्रहचारेषु ग्रहणे ग्रहसंयुतौ । त्रिप्रश्ने चन्द्रवृत्तौ च सर्वत्राङ्गीकृतं हि तत् ।।
द्वीपसागरशैलानां सङ्ख्याव्यासपरिक्षिपः । भवनव्यन्तरज्योतिर्लोक-कल्पाधिवासिनाम् ।।
नारकाणाञ्च सर्वेषां श्रेणी-बन्धेन्द्रकोत्कराः । प्रकीर्णकप्रभाणाद्या बुध्यन्ते गणितेन ते ।।
प्राणिनां तत्र संस्थानमायुरष्टगुणादयः । यत् किञ्चिद्वस्तु तत्सर्वं गणितेन विना न हि ।।
बहुभिर्विप्रलापैः किं त्रैलोक्ये सचराचरे । यत् किञ्चिद्वस्तु तत्सर्वं गणितेन विना न हि ।।

इति ।

अत एव वक्तुं शक्यते सुकृतिनाऽपि स्वकीये कार्तवीर्योदयनामके महाकाव्ये सर्वेषु सर्गेषु षष्ट्युत्तरशतस्थानेषु अर्थाद् दशप्रतिशतस्थानेषु ज्योतिषशास्त्रीयविषयाणामुल्लेखो कृतो दृश्यते । तेषां सर्वेषामुल्लेखनं कृत्वा मूल्याङ्कनं कर्तुं तु नाऽत्र लघुकाये निबन्धे सम्भवोऽस्ति । इह केवलं कतिपये महत्त्वपूर्णा एव ज्योतिषविषयाः कालिदासादिभिरपि प्रयुक्तैर्विषयैस्तुलनया साकमत्र प्रदर्श्यन्ते ।

कतिपये सिद्धान्तज्योतिषशास्त्राधारिता विषयाः

क) दिने तारकाणामदर्शने हेतुः

तारकाणां दर्शनं निरभ्रे आकाशे रात्रौ भवति । यदा सूर्योदयस्तदा तारका न दृश्यन्ते । ता विलीयन्ते । अधिकप्रकाशयुक्तस्य सूर्यस्य किरणजनितदृष्टिदोषाधिक्यात् तारका दृष्टिपथं नायाता इति तावद् ज्योतिषशास्त्रस्य राद्धान्तः। यथा सिद्धान्ततत्त्वविवेके मूर्धन्यो ज्योतिषशास्त्रीयाचार्यः कमलाकरः -

गोलेऽष्टमे तारकनीरगोलाः सदोज्ज्वलाः सूर्यकरैर्विलग्नैः ।
दिने तु ते त्वर्ककरप्रदुष्टदृशा न दृश्याः क्षितिपृष्ठगानाम् ।।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

अस्यैवाधारे सुकृतिना वर्णितम् –

उदिते कृतवीर्यभूभृतः प्रतपत्सूर्यविकाशि तेजसि ।
न हि पूरितराजमण्डलं सह नक्षत्रगणैस्तिरोऽभवत् ।। इति ।

ख) चन्द्रस्य कलावृद्धिक्रमः

तथा च चन्द्रस्य कलावृद्धिह्रासयोर्विषयेऽपि ज्योतिषस्य सिद्धान्तमाधारीकृत्यैव तत्र भवता सुकृतिना वर्णितं दृश्यते । ज्योतिषशास्त्रे हि चन्द्रस्य कलायाः पूर्णतया नाशोऽमायां भवतीति प्रतिपादितमस्ति । अमायां सूर्याचन्द्रमसावेकत्रैव भवतः । तदनन्तरं चन्द्रोऽधिकगतित्वादग्रतो याति । यथा यथा सूर्यमतीत्य सोऽग्रतो याति तथा तथा चन्द्रस्य कलाया वृद्धिः क्रमशो जायते । यदा सूर्यचन्द्रयोः परमाधिकमन्तरं भवति तदा पूर्णिमा तिथिर्भवति, पूर्णिमायां तिथौ च चन्द्रबिम्बं पूर्णमुज्ज्वलितं पृथ्वीवासिभिरस्माभिर्दृश्यते । इत्थमेव अन्येषां बुधशुक्रादीनामपि भवति । एष ज्योतिषशास्त्रीयः सिद्धान्तः । यथोक्तं भास्कराचार्यकमलाकराभ्याम् –

उपचितिमुपयाति शौक्ल्यमिन्दोस्त्यजत इनं व्रजतश्च मेचकत्वम् ।
जलमयजलजस्य गोलकत्वात्प्रभवति तीक्ष्णविषाणरूपताऽस्य ।।
तेजसां गोलकः सूर्यो ग्रहर्क्षान्यम्बुगोलकाः ।
प्रभावन्तो हि दृश्यन्ते सूर्यरश्मिप्रदीपिताः ।। इति ।

अस्यैवाधारे सुकृतिरपि –

शुक्लेन्दुमण्डलमिव क्रमतो विवृद्धिम् (४/४४)
भुवनमध्यविलीनतमोग्रहा
ग्रहदिनेशरुचः स्फुरिता यथा । (६/२७) इति लिखति ।

चन्द्रकलावृद्धिक्रमस्याऽस्य सिद्धान्तस्याधारे कविकुलगुरुणा कालिदासेनापि रघुवंशे तृतीयसर्गे लिखितम्-

पितुः प्रयत्नात्स शरीरसम्पदः शुभैः शरीरावयवैर्दिने दिने ।
पुपोष वृद्धिं हरिदश्वदीधितेरनुप्रवेशादिव बालचन्द्रमाः ।। इति ।

ग) चन्द्रस्य नक्षत्रेण सह योगः

यदा चित्रया सह समीप एव स्थितश्चन्द्रो निरभ्रे आकाशे दृश्यते तदाऽऽकाशस्य शोभा अतीव वर्धत इति बहुभिः कविभिर्वर्णितं दृश्यते ।

वाल्मीकिरामायणे अरण्यकाण्डे १७ तमेऽध्याये आदिकविः –

स रामः पर्णशालायामासीनः सह सीतया ।
विरराज महाबाहुश्चित्रया चन्द्रमा इव ।।

कविकुलगुरुः कालिदासो रघुवंशस्य प्रथमे सर्गे –

काऽप्यभिख्या तयोरासीद् व्रजतोः शुद्धवेषयोः ।
हिमनिर्मुक्तयोर्योगे चित्राचन्द्रमसोरिव ।।

तथैव सुकृतिदत्तेनाऽपि कार्तवीर्योदये पञ्चदशसर्गे –

अथ चैत्ररथारूढौ चैत्रिकोत्सवतत्परौ ।
रेजतुश्चित्रवेषौ तौ चित्राचन्द्रमसाविव ।। इति लिखितम् ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

एते त्रय एव कवयो ज्योतिषशास्त्रे वर्णितनक्षत्रचन्द्रयोः समागमरूपायाः शोभायाश्चित्रानक्षत्रमाधारीकृत्य वर्णनं कृतवन्तः ।

अत्र किं कारणम् ? किमर्थं कविभिरित्थं चित्राचन्द्रमसोर्योगवर्णनं विशिष्टीकृतमिति प्रश्ने तस्य कारणं ज्योतिषशास्त्रे उपलभ्यते । बृहत्संहितायां चन्द्रचाराध्याये (७ श्लोके) तथा पञ्चसिद्धान्तिकायां चतुर्दशाध्याये (३७ श्लोके) वराहमिहिराचार्या वर्णयन्ति – 'त्रिप्रकारकाणि नक्षत्राणि सन्ति । कतिपयानि अनागतभोगानि, कतिपयानि मध्यभोगानि, तथा कतिपयानि चातीतभोगानीति । एतदुक्तं भवति – उत्तरभाद्रपदस्थेन चन्द्रेण रेवत्या सह भोगः (समागमः) कृतो दृश्यते, रेवतीस्थेन अश्विन्या सह । एतादृशानि अन्यानि यावन्ति नक्षत्राणि सन्ति तानि अनागतभोगानीति कथ्यन्ते । नक्षत्रस्य यत्र मध्यभागो भवति तत्रैव चन्द्रे प्राप्ते सति तस्मिन्नेव नक्षत्रे यदि चन्द्रश्च दृष्टो भवेत् तदा तथाविधानि नक्षत्राणि मध्यभोगानीति कथ्यन्ते । यथा चित्राया यावान् भोगभागस्तस्यार्धे स्थितोऽर्थात् मध्ये स्थितश्चन्द्रः चित्रानक्षत्रेण सहैवाकाशेऽपि दृश्यते चेत्तदा तयोः समागमो जात इति कथ्यते । अवशिष्टानि चान्यानि नक्षत्राणि अतीतभोगानि कथ्यन्ते अर्थात् मूलस्थस्य चन्द्रमसो ज्येष्ठानक्षत्रेण सह समागमो भवतीति तथा पूर्वाषाढास्थस्य चन्द्रस्य मूलेन सह समागमो जातो दृश्यते आकाशे । एतादृशानि यावन्ति नक्षत्राणि, तानि अतीतभोगानि कथ्यन्ते ।' इति

एतस्मिन् वर्गीकरणे चित्रानक्षत्रं मध्यभोगि नक्षत्रमस्ति । तेन तत्रस्थेनैव (चित्राभोगभागस्य मध्यभागस्थेनैव) विधुना चित्रया सह समागमो जातोऽस्माभिः पृथ्वीवासिभिर्दृश्यते । तेनैव कारणेन कविभिः – **चित्राचन्द्रमसोरिव** इति कथितं प्रतिभाति । तत्तु ज्योतिषशास्त्राधारितं वस्तुतथ्याधारितञ्चेति ।

फलितज्योतिषसम्बन्धाः कतिपयविषयाः

क) ग्रहोच्चराशिज्ञानम्

त्रिप्रभृतिभिरुच्चस्थैर्नृपवंशभवा भवन्ति राजानः ।
पञ्चादिभिरन्यकुलोद्भवाश्च तद्वत्त्रिकोणगतैः ।।

अर्थात् जन्मकुण्डल्यां स्थितग्रहेषु मध्ये यदि पञ्चग्रहाः स्वोच्चराशौ स्थिता भवन्ति तदा साधारणकुलोत्पन्ना जना अपि राजपदं प्राप्तुं शक्नुवन्तीति तावत् फलितज्योतिषस्य सिद्धान्तः ।

सिद्धान्तमिममाधारीकृत्य तत्र भवता कालिदासेन रघुवंशमहाकाव्यस्य तृतीये सर्गे **'ग्रहैस्ततः पञ्चभिरुच्चसंश्रयैरसूर्यगैः सूचितभाग्यसम्पदम्'** इति लिखितं दृश्यते । नात्र कालिदासेन को ग्रहः कस्मिन् राशौ उच्चस्थो भवतीति स्पष्टतया लिखितम् । सुकृतिदत्तेन तु

दिनकृति शुचिकोणाच्छौचपत्रं गृहीत्वा
गतवति शिववाहं शेखरे (चे)श्वरस्य ।
मृगयति मृगपङ्कं मङ्गले मङ्गलार्थम्
स्थितवति परमोच्चं कर्कमारुह्य जीवे ।।(४/४५)

अस्मिन् पद्ये स्पष्टतया चन्द्रस्योच्चराशिर्वृषः, मङ्गलस्य मकरस्तथा बृहस्पतेः कर्कटराशिरिति **'अजवृषभमृगाङ्गनाकुलीरा झषवणिजौ च दिवाकरादितुङ्गाः'** इति वराहमिहिरेण लिखितमाधारीकृत्य शुद्धरूपेण ग्रहाणामुच्चराशयो निरूपिताः सुकृतिना । अतः फलितज्योतिषस्य विशिष्टं ज्ञानं सुकृतिदत्ते आसीदिति प्रमाणीभवति।

ख) मुहूर्त्तानां यथार्थज्ञानम्

दिने पञ्चदश मुहूर्त्ताः । रात्रौ च पञ्चदश मुहूर्त्ताः । ते शुभमध्यमाधमरूपेण वर्गीकृताः सन्ति । शुभकर्मणि

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

शुभमुहूर्त्तानां ग्रहणम् । विवाहे शुभमुहूर्त्तस्य वेलायां जनाः कार्याणि कुर्वन्ति । तत्र भवता सुकृतिनाऽपि विवाहवेलायां शुभमुहूर्त्तस्य, विवाहे ग्राह्यनक्षत्रस्य(हस्तस्य) चोल्लेखं कृत्वा स्वज्योतिषशास्त्रीयज्ञानपरिचयो दत्तो वर्तते यथा-

अथ प्रशस्तेऽभ्युदिते मुहूर्त्ते हस्तेऽभिशस्ते गलहस्तिते च । (१४/६२)
एवं सखीमातृगणेन साधु प्रसाधिता सा सुतरां दिदीपे । (१४/६१) इति ।

तथैव कलिकुलगुरुः कालिदासोऽपि कुमारसम्भवे सप्तमसर्गे -

मैत्रे मुहूर्त्ते शशलाञ्छनेन योगं गतासूत्तरफल्गुनीषु ।
तस्याः शरीरे प्रतिकर्म चक्रुर्बन्धुस्त्रियो याः पतिपुत्रवत्यः ।।

ग) ध्रुवताराया विलोकनम्

विवाहे वरः कन्यां ध्रुवतारां दर्शयति । अयं हिन्दूनामाचारः । तमाचारं वर्णयन् सुकृतिश्चतुर्दशे सर्गे लिखति –

विलोकयेति ध्रुवमीरिता सा भर्त्रा सुरुच्या सहितीकृतं तम् ।
परं दृशानुत्तमसोदरञ्च प्रैक्षिष्ट चित्तेन न तद्गतेन ।।८४।।

तथैव कालिदासः कुमारसम्भवे

ध्रुवेण भर्त्रा ध्रुवदर्शनाय प्रयुज्यमाना प्रियदर्शनेन ।
सा दृष्टमित्याननमुन्नमय्य ह्रीसन्नकण्ठी कथमप्युवाच ।।

इत्थं ज्योतिषशास्त्राधारिता व्यावहारिकाः सांस्कृतिकाश्चानेके विषयाः कार्तवीर्योदयमहाकाव्ये वर्णिताः सन्ति । तेषां सर्वेषां मूल्याङ्कनं कर्तु नात्र पार्यते । केवलं कतिपयेषामुल्लेखनं कृत्वाऽत्र विरम्यते ।

यस्यावदातगुणराशिनिवासहेतोः ब्रह्माण्डवृन्दमपि सङ्कटमेव गेहम् । (१/५)

अत्रानेकब्रह्माण्डानां सत्ताऽस्तीति स्वीकृतम् । द्वितीये सर्गे **धरणेर्वलयाकारत्व(गोलाकारत्व)वर्णनम्** (३० श्लोके), तृतीये **महीयं सप्तद्वीपवती अस्तीति वर्णनम्** (३४ श्लोके), चतुर्थे **उद्यद्रवीन्द्रपरिवेषवशेन किं वा ?** इत्यनेन परिवेषवर्णनम् (५ श्लोके), पञ्चमे **ज्योतिषशास्त्रानुसार्यक्षरारम्भविधिवर्णनम्** (५० श्लोके), षष्ठे **सूर्यकिरणैर्ग्रहाः प्रकाशिता भवन्तीति** प्रतिपादनम् (२७ श्लोके), सप्तमे **अत्रिपुत्रसदनं नाम कर्कटराशिरिति** वर्णनम् (२० श्लोके), अष्टमे **पारे परार्द्धगणनापि परार्द्धवृत्तान्यासादयेत्** इत्यनेन परार्धसङ्ख्योल्लेखनम् (७२ श्लोके), नवमे **बहुमीलितपर्वसन्धयः** इत्यादिना सामुद्रिकशास्त्राधारितकरशाखावर्णनम् (७६ श्लोके), दशमे **शुक्लपक्षस्य कृष्णपक्षस्य च वर्णनम्** (६५ श्लोके), एकादशे **दाक्षिणात्यो विवस्वान् शीतो भवतीति** ऋतुवर्णनम् (३२ श्लोके), द्वादशे **चन्द्रकलङ्कविषयकवर्णनम्** (१३ श्लोके), त्रयोदशे **अष्टदिगीशानामुल्लेखः** (२९ श्लोके), चतुर्दशे **मौहूर्त्तिकादिष्टविवाहवेलावर्णनम्** (२९ श्लोके), पञ्चदशे **नानाविधानां कुशक्रौञ्चादिद्वीपानां** वर्णनम् (१५४, १५८ श्लोके), षोडशे **चन्द्रकलङ्कविषयकनानाविधविचारोपस्थापनम्** (१०८ श्लोके), सप्तदशे **नागेन्द्रनेत्रनवभूमित (१९२९) विक्रमाब्दे** इति लिखित्वा ज्योतिषशास्त्रीयसङ्ख्योल्लेखनशब्दानां स्वज्ञानवत्त्वप्रकटनम् (३५ श्लोके), एतान् ज्योतिषशास्त्रीयविषयान् प्रचुररूपेण प्रयुक्तान् दृष्ट्वा कार्तवीर्योदयमहाकाव्ये ज्योतिषशास्त्रस्य प्रभावोऽत्यन्तमस्तीति वक्तुं शक्यत इति शम् ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

कार्तवीर्योदयमहाकाव्यस्य प्रबन्धविधानम्

- प्रा. नीलमणिढुङ्गाना:

वसुपन्तकुलभूषणेन निखिलशास्त्रार्णवालोडनमन्दरायमाणेन कालिदासमाघश्रीहर्षादिकवीनां काव्यामृतपानसंवर्धित-साहित्यामलवपुषा भार्गवीभवदत्तसूनुना श्रीमता सुकृतिदत्तपन्ताभिधेन महाकविना प्रणीतेषु मन्दारमाला-छन्दःप्रबन्धभावामृतादि-ग्रन्थेषु विलक्षणमेव वैशिष्ट्यं धत्ते कार्तवीर्योदयं नाम महाकाव्यम् ।

स्वामिप्रपन्नाचार्य-जोन्सनमहोदयाभ्यां संस्कृतमपि महाकाव्यमिदं विप्रवर्येभ्य एव पुनः संस्कारं कामयमानं सारस्वतयज्ञेऽस्मिन् समुपस्थितमिव प्रतीयते । अशरण्यस्य शरणदैरत्र भवद्भिर्विद्वद्वरैः कार्यपत्रलेखकैः सहभागिभिश्च संभूय महाकाव्यस्यास्य संस्काराय यत्सत्रमारब्धं तत्फलन्तु दशाश्वमेधजफलादपि अधिकमिति विभावयामि । सन्दर्भेऽस्मिन् पुण्यलवलोलुपेन मयाऽपि महाकाव्यस्यास्य प्रबन्धविधानविषयमधिकृत्य स्वल्पं विचारपत्रं प्रणीतन्तदहं विद्यावदातान्तःकरणानां भवतां पुरः सत्रेऽस्मिन् समुपस्थापयितुमवसरं कामये ।

भवन्तो जानन्त्येव यत् कार्तवीर्योदयं नाम महाकाव्यं कृतवीर्यपुत्रस्य कार्तवीर्यस्योदयमधिकृत्य प्रणीतं प्रबन्धकाव्यमिति। प्रबन्धविधानदृशा काव्येऽस्मिन् यद्वैशिष्ट्यमधिगम्यते तत्रैव केन्द्रीभूतमस्ति विचारपत्रमिदम् । तत्रादौ किमस्ति प्रबन्धविधानमित्यत्र किञ्चिद् विचार्यते। विधीयते इति विधानम्, प्रबन्धस्य विधानम् प्रबन्धविधानमिति व्युत्पत्या पदमिदं निष्पादयन्ति वैयाकरणाः। प्रबन्धविधानस्य महदस्ति वैशिष्ट्यम्, इत्थञ्च प्रबन्धविधानं नाम समुचितपद्धत्या प्रबन्ध-शरीरावयवभूतानां कथावस्तुपात्ररसालङ्कारादितत्त्वानां सङ्घटनमित्यर्थो भवति समीचीनः । यथा परमरमणीयापि भूषणवत्यपि रसवत्यन्वयवत्यपि रमणी समुचिताङ्गसंस्थानं विना न शोभते, युवकानां मनो हर्तुं न प्रभवति तथैव रसालङ्कारप्रतीय-मानार्थवक्रोत्यादिभिर्लसितापि कविभणितिः प्रबन्धसंघटनस्य विच्छित्तिं विना सौन्दर्यमाधातुं न शक्नोति, सहृदयानामन्तः-करणमावर्जयितुञ्च न प्रभवति ।

साहित्यस्य भेदानुसारेण प्रबन्धविधानविधिश्च नैकविधो भवति । कथाविधानस्य किं वा महाकाव्येतरविधानां प्रणयनस्य या सरणिर्विद्यते तया सरण्या महाकाव्यं न निर्मीयते । महाकाव्यीयप्रबन्धविधानविषये यदुक्तं साहित्यदर्पणे -

सर्गबद्धो महाकाव्यं तत्रैको नायकः सुरः ।
सद्वंशः क्षत्रियो वापि धीरोदात्तगुणान्वितः ।।
एकवंशभवा भूपाः कुलजा बहवोऽपि वा ।
शृङ्गारवीरशान्तानामेकोऽङ्गीरस इष्यते ।।
अङ्गानि सर्वेऽपि रसा सर्वे नाटकसन्धयः ।
इतिहासोद्भवं वृत्तमन्यद्वा सज्जनाश्रयम् ।।
चत्वारस्तस्य वर्गाः स्यु तेष्वेकञ्च फलं भवेत् ।
आदौ नमस्क्रियाशीर्वा वस्तुनिर्देश एव वा ।।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

क्वचिन्निन्दा खलादीनां सताञ्च गुणकीर्तनम् ।
एकवृत्तमयैः पद्यैरवसानेऽन्यवृत्तकैः ।।
नातिस्वल्पा नातिदीर्घा सर्गा अष्टाधिका इह ।
नानावृत्तमयः क्वापि सर्गः कश्चन दृश्यते ।।
सर्गान्ते भाविसर्गस्य कथायाः सूचनं भवेत् ।
सन्ध्यासूर्येन्दुरजनीप्रदोषध्वान्तवासराः ।।
प्रातर्मध्याह्नविषयाः शैलर्तुवनसागराः ।
सम्भोगविप्रलम्भौ च मुनिस्वर्गपुराध्वराः ।।
रणप्रयाणोपयममन्त्रपुत्रोदयादयः ।
वर्णनीया यथायोगं साङ्गोपाङ्गा अमी इह ।।
कवेर्वृत्तस्य वा नाम्ना नायकस्येतरस्य वा ।
नामास्य सर्गोपादेयकथया सर्ग नाम तु ।। इति ।

प्रबन्धविधानविषये प्रबन्धध्वनिसन्दर्भे यदुक्तं ध्वन्यालोककृता श्रीमता आनन्दवर्धनाचार्येण -

विभावभावानुभावविभावौचित्यचारिणः ।
विधिः कथाशरीरस्य वृत्तस्योत्प्रेक्षितस्य वा ।।
इतिवृत्तवशायातां त्यक्त्वाननुगुणां स्थितिम् ।
उत्प्रेक्ष्याप्यन्तराभीष्टरसोचितकथोन्नयः ।।
सन्धिसन्ध्यङ्गघटनं रसाभिव्यक्त्यपेक्षया ।
न तु केवलया शास्त्रस्थितिसंपादनेच्छया ।।
उद्दीपनप्रशमने यथावसरमन्तरा ।
रसस्यारब्धविश्रान्तेरनुसन्धानमङ्गिनः ।।
अलङ्कृतीनां शक्तावप्यानुरूप्येण योजनम् ।
प्रबन्धस्य रसादीनां व्यञ्जकत्वे निबन्धनम् ।।
अनुस्वानोपमात्माऽपि प्रभेदो य उदाहृतः ।
ध्वनेरस्य प्रभेदेषु भासते सोऽपि केषुचित् ।।
प्रबन्धे मुक्तके वापि रसादीन् बन्धुमिच्छता ।
यत्नः कार्यः सुमतिना परिहारे विरोधिनाम् ।।
विरोधिरससम्बन्धिविभावादिपरिग्रहः ।
विस्तरेणान्वितस्यापि वस्तुनोऽन्यस्य वर्णनम् ।।
अकाण्ड एव विच्छितिरकाण्डे च प्रकाशनम् ।
परिपोषं गतस्यापि पौनःपुन्येन दीपनम् ।।

प्रबन्धविधानविषये कुन्तकोऽप्येवमाह -

इतिवृत्तान्यथावृत्तरससम्पदुपेक्षया ।
रसान्तरेण रम्येण यत्र निर्वहणं भवेत् ।।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

तस्या एव कथामूर्तेरामूलोन्मिलिताश्रयः ।
विनेयानन्दनिष्पत्त्यै सा प्रबन्धस्य वक्रता ।।
त्रैलोक्याभिनवोल्लेखनायकोत्कर्षकारिणा ।
इतिहासैकदेशेन प्रबन्धस्य समापनम् ।। इति ।

एवमेव क्षेमेन्द्रोऽपि औचित्यचर्चाभिधानके स्वग्रन्थे प्रबन्धौचित्यसन्दर्भे प्रबन्धविधानविधिं सम्यक्तया प्रतिपादितवान्। पाश्चात्यजगति लब्धप्रतिष्ठैः काव्यकोविदैः समीक्षाम्भोधिसमालोडननिपुणैर्विद्वद्भिर्बहुधा प्रबन्धविधानस्य महाकाव्यविधानस्य च पद्धतिः प्रत्यपादि । पौरस्त्यविदुषां पाश्चात्यधीवराणाञ्च तानेव प्रबन्धविधानविधीनाश्रित्य बहूनि महाकाव्यानि प्रणीतानि, साम्प्रतं प्रणीयमानानि च सन्ति ।

सुकृतिदत्तपन्तेन प्रणीतं कार्तवीर्योदयं नाम महाकाव्यं काव्यकलयेव शास्त्रीयपाण्डित्येनेव च प्रबन्धाविधानेनापि स्वकीयं वैशिष्ट्यं धत्ते । उक्त सिद्धान्तानुसारेण महाकाव्यस्यास्य निदर्शनान्यपि सन्दर्श्य विश्लेषणमपेक्षितम्, सीमाङ्किते विचारपत्रे तदसम्भवतया दिङ्निर्देशनमेवात्र विधीयते ।

सतीष्वपि कार्तवीर्यसम्बद्धासु पुराणोपपुराणवर्णितासु नैकविधकथासु कार्तवीर्योदयमहाकाव्यस्योपजीव्यग्रन्थरत्नं श्रीमता भगवता वेदव्यासेन प्रणीतं विष्णुपुराणं विद्यते। पुराणस्यास्य चतुर्थांशस्यैकादशाध्याये कार्तवीर्यसम्बद्धं यत्कथानकमस्ति, तदेवादाय सुकृतिदत्तपन्तो महाकाव्यमिदं प्रणीनाय । परं महाकाव्यस्य नायकगतामुदात्ततां प्रकाशयितुं स तत्र यथेष्टं परिवर्तनमपि चकार । पुराणेऽनिबद्धा अपि काश्चन घटनाः कविना सुकृतिदत्तपन्तेन स्वप्रतिभया समुद्भाव्य सन्ति विन्यस्ताः। ताः सन्ति सर्वाः कवेर्मौलिक्य उद्भावनाः । किञ्च पुराणस्य कथानकमाख्यानानुकूलं वर्तते, तस्य सङ्घटनञ्चाख्यानानुसारि विद्यते । परन्तु महाकाव्यस्य कथावस्तु कथाविधायाः कथानकात् पृथगेव भवति । जीवनस्य विशालताचित्रणपरतया सङ्घटनेऽपि तत् स्वकीयं वैशिष्ट्यं धत्ते, तत्र वर्णनस्य विस्तारो भवति । पौराणिकं कथानकमनुसरदपि महाकाव्यमेतद् विविधैर्गरिममण्डितविशेषतापरिलसितैरलङ्कारविधानादिभिः संस्कृतमहाकाव्यजगति स्ववैशिष्ट्यं स्थापयन्नेपालस्य गौरवं निखिलेष्वपि भुवनेषु विस्तारयति । अत एव च जर्मनीदेशवास्तव्यो जोन्सननामा प्रतीच्यः प्रधीः स्वसम्पादितग्रन्थस्य कार्तवीर्योदयस्य भूमिकायां सुकृतिदत्तं ग्रन्थमेनञ्च प्राशंसत् ।

महाकाव्येऽस्मिन् सप्तदश सर्गाः सन्ति । तत्र प्रथमसर्गे कार्तवीर्यराजधान्या माहिष्मत्याः कार्तवीर्योदयकथानकस्य च महत्त्वं वर्णितमस्ति। द्वितीयसर्गे तत्पितुः कृतवीर्यस्य सुशासनं चित्रितं विद्यते । अस्मिन्नेव सर्गे कृतवीर्यो निःसन्तानः स्वपीडानिवारणाय दत्तात्रेयस्याश्रमं समुपैति । तृतीयसर्गे तत्प्रणीतवचनैः प्रीतो गुरुर्दत्तात्रेयस्तस्मै सन्ततिलाभसम्बद्धमाशिषं प्रयच्छति, स्वनगरीञ्च प्रत्यागच्छति । चतुर्थसर्गे दत्तात्रेयस्य कृपया कृतवीर्यः सर्वलक्षणसमवेतं सुतं जनयति, अर्जुन इति तस्याभिधानञ्च करोति। पञ्चमसर्गे कार्तवीयस्य शैशवावस्था वर्णिताऽस्ति । अस्मिन्नेव सर्गे कार्तवीर्यस्य गुरुगृहगतं विद्याध्ययनञ्च वर्णितमस्ति । षष्ठे सर्गे दिव्यशक्तिलाभाय कार्तवीर्यकृतं तपश्चरणं निरूपितमस्ति । सप्तमसर्गे विविधैः शब्दालङ्कारप्रधानैर्वाक्यैः कार्तवीर्यस्य तपोवनाद् गृहप्रत्यागमनरूपो विषयः प्रतिपादितः । अष्टमे सर्गे कार्तवीर्यार्जुनस्य राज्याभिषेकविषयः, कृतवीर्यस्य तपोवनगमनाख्यानञ्च वर्णितम् । नवमसर्गे कनकप्रभायाः स्वयंवरयोजनामुपक्रान्तुं तस्याः सौन्दर्यादिकं वर्णयति कविः । दशमसर्गे कनकप्रभायाः स्वयंवरसमारोहे कार्तवीर्यस्य यात्रावृत्तान्तो विदर्भराजधान्या वैशिष्ट्यञ्च निरूपितं विद्यते । एकादशसर्गे कार्तवीर्यस्य कनकप्रभास्वयंवरस्थलगमनं वर्णितम् । द्वादशसर्गे कनकप्रभायाः स्वयंवरः सुविशदं वर्णितः । त्रयोदशे सर्वोत्कृष्टतया कनकप्रभया कार्तवीर्यस्य वरणं निरूपितम् । चतुर्दशसर्गे कनकप्रभाकार्तवीर्ययोर्विवाहवर्णनं विद्यते । विवाहानन्तरमुपवनादिषु विहरन् कार्तवीर्यो जलक्रीडार्थमुपयाति । तत्रैव च रावणोऽपि समागच्छति । तयोर्युद्धे रावणस्य पराजयो दर्पभङ्गश्च जायते । पञ्चदशसर्गे कनकप्रभया सहितस्य कार्तवीर्यस्य द्वीपान्तरेषु सागरेषु च कृतो विहारो निबद्धः। षोडशे सर्गे शास्त्रचर्चां दानादिकञ्च कृत्वा मोक्षप्राप्तये तपोवनप्रस्थानं निरूपितम् । सप्तदशसर्गे कविना स्ववंशपरिचयः, स्वकाव्यविवरणञ्च प्रस्तुतम् । इत्थं महाकाव्यस्य समाप्तिर्जायते ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

अर्थप्रकृतयः कार्यावस्थाः सन्धयश्च सन्ति कथावस्तुविकासस्य साधनानि । सुकृतिदत्तोऽस्मिन् महाकाव्ये तत्साधनानि कया रीत्या प्रयुङ्क्ते इत्येवमस्त्यत्र विचारणीयम् । कार्तवीर्योदयमहाकाव्यकथानकस्य प्रधानं साध्यमस्ति कार्तवीर्यनृपतेरुदयस्य प्रदर्शनम् । विशिष्टकाव्यरचनाद्वारा कालिदासभारविमाघश्रीहर्षादिकवीनामिव यशोऽभिलषता महाकाव्यकारेण -

यन्नामवामगुणधामसुरामकीर्ति-
रद्यापि भूमिवलयं विमलीकरोति ।
तस्यार्जुनस्य चरितं महितं यथाधि
सङ्कीर्तयामि निजबुद्धिविशोधनाय ।। (१/२३)
कथा भागीरथ्या जगति बहुपथ्यापि न तथा (१/२१)

इत्याद्युक्तिभिः साध्यस्य बीजं निर्दिष्टमस्ति स्पष्टम् ।

गच्छ साधय समीहितकार्यं साधयामि भवदीप्सितमाशु ।
आत्मनाप्युभयथा श्रुतिवाक्याद् विष्णुना रम विरामविहीनः ।। (का.म. ३/५२)

इत्यन्तं यावद् बीजमेवोवस्थापयति महाकविः पन्तः । पुत्रप्राप्तये दत्तात्रेयदत्तशुभाशीर्वादपर्यन्तोऽयं भागः कथानकस्य आरम्भावस्थां सूचयति । बीजाभिधाया अर्थप्रकृतेरारम्भावस्थायाश्च मुखसन्धिना संयोगो भवति । मुखसन्धावेव बीजोत्पत्तिः, उद्देश्यकथनं फलप्रोत्साहनादयश्च निरूप्यन्ते । सर्वेषामप्येषां सद्भावः प्रसङ्गेऽत्र समुपलभ्यते। अतोऽत्र मुखसन्धिर्विलसति।

बिन्दुप्रयत्नयोः समन्वयः प्रतिमुखसन्धौ भवति । महाकाव्येऽस्मिन् चतुर्थसर्गान्नवमसर्गं यावद् अर्थप्रकृति-बिन्दुमुपस्थापयति महाकाव्यकारः । कार्तवीर्योदयमहाकाव्ये यदा कृतवीर्यः स्वपुत्रायार्जुनाय राज्यं समर्प्य तपस्तप्तुं वनमभियाति तदा कथानकं विच्छिन्नमिव जायते, तदा नवमसर्गेण तस्य पुनः संयोजनं विधीयते । अतोऽत्र बिन्दुनाम्न्यर्थप्रकृतिर्विलसति । अस्मिन्नेव भागे दत्तकस्य कृपयाऽर्जुनस्य जन्म भवति, धर्मशास्त्रोक्तविधिना तस्य संस्काराश्च क्रियन्ते । कृतवीर्यप्रासादे मित्रगणैः स शैशवावस्थां यापयति । विद्याध्ययनार्थं कार्तवीर्यो गुरोर्दत्तकस्य समीपं गच्छति । तत्र सकला विद्या अधीत्य माहिष्मतीं प्रत्यागच्छति । पुनश्च स दिव्यशक्तिलाभाय तपस्तप्तुं वनमभियाति। तत्र च कठिनन्तपस्तप्त्वा कार्तवीर्यो ब्रह्मणो वरं लब्ध्वा माहिष्मतीं प्रत्यागच्छति, तस्य च दत्तात्रेयोपदेशानुसारेण राज्याभिषेकः सम्पद्यते । कृतवीर्यः स्वपुत्राय राज्यं समर्प्य तपोवनमभियाति । पितृवियोगात्कार्तवीर्ये नैराश्यं समुदेति। एष एव कार्तवीर्योदयस्य प्रयत्नाख्या कार्यावस्था विद्यते । बिन्दुप्रयत्नयोः समन्वयः प्रतिमुखसन्धौ जायते । अत एव महाकाव्येऽस्मिन् चतुर्थसर्गान्नवमसर्गं यावत् प्रतिमुखसन्धिर्विलसति ।

महाकाव्यस्यास्य स्वयंवरार्थं समागतानां नृपाणां वर्णनादौ पताकाभिधार्थप्रकृतिरुपनिबद्धाऽस्ति । अस्मिन्नेव प्रसङ्गे प्रयत्नाख्यायाः कार्यावस्थाया भवति प्रारम्भः । अत्रैकतः कार्तवीर्यस्योदयविघातका इन्द्रप्रहितकामदेवकृततपोविघ्नाद्या रावणयुद्धादयश्च विषयाः सन्ति काञ्चन वर्णिताः, तदन्यतः कनकप्रभया सर्वानपि राजकुमारान् परित्यज्य कार्तवीर्यस्य वरणम्, युद्धे रावणस्य पराजय इत्याद्या घटनाः सन्त्यनुकूलतया समुपन्यस्ताः । अत्रैव पताकाकार्यावस्थयोः समन्वयरूपो विमर्शसन्धिर्निबद्धः । महाकाव्ये विमर्शसन्धेरुद्भव एवोपलभ्यते न तु परिपोषः ।

महाकाव्यस्य पञ्चदशसर्गस्यावसाने सकलान् शत्रून् विजित्य शासनं विदधतो कार्तवीर्यस्योदयोऽत्यधिकतया वर्णितः । अत्रैव नियताप्तिः, दृश्यते । निर्वहणसन्धेश्च सङ्केतोऽत्रैव विहितो वर्तते कविना । षोडशे सर्गे कविना कार्तवीर्यस्य धार्मिकं शास्त्रीयञ्च वैदुष्यं प्रकाशितम् । सकलमपि राज्यं परित्यज्य मोक्षप्राप्तये तपश्चरणाय कार्तवीर्यस्य वनप्रस्थानविषयोऽत्र वर्णितः । महाकाव्यस्य कथानकमिहैव विरतं भवति । अत्र फलागम उपसंहृतिः कार्याभिधाऽर्थप्रकृतिश्च संलक्ष्यन्ते । महाकाव्यस्य कथानकं विविधालङ्कारप्रयोगवैदुष्यप्रदर्शनादिकार्यजातैः समृद्धमपि प्रासङ्गिककथानकस्य विरलप्रवाहतया विच्छिन्नमिव न प्रतिभाति ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

महाकाव्ये सद्वंशोत्पन्नो धीरोदात्तो देवप्रकृतिक एकमात्रो वा तादृशा बहवो भूपा नायका भवितुमर्हन्ति । महाकाव्येऽस्मिन् कृतवीर्यवंशोद्भवश्चक्रावतारो भगवतोंऽशरूपः कार्तवीर्यो नायकत्वेन कल्पितः ।

स चात्र महासत्वो गम्भीरोऽविकत्थनः स्थिरो निगूढाहङ्कारो दृढव्रतश्चास्ति। कार्तवीर्यस्योदात्तं चरित्रमेवाश्रित्य महाकाव्यमिदं प्रणीतम् । भगवतश्चक्रावतारस्य कार्तवीर्यस्योदयप्रदर्शनाय निर्मितेऽस्मिन् महाकाव्ये तस्यैव वैशिष्ट्यं निरूपयितुं बहवः सर्गा निबद्धाः ।

विदर्भराजभोजसुताया कनकप्रभायाश्चरित्रमपि नितान्तमेव मञ्जुलतया विद्यते चित्रितम्, तस्या ऊर्वोर्वर्णनं कविः कीयत्या मनोज्ञया पद्धत्या करोति क्षणमीक्ष्यताम् -

कनकप्रभया निजोरुणापि च रम्भा हरिणी पराजिता ।
करिराजकरोऽपि तद्धिया कुरुते सङ्कुचितं मुहुर्मुहुः ।। (का.म. ९/९२)

सा च वर्तते स्वकीया नायिका, एवमेव कृतवीर्यस्य कनकप्रभायाः स्वयंवरे समागतानां नृपाणां तदितरेषाञ्च पात्राणां चित्रणमलङ्कृतवाचा कविना यथावसरं सम्यक्तया कृतं विद्यते । दृश्यतां निदर्शनभूतं पद्यमेकम् -

प्रफुल्लपद्मं भ्रमरालिहीनं कलङ्कहीनं विधुमण्डलन्नु ।
अश्मश्रुजातं मुखमस्य राज्ञः केनोपमीयेत सुवर्णवर्णे ।। (का.म. १२/६८)

महाकाव्ये शृङ्गारवीरशान्तानामन्यतमो रसोऽङ्गितया विन्यस्यते । अन्ये च सर्वे रसा अङ्गत्वमुपयान्ति तस्यैव रसस्य । विरोधिरसाणाञ्च परस्परमङ्गाङ्गिभावादिना तत्र सन्निवेशो विधीयते । कार्तवीर्योदयमहाकाव्ये प्रथमं कस्य रसस्यास्ति प्राधान्यमित्यत्र अस्ति किमपि विचारणीयम् । राजकीयप्रज्ञाप्रतिष्ठानतः प्रकाशितस्य कार्तवीर्योदयमहाकाव्यस्य भूमिकायां ब्रह्ममित्रमहोदयेन काव्यस्यास्य शृङ्गारस्याङ्गिरसत्वं स्वीकृतं विद्यते । स्वामिप्रपन्नाचार्यमहोदयेन च स्वभूमिकायां शृङ्गारस्याङ्गिरसत्वं स्वीकृत्यापि शान्तरसस्य भङ्ग्यन्तरेण प्राधान्यमुररीकृतम् । मम विचारे तु न तयोरत्र प्राधान्यम् । यतो हि यो रसो मुख्यः स प्रबन्धव्यापी भवति । विभावानुभावव्यभिचारिणश्च तदनुकूलतयैव समुपस्थाप्यन्ते । श्रीहर्षस्य नैषधमहाकाव्ये प्रथमसर्गादेव शृङ्गाररसानुकूलानि विभावादिरससाधनान्युपयुज्य ग्रन्थसमाप्तिं यावन्मुख्यरसस्यानुसन्धानं विहितम् । तथैवान्येष्वपि प्रबन्धकाव्येषु एषैव स्थितिर्दृश्यते । कार्तवीर्योदयमहाकाव्ये तु पञ्चमसर्गं यावद् शृङ्गाररसस्याभिव्यक्तिर्न क्वापि समुपलभ्यते । कनकप्रभायाः स्वयंवरप्रसङ्गे सख्युक्तौ शृङ्गाररसपोषकाणि विभावादि-रसद्योतकसाधनानि नैवोपलभ्यन्ते । कनकप्रभाकार्तवीर्ययोर्मुकुलिता रतिः पञ्चदशसर्गे वृद्धिमुपगताऽपि सामग्रीणामपर्याप्ततया चरमोत्कर्षतां न धत्ते । षोडशसर्गे तु शृङ्गारस्य गन्धोऽपि नास्ति । सप्तदशसर्गे **भरतवचनभारतोक्तिविज्ञो मम कृतिदर्शनमातनोतु विद्वान्** इति निगदता सुकृतिदत्तपन्तेन काव्यशास्त्रावगाहनलब्धवैदुष्येण न कदाप्येषा त्रुटिः कृता भवेदिति स्वल्पधियाऽपि शक्यते वक्तुम् । वस्तुतः प्रबन्धेऽस्मिन् प्रारम्भत एवोत्साहस्थायिभावः परिलक्ष्यते । विविधैः कार्यजातैः परिपुष्टोऽसौ ग्रन्थसमाप्तिं यावदुपलभ्यते। अत महाकाव्यस्यास्य प्रधानो रसो वीर एवास्ति । उक्तञ्च तेनैव महाकविना सुकृतिदत्तपन्तेन स्वमहाकाव्यपरिचयं प्रस्तुतवता कार्तवीर्योदयस्य सप्तदशसर्गे-

भङ्गश्लेषप्रचुरमुदयद्बह्वनुप्रासपद्यं
धीरोदात्तस्मृतिगदिलसन्नायकं पूर्णमङ्गैः ।
वीरप्रायाखिलरसयुतन्नातिसंक्षिप्तसर्गं
प्रायो व्यङ्ग्यप्रकटितचमत्कारसारप्रचारम् ।। (का.म.१७/१६)

अत्र वीरप्रायाखिलरसयुतमित्युक्त्या वीरस्यैव प्राधान्यं कविसम्मतमिति सिद्ध्यति ।

कनकप्रभाकार्तवीर्ययोः रत्याख्यभावः शृङ्गाररसतामुपेतो योऽभिव्यक्तः सोऽपि तस्य वीरस्यैवाङ्गत्वमुपगतः। एवमेव

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

कृतवीर्यस्य कार्तवीर्यस्य च तपश्चरणादिप्रसङ्गेऽभिव्यक्तः शान्तरसः, महाकाव्यस्यारम्भतो ग्रन्थसमाप्तिं यावदभिव्यक्तः कविनिष्ठस्ताराविषयकरतिभावश्च महाकाव्येऽस्मिन् वीररसस्यैवाङ्गतया निबद्धौ । वीरशान्तयोर्मिथो विरोधेऽपि अवस्थागताश्रयभेदात् वीरस्यैवाङ्गतया च नात्र दोषः । तदुक्तं काव्यप्रकाशे –

आश्रयैक्ये विरुद्धो यः स कार्यो भिन्नसंश्रयः ।
रसान्तरेणान्तरितो नैरन्तर्येण यो रसः ।। (काव्य. ७/६४) ।

एवमेव महाकाव्ये कार्तवीर्यरावणयुद्धादिप्रसङ्गे भयानकबीभत्सादिरसानां कार्तवीर्यस्य बाल्यावस्थावर्णनक्रमे वात्सल्यरसस्य च प्रयोगो दृक्पथमवतरति । एते सर्वे रसा भावादयश्च वीररसपोषकतयैव निबद्धाः सन्त्यत्र कविना ।

महाकाव्ये चत्वार एव धर्मार्थकाममोक्षाख्या पुरुषार्था वर्णिता भवन्ति । तेष्वेकं मुख्यं भवति । कार्तवीर्योदयमहाकाव्ये धर्मार्थकामफलं प्रदर्श्य जीवनस्य सकल एव सारो मोक्षोऽस्तीति प्रतिपादितम् ।

महाकाव्ये ग्रन्थस्यादौ नमस्कारात्मकं वस्तुनिर्देशात्मकमाशीर्वादात्मकं वा मङ्गलं विधीयते । कार्तवीर्ये प्रतिसर्गं कुत्रचिद् वस्तुनिर्देशात्मकं कुत्रचिन्नमस्कारात्मकं वा मङ्गलाचरणं समुपलभ्यते ।

महाकाव्ये यथावसरं सन्ध्यासूर्यसागरादीनां वर्णनमपेक्ष्यते । महाकविना पन्तमहोदयेन कुत्रचित्प्रकृतीनां स्वरूपमालम्बनमुखेन क्वचिदुद्दीपनमुखेन क्वचिच्चालङ्कारविधानरूपेण च चित्रितम् । आलम्बनमुखेन चित्रितायाः प्रकृतेः सुकुमारं स्वरूपं वीक्ष्यतां क्षणं तपोवनवर्णनसन्दर्भे –

घनपादपपादवासिभिस्तृणमूलामलवारिवृत्तिभिः ।
परनादसुखैर्भयोज्झितैर्मृगपोतैर्मुनिभिर्यथावृत्तम् ।। (का.म. २/५३)

रत्युद्दीपकरूपेण चित्रिताया वासन्त्याः प्रकृतेः स्वरूपं प्रस्तौति पद्यमिदम् –

मञ्जुगुञ्जदलिपुञ्जनिकुञ्जे नार्मदे मदननर्मदे मदात् ।
सौरभाप्तसुरभौ विहरन्ति स्फारहारदयितैरिह नार्यः ।। (का.म.१/१९)

सम्प्रत्यलङ्कारमुखेन चित्रितायाः प्रकृतेः स्वरूपमतिशयोक्तिसन्दर्भे निभाल्यताम् –

यत्तुङ्गसौधशिखराणि कुरङ्गनेत्रा
आरुह्य नाभिकुचदृष्टिरुचं स्वकीयाम् ।
आवर्तचक्रयुगलोर्मिषु शोभितासु
पश्यन्ति मेकलभुवः सरितो विदूरे ।। (का.म. १/१५)

मानवीकृतप्रकृतेर्दृश्यतां तावदेकं निदर्शनम् –

सुशीतलामूर्मिभुजां प्रसार्य सभाजयन्ती कलहंसवाक्यैः ।
स्फुटोत्पलाक्षी परमादरेण सखीव यं श्लिष्यति सोमपुत्री ।। (का.म.१/१४)

खलानां निन्दा सज्जनानां स्तुतिश्च यथावसरं कविना महाकाव्यीयप्रबन्धविधानसिद्धान्तानुसारेण विहिता । निदर्शनाय पद्यमेकं खलनिन्दासम्बद्धमधः प्रस्तूयते–

उत्कोचजीवनकरः सचिवोपजापी
कर्णेजपो निरपराधजनोपतापी ।
भूदेवमत्सरपरो मनुजा इमे ते
राज्यस्य विप्लवकरा न वसन्तु राज्ये ।। (का.म. ८/५५)

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

तथैव सज्जनप्रशंसायां निबद्धं पद्यमेकमत्र प्रस्तूयते –

परोपकारैकरसो भवादृङ् न प्रार्थनामर्हति पीडितानाम् ।
किमर्थितः शीतमयूखमाली प्रतिक्षणं मुञ्चति सौधधाराम् ।। (का.म.१०/७)

महाकाव्ये प्रतिसर्गमेकस्यैव वृत्तस्य प्रयोगो विधीयते । सर्गान्ते तदितरवृत्तस्य प्रयोगो भवति । भाविसर्गस्य कथानकस्य सूचनञ्चात्र विधीयते । कुत्रचिद् सर्गेऽनेकवृत्तानामपि प्रयोगो विधातुं शक्यते । परं वैदुष्यप्रदर्शनेच्छया कविना महाकाव्येऽस्मिन् प्रतिसर्गं नैकविधानि छन्दांसि प्रयुक्तानि । सर्गान्ते छन्दः परिवर्तने कृतेऽपि प्रबन्धविधान-सिद्धान्तानुसारेण भाविसर्गस्थकथानकस्य सूचनं तत्र नैवोपलभ्यते । परन्तु गतसर्गस्य कथानकं संसूच्य सर्गारम्भो जायते कार्तवीर्योदयमहाकाव्ये । एतेन कथाप्रवाहोऽत्र नैव विच्छिद्यते । निदर्शनाय पद्यमेकमत्र प्रस्तूयते –

अथ तत्र समस्तवस्तुभिर्महितायां जनताहिताशयः ।
कृतवीर्य इति प्रथाङ्गतो बहुवीर्यो धरणीश्वरोऽभवत् ।। (का.म. २/१)

अथ तत्र (माहिष्मत्याम्) इत्यनेन पूर्वसर्गस्थकथा संसूचिता ।

अलङ्कारविधाने महाकविनानेन विलक्षणमेव वैशिष्ट्यमधिगतम् । कार्तवीर्योदयस्य पद्यानि नैषधीयचरितपद्यानीव सर्वाण्यपि सन्ति यमकानुप्रासादिभिः शब्दालङ्कारैरुपमादिभिश्चार्थालङ्कारैर्मण्डितानि । तत्रापि महाकाव्यस्यास्य सप्तमे सर्गे शब्दालङ्काराणां चित्रबन्धादीनामष्टमे च सर्गे द्व्यधिकसप्तत्यर्थालङ्काराणां छटाः प्रदर्शिताः । प्रसङ्गेऽस्मिन् कविरसौ भारविमाघश्रीहर्षादीन् महाकवीनप्यतिशेते । अलङ्कारविधानसन्दर्भे कविनाऽनेन श्रीहर्षेणेव व्याकरण-न्याय-ज्यौतिष-धर्मशास्त्र-साहित्यशास्त्रादिभ्यो यदुपमानं गृहीतं तदस्ति विशेषत उल्लेखनार्हम् । साहित्यशास्त्रगृहीतोपमानमण्डितालङ्कार-विधानसमन्वितानि कानिचिद् पद्यानि निर्दशनायात्र प्रस्तूयन्ते –

सद्हृद्यपद्या सुपदा सुवर्णा रसान्विता भूरितरार्थयुक्ता ।
लसद्ध्वनिः सत्कविता च कान्ता पुरी सुराज्ञः प्रमुदे न कस्य ।। (का.म. १०/८)
काव्यं यथाभ्यासवशेन शक्त्या प्रावीण्यतः शास्त्रविलोकनोत्थात् ।
पितुः प्रयत्नाददनीययोगात्तथा नियत्या ववृधेऽस्य देहम् ।।(का.म. ५/८)
व्यञ्जनाश्रितविचित्ररसाद्यमिष्टभक्तिपरमोदनमच्छम् ।
सत्कवेर्वच इवातरलाभं षष्ठमासि बुभुजे नृपसूनुः ।।(का.म. ५/९)

एवमेव शास्त्रान्तरेभ्य उपमानानि गृहीत्वा रचितानि सन्ति बहूनि पद्यानि, विस्तरभयान्नैवात्र प्रस्तुतानि ।

एवमेव कविना कार्तवीर्योदयमहाकाव्ये सन्ध्यासूर्यसमुद्रद्वीपादीनां वर्णनं विविधैरलङ्कारमयैर्वाक्यैः कृतम् ।

महाकाव्ये प्रयुक्तानि सर्वाण्येवालङ्काराणि सन्ति पृथग्यत्नसाध्यानि, तानि शृङ्गारकरुणशान्तवात्सल्येषु कोमलरसेष्वनुपयुक्तान्यपि नान्येषु कठोररसेषु । अतो वीररसप्रधानेऽस्मिन् काव्ये तथाविधानामलङ्काराणामुपयोगो भवत्येव समीचीनः।

छन्दोविधाने कविरयं नितान्तमेव कुशलः । छन्दांसि तन्मुखकमलस्य वश्यानीव राजन्ते । महाकाव्येऽस्मिन् शार्दूलविक्रीडितवसन्ततिलकास्रग्धराशिखरिणीन्द्रवज्रोपेन्द्रवज्रोपजातिमालिनीप्रभृतीनि बहूनि छन्दांसि प्रयुक्तानि सन्ति । तानि सर्वाण्यपि कवेर्भावानुकूलानि ।

कार्तवीर्योदयमहाकाव्ये प्रयुक्ता भाषा समासबहुला विद्यते । अनुप्रासभङ्गश्लेषादिभिरलङ्कारैर्मण्डितानां वाक्यानां प्रयोगेण तत्र ओजोगुणस्य गौड्याश्च रीतेर्बाहुल्यं विलसति । अप्रयुक्तपदानां प्रयोगः स्थाने स्थाने परिलक्ष्यते । विद्वद्धौरेयाणां विदितसकलशास्त्राणां कृते कृतिरियं नितान्तमेव ब्रह्मानन्दसहोदरमानन्दं प्रयच्छतीति नात्र सन्देहः ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

महाकाव्यस्यास्य पर्यालोचनेन ज्ञायते यत् – कालिदासस्य काव्यविधाने कथानकं यथा प्रवहति तदत्र न प्राप्यते, प्रतिपाद्यविषयस्यालङ्कारिकपद्धत्या यदत्र वर्णनं समुपलभ्यते न तत्कालिदासप्रबन्धेषूपलभ्यते । कालिदासीयप्रबन्धेषु समुपलब्धा भावतरलता नैसर्गिकव्यञ्जनात्मकता, स्वाभाविकालङ्कारविधानता, मनोद्वेगपोषणपरा कल्पनाशीलता च कार्तवीर्योदयमहाकाव्यस्य नास्ति विषयः. । शास्त्रियविषयसम्बद्धैरुपमानैः श्लेषगर्भैर्वक्रोक्तिमयैर्वाक्यैः परिलसिताया शैल्याश्च यद् वैशिष्ट्यं कार्तवीर्योदयमहाकाव्ये समुपलभ्यते, तन्नावाप्यते कालिदासप्रबन्धेषु । पात्राणां चित्रणे आर्यसंस्कृतेरुपस्थापने च कालिदासीयप्रबन्धेषु या नैसर्गिकता समुपलभ्यते सा नैव दृग्गोचरी भवति प्रबन्धेऽस्मिन् । कालिदासीयपात्राणि यथा सन्त्यसुमन्ति न तथा सन्ति सुकृतिदत्तपात्राणि । अत्र तु कृत्रिमतायाः साम्राज्यं सर्वत्र लसति, शास्त्रियतामण्डितं वैदुष्यं वर्णे वर्णे, पदे पदे, वाक्ये वाक्ये, प्रकरणे प्रकरणे, प्रबन्धे च दृक्पथमवतरति । महाकाव्यमिदं चित्रकाव्यनिर्माणे यमकालङ्कारनिबन्धने च किरातार्जुनीयं शिशुपालवधमहाकाव्यञ्चानुसरति। ततोऽपि कृत्रिमतामुपस्थाप्यात्र सुकृतिदत्तपन्तः स्ववैदुष्यमेधयितुमीहते। शास्त्रीयवैदुष्यप्रदर्शने ग्रन्थियोजनाहङ्कारप्रदर्शने सभङ्गश्लेषादीनां विधाने च महाकाव्यमिदं नैषधीयमहाकाव्यमनुसरति । प्रबन्धसङ्घटने तु प्रथमसर्गादासप्तमसर्गं छायेव महाकाव्यमिदं नैषधमहाकाव्यमनुगच्छतीति वक्तुं पार्यते ।

एतादृशवैदुष्यविलसितस्य महाकाव्यस्य पुनः सम्पादनं विधाय प्रकाशनमत्यावश्यकमस्ति । तदर्थं विश्वविद्यालयस्य पादचारः स्यादिति कामये । अस्तु ।

सन्दर्भग्रन्थाः

१. साहित्यदर्पणः – विश्वनाथप्रणीतः ।
२. काव्यप्रकाशः – मम्मटप्रणीतः ।
३. ध्वन्यालोकः – आनन्दवर्धनप्रणीतः ।
४. वक्रोक्तिजीवितम् – कुन्तकप्रणीतम् ।
५. औचित्यविचारचर्चा – क्षमेन्द्रप्रणीता ।
६. सुवृत्ततिलकम् – क्षमेन्द्रप्रणीतम् ।
७. काव्यशास्त्रम् – अरस्तुप्रणीतम् ।
८. संस्कृत साहित्य का इतिहास – बलदेव उपाध्याय ।
९. संस्कृत वाङ्मयको इतिहास – हंसपुरे सुवेदी ।
१०. कार्तवीर्योदयमहाकाव्यम् – सुकृतिदत्तप्रणीतम्, डा. स्वामिप्रपन्नाचार्यसम्पादितम् ।
११. पूर्वीय साहित्य सिद्धान्त – केशवप्रसाद उपाध्याय ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

कार्तवीर्योदयमहाकाव्ये धर्मशास्त्रीयविषयाणां स्थानम्

- प्रा.डा. रामचन्द्रगौतमः

सुकृतिदत्तपन्तविरचिते कार्तवीर्योदयमहाकाव्ये धर्मशास्त्रीयविषयाणां स्थानं कीदृशमस्तीति चिन्तनं कृतमस्त्यत्र। चिन्तनमेतत्काव्योपस्थापितविषयाणामाधार एवास्ति विहितम् ।

आचारो व्यवहारः प्रायश्चित्तञ्चेति त्रयो विषया धर्मशास्त्रप्रतिपादिताः । काव्येऽस्मिन्नेषां त्रयाणामेवोपस्थापनमस्ति। तथापि बाहुल्यन्त्वाचारेण सह सम्बद्धानां संस्कारादिविषयाणां दृश्यते । काव्यस्यास्य कुत्राचारसम्बद्धानां पुंसवन-सीमन्तोन्नयनादिसंस्कारविषयाणामुपस्थापनं विहितं महाकविनेति विषयविवेचनमत्रास्ति । तच्चाधोनिर्दिष्टम् ।

प्रथमे सर्गे कविना नर्मदाया माहिष्मत्याश्च मनोहरं वर्णनं विहितम् । राज्ञः कार्तवीर्यस्य राजधानी माहिष्मती। तस्या यद्वर्णनमुपस्थापितं तद्धर्मशास्त्रानुकूलम् । धर्मशास्त्रेऽधिकानां राजधानीनां वर्णनमुपलभ्यते, तासु विशिष्टाया वर्णनन्तु मनोरममस्ति । उत्कृष्टाया यद्विधं वर्णनमस्ति तद्विधमेव वर्णनं माहिष्मत्याश्चास्ति । नानावृक्षवनदुर्गनदीतडागापण-प्राकारपरिखापथहर्म्योद्यानादिभिः सुशोभिता राजधानी विशिष्टा । तादृश्येव राज्ञो निवासस्य कृते सर्वथोपयुक्ता । राजनिवासोपयुक्तस्य स्थलविशेषस्य वर्णनं योगीश्वरेण याज्ञवल्क्येनापि विहितम् । यत् स्थलं सततं सर्वथा सुरक्षितं विद्यते, वनदुर्गादिभिस्तस्मिन् सुरक्षिते स्थले वसन् राजापि सुरक्षितो भवति । तत्रस्थानां जनानां कोशस्य च सुरक्षा सुनिश्चिता ।

रम्यं पशव्यमाजीव्यं जाङ्गलं देशमावसेत् ।
तत्र दुर्गाणि कुर्वीत जनकोशात्मगुप्तये ।। (या.स्मृ. १/३२१)
जाङ्गलं सस्यसम्पन्नमार्यप्रायमनाविलम् ।
रम्यमानतसामन्तं स्वाजीव्यं देशमावसेत् ।। (मनुस्मृति. ७/६९)

राज्ञः कार्तवीर्यस्य निवासस्थलं (राजधानी) एतादृशमेवासीदित्यनुमीयते कवेर्वर्णनानुसारेण । राजपुर्येव राज्यस्य प्रजानाञ्च भवति क्षेमकरी । उक्तञ्च कविना -

जयति वरपुरी सा क्षेमदात्री जनानाम् । (का.वी. १/४५)

कार्तवीर्यो राजा राजोचितसर्वगुणसम्पन्न आसीत् । स एव माहिष्मती इत्याख्यं राज्यं सञ्चालयति स्म । राज्यस्यास्य राजपदमवाप्यातिप्रसन्नो गौरवान्वितश्चासीत् । धार्मिकभावनयाभिप्रेरितत्वाद्दानधर्मयज्ञयागादिकं शास्त्रोदितं कर्म सततं सम्पादयति स्म । राज्ञानुष्ठितानां दानादिकर्मणां रोचकं वर्णनमस्ति कार्तवीर्योदये । काव्यवर्णिता राजधर्मदानधर्मादिविषया धर्मशास्त्रीयाः। तस्मात्तेषां विषयाणां स्थानमत्यधिकमत्युच्चं विद्यते काव्येऽस्मिन् । पुनर्धर्मशास्त्रेण मुनीनामनेकेषामाश्रमाणां मनोहरं वर्णनं कृतं चेदस्मिन् काव्ये मुनेर्दत्तात्रेयस्याश्रमस्याकर्षकं वर्णनमस्ति। द्वयोर्वर्णनयोर्भिन्नता नोपलब्धा । अत एवाश्रमवर्णनादावपि धर्मशास्त्रस्य गभीरप्रभावद्वारा प्रभावितमस्ति काव्यमेतत् ।

सन्तत्यभावेन चिन्तितो राजा कृतवीर्यस्तत्प्राप्त्युपायान्वेषणाय राज्यं परित्यज्य मुनीश्वरस्य दत्तात्रेयस्याश्रमं गच्छति। मुनिसमक्षं स्वां मनोव्यथां निवेदयति । दुःखज्ञो मुनिराशिषं यच्छति । मुनीश्वरात् सन्तानप्राप्तेर्वरदानमवाप्य प्रत्यावर्तितो राजा पुनः पूर्ववद्राज्यं करोति । आश्रमगमनमाशीर्वचनग्रहणं राज्यसञ्चालनं प्रजापालनं रक्षणञ्चेत्यादयो विषया धर्मशास्त्रीयाः। अत एव तृतीये सर्गेऽपि धर्मशास्त्रीयविषयाणामत्यधिकं वर्णनमस्ति ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

चतुर्थसर्गे पुंसवनसीमन्तोन्नयनजातकर्मणां संस्काराणां वर्णनमस्ति । अष्टचत्वारिंशत्संस्काराः सन्ति धर्मशास्त्रप्रदर्शिताः। तेषु षोडशसंस्कारा लोकप्रसिद्धाः, व्यवहारप्रचलिताश्च । तदन्तर्गता एव एते त्रयः संस्काराः – पुंसवनसंस्कारः, सीमन्तोन्नयन-संस्कारः, जातकर्मसंस्कारश्च ।

पुंसवनसंस्कारो गर्भधारणानन्तरं गर्भचलनात्प्रागेव भवति, अर्थाद् द्वितीये तृतीये वा मासे विधीयते । संस्कारोऽयं गर्भसंस्कारकर्मेत्युच्यते। सीमन्तोन्नयनं प्रथमगर्भे षष्ठेऽष्टमे वा मासे सम्पद्यते एते च द्वे पुंसवनसीमन्तोन्नयने क्षेत्रसंस्कारकर्मत्वात् सकृदेव कार्ये न प्रतिगर्भम् । गर्भकोशाज्जाते कुमारे जातकर्म, अर्थाद् गर्भजननानन्तरं नालच्छेदनात्प्रागेव तद् विधीयते। उक्तञ्च याज्ञवल्क्येन –

गर्भाधानमृतौ पुंसःसवनं स्पन्दनात्पुरा ।
षष्ठेऽष्टमे वा सीमन्तो मास्येते जातकर्म च ।। (याज्ञवल्क्यस्मृतौ १/११)

सर्वेष्वेतेषु संस्कारेषु वैदिकविधिरपेक्ष्यते । तदनुसारेण विधीयमानानामेतेषां संस्काराणामुल्लेख एतादृशोऽस्ति कार्तवीर्योदये महाकाव्ये –

सीमन्तपुंसवनमुख्यविधानमार्य्यो
गर्भस्य संस्कृतिकरं श्रुतिवर्त्मनाऽसौ ।
दत्तादिभिर्द्विजगणैर्व्यदधाद् यथावद्
विश्राणयन्सुरभिकाञ्चनभूमिवस्त्रम् ।। (कार्तवीर्योदये ४/५०)
सा गर्भसंस्कृतिमवाप्य नरेन्द्रपत्नी । (कार्तवीर्योदये ४/५१)

इत्थं धर्मशास्त्रीयविषयाणां प्रभावद्वारा प्रभावितोऽस्ति सर्गोऽयम् ।

कृतवीर्यात्मजकार्तवीर्यस्य जातकर्मसंस्कारानन्तरं षष्ठे दिने षष्ठीलेखनकृत्यमेकादशाहे नामकर्म चोल्लासपूर्वकं सम्पन्नम् । एकादशाहे विधीयमानं नामकरणं पूर्णतया शास्त्रीयमेव । तद्यथा – **अहन्येकादशे नाम, एकादशेऽर्हति नाम।** तच्च पितामहमातामहादिसम्बद्धं कुलदेवतासम्बद्धं वा। यथाह शङ्खः – **कुलदेवतासम्बद्धं पिता नाम कुर्यात्।** मिताक्षरा (या.स्मृ. १/१२) । षष्ठे मासेऽन्नप्राशनञ्च सम्पन्नम् ।

कृत्यान्येतानि सर्वाणि गुरोर्दत्तात्रेयस्याचार्यत्वे सुसम्पन्नानि । तच्चोक्तं कविना –

राज्ञोऽस्य संस्कृत्य मुनिर्जगाम । (कार्तवीर्योदये ५/७)
षष्ठे दिने तस्य लिलेख षष्ठी । (कार्तवीर्योदये ५/५)
युक्तञ्चकाराज्र्जुननाम पुण्यम् । (कार्तवीर्योदये ५/६)
षष्ठमासि बुभुजे नृपसूनुः । (कार्तवीर्योदये ५/९)
ओदनञ्जनमनोऽतिमोदनं व्यञ्जनं रसनवृत्तिरञ्जनम् ।
दाधिकन्निखिलभोजनाधिकं निर्मिषं स बुभुजे सदामिषम् ।। (कार्तवीर्योदये ५/१०)

पञ्चमे वर्षे राजकुमारस्य कार्तवीर्यस्य गणेशादिदेवार्चनपूर्वकमक्षरारम्भ एकादशे वर्षे व्रतबन्धसंस्कारश्च गुरोः सकाशात् सम्पन्नः । तद्यथा –

पञ्चमे मुनिरुपेत्य वत्सरे शारदाहरिगणेशपूजनम् ।
संविधाय लिखितमजीग्रहद् वर्णपङ्क्तिममुमागमाध्वना ।। (कार्तवीर्योदये ५/५०)
आश्रमाधिगतवाङ्मयो मुनिर्वैदिकेन विधिनोपनीतवान् ।। (कार्तवीर्योदये ५/५९)

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

एवमेवाक्षरारम्भोपनयनयोः समर्थनं धर्मशास्त्रेणापि विहितम् । धर्मशास्त्रेणाक्षरारम्भे गणेशस्य, विष्णोः, सरस्वत्याः, लक्ष्म्याश्चैतासां देवतानां पूजाक्रमः प्रदर्शितः । महाकाव्येन तु प्रथमं शारदायास्ततो हरेस्तदनन्तरमेव गणेशस्य पूजाक्रमो निर्धारितः । इत्थं पूजाक्रमे धर्मशास्त्रकाव्यशास्त्रयोर्मतैक्यं नोपलभ्यते, किञ्चिदन्तरं दृश्यते । उपनयनकालसम्बन्धे तु द्वयोरैकमत्यमस्ति । यथा –

गणेशविष्णुवाग्रमाः प्रयुज्य पञ्चमाब्दके । (मुहूर्तचिन्तामणौ, सं.प्र.)

राज्ञामेकादशे .... । (याज्ञवल्क्यस्मृतौ १/१४)

गर्भादेकादशे राज्ञो .... । (शङ्खस्मृतौ २/७)

क्षत्रियवर्णस्योपनयनस्य मुख्यकालस्त्वेकादशाब्द एव । शास्त्रोदितकाल एवोपनीतेन राजकुमारेण वेदानां वेदाङ्गानां पुराणन्यायमीमांसाधर्मशास्त्रादीनाञ्चाध्ययनं कृतम् । अनया रीत्या पञ्चमसर्गो धर्मशास्त्रोक्तसंस्कारादिविषयैर्विद्याध्ययनादि-विषयैश्चापूरितो दृश्यते ।

षष्ठे सर्गे कार्तवीर्यचरितशौचाचारादिस्मार्तधर्माणामलौकिकं वर्णनं विहितं कविवरेण । शौचस्नानजपोपस्थानशुद्धा-हारादिकं कृच्छ्रातिकृच्छ्रव्रतादिकञ्च विधाय गुरुमग्न्यादिदेवाँश्चोपास्य ब्रह्मयज्ञदेवयज्ञमनुष्ययज्ञादिधर्मानुष्ठानं कृत्वा कतिपयानि दिनानि तपस्विभावेन यापितानि राजकुमारेण । तस्य शास्त्रोक्तकर्मनिरतजीवनस्य वर्णनमेतादृशमस्ति कार्तवीर्योदये –

परिचरन् गुरुमग्निमतन्द्रितं मितहिताशनभुग्यतमानसः ।
कतिपयैर्दिवसैस्स तपस्विनामपि पुरो गणनीयतरोऽभवत् ।। (कार्तवीर्योदये ६/३)

धर्मशास्त्रेऽपि शौचाचारादीनां विस्तृतं वर्णनमस्ति यथा –

दिवासन्ध्यासु कर्णस्थ .... । (या.स्मृ. १/१६-२१)

स्नानमब्दैवतैर्मन्त्रैर्मार्जनं प्राणसंयमः ।
सूर्यस्य चाप्युपस्थानं गायत्र्याः प्रत्यहं जपः ।। (या. स्मृ. १/२२-२४)

अग्निकार्यं ततः कुर्यात् .... । (या. स्मृ. १/२५-२७)

प्रकारेणानेन कार्तवीर्योदयेन धर्मशास्त्रेण चाचारादिधर्माणामनुवर्णनं विहितम् । द्वयोर्वर्णनयोर्वर्णितविषयस्वरूपयोर्वा पार्थक्यं नोपलभ्यते । अत एव कार्तवीर्योदयमहाकाव्यं धर्मशास्त्रस्यानुगतमस्तीत्यनुमीयते ।

सप्तमे सर्गे तु धर्मशास्त्रीयविषयाणां सामान्यप्रभावो दृश्यते न तु विशेषः ।

कृतवीर्यो राजा वृद्धावस्थां प्राप्तः । तस्मात्तेन राज्यभारवहनसमर्थाय स्वपुत्राय राज्यं प्रत्तम् । पैतृकं राज्यमवाप्याति-प्रसन्नेन राज्ञा कार्तवीर्येण च वैदिकविधिपूर्वकं राज्याभिषेको विहितः । अभिषेकोऽयं राज्ञि राजत्वोत्पादकं कर्म। कर्मणानेन यदा राजा सुसंस्कृतो भवेत्तदैव स औपचारिकरूपेण राज्यसंचालनाधिकारमाप्नोति । तस्मात्तेन पूर्णाधिकारप्राप्त्यनन्तरमेव राज्यशासनं कृतम् । प्रजारक्षणपालनपोषणरञ्जनसमर्थत्वाद्राज्यसंचालनादिसर्वविधकार्यकुशलत्वाच्च सर्वत उच्चादरः प्राप्तो महामतिना कार्तवीर्येण । इत्थं कार्तवीर्योदयस्याष्टमे सर्गे राजधर्मस्य राज्ञः कर्तव्यस्य च विस्तृतं वर्णनमुपस्थापितं महाकविना । एवमेव धर्मशास्त्रस्य राजधर्मप्रकरणेऽप्यस्य विषयस्य व्यापकं वर्णनमस्ति । द्वयोर्वर्णनमेकविधम् । विषयो-पस्थापनक्रमश्चैकरूपः । वर्णितविषयश्च समानः । केवलं विषयवर्णनशैली भिन्नरूपा । पुनः काव्यं रसालङ्कारादिभिरप्या-कर्षकमस्ति चेद्धर्मशास्त्रन्तु न तु तद्विधम् । तथापि सर्वतः सदैव ग्रहणीयमेव ।

नवमे सर्गे कनकप्रभाकार्तवीर्ययोः स्वयंवरप्रसङ्गे कनकप्रभायास्तनुलोमकेशदशनलोचनमुखमण्डलादिबाह्यलक्षणस्य

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

(शारीरिकसौन्दर्यस्य) मनोहरं वर्णनमस्ति । धर्मशास्त्रेऽपि विवाहयोग्यायाः कन्याया लक्षणमस्ति प्रदर्शितम् । तद्यथा –

अविप्लुतब्रह्मचर्यो लक्षण्यां स्त्रियमुद्वहेत् ।
अनन्यपूर्विकां कान्तामसपिण्डां यवीयसीम् ।। (याज्ञवल्क्यस्मृतौ १/५२)

बाह्याभ्यन्तरलक्षणैर्युक्ता, दानेनोपभोगेन वा पुरुषान्तराऽपरिगृहीता, मनोनयनानन्दकारिणी, वयसा प्रमाणतश्च न्यूना, रोगदोषहीना, कुलशीलादिगुणयुता कन्योद्वाह्या । लक्षणयोर्द्वयोर्वर्णनशैल्यां शब्दविन्यासक्रमे च किञ्चिदन्तरं दृश्यते, तथाप्याशयस्तूभयोः समानः । चिन्तनञ्चैकविधम् ।

दशमे सर्गे विदर्भयात्रायाः, यात्रायां संमिलितानां सैनिकामात्यसेवकादीनाम्, यात्रामार्गस्थानां नदीवनोपवनवृक्षलता-कुञ्जपाषाणपर्वतादीनाञ्च मनोरमं वर्णनं दृश्यते । धर्मशास्त्रे राज्ञो राजमहिष्या राजकुमार्याश्च विविधयात्रावर्णनं लभ्यते । राज्ञो राजपरिवारस्य च प्रायः सर्वविधासु यात्रासु सैनिकाद्यङ्गरक्षकाणाममात्यसेवकादीनाञ्चोपस्थितिरनिवार्या । उपस्थितेरे-तद्विधायाः कविवरेण सुकृतिदत्तमहाशयेन काव्यात्मिकां शैलीमादायोपयुक्तं समर्थनं कृतम् ।

राज्ञः कार्तवीर्यस्य शयनोत्थानव्यवहारावलोकनादीनां दैनिककृत्यानां वर्णनमस्त्येकादशे सर्गे । धर्मशास्त्रेऽपि राज्ञो दैनिककृत्यस्य विशदं वर्णनं लभ्यते । यथा –

कृतरक्षः समुत्थाय पश्येदायव्ययौ स्वयम् ।
व्यवहारां स्ततो दृष्ट्वा .... ।। (या. स्मृ. १/३२७–३३५)
उत्थाय पश्चिमे यामे .... । (मनुस्मृतौ ७/१४५–१५५)

काव्यकृतदैनिककृत्यवर्णनापेक्षायां धर्मशास्त्रकृतदैनिककृत्यवर्णनं विस्तृतम्, सुबोधम्, व्यावहारिकम्, महत्त्वपूर्णम्, प्रामाणिकञ्चास्ति । अत एव प्रायः सर्वे राजानो धर्मशास्त्रप्रतिपादितदैनिककृत्यमनुसरन्ति ।

द्वादशसर्गे कनकप्रभाकार्तवीर्ययोः स्वयंवरवर्णनमस्ति । राजकीयवैभवेन सुसम्पन्नस्यास्य कृत्यस्य वर्णनमत्यन्त-माकर्षकम् । दर्शनीयेऽस्मिन् कार्ये मथुराधीशः, अवन्तीनाथः, पाटलीपुत्राधिपतिश्चेत्यादयः सम्मानार्हा विश्रुताश्च बहवो राजानः समुपस्थिता आसन् । कार्यमेतद् विवाहसंस्कारस्याभिन्नाङ्गम् । विवाहसंस्कारेण तु प्रायः सर्वे वर्णा भवन्ति सुसंस्कृताः । किन्तु विवाहाङ्गरूपमेतत्कृत्यन्तु प्रायः क्षत्रियवर्णेषु प्रचलितं दृश्यते । कार्तवीर्यस्य राज्ञः क्षत्रियत्वात् सर्गेऽस्मिन् तज्जातिप्रचलितस्वयंवरस्याधिकं महत्त्वं प्रदर्शितं काव्यनिर्मात्रा । धर्मशास्त्रेण तु विवाहस्यैव महत्त्वं प्रदर्श्यते। विवाहसंस्कारस्य संस्कारेषु श्रेष्ठत्वादस्याधिकमहत्त्वप्रदर्शनं सर्वथा स्वाभाविकमेव ।

उच्चकुलोत्पन्नाम्, मनोवृत्तानुसारिणीम्, मनोनयनानन्दकारिणीञ्च पत्नीमवाप्यातितुष्टो राजा कार्तवीर्यः सदैव प्रजानां हितानुकूलं कार्यं करोति । तदनुरूपं राज्यं सञ्चालयति । प्रजास्वत्यन्तं वात्सल्यञ्च प्रदर्शयति । राज्ञ एतादृश्या उत्कृष्टक्रियायाः प्रजा भूमावपि स्वर्गस्यानुभवं कुर्वन्ति । राजा अपि प्रजाजनादिन्द्रतुल्यं सम्मानं समादरं चाप्नोति । त्रयोदशे सर्गे राज्ञः प्रजारक्षणपालनपोषणरञ्जनादिकमत्युत्कृष्टं यत्कार्यं प्रदर्शितं तत्सर्वं धर्मशास्त्रसम्मतमेव । तस्मादस्य सर्गस्य स्मृत्या सहात्यन्तं निकटसम्बन्धो दृश्यते ।

चतुर्दशसर्गे कनकप्रभाकार्तवीर्ययोर्विवाहवर्णनमस्ति । कवेर्वर्णनानुसारेण विवाहस्तु पूर्णशास्त्रीयविधिना सम्पन्न इत्यनुमातुं शक्यते । शास्त्रोदितविधौ वरवरणम्, मधुपर्कदानम्, कन्यादानम्, जयहोमः, गुप्ताहुतयः, लाजहोमः, अष्टपर्वतपूजा, सप्तपदी, सिन्दूरार्पणम्, योजकनामाग्नेः सन्तर्पणञ्चेत्यादीन्यवश्यकर्तव्यानि कृत्यानि भवन्ति । सर्वेषामेतेषां कृत्यानामस्त्युल्लेखः सर्गेऽस्मिन् । सर्वाण्येतानि कृत्यानि धर्मशास्त्रोक्तानि । अत एव सर्गोऽयं धर्मशास्त्रीयविषयद्वारा पूर्णरूपेणाबद्धः ।

पुनः कार्तवीर्यो राजा महिष्या कनकप्रभया सह स्नानोदेश्येन रेवानदीं गच्छति । दुराशयाविष्टो दशाननोऽपि स्नानपूजादिकृत्यव्याजेन पूजासामग्रीमादाय तत्रैव प्राप्नोति । स्वसमीपागतस्य दशाननस्य दुर्विचारं ज्ञात्वा राज्ञापि तस्य दुर्मतेः पूजोपहारो बलादपहृतः । अपहरणकारणादेव द्वयोस्तुमुलं युद्धं सञ्जातम् । तीव्रसंघर्षेण रावणः क्षीणावस्थां प्राप्तः।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

तदैवार्जुनो राजा तं शुकमिव निगृह्य कारावासदण्डं प्रयच्छति । इत्थं यथोचितं दण्डं दत्त्वा दुष्टदमनं राज्ञः कर्तव्यम्, एतादृशस्य कर्तव्यस्य प्रदर्शनमेव धर्मशास्त्रस्योद्देश्यम् । उद्देश्यस्यास्य पूर्णं समर्थनं सर्गेणानेन विहितम् । बलशालिनो दशाननस्य गर्वशमनं कृत्वा सपत्नीकेन राज्ञा कार्तवीर्येण पृथ्वीतलस्थानां तीर्थस्थलानां भ्रमणारम्भो विहितः । तत्क्रमे शाल्मल्यादिसप्तद्वीपानां भ्रमणम्, केतुमालमानसरोवरकैलाशमाल्यवद्गन्धमादनादीनां पर्वतानां दर्शनम्, अलकनन्दा-गङ्गा-यमुनादिनदीषु स्नानम्, विश्वनाथादिदेवानां दर्शनञ्च विहितम् । तीर्थगमनं तीर्थस्नानं देवदर्शनञ्चेत्यादीनि सर्वाणि कर्माणि धर्मशास्त्रोक्तानि । अतः सर्गेऽस्मिन् पञ्चदशे धर्मशास्त्रीयविषयाणां स्थानमत्यधिकमत्युच्चं च वर्तते ।

धर्मशास्त्रोक्तं स्नानदानजपतपव्रतोपवासयज्ञानुष्ठानादिकं कर्म विधाय पत्नीसमेतो राजा कार्तवीर्य ऐहिकमनन्तसुखदं भोगमार्गं परित्यज्य मोक्षमार्गाश्रयणं करोति । तथैव त्रिविधऋणापाकरणं कृत्वात्मज्ञानचिन्तनादिकञ्च व्यधादिति कथयति कविवरः पन्तमहाभागः ।

बलिवैश्वदेवादिस्मार्तकर्मणां दर्शपौर्णमासवाजपेयविश्वजिदादिश्रौतकर्मणां वर्णाश्रमधर्मगुणधर्मनिमित्तधर्मसाधारणधर्माणां भोगमार्गमोक्षमार्गाणाञ्च विस्तृतं वर्णनमस्ति सर्गेऽस्मिन् षोडशे । अत एव सर्गोऽयं धर्मशास्त्रीयविषयद्वारात्यन्तं प्रभावितोऽस्ति।

सप्तदशे सर्गे कविना पन्तमहाशयेन स्वकीयाया एव वंशपरम्पराया वर्णनं कृतं न तु शास्त्रीयविषयस्य ।

प्रस्तुतविवरणानुसारेण महाकविना सुकृतिदत्तसूरिणा धर्मशास्त्रीयाणामधिकानामाचारादिविषयाणामुपस्थापनं विहितं स्वकीये महाकाव्ये काव्यात्मकमाकर्षकं शैलीविशेषमादाय । धर्मशास्त्रप्रतिपादिता विषयाः प्रायः काव्यसम्मतरसालङ्कारादिभि-र्विहीनास्तस्मात्ते नीरसा अनुभूयन्ते । तादृशा विषया अपि काव्येऽस्मिन् अलङ्कारादिभिरलङ्कृता गुणादिभिः सुशोभिता रसादिभिः परिपूरिताश्च सन्ति । इत्थं नीरसानपि विषयान् सरसान् कृत्वा तेषां बाहुल्यञ्च स्वीकरोति काव्यमेतत् । इत्थं स्वभावभिन्नानामत्यधिकानां धर्मशास्त्रीयविषयाणामङ्गीकरणमेवास्य काव्यस्य वैशिष्ट्यम् ।

पुनः कार्तवीर्योदयस्य प्रायः सर्वे सर्गा धर्मशास्त्रीयविषयाबद्धास्तस्मात्तेषां विषयाणां स्थानमुच्चतममस्तिकाव्येऽस्मिन्। निजनिर्मितायां काव्यरचनायामधिकेभ्य आचारादिधर्मशास्त्रीयविषयेभ्य उच्चस्थानप्रदानात् कविवरः सुकृतिदत्तो धर्मशास्त्रज्ञः, शास्त्रीयकर्मनिष्ठो धर्मशास्त्रीयनिर्णयप्रदानसमर्थश्चासीदित्यनुमीयते ।

उपर्युक्तविवेचनानुसारेणाचारव्यवहारादिविषयाणां महत्त्वप्रतिपादकयोर्धर्मशास्त्रकार्तवीर्योदयमहाकाव्ययोः सम्बन्धो निकटतमो दृश्यते ।



Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

कार्तवीर्योदयमहाकाव्ये वैदिकसंस्कृतेः प्रभावः

- प्रा.डा. हरिप्रसादगौतमः

सुकृतिना सुकृतिदत्तेन प्रणीते कार्तवीर्योदयमहाकाव्ये वैदिकसंस्कृतेः प्रभावं परिशीलयितुं विदुषां सन्निधौ विचारपत्रमेतत् प्रस्तूयते । अत्र लघुविचारपत्रे वैदिकवाङ्मयगतप्रभावस्य व्यापकं समीक्षणमसम्भवमिति संक्षेपेण विचारोपस्थापनाय प्रवृत्तोऽस्मि।

कार्तवीर्योदये महाकाव्ये वैदिकस्वरव्यञ्जनयोः प्रभावः

विदुषा निर्मितस्य व्युत्पत्तिप्रधानभूतस्यास्य काव्यस्य सप्तमे सर्गे कपियेषु पद्यरत्नेषु निष्कण्ठ्या निस्तालव्या निर्दन्त्या, निरोष्ठ्या, निरनुनासिक्या, निरूष्मा, निरन्तःस्थाश्च वैदिकस्वरध्वनियुता रचनाः सन्ति । अत्रैव प्रसङ्गेऽसौ कविर्वैदिकयज्ञेषु संप्रयुज्यमानस्य 'तान' स्वरस्य प्रकारान्तरेणानुसरणं कुर्वन् कतिषुचित् पद्येषु केवलमेकजातीयस्वरवती-मन्यत्र वैदिकीं द्विर्व्यञ्जनवतीञ्चतुर्व्यञ्जनवतीं वा रचनां निबध्नाति । एतद्वैशिष्ट्यं नान्यत्रोपलभ्यते ।

निःसन्तानस्य कृतवीर्यस्य पीडानिवृत्तिप्रसङ्गः

वैदिकसंस्कृतिसंबद्धेषु समेषु ग्रन्थेषु निस्सन्ततिकस्य गतिर्नास्तीति बहुचर्चितमस्ति । सुसन्ततेरभावात्प्रपीडितस्य राज्ञो हरिश्चन्द्रस्य जीवनेतिवृत्तम्, तत्र भवता सन्ततिलाभाय कृता अनेके उपायाश्च तत्रैव वर्णिताः सन्ति । दम्पत्योः सन्ततिप्रजननसामर्थ्योत्पादनाय वेदायुर्वेदधर्मशास्त्रपुराणादिषु षष्ठिदेव्युपासनहरिवंशश्रवण-पुत्रेष्टिपुत्रमन्थ-गुरुजनाशीर्वाद-ग्रहणसुवर्णधेनुदानादयोऽनेके, उपायाः परिवर्णिता दृश्यन्ते । तेष्वन्यतमः सरलोपायो गुरुजनशुभाशीर्वादात्मको वर्तते।

कालिदासरचिते रघुवंशमहाकाव्ये पुत्राभावपीडया प्रपीडितेन प्रथमनायकेन दिलीपेन पुत्रप्राप्त्युपायज्ञानार्थं कुलगुरोर्वशिष्ठाश्रमो यथा गम्यते तथैवात्र कृतवीर्येणाऽपि स्वकीयपुत्राभावपीडानिवृत्त्यै दत्तगुरोराश्रमो गम्यते । स गुरुं प्रीणयित्वा च सन्ततिलाभायऽऽशीर्वादं लभते । उपनिषदादिषु यथा ऋषीणामाश्रमाणां सुन्दरं वर्णनमुपलभ्यते, तथैवात्र द्वितीये सर्गे दत्तगुरोराश्रमस्य काव्यात्मकं वर्णनं कृतमस्ति । गुरुकृपया च कृतवीर्येण सर्वलक्षणसम्पन्नः पुत्रो लभ्यते ।

कार्तवीर्य्योदये महाकाव्ये चर्चिताः संस्काराः

गर्भाधानम्

अस्मिन् काव्ये कविना व्यासोक्ताः षोडश संस्काराः प्रायः सर्वे निरूपिताः सन्ति । तेषु प्रमुखाः केचनात्र क्रमशो विविच्यन्ते मनुस्मृतौ (२/१६, २६), याज्ञवल्क्यस्मृतौ (१/१०-११), विष्णुधर्मसूत्रे (२/३, २७/१) च निषेकगर्भाधानयोः समानार्थत्वमुररीकृतं दृश्यते । पारस्कर (१/११) शाङ्खायन (१/१८-१९), आपस्तम्बगृह्यसूत्रेषु चतुर्थीकर्मगर्भाधानयोः समानत्वं निरूपितमस्ति । तथैव कविवरेण सुकृतिदत्तसूरिणा चात्र कृतवीर्यदम्पतिविधेयस्यऽऽदिमस्य गर्भाधानसंस्कारस्य निर्देशो विहितः ।

वैदिकौ गार्भिकौ संस्कारौ तत्संकारप्रयोजनञ्च

संस्काराद्दोषमार्जनं नवीनगुणस्याधानं हीनाङ्गस्य पूरणञ्च जायते गर्भाधानोपेतो गर्भो ब्रह्म संदधाति। पुंसवनात्पुरुषत्वं लभते । फलस्थापनान्मातृपितृजं पाप्मानमपोहति । रेतोरक्तादिगर्भोपघातका गर्भाशयजन्या दोषा जातकर्मनामकरणान्नप्राशन-चूडाकरणसमावर्तनैश्च दूरीक्रियन्ते । एतैरष्टविधैर्गर्भाधान-पुंसवन-सीमन्तोन्नयन-जातकर्मनामकरणान्नप्राशन-चूडाकरण-

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

समावर्तनैश्च संस्कारैः शिशुशरीरं सुपवित्रं सञ्जायते । उपनयनेन वेदाध्ययने यज्ञयागादिषु चाधिकारी भवति । विवाहेन हीनाङ्गस्यापूर्तिश्च जायते । वेदोक्ता वैदिकैर्मन्त्रैश्च संपादनीयाः सर्वे संस्कारा वैदिका एव तेषु गार्भिकौ सीमन्तपुंसवनाभिधेयौ संस्कारौ सुकृतिदत्तेन निम्नानुसारेण वर्णितौ ।[१]

कार्तवीर्योदये वर्णितेषु संस्कारेषु गार्भिकः पुंसवन-संस्कारः

विकसितेषु देशेषु वर्तमानकाले शल्यक्रियया यथा – स्त्रीपुंश्चिह्नपरिवर्तनं क्रियते, तथैवास्माकं पूर्वजैः गर्भसन्धान-कालात्मासत्रयाभ्यन्तरे स्त्रीसन्तति-गर्भ-सन्धानाय स्त्रीसूयविधेः, पुंसन्तति-गर्भस्थापनाय पुंसवनविधेश्च निरूपणं कृतमस्ति। प्रसङ्गवशादत्र पुंसवनस्यैव विवेचनं क्रियते । गर्भसंस्कारपूर्वकं पुँश्चिह्नाधायकस्यास्य चरके शारीरे द्वादशदिवसान्मासत्रयं यावत्समयो निर्धारितः । बहुभिः सूत्रस्मृतिकारैस्तद्भाष्यकारैश्च प्रथममासादारभ्य मासत्रयं यावदेवास्य कालनिर्धारणं कृतमस्ति । अव्यक्ते चिह्ने तद्विधेयमिति याज्ञवल्क्यादीनां मतं दृश्यते ।

पुंसवनविधिः

पुन्नक्षत्रे चन्द्रमसि वटाङ्कुरादीनां रसं निस्कास्य वा उपवासपूर्वकं समुत्तानेन शयानाया गर्भिण्या दक्षिणनासाछिद्रतो 'हिरण्यगर्भ' इत्यनेन सायङ्काले तत्सेचनमामनन्तिप्रायः सर्वे । केचनात्र प्रातःकालेऽपि तदिच्छन्ति ।[२] अत्रैके कुशकण्टकं सोमलताखण्डञ्च रसनिष्कासनाय प्रक्षिपन्तीति ।

कार्तवीर्योदये चर्चितः सीमन्तोन्नयनसंस्कारः

स्त्रीक्षेत्रसंस्काराय, मलिम्लुचादि(भूतराक्षस्यादि)समग्रदोषतो गर्भसंरक्षणाय गर्भस्य कृतेऽनिवार्यत्वेन चतुर्थमासा-दारभ्य षण्मासाभ्यन्तरे संविधेयस्य, अदित्याः क्षेत्रसंस्कारपूर्वकं तत्सौभाग्यवर्धनाय, तद्गर्भसंरक्षणपुरःसरमादौ सृष्टिसञ्चा-लनाय प्रजापतिकश्यपेनैवाऽरब्धस्य स्वास्थ्य-शारीरिक-मनोविज्ञान-दाम्पत्यस्नेहप्रवर्धनदृष्ट्या चोपयुक्तस्य श्रुतिस्मृति-सूत्रपुराणादिषु च बहुचर्चितस्यास्य वैज्ञानिकरहस्यज्ञेन सुकृतिदत्तसूरिणा स्वकीये काव्यरत्ने कृतवीर्यमहिष्याः क्षेत्रसंस्कारपूर्वकं तद्गर्भसंरक्षणायायं वैज्ञानिकः संस्कारो निर्दिष्टः ।[३]

कार्तवीर्योदये जातकर्मपूर्वं विधेयानि कृत्यानि

महाकविना सुकृतिदत्तसूरिणा स्वकीये महाकाव्ये जातकर्मपूर्वं विधेयानि प्रमुखकृत्यानि निम्नानुसारं निरूपितानि सन्ति ।

१. गर्भसन्धानलक्षणानि ।
२. दशमासपर्यन्तं गर्भिण्या पालनीया धर्माः।
३. प्रसूतिगृहसञ्चयनं तत्र प्रवेशसमयनियमाश्च ।
४. सुखप्रसवोपायाः ।

उक्त प्रसङ्गाध्ययनात्कविर्वेदायुर्वेदधर्मशास्त्रादिसिन्धुपारङ्गत आसीदिति बुद्ध्यते । कविनाऽस्मिन् महाकाव्ये श्रुतिस्मृतिसूत्रपुराणायुर्वेदादिषु जातकर्मपूर्वं विधेयानि वैज्ञानिकानि यानि कार्याणि वर्णितानि तानि सर्वाणि सूचितानि सन्तीति सुकृतिदत्तस्य वैदुष्यं स्वतः स्पष्टं स्यादिति मे मतिः ।

---

१. *सीमन्त-पुंसवनमुख्यविधानमार्यो गर्भस्य संस्कृतिकरं श्रुतिवर्त्मनासौ ।।*
दत्तादिभिर्द्विजगणैर्व्यदधाद् यथावद् । विश्राणयन्सुरभिकाञ्चन भूमिवस्त्रम् ।। (सर्ग४, श्लो. ५०)

२. *गर्भधारणकालाद् द्वितीये तृतीये वा मासे यस्मिन् दिने पुष्यादिपुन्नक्षत्रेण शशी युक्तो भवेत्, तद्दिने गर्भिणीं भार्यामुपवास्य स्नापयित्वा शुद्धेऽन्तरीयोत्तरीये द्वे वाससी परिधापनं कृत्वा वटशुङ्गान् पिष्ट्वा रसं निष्कास्य तद्रसं पत्न्या दक्षिणनासापुटे आसिञ्चेत् 'हिरण्यगर्भः' । (पारस्करगृह्यसूत्रे)।*

३. *आद्ये गर्भे षष्ठेऽष्टमे वा मासि तिलमुद्गमिश्रं स्थालीपाकं (चरुं) श्रपयित्वा प्रजापतेर्हुत्वाऽग्नेः पश्चाद् भद्रपीठे निवसितायां भार्यायां युग्मेनापक्वेनौदुम्बरस्तवकेन त्रिभिश्च दर्भपिञ्जूलैस्त्र्येण्या शलल्या वीरतरशङ्कुना पूर्णचात्रेण च सीमन्तमूर्ध्वं विनयति –भूर्भुवः स्वरिति, प्रतिमहाव्याहृतिर्वा । त्रिवृतमाबध्नाति अयमूर्जावतो वृक्ष ऊर्जीव फलिनी भवेदिति । (पारस्करगृह्यसूत्रे)*

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

कार्तवीर्योदये जातकर्मसंस्कारप्रसङ्गस्तत्र विधेयानि कृत्यानि च

दत्तगुरोः शुभाशीर्वादेन लक्ष्मीनारायणानुकम्पया च सुदर्शनचक्रस्वरूपस्य भगवतोंऽशरूपभूते कृतवीर्यमहिष्याः धारिते शुभलक्षणोपेते गर्भे दशमे मासि पूर्णे सति शुभसमये भगवान् जात इति वर्णितं लभ्यते ।[४]

जातस्य शिशोरच्छिन्नायां नाड्यां मेधाजननायुष्ये विदधाति पिता । अनामिकया अङ्गुल्या स्वर्णान्तर्हितया मधुघृते प्राशयति घृतं वा **भूस्त्वयि दधामि भुवस्त्वयि दधामि स्वस्त्वयि दधानि भूर्भुवः स्वः सर्वं त्वयि दधामीति ।** अत्रायुर्वेदस्य सुश्रुते स्वर्णभस्मब्राह्मीरसयोः सम्मेलनपूर्वकं तत्र संस्थाप्य प्राशनञ्च निर्दिष्टम् । अत्र दधिरसप्रक्षेपणपक्षोऽप्यस्त्येव। नव जातस्य शिशोर्नाभ्यां दक्षिणे वा कर्णे '**अग्निरायुष्मान्...** ' इत्यादिभिर्मन्त्रैरायुष्यञ्च करोति वारत्रयम् । स यदि कामयेत सर्वमायुः शिशुरियादिति '**दिवस्परी**' इत्यादिना वात्सप्रेणैनमभिमृशेत् । ततः प्रतिदिशं पञ्चब्राह्मणानवस्थाप्य अनुप्राणनादिकञ्च कारयेत् । ब्राह्मणाभावे परिक्रम्य स्वयं कुर्यात् । शिशुजातभूमिं '**वेदते**' इत्येनेनाभिमन्त्रयेत् । '**अश्मा भव**' इत्यनेनाभिस्मृशेत्, ततः शुभाशीर्वादमन्त्रञ्च पठेत् । '**इडासी**'त्यनेन मातरमभिमन्त्रयेत् । दक्षिणं स्तनं प्रक्षाल्य '**यस्ते स्तन**' इत्यनेन पाययेत् । ततः शिरोभागे उदकपात्रं संस्थाप्य द्वारदेशे सूतिकाग्निमुपसमाधायोत्स्थानात्सन्धिवलयोः फलीकरणमिश्रान्सर्षपानग्नावावपेत् '**शुण्डामर्क्के**'त्यादिभिर्मन्त्रैः । बालोपद्रवनिवारणाय शिशुजालेनोत्तरीयेण वा प्रच्छाद्य स्वाङ्क आधाय '**कूर्कुरः**' इत्यादिमन्त्रं जपेत् पिता । रोदनादिदोषपरिहाराय च '**नामयती**'त्यनेनाभिमृशेत् । इति ।

मेधाजननायुष्ययोः, शिशुमर्मस्थानाभिमर्शनस्य, अनुप्राणनस्य, शण्डामर्कादिहवनस्य च वैज्ञानिकत्वमथर्ववेदायुर्वेद-योरध्ययनात्सिद्ध्यति । जननानन्तरं शिशोः शरीरसंस्पर्शद्वारा सचेततात्प्रदानं सञ्जायते । दधिमधुघृतस्वर्णभस्मब्राह्मीरसप्राशनाद् धनुष्टङ्कारादिभाइरसटीकादितश्च शिशोः संरक्षणं भवति । जातभूमिमात्र्यभिमन्त्रणयोश्च राष्ट्रियं मनोवैज्ञानिकञ्च महत्त्वमस्ति। दत्तगुरोराशीर्वादेन लक्ष्मीनारायणस्यानुकम्पया च कृतवीर्यस्य पुत्रत्वेन चक्रावतारस्वरूपस्य नारायणस्यैवावतरणम्, तस्य जातकर्मादिवैदिकाः संस्काराश्चावधूतस्वरूपस्य दत्तगुरोर्निर्देशानुसारमेव सञ्जाता आसन् ।

कार्तवीर्योदये महाकाव्ये षष्ठीपूजा

षष्ठे दिने तस्य लिलेख षष्ठी इति महाकाव्ये कविना निरूपितमस्ति । तस्याः पूजायाः प्रकारविषये विचारः क्रियते।

पञ्चमे षष्ठे च दिवसे षष्ठे एव वा पूर्वरात्रौ पित्रादिराचम्य प्राणानायम्य शिशोरायुरारोग्यसकलरिष्टशान्तये षष्ठीपूजनाय सङ्कल्पं कृत्वा षोडशोपचारैस्तां पूजयेत् । एतत्प्रतिमाश्च लेपादिना कुड्ये लेखनीयाः । पीठादौ वाऽक्षतपुञ्जरूपेण निवेश्याः। पुरुषाः शस्त्रहस्ताः स्त्रियश्च नृत्यगीतकारिण्योऽस्यां रात्रौ जागरणं कुर्युः । सूतिकागृहञ्च सधूमाग्निदीपशस्त्रमुसलाम्बुविभूतियुतं कार्यम्। कर्ता श्वेतसर्षपाँश्च परितोऽवकिरेत् । जन्मदाभ्योऽन्नादिना बलिर्देयः । विप्रेभ्यश्च भोजनदक्षिणा देया । अनेन रूपेण षष्ठीप्रार्थना च विधेया –

गौरीपुत्रो यथा स्कन्दः शिशुत्वे रक्षितः पुरा ।
तथा ममाप्ययं बाल षष्ठिके रक्षतां नमः ।।

पुन राकाद्यानां चतसृणां पूजा च विधेयेति शास्त्रनिर्देशः । कार्तवीर्योदयमहाकाव्येऽपि शास्त्रानुसारणैव षष्ठीपूजाया निर्देशो जातः ।

कार्तवीर्योदयमहाकाव्ये नामकरणसंस्कारप्रसङ्गः

कार्तवीर्योदयमहाकाव्ये एकादशे दिवसे राजा कृतवीर्यो जातकस्य नामकरणसंस्कारं कृतवान् इति निरूपितम् । यथा – '**दिने व्यतीते दशमे पितास्य युक्तञ्चकाराज्र्जुन नाम पुण्यम् ।**'

सूतकान्ते सूतिकाग्निमुत्थाप्य नामकरणाङ्गतया त्रीन् ब्राह्मणान् भोजयित्वा पिता सन्ततेर्नामकरणं शास्त्रनिर्दिष्टम् ।

---

४. *समभवदभवार्थं भक्तिभाजां प्रजानाममृतविशदकीर्त्या सेचनार्थं त्रिलोक्याः*
अरुणकमलकान्त्या भासयन्दिग्वितानं हरिरवनिमहेन्द्राच्चारुकीर्त्याम्महिष्याम् ।।(४/६२)

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

दशरात्रे व्यतीते नामकरणमिति गोभिलः । याज्ञवल्क्यश्च **'अहन्येकादशे नाम'** इत्युक्तवान्। अतो महाकाव्यनिर्दिष्टो नामकरणसंस्कारप्रसङ्गः पूर्णतया वैदिकसंस्कृत्यनुकूलः ।

कार्तवीर्योदयेऽन्नप्राशनप्रसङ्गः

कार्तवीर्योदयमहाकाव्ये कार्तवीर्यस्य अन्नप्राशनसंस्कारः काव्यवाचा सुष्ठु निरूपितः । षष्ठादिसममासे पुत्रस्य, पञ्चमादिविषमे मासि पुत्र्या अन्नप्राशनं विधेयमिति श्रुतिस्मृतिसूत्रपुराणादिषु वर्णितमस्ति । उक्तञ्च पारस्करगृह्यसूत्रे - **'षष्ठे मासेऽन्नप्राशनम्'**। जातस्य शिशोः कृते पञ्च षण्मासादन्नमांसमधुरादिषड्रसस्यावश्यकत्वं भवतीति विचार्य प्राच्यैर्महर्षिभिः शरीरविज्ञानानुसारं तद् व्यवस्थितम् । अमांसभोजिनां कृते दधिमधुघृतयुक्तं पायसं प्रदीयते । तस्योल्लेख आश्वलायन-गृह्यसूत्रब्रह्मपुराणादिष्वस्ति ।

कार्तवीर्योदये शैक्षिकाः संस्काराः

कार्तवीर्योदयमहाकाव्ये कविना कार्तवीर्यस्य पञ्चमे वर्षेऽक्षरारम्भसंस्कारो वर्णितः ।[५]

उपनयनम्

उपगुरुसमीपे वटोर्नयनं प्रापणमुपनयनम् । वेदाध्ययनायाचार्यादीनां समीपे नीयते वटुर्येन तदुपनयनं वेति । तदर्थे वा कर्मोपनयनम् । अत्र भावव्युत्पत्तिरेव साधीयसीति गम्यते । संस्कारोऽयमुपनयनम्, उपनायनम्, मौञ्जीबन्धनम्, बटुककरणम्, व्रतादेशः, व्रतबन्धादिनाम्ना च व्यवह्रियते । अमुं संस्कारमनुसृत्यापस्तम्बधर्मसूत्रे च निगदितमेतत् - **'स हि विधातस्तं जनयति'** इति, तथाचोक्तम् - उपनयनं विद्यार्थस्य श्रुतितो विधेयः संस्कारः । अथर्ववेदे - उपनयनसंस्कारमाश्रित्योपदिष्टम्- **आचार्य उपनीयमानो ब्रह्मचारिणं कृणुते गर्भमन्तः** । इति ।

अथचाऽचार्य उपनीतं ब्रह्मचारिणं त्रिरात्रपर्यन्तं स्वकीये गर्भे प्रकारान्तरेण धारयति । तदेव बटोर्द्वितीयं जन्म तं द्रष्टुं देवाः (विद्वांसः) एकत्रिता भवन्तीति तत्रैव प्रतिपादितमस्ति । वैदिकममुं सिद्धान्तमाश्रित्यापस्तम्बधर्मसूत्रेऽपि निरूपितञ्चैतत्- **'स हि विधातस्तं जनयति । तच्छ्रेष्ठे जन्म । मातापितरौ शरीरमात्रमेव जनयतः । आचार्यस्तु सर्वपुरुषार्थक्षमं विद्यासंस्कृतं द्विजत्वमुत्पादयति। विद्यातो जन्म प्रशस्ततमम् । अभ्युदयनिःश्रेयसहेतुत्वात्।** इति। शतपथब्राह्मणे च तदेवोक्तम्। अत्र मनुश्चाह- **अत्रास्य माता सावित्री पिता त्वाचार्य उच्यते** इति। **संस्कारात् द्विज उच्यते** इति । यच्छाखीयैः **संस्कारैर्यः सुसंस्कृतो भवेत्स तच्छाखाध्ययनात्पतितो न स्यादिति।** उपनयनपूर्वकं वेदाध्ययनं विधायैवान्यानि धर्मशास्त्रादीनि त्रैवर्णिकैरध्येतव्यानीति शास्त्रीयो नियमोऽस्ति। उक्ततथ्यं ज्ञात्वैव महाकविः सुकृतिदत्तसूरिः कार्तवीर्यार्जुनस्य उपनयन-वेदाध्ययन-भिक्षाचर्यादीनि कृत्यानि वर्णितवान् ।[६] महाकाव्ये गुरुकुले उषित्वा राजकुमारेण कार्तवीर्यार्जुनेन वेदोऽधीत इति वर्णितम् ।[७]

अनेन प्रकारेणैव शैक्षिकाः केशान्तस्नानसंस्कारादयश्च कविना कार्तवीर्यं लक्ष्यीकृत्य परिवर्णिताः सन्ति । वेदेषूल्लिखिता वैदिकैर्मन्त्रैश्च विधेयाः प्रायः सर्वे संस्काराः कविना स्वकीये काव्ये मुख्यनायकं लक्ष्यीकृत्य यथास्थानं चर्चिताः ।

संस्कारफलम्

कार्तवीर्योदये महाकाव्ये कविना गार्भिकैः पुंसवन-सीमन्तोन्नयनादिभिः, बाल्यकालिकैर्जातकर्मनाम-कर्मान्नप्राशन-

---

५. क) *पञ्चमे मुनिरुपेत्य वत्सरे शारदाहरिगणेशपूजनम् ।*
संविधाय लिखितमजीग्रहत् वर्णपङ्क्तिममुनागमाध्वना ।। (कार्तवीर्ये ५/५०)
ख) *अक्षराणि स पठन् मनीषया । (५१/५५)*

६. *वेदमातरमवाप्य मातरं भिक्षितुं स वटुरागमत्ततः ।। (५/६१)*
तं गुरु रुरुभवेन चर्मणा वेष्टितं पुरुमनीषमादरात् । साङ्गवेदमुपशिक्षयन्पुरोऽपाठयत्कुलपरम्परागतम् ।। (५/६३)
आश्रमञ्च समुपेत्य गौरवं वन्यवृत्तिपरितुष्टमानसः । वर्णिनो व्रतमखण्डितं दधत् स त्रयीमधिजगे गुरूदिताम् ।। (५/६४) ।

७. *प्राप्यासौ श्रुतिमातरं गुरुगृहे दान्तो वसन्नगृहे । (१०/११८) ।*

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

चूडाकरणादिभिः, शैक्षिकैरक्षरारम्भ-उपनयन-व्रतादेश-वेदाध्ययन-केशान्त-स्नानसंस्कारैश्च मुनिना सुसंस्कृतं कार्तवीर्यार्जुनं सुपुत्रं दृष्ट्वा कृतवीर्यो राजा तुतोषेति वर्णितमस्ति ।[८]

कार्तवीर्योदयेऽष्टविकृतिसहितवेदाध्ययनप्रसङ्गः

कार्तवीर्योदयमहाकाव्ये सुकृतिदत्तसूरिणा साङ्गानामष्टविकृतिसहितानां दृष्टादृष्टफलदायकानां तापत्रयोन्मूलकानां ध्वनिविज्ञानवातावरणविज्ञानस्वास्थ्यविज्ञानशिक्षाविज्ञानसमाजविज्ञानदृष्ट्या च महत्त्वोपेतानां (११३१) एकत्रिंशदुत्तरैकादश-शतशाखोपेतानामध्ययनं मानवकल्याणायाऽवश्यकमस्तीति निरूपितम् ।[९]

काव्यकला-निबन्धन-प्रसङ्गे कविना ऋग्यजुःसाम्नां लक्षणानि, प्रतिवेदं शाखाभेदः, कृष्णत्वशुक्लत्वयोर्हेतुः, शिक्षादीनां षडङ्गानां लक्षणोदाहरणानि, धर्मशास्त्रादीनि षडुपाङ्गानि जटाद्यष्टविकृतीनां लक्षणानि च संक्षेपेण निरूपितानि सन्ति । इह संहितापदक्रमाणामपि शास्त्रेषु चर्चा जाता ।[१०]

अष्टौ विकृतयः

१) जटा २) माला ३) शिखा ४) रेखा ५) ध्वजः ६) दण्डः ७) रथः ८) घनश्चेति अष्टौ विकृतय भवन्ति । एतेषां वैदिकवाङ्मये महत्त्वपूर्णं स्थानमस्ति ।[११]

---

८. *संस्कारमासाद्य नरेन्द्रसूनुर्मुनिप्रणितन्त्रितरां दिदीपे । प्रागेव हीरो हरते मनांसि किं लब्धशाणोत्कषणः सुवर्णः ।। (५/१) तं संस्कृतं वीक्ष्य तुतोष राजा ।। (५/२) इति ।*

९. *सा त्रयी हरतनूरिवानलस्थापनोपरिगसोमसङ्गता । उच्चनीचपद सङ्क्रमा जटावल्लिवेल्लितघनाशिखान्विता ।। (५/६५)*

१०. *संहिताया उदाहरणम्*

इषे त्वा त्वोर्जे ऋचोर्धे तु द्विमात्रः स्यादित्यादिशिक्षानियमानुसारं संहितापाठः क्रियते। यथा- सहस्रशीर्षा पुरुषः ।

पदस्योदाहरणम्

सहस्रशीर्षेति सहस्रशीर्षा । पुरुषः।

सहस्राक्ष इति सहस्र अक्षः ।

इषे त्वा ऊर्जे त्वा । इत्यादिः ।

क्रमपाठस्योदाहरणम्

सहस्रशीर्षा पुरुषः । सहस्रशीर्षेति सहस्रशीर्षा । पुरुषः सहस्राक्षः । सहस्राक्षः सहस्रपात् । इत्यादिः ।

११. *जटालक्षणम् -*

क्रमं यथोक्तं प्रब्रुयात् व्युत्क्रमेण क्रमेण च । सलक्षणं सर्वसन्धौ जटा सा प्रोच्यते बुधैः ।। (शु.य.प्रा.परि.)

जटापाठफलम् -

संहितापाठतः पुण्यं द्विगुणं पदपाठतः । त्रिगुणं क्रमपाठेन जटापाठेन षड्गुणम् ।। (वराहपु.) ।

जटापाठे अनुक्रमादयः पञ्चक्रमाः पठ्यन्ते । तदुदाहरणम् -

१. *अनुक्रमः - सहस्रशीर्षा पुरुषः ।*
२. *उत्क्रमः - पुरुषः पुरुषः ।*
३. *व्युत्क्रमः - पुरुषः सहस्रशीर्षा ।*
४. *अभिक्रमः - सहस्रशीर्षा सहस्रशीर्षा ।*
५. *संक्रमः - सहस्रशीर्षा पुरुषः । इत्यादिः ।*

मालालक्षणम् -

माला मालेव पुष्पाणां पदानां ग्रन्थिनी हि सा । आवर्तन्ते त्रयस्तस्यां क्रमव्युत्क्रमसंक्रमाः ।। (शु.य.प्रा.प.)

तदुदाहरणम् -

सहस्रशीर्षा पुरुषः सहस्रशीर्षा पुरुषः पुरुषः सहस्रशीर्षा पुरुषः सहस्रशीर्षा सहस्रशीर्षा पुरुषः सहस्रशीर्षा पुरुषः । सहस्रशीर्षेति सहस्रशीर्षा । इत्यादिः ।

शिखालक्षणम् -

पदोत्तरां जटामेव शिखामार्याः प्रचक्षते । (शु.य.प्रा.परि.)

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

कार्तवीर्योदये स्वयंवरप्रसङ्गः

कुलञ्च शीलञ्च विद्या च वयश्च समानं स्वयंवरस्य कृते परिवर्णितमस्ति शास्त्रे वरकन्ययोः । ब्रह्मचर्येण कन्या युवानं विन्दते पतिमिति वेदश्चाह । प्रसङ्गेऽस्मिन् ऋग्वेदे चोक्तमेतत् – **भद्रावधूर्भवति यत्सुपेशाः स्वयं सा वनुते जने चित् । ' भद्रावधू प्रतिकाम्यं वरं वृणुते'** इत्यथर्ववेदे चोक्तम्। **युवतयो युवानमिच्छन्तीति** यत्र कुत्रापि वेदे समुक्तं

शिखापाठस्योदाहरणम् –

सहस्रशीर्षा पुरुषः पुरुषः सहस्रशीर्षा सहस्रशीर्षा पुरुषः सहस्राक्षः । सहस्रशर्षेति सहस्रशीर्षा । इत्यादिः ।

रेखालक्षणम् –

क्रमाद् द्वि-त्रि-चतुः पञ्च पदक्रममुदाहरेत् । पृथक्पृथग् विपर्यस्य रेखामाहुः पुनः क्रमात् ।। (शु.य.प्रा.परि.)

तत्पाठस्योदाहरणं यथा –

पुरुषऽएव । पुरुषऽएवेदम् । पुरुषऽएवेदङ्सर्वम् । पुरुषऽएवेदऽसर्वं यत् । एव पुरुषः । इदमेव पुरुषः सर्वमिदमेव पुरुषः। यत्सर्वमिदमेव पुरुषः । पुरुषऽएवेदङ्सर्वं यत् । इत्यादिः।

ध्वजलक्षणम् –

ब्रूयादादेः क्रमं सम्यगन्तादुत्तारये (दिति) । वर्गे वा ऋचि वा यस्य पठनं स ध्वजः स्मृतः । (शु.य.प्रा.परि.)

तत्पाठस्योदाहरणञ्च यथा –

सहस्रशीर्षा पुरुषः । दशाङ्गुलमिति दश अङ्गुलम् । पुरुषः सहस्राक्षः । अत्यतिष्ठत् । सहस्राक्षः सहस्रपात् । स्पृत्वाति। सहस्राक्षऽइति सहस्र अक्षः । इत्यादिः ।

दण्डलक्षणम् –

क्रममुक्त्वा विपर्यस्य तत्पदानि पुनः पठेत् । अर्धचादेवमुक्तोऽयं क्रमदण्डोऽभिधीयते ।। (शु.य.प्रा.परि.)

तत्पाठस्योदाहरणञ्च यथा –

सहस्रपादिति सहस्रपात् । सहस्र अक्षः । सहस्राक्षः सहस्रपाद । सहस्रपात् सहस्राक्षः । सहस्राक्षः सहस्रपात् । पुरुषः सहस्राक्षः सहस्राक्षः पुरुषः । पुरुषः सहस्राक्षः । सहस्रशीर्षेति सहस्रशीर्षा। सहस्रशीर्षा पुरुषः । पुरुषः सहस्रशीर्षा । सहस्रशीर्षा पुरुषः। पुरुषऽइति पुरुषः । इत्यादिः ।

रथलक्षणम् –

पादशोऽर्धर्चशो वापि सहोक्त्या दण्डवद्रथः । (शु.य.प्रा.परि.)

तत्पाठस्योदाहरणञ्च यथा –

सहस्रपादिति सहस्रपात् । सहस्रशीर्षेति सहस्रशीर्षा । सहस्राक्षऽइति सहस्र अक्षः । सहस्राक्षः सहस्रपात् । सहस्राक्षऽइति सहस्र अक्षः । सहस्रशीर्षा पुरुषः । सहस्रशीर्षेति सहस्रशीर्षा । पुरुषः सहस्राक्षः । पुरुषः सहस्राक्षः । सहस्रशीर्षेति सहस्रशीर्षा। पुरुषः सहस्राक्षः । पुरुषः सहस्राक्षः । सहस्रशीर्षा पुरुषः । सहस्रशीर्षेति सहस्रशीर्षा ।

घनलक्षणम् –

घनो द्विविधः । क्रमघनः शिखाघनश्चेति ।

घनक्रमस्य लक्षणम्

अन्तात्क्रमं पठेत् पूर्वमादिपर्यन्तमानयेत् । आदिक्रमं नयेदन्तं घनमाहुर्मनीषिणः ।। (शु.य.प्रा.परि.)

घनक्रमपाठस्योदारहणम्

दशाङ्गुलमिति दश अङ्गुलम्। अतिष्ठद्दशाङ्गुलम्। अत्यतिष्ठत्। स्पृत्वाति। सर्वत स्पृत्वा। भूमिङ्सर्वतः। स भूमिम्। इत्यादिः।

शिखाघनलक्षणम्

शिखामुक्त्वा विपर्यस्य तत्पदानि पुनः पठेत् । अयं घन इति प्रोक्त इत्यष्टौ विकृतीः पठेत् । (वा.प्रा.परि.) ।

शिखाघनपाठस्योदाहरणम्

सहस्रशीर्षा पुरुषः पुरुषः सहस्रशीर्षा सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्राक्षः पुरुषः सहस्रशीर्षा सहस्रशीर्षा पुरुषः सहस्राक्षः। सहस्रशीर्षेति सहस्रशीर्षा । पुरुषः सहस्राक्षः सहस्राक्षः पुरुषः पुरुषः सहस्राक्षः सहस्रपात्सहस्रपात् सहस्राक्षः पुरुषः पुरुषः सहस्राक्षः सहस्रपात् । सहस्राक्षः सहस्रपात्सहस्रपात्सहस्राक्षः सहस्राक्षः सहस्रपात् । सहस्राक्षऽइति सहस्र अक्षः । सहस्रपादिति सहस्रपात् । इत्यादिः (द्र. प्रा.डा. ऋषिरामपोखरेल, मर्यादा १७ पूर्णाङ्कः, वि.सं. २०४३, वेदपाठप्रकारः, पृ. ४७-५८) ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

दृश्यते । **युवाह युवत्या क्षेत्रियोनिषु** इति ऋग्वेदश्चाह । **सुन्दर्यो युवतयः प्रतिकाम्यवरचयनाय समननामके उत्सवे गच्छन्तीति** ऋग्वेदे अथर्ववेदे च सङ्केतितमस्ति । सूत्रस्मृतिषु च आद्यरजःस्नानकालात्त्रिवर्षे व्यतीते कन्या स्वयं वरं वृणुते इत्युक्तमस्त्येव । सूर्यपुत्री सूर्या सोमम्, जनकपुत्री सीता रामम्, द्रुपदपुत्री द्रौपदी अर्जुनम्, इन्दुमती नलं यथा वृणुते तथैवात्र भोजपुत्री कनकप्रभा कार्तवीर्याजुनं वृणुते । ऋग्वेदे सूर्यासोमयोः, रामायणे सीतारामयोः, रघुवंशे इन्दुमत्यजयोः, नलचम्पूकाव्ये नलदमयन्त्योः, महाभारते द्रौपद्यर्जुनयोर्यथा कविभिः स्वयंवरप्रसङ्गो वर्णितस्तथैवात्र (९, १०, ११, १२ सर्गेषु) सुकृतिदत्तसूरिणा च । एतावता सुकृतिदत्तसूरिणा कार्तवीर्योदये वर्णितः स्वयंवरप्रसङ्गः शास्त्रप्रमाणितो ज्ञेयः ।

कार्तवीर्य-कनकप्रभयोर्विवाहप्रसङ्गः

विशेषतो यस्मिन् संस्कारविशेषे वेदविधेर्वहनं भवति स विवाहसंस्कार इत्युच्यते बुधैः । द्विजातीनां महत्त्वपूर्णोऽयं संस्कारः । अनेन विना द्विजो न वेदोक्तधर्मकर्मसु, न लोकप्रतिष्ठायाम्, न च सन्तानोत्पादनेऽकिारी भवति । अस्याः प्रथायाः समुपक्रमः प्रजापतिनैव कृत इति प्रकारान्तरेण बृहदारण्यकोपनिषदि निरूपितमस्ति । तदेवाह मनुरपि । मानवो विवाहसंस्कारेण विना पूर्णो न भवतीति शतपथब्राह्मणे प्रतिपादितमस्ति । भार्याहीनः पुरुषो धार्मिककार्येषु नाधिकारी भवतीति ब्रह्मपुराणे उक्तं दृश्यते । अस्मात्संस्कारात्मलापकर्षणं गुणाधानं हीनाङ्गपूरणञ्च भवतीति शास्त्रकारैरुक्तम् । अस्मिन् संस्कारे वरो वध्वा अङ्गुष्ठं गृह्णाति '**गृभ्णामिते**' इत्यनेन । प्रजासुखदीर्घायुःसम्प्राप्तये वरो वधूमश्मारोहणायाभिप्रेरयति कौशिकसूत्रनियमार्थववेदयोर्मन्त्रपठनपूर्वकम् । मन्त्रश्च यथा -

एह्यस्मान् मातिष्ठाश्मा भवतु ते तनूः ।
कृण्वन्तु विश्वेदेवा आयुष्टे शरदः शतम् ।। (अ. १४/१/४७)

स्योनं ध्रुवं प्रजायै धारयामितेऽस्मानं देव्याः पृथिव्या उपस्थे । तमातिष्ठानुमाद्या सुवर्चा दीर्घं त आयुः सविता कृणोतु ।' वेदोक्तमन्त्रभावपरिपूरको मन्त्रश्चाश्मारोहणे सूत्रस्मृतिकारैः समुपस्थापितोऽस्ति; च यथा - **आरोहेमश्मानमश्मेवत्वं स्थिरा भव । अभितिष्ठ पृतन्यतोऽवबाधस्व पृतनायतः** । सुकृतिदत्तसूरिणा चाश्मारोहणप्रसङ्गेऽयमेव मन्त्रो निरूपितो दृश्यते ।

वैदिकविवाहपद्धतौ आदौ कन्या पिता मधुपर्कविधिना वरस्वागतं विदधाति । अत्रापि कनकप्रभापिता भोजो वररूपेणागतमर्जुनं मधुपर्केण पूजयति ।[१२] वैदिकविवाहविधौ वरः कन्याकण्ठे ललन्तिकां परिधापयतीति उक्तमस्ति ।[१३] तद्विधेः सार्थकत्वञ्च कविः प्रकाशितम् ।[१४] काव्येऽस्मिन् कार्तवीर्यार्जुनः सामविधानब्राह्मणमन्त्रभावं पूरयितुं कनकप्रभाया हृदयं संस्पृशति । तद् विषये वैदिका मन्त्रा दृश्यन्ते ।[१५] ऋग्वेदाथर्ववेदमन्त्रेषु निर्दिष्टानि सर्वाणि वैवाहिककृत्यानि सीतारामयोः, गौरीशङ्करयोश्च विवाहे यथा चरितार्थानि तथैव कार्तवीर्य-कनकप्रभयोश्च विवाहेऽपि दरीदृश्यन्ते ।[१६]

---

१२. *का.म. ४/३१ ।*

१३. *आश्वलायनस्मृतौ १५/३३ ।*

१४. *ललन्तिका चारु गले ललास । कुमारपत्या निहिता कुमार्य्याः ।। का. म. १४/५५ ।*

१५. *यदेतद्धृदयं तव तदस्तु हृदयं मम । यदेतद्धृदयं मम तदस्तु हृदयं तव ।।*

१६. क) *पारस्परिकं समञ्जनम् । (का.स. १४/७४) तत्प्रसङ्गः पा.गृ.सू. १/४, शां.गृ.सू. (१/१२/५) ।*
ख) *अग्निप्रदक्षिणा - (स. १४/७६), तद्विधेरुल्लेखः, हिरण्यके. गृ.सू. १/२०/८१*
ग) *वैदिकहोमः (राष्ट्रभृज्जयाऽभ्यातानगुप्ताहुतिः) (स. १४/७६), तद्विधेरुल्लेखः गोभिलगृह्यसूत्रे २/१/२४-२६)*
घ) *लाजाहोमो वधुकर्तृकः (स. १४/७७), तद्विधेरुल्लेखः (पारस्करगृ.सू. १/६)*
ङ) *अश्मारोहणम् (स. १४/८४), तद्विधिः - पा.गृ.सू. १/६) ।*
च) *ध्रुवदर्शनम् - (स. १४/८४), तद्विधिः - पा.गृ.सू. १/६*
छ) *सप्तपदी -(स. १४/८५) , तद्विधेर्वैशिष्ट्यम्, मनुस्मृ. ८/२२७, ९/७०, या.स्मृ. १/८४, पा.गृ.सू. १ ।*
ज) *पूर्णाहुतिः,तिलकग्रहणम्, मूर्धाभिषेकः, वैदिकशुभाशीर्वादः । (स. १४-८६-८७) , तद्विधेरुल्लेखः पा.गृ.सू. १/७, १/८ ।*

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

कार्तवीर्योदये महाकाव्ये वैदिकयज्ञप्रसङ्गः

कृतवीर्य-कार्तवीर्ययोः शासनावधौ दैनिकपाक्षिकवार्षिकपर्यावरणादिसन्तुलनपूर्वकं यथासमये सुवृष्टिरस्तु पृथी च सस्यशालिनी स्वर्गीयसुखदा भवतु शान्ति स्वस्तिश्च सर्वत्रैव भवत्विति हेतो सायंप्रातयोः संपाद्यमानस्याग्निहोत्रस्य प्रतिपक्षसन्धौ क्रियमाणायाः पौर्णमासेष्ट्या, विविधसत्रादिभिर्वर्षदिनपर्यन्तमपि सञ्चाल्यमानस्य सोमयागस्य, तत्संबद्धस्य वाजपेयस्य, सौमिक्या औदुम्बर्याः, राष्ट्रसंवर्धनपूर्वकं शत्रुनिवारणहेतोः संविधेयस्य विश्वजिन्नामकस्य यज्ञस्याश्वमेधस्य च कार्तवीर्योदये महाकाव्ये कविना प्रसङ्गानुसारेण निरूपणं कृतम् । राष्ट्रकल्याणाय कार्तवीर्येण पूर्वोक्तयज्ञा यथा कृता तथैवाधुना च विश्वकल्याणाय ते करणीया इति काव्याध्ययनादबुद्ध्यते । काव्येऽस्मिन् विश्वकल्याणाय योगदानकर्तृणामृषीणां तादृशाणां ग्रन्थरत्नानां द्वैताद्वैतसम्बद्धानां दर्शनादीनाञ्चोट्टङ्कनं कृतमस्ति ।

अस्य काव्यस्य सर्गे द्वितीये कृतवीर्यकृतमखेषु देवा निजभागम्, देववैद्यावश्विनौ च पारितोषिकं सोमभागं जगृहाते।[१७] तत्र देवा ब्राह्मणाश्च स्वकीयं भागं प्राप्य तृप्ता अभवन्[१८] इत्युक्तम् । कविर्यज्ञसम्बद्धविषया कविना महाकाव्येऽस्मिन् प्रसङ्गानुसारेण निरूपिताः ।[१९]

कार्तवीर्यतपोवर्णनम्

तपसा किन्न लभ्यते । तपसैव ब्रह्मविष्णुमहेश्वराश्च स्वकीयं कार्यं कुर्वन्ति । तपसैव ऋषयो मन्त्रद्रष्टारोऽभूवन् । तपसैव ध्रुवेण ध्रुवपदं लब्धम् । कृतवीर्यपुत्रेण कार्तवीर्येण च दत्तगुरोरुपदेशेन कृतेन तपसा सहस्त्रबाहुना सर्वशक्तिसम्पनेन भूयते स्म । तत्तपसा प्रसन्नो मुनिस्तस्मै सर्वशक्तिप्रदानं करोति स्म । तन्त्रशास्त्रे भगवद्विष्णोरंशस्वरूपेण (सुदर्शनचक्रावतारत्वेन) अवतीर्णाय कार्तवीर्यार्जुनाय दीपदानविधिर्निरूपितोऽस्ति । तदुपासनमन्त्रतन्त्रयन्त्राणि च तन्त्रशास्त्रे परिवर्णितानि सन्ति । तन्त्रशास्त्रे कार्तवीर्यार्जुनस्य स्मरणमात्रेण गतं नष्टञ्च लभ्यते इति वर्णितमस्ति ।[२०] इत्थं कविवरोऽपि तदुपासक एवासीदिति अनुमीयते ।

वानप्रस्थाश्रमः

शरीरविज्ञानायुर्विज्ञानानुसारं श्रुतिस्मृतिसूत्रपुराणदिष्वाश्रमचतुष्टयानां वैज्ञानिकं रहस्यं परिवर्णितमस्ति । आयुर्विज्ञानानुसारं गृतीये वयसि पञ्चाद्दवर्षतोऽस्यानुसरणे शास्त्रे निरूपितं दृश्यते । कार्तवीर्योदयमहाकाव्यस्यादिमो नायकः कृतवीर्यस्तृतीये वयसि स्वकीयराज्यभारं तनये निधाय महाभारतानुसारं मोक्षपदप्राप्तये वनं गतवान् । चरमपुरुषार्थस्वरूपस्य मोक्षस्य पक्षपातिना तत्प्राप्त्यर्थं वनगमनमुचितमेव ।

उपसंहृतिः

काव्येऽस्मिन् काव्यनायका गर्भाधानाद्विवाहपर्यन्तं विधेयाः सर्वे च ते संस्कारा वैदिकपद्धत्यनुसारमेव कुर्वन्ति । वेदोक्ता वैदिवैर्मन्त्रैश्च दृष्टादृष्टफलप्राप्त्यर्थं विधेयाः पूर्वोक्ताः संस्कारा वैदिका एव । तेषु केचन मातृपितृरजोवीर्यदोषनिवारणपूर्वकं ब्राह्मीयतनूकराः सन्ति, केचन क्षेत्रपरिशोधनपुरःसरं भूतराक्षस्यादिदोषतो गर्भसंरक्षका

---

१७. का.म. २/६-८ ।

१८. का.म. २/९ ।

१९. बहुवर्षगणातिपातिभिः कृतवीर्याध्वरकौतुकैः सुराः । निजदारकलाकुतूहलं चिरलग्नं हृदि ते विसस्मरुः ।।(२/१०)
कृतवीर्यनृपाध्वरोद्भवैरतिपुष्टा पृथुधूमराशिभिः । मुदिरालिरवर्षयज्जलं जगताञ्जीवनभावनं सदा ।। (२/१२)
हयमेधमुखैर्मखै रसा वतिदक्षो बहुदक्षिणान्वितैः । सुरभूसुरपङ्क्तिकामवत् समनैषीच्छरदां शतन्नृपः ।। (२/१४) ।
चरमेऽवभृथा प्लुतो नृपोऽध्वरराशेः कनकैरवर्षयत् । कनकात्मजमेत्य दीक्षितं बहुलेभे कनकत्रकस्तदा ।। (२/१५)
अवसाय सवोत्सवन्निजं परिधायाभरणाम्बरादिकम् । अतिबन्धुरसिन्धुरस्थितः शुशुभे पूर्वगिरौ यथांशुमान् ।। (२/१६) ।

२०. कार्तवीर्यार्जुनो नाम राजाबाहुसहस्त्रवान् । यस्य संस्मरणमात्रेण गतं नष्टञ्च लभ्यते ।। - उड्डामरतन्त्रे ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

दृश्यन्ते, केचन पुंगर्भसन्धायकाः, केचन बालग्रहदोषनिवारणपूर्वकं शारीरिकमानसिकस्वास्थ्यप्रदायका वर्तन्ते । केचन द्विजत्वाऽऽपादका मलापकर्षका गुणाधायकाः केचन हीनाङ्गपूरका नवीनगुणसन्धायकाश्च सन्ति ।

पूर्वोक्तसंस्कारद्वारा मानवदोषनिवारणं मानवेषु नवीनगुणसन्धानं मानवानां हीनाङ्गपूर्तिश्च जायते खलु । अतोऽस्माकं पूर्वजैर्महर्षिभिः मातृपितृरजोवीर्यादिदोषपरिहाराय सुसन्ततिप्रजननाय च गर्भाधानपुंसवनसीमन्तोन्नयननाम्ना प्रसिद्धाः गार्भिकाः, जातस्य शिशोर्दीर्घायुष्यशारीरिकमानसिकस्वास्थ्यव्यवहारसिद्धिदायका जातकर्मनामकर्मनिष्क्रमणान्नप्राशनकर्णवेध-चूडाकरणान्ताः शैशविकाः, अक्षरारम्भोपनयनवेदाध्ययनकेशान्तस्नानसंस्काराद्विजत्वाऽऽपादकाः शैक्षिकाश्च, हीनाङ्गपूरका नवीनगुणाधायकाश्च वैवाह्या, ऐच्छिका यौवनायिकाश्चेति । द्विजत्वाऽऽपादको वेदाध्ययनगायत्रीश्रवणपरकौपनायिकस्त्वनिवार्य-स्त्रैवर्णिकानां कृते ।

काव्येऽस्मिन् पूर्वोक्तसंस्कारैः सुसंस्कृतस्य काव्यनायकस्य वर्णनमस्ति । कृतवीर्यस्य राज्ये, ऐहिकामुष्मिककल्याणकरा दैनिकाः अग्निहोत्रपञ्चमहामखाः, पाक्षिकदर्शपौर्णमास्येष्टिः, त्रैमासिकी चातुर्मास्येष्टिः, सत्रैर्युता वार्षिकी सौमी, राष्ट्रवृद्धिकरी विश्वजित् इत्याद्या मखा वैदिकाः संस्काराश्च सञ्चालिता आसन्निति तत्काव्याध्ययनाद् बुद्ध्यते । पूर्वोक्तदैव्यब्राह्मसंस्कारैः सुसंस्कृतः काव्यनायकोऽर्जुनो दत्तमुनेः कृपया शक्तिं प्राप्नोति। इत्थं काव्यमिदं वैदिकसंस्कृत्यनुप्राणितमिति नात्र केषाञ्चन विमतिः ।



Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

कार्तवीर्योदयमहाकाव्यस्य भावपक्षपरिशीलनम्

- प्रा. डा. टीकारामोऽधिकारी

१. भावसङ्गतिः

परमपवित्रमेकलगिरिसमुत्पन्नाया भगवत्या रेवानद्या अजस्राभिरूर्मिमालाभिः समलङ्कृताया वर्तमान-भारतस्थमध्यप्रदेशान्तर्गतमध्यपुराऽपरनामधन्याया माहिष्मतीति तदानीन्तननामधेयाया विद्यानगर्याः समकक्षीये कृष्णाकलकलरमणीये प्रकृतिसम्पदहीने परमपावनेऽस्मिन् नैपालकपर्वतमण्डले विद्याविद्योतिनान्तःकरणानां प्रसिद्ध-मलयवर्मभूपवरवंशश्रद्धाभाजनानां दिगन्तकीर्तीनां श्रीमद्विद्वद्वरेण्यनीलदेवपन्त-वीरशालिपन्त-प्रेमनिधिपन्तादि-तान्त्रिकमहात्मनां विश्वविख्यातकुलरत्ने लब्धजनुषा माहिष्मतीनगरमहितविद्यापरम्परां समवलम्ब्य स्वजन्मधरायामपि तदनुकूलविद्यापरम्परास्थापनकर्मणि कृतभूरिश्रमेण वंशानुगतरचनासौष्ठवमपि समधिगतेन श्रीहर्षस्थानीयेन प्रातःस्मरणीयमहाकविना तत्रभवता पण्डितसुकृतिदत्तपन्तवरेण प्रणीतस्य शास्त्रीयपरम्परासमृद्धस्यापि रसभावदृशा ललितमार्गानुयायिनो रघुवंशकुमारसम्भवादिमहाकाव्यजातस्य भावौपम्यनैपुण्यमधिगच्छतो विविधविषयबोधन-निविडस्य कार्तवीर्योदयमिति प्रसिद्धतरमहाकाव्यस्य भावपक्षपरिशीलनं न खलु विदुषामनधिगतं यदिदं महाकाव्यं महर्षिदत्तात्रेयचरणसरोरुहकृपाभाजनस्य सकलसिद्धिसमलङ्कृतस्य श्रीमद्बाहुसहस्रविलसिततया सहस्रार्जुन इति स्वनामधन्यस्य योगेश्वरस्य तत्र भवतः कार्तवीर्यमहाराजस्य भगवतीतारापरकरतिभावनिष्ठं महर्षिदत्तात्रेयचरण-कमलभक्तिनिष्ठञ्च सन्निरतिशयं पुष्णाति संस्कृतमहाकाव्यपरम्पराम्। भगवद्विष्णोश्चक्रावतार इति विख्यातिं भजमानस्य धीरोदात्तनायकपदजुषोऽस्य सहस्रबाहोर्दृढभक्तिप्रवाहेण विष्णुसायुज्यमधिगच्छतस्तत्र भवतो महाकवेः पन्तवरस्य च जयन्ति तास्ताश्चक्रधरमेकलकन्याविषयिण्यो रतिभावाश्च । नैतत्तिरोहितं यदिदं महाकाव्यरत्नं श्रीहर्षकविपुङ्गवकृतं नैषधीयचरितं त्रिलोकसुन्दर्या अदम्यगुणगणगुरुतरायाः पुण्यश्लोकाया दमयन्त्या इव कुण्डिननागर्याः कनकप्रभायाः कनकप्रभामयमनुपमलावण्यमयं वा तनुसौष्ठवं वर्णयितुं प्रभवतीति नृपपत्नीगता अपि कविनिष्ठा रतिविशेषाश्च जयन्ति । कनकप्रभास्वयंवरसमारोहस्य प्रस्तावनारूपेणोपस्थापिते प्रभातकालिकवर्णने रसविदाऽनेन महाकविना काव्यात्मवैशिष्ट्याधायका विविधालङ्कारशिल्पसुन्दराश्च रसराजशृङ्गारचमत्कारविशेषाश्चोपस्थापिताः । एवमस्य काव्यस्य भावचित्रं प्रदर्शयितुं भावपदार्थपरिचयः प्रासङ्गिक इति सकौतुककलकलमुपनीयते विद्वत्समक्षम् ।

२. भावपदार्थानुशीलनम्

भूधातोर्भावे घञ्प्रत्ययविधानेन निष्पन्नो भावशब्दो भवनक्रियामस्तित्वं सत्तां वा बोधयति, कस्यचिदपि वस्तुनो घटनक्रियामवस्थां स्थितिं वा लक्षयति, पदं, स्तरं, वस्तुस्थितिं यथार्थतां वा व्यञ्जयति च । एवञ्च भावशब्देन कस्यचिदपि सचेतनस्य वास्तविकताः, सहजगुणाश्चित्तवृत्तयः, स्वभावप्रवृत्तयो विचार-मत-कल्पनासंवेग-रस-भावप्रभृतयश्च सर्वेऽपि हृदयभक्तिसम्बद्धा भावप्रवणा वा विषयविस्तारा अवगम्यन्ते । महाभाष्यकारानुसारेण शब्दप्रवृत्तिश्चतुष्टयीति गौः शुक्लश्चलो डित्थ इत्येवमादिषु शब्देषु जाति-गुण-क्रिया-द्रव्यवाचकानि गोत्व-शुक्लत्व-चलत्व-डित्थत्वसामान्यानि साहित्यशास्त्रीयसङ्केतग्रहविषयाणीति च भावतत्त्वस्य निखिलशब्दब्रह्मव्यापकता-ऽनिवारणीया। भावस्थिराणि जननान्तरसौहृदानीति निखिलानामपि सचेतसां जगतामस्तित्वस्थितिर्भावमहिम्नैवाऽवशिष्यते, व्यक्तिविशेषे निरवशेषेऽपि जातिसामान्येनाऽटति खलु निखिलप्रकृतिप्रवाहेषु व्यक्तिसत्ता सचेतनसृष्टिमहत्ता वा ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

एवं निखिलचराचरप्रकृतिर्भावपरम्परया संस्कारसन्तानरूपेण वा जगज्जीवनचक्रं परिचालयतीति भावाभिधानानामखिलपदार्थानामपि भाववाच्यतैवोचिता विलसति । यदाह राजानकः कुन्तकः -

यथातत्त्वं विविच्यन्ते भावास्त्रैलोक्यवर्तिनः ।
यदि तन्नाद्भुतं नाम दैवरक्ता हि किंशुकाः ।। (वक्रोक्तिजीविते -१) ।

एवमुक्तानाञ्च कथं भावाख्यानां पदार्थानां वर्णनविषयता ? यतो हि भावो मनस्युत्पद्यते मनस्येव प्रलीयते च। स च मानसधर्मः कथं शब्दगतो भवतीति न विभावनीयम्। आगमानुसारमिक्षुगुणमाधुर्यं जिह्वयेव भावश्च कविमनसा परिभाव्यते । निखिला अपि भावाभिधानाः पदार्थव्राता न केवलं स्वभाववर्णनमर्हन्ति परन्ते शास्त्रीयमहिम्ना सहैव साहित्यविशेषसम्मतया रमणीयतया लोकोत्तराह्लादजनकज्ञानगोचरतया वाऽलङ्क्रियन्ते कविकल्पनासौन्दर्यबलात्। एवञ्च **'असारे काव्यसंसारे कविरेकः प्रजापतिः'** इत्यनुकल्पनानुसारं कविर्वर्णयति, तदनुरूपाऽस्य नियतिकृतनियमरहिताऽनन्यपरतन्त्रा नवरसरुचिरा वचनविच्छित्तिर्नवनवोन्मेषशीलतामधिगच्छति च । यदाह ध्वनिकारः-

अतथास्थितानपि तथा संस्थितानिव हृदये या विनिवेशयति ।
अर्थविशेषान् जयति सा विकटकविगोचरा वाणी ।। (ध्वन्या.) ।

मुख्यतः स्वयं भवतीति भावोऽन्यं भावयतीति वा भाव इति व्युत्पत्त्यनुसारेण नाट्यविधाने काव्यसर्जनजगति वा स्वयं भवतीति व्युत्पत्त्यनुसारेण वासनात्मकरूपेण संस्काररूपेण वा सहृदयैरात्मसात्कृतः स्थायिभाव इत्युच्यते। अन्यं भावयतीति व्युत्पत्त्यनुसारेण पूर्वोक्तस्थायिभावसञ्चारणशीलोऽस्थायिभावः सञ्चारीति स्वकर्मणा व्यपदिश्यते। भावः प्रकृतिरूप इति विभावव्यपदेशं प्राप्नोति । भावः क्रियारूप इत्यनुभावपदं गच्छति च । एवं भावो विभावाऽनुभावव्यभिचारिरूपेण स्वयं चतुर्द्धा विभक्तोऽभिव्यक्तिमाध्यमेन रसव्यपदेशभाग् भवति च । अत एवोक्तम्- **विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिः** इति । एवञ्च भावो ध्वनिनामान्तरेण लब्धप्रतिष्ठो रसमानताप्राणो रस-भाव-तदाभासादिरूपेणाऽष्टधा विस्तारमुपगतो निखिलकाव्यकलेवरं दीपयति। वस्तुतस्तु गानयोग्यो वाचिकसन्निवेशविशेषो हस्तपादमुखनेत्राद्यङ्गाभिनयविशेषः सात्त्विकचित्तवृत्तिजन्यकाव्यात्मकरसास्वादजनकश्चित्तवृत्तिविशेषो वा भाव इति ज्ञायते। भरतस्य नाट्यशास्त्रानुसारेण विभावैः प्रस्तुताऽनुभावैर्वाचिकाऽऽङ्गिकसात्त्विकाभिनयैर्वा प्रतीतियोग्यतां नीतोऽर्थविशेषो हि भाव इति कथ्यते । यद् वा वचनैरङ्गैर्मुखरागेण सात्त्विकाभिनयेन वाऽभिव्यक्तिमानीतः कविहृदयगतो भाव एव भाव इत्युच्यते । एतेन कस्यचिदपि वाक्यार्थीभूततात्पर्यविशेषो व्यङ्ग्यो भाव इति च काव्यादर्शकारादिभिरुक्तम् । तदनुसारेण काव्यशास्त्रीयोऽभिधामूलो लक्षणामूलो वा संलक्ष्यक्रमात्मकोऽसंलक्ष्यक्रमात्मकश्च सर्वोऽपि ध्वन्यमानपदार्थतात्पर्यप्रपञ्चो भाव इत्ययं द्योत्यते। एवं भावोऽवाच्य इति चाऽलौकिकतत्त्वविशेषो हि सिध्यतीति सहृदयवतां संवेदनाबलाद्धृदयसरणीमधिरूढस्तज्जातो वा भावोऽनेकार्थप्रपञ्चमूलतया कविकामदः कल्पवृक्षवन्नितरां चकास्ति च । रस्यमानतावस्थायां स्वकीयप्राधान्याऽप्राधान्यादेवाऽस्मिन् विभावाऽनुभावव्यभिचारिभावत्वसंज्ञानमन्यथा भावो नाम ब्रह्मास्वादसहोदरस्याऽखण्डरसस्याऽस्तित्वबोधकोऽपूर्वचमत्कारतत्त्वविशेषः । यदुक्तम्-

विभावा अनुभावाश्च सात्त्विका व्यभिचारिणः ।
प्रतीयमानाः प्रथमं खण्डशो यान्त्यखण्डताम् ।। (साहि. ३/२८)

एतेनान्तश्चमत्कारान्तरनामधेयस्य तात्कालिककाव्यप्रयोजनस्य च प्रयोजनको रमणीयशब्दार्थसौष्ठवघनो रसभावादिविशुद्धसञ्ज्ञानोऽसौ भावविशेष एव। एतेन वाङ्मयजगति सर्वत्र भावस्यैवाऽनुप्राणतोर्जस्विता वा विलसतीति सहृदयैरवधेयम् । एतेन भावशब्देन संस्कृतवाङ्मयजन्याऽभिप्रायतात्पर्यप्रकाशनादिक्रियासम्बलितं निखिलमपि मनःसङ्कल्प-चिन्तन-मननप्रधानं भावनामयमान्तरं वा जगज्जातं सर्वमेवाऽऽत्मसाद् विधीयते।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

३. भावोत्पत्तिः

भावाः स्थायिनोऽस्थायिनश्च द्विविधा भन्तीति पूर्वमुक्तम् । नवीनमनोविज्ञानानुसारं स्थायिभावाश्च ते मनोवेगेभ्यः समुत्पन्ना मानवीयमूलप्रवृत्तयो निगद्यन्ते । प्रसिद्धमनोविन्मैगड्डुगलमहोदयेन मानवीयमूलप्रवृत्तयश्चतुर्दशेति तत्सम्बद्धाश्च मनः संवेगास्तावन्त एवेति निर्दिष्टम् । तेन महानुभावेन मांनवीया मूलप्रवृत्तिः खलु प्रकृतिप्रदत्ता शक्तिरिति तद्वशश्च प्राणी विशिष्टभावन्नतिषु पदार्थसमुदायेषु वा दत्तावधानो विशिष्टमनःसंवेगम्, मनःक्षोभं वाऽधिगच्छतीति निरूपितमस्ति । मनोविज्ञानानुसारेण मनः संवेगास्तत्समुत्पन्ना मूलप्रवृत्तयस्तथा साहित्यसम्मतास्तत्स्थानीयाः स्थायिभावास्तदुत्पन्ना रसाश्च वक्ष्यमाणप्रकारका विलसन्ति । यथा –

नवीनमनोविज्ञानानुसारम्		प्राचीनसाहित्यशास्त्रानुसारम्	
मनःसंवेगाः	मूलप्रवृत्तयः	स्थायिभावाः	रसाः
१. भयम्	पलायनमात्मरक्षा च	भयम्	भयानकरसः
२. क्रोधः	युयुत्सा	क्रोधः	रौद्ररसः
३. घृणा	निवृत्तिर्वैराग्यश्च	जुगुप्सा	बीभत्सरसः
४. करुणा दुःखञ्च	शरणागतिः	शोकः	करुणरसः
५. कामः	कामप्रवृत्तिः	रतिः	शृङ्गाररसः
६. आश्चर्यम्	कौतूहलं जिज्ञासा च	विस्मयः	अद्भुतरसः
७. हासः	आमोदः	हासः	हास्यरसः
८. दैन्यम्	आत्मदीनता	निर्वेदः	शान्तरसः
९. आत्मगौरवमुत्साहः	आत्माभिमानः	उत्साहः	वीररसः
१०. वात्सल्यं स्नेहश्च	पुत्रैषणा	वात्सल्यं स्नेहश्च	वात्सल्यरसः

नाट्यशास्त्रानुसारेण स्थायिभावा अनुभावाश्च वक्ष्यमाणप्रकारकाः सन्ति । यथा –

१.	रतिः	स्मितवदन-मधुरकथन-भ्रूविक्षेप-कटाक्षादयः
२.	हासः	पूर्वोक्ताः स्मितवदनादयः
३.	शोकः	अश्रुपात-परिदेवित-विलपित-वैवर्ण्य-स्वरभेद-स्रस्तगात्रता-भूमिपतन-सस्वनरुदिताक्रन्दित-दीर्घनिःश्वसित-जडतोन्माद-मोह-मरणाः
४.	क्रोधः	विकृष्टनासापुटोद्वृत्तनयन-सन्दष्टोष्टपुट-गण्डस्फुरणादयः
५.	उत्साहः	धैर्य-शौर्य-त्याग-वैशारद्यादयः
६.	भयम्	प्रकम्पितकरचरण-हृदयकम्पन-स्तम्भ-मुखशोष-जिह्वापरिलेहन-स्वेदवेपथु-त्रास-परित्राणान्वेषण-धावनोत्क्रुष्टादयः
७.	जुगुप्सा	सर्वाङ्गसङ्कोच-निष्ठीवन-मुखविकूणन-हृल्लेखादयः
८.	विस्मयः	नयनविस्तारानिमेषप्रेक्षित-भ्रूक्षेप-रोमहर्षण-शिरःकम्पन-साधुवादादयः

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

एवं संस्कृतवाङ्मयजगति भावचमत्कारमय्या काव्यसरण्या विलक्षणप्रतिभाबलमुपस्थापयतां श्रीहर्षादि-महाकवीनां काव्यनैपुणीं प्रमाणयद्भिर्नेपालधरावलयविभूषणैर्यशोभास्वरैस्तत्रभवद्भिः सुकृतकृतकाव्यकेलिभिः सुकृतिदत्तपन्तप्रभृतिभिश्च कविकण्ठीरवैः कार्तवीर्योदयाभिधविशिष्टकाव्यनिकुञ्जे मधुमदसुकरपिककलरववद् भावमाधुर्यञ्च प्रवाहितं स्थले स्थले विविधरस-भाव-तदाभासादिमाध्यमेन । सा च भावोत्पत्तिरनादिकालात् प्रवहमाना काव्यजगतीह जयति कार्तवीर्योदयसदृशशृङ्गारप्रधानकाव्यक्रीडया । सा च यथा यथेह काव्यकानने स्वकीयां शब्दार्थक्रीडामातनोति तथा तथैव प्रतिपादनीयेति साम्प्रतिकोऽनुषङ्गः।

तीर्थे तोयव्यतिकरभवे जह्नुकन्यासरय्वो-
र्देहत्यागादमरगणनालेख्यमासाद्य सद्यः ।
पूर्वाकाराधिकतररुचा सङ्गतः कान्तयाऽसौ
लीलागारेष्वरमत पुनर्नन्दनाभ्यन्तरेषु ।।

इति स्वकीयभावनाबलेन दिवङ्गतपत्नीसाहचर्यं भजतां कालिदासकाव्यप्रवृतीनामजप्रभृतीनां भावमयी प्रेमरस-शक्तिर्देवलोकेष्वपि विजयतेतराम् । एवं कार्तवीर्यसदृशवीरपुङ्गवानां नायकानां सप्तद्वीपविहारपभृतिकेलिकला च पौरुहूतधनुषामावलीव लोकलोकान्तरव्यापिनीति भावः खलु सर्वदाऽनिर्गलो भौतिकपदार्थैरव्याहतशक्तिकश्च। अत एव जात्यन्धा मेधाविकवयश्च दिव्यदृशोऽभिधीयन्ते भावशक्त्यैव ।

कटाक्षास्तारिण्या मम विदधतां विघ्नशमनम् इत्यादिभिः, **ताराभिधानममलं हृदये ममास्तु** इत्यादिभिः, **त्रैलोक्यतापशमने प्रथितं महस्तत्** इत्यादिभिश्च पद्यबन्धैस्तारिणीविषयकं स्वकीयभावं प्रकटयतः कवेरस्य हृदि दत्तात्रेयमेकलकन्याप्रभृतिमान्यवरेषु समुदिता च प्रकृतभावसन्ततिः, दत्तकमुनिपरिचर्याप्रवृत्तिश्च कवेरस्य पैतृकी भावसम्पत्तिरिति कृतवीर्यस्य तदाराधनासन्तानैरवगम्यते । एवं शृङ्गारादिरसानुभूतिशीलताऽस्य द्योत्यते। भगवद्भक्तिसम्पदाऽहीनस्य कवित्वबीजसमलङ्कृतस्य कवेरस्य कनकप्रभाऽङ्गलावण्यवर्णननिपुणतयापि शृङ्गारप्रति-पत्तृता पाठकवेद्यास्ति । अन्येषाञ्च वीरबीभत्सादिरसानामुपस्थित्याऽस्मिन् काव्यकलेवरे विविधभावविशेषाणामौचित्य-निबन्धनं तत्प्रकर्षो वाऽव्याहत एवाऽऽसाद्यते ।

४. भावप्रकर्षप्रकाराः

महाकविदण्डिप्रभृतिभिः प्राचीनलक्षणकारैर्भावाख्यं कञ्चिदलङ्कारं प्रतिपाद्य तस्य वाच्यपक्षीयमाहात्म्यमेवो-पन्यस्तम् । तत्परवर्तिभिश्च ध्वनिकरादिभिर्भावतत्त्वस्य व्यङ्ग्यतां स्वीकृत्य वाच्यस्वरूपापेक्षयाऽस्य काव्यात्मस्थानीय-ध्वनिगौरवमहत्ता विस्तारिता । अत एव ध्वनिकारेण भावतत्त्वमभिलक्ष्यैव ललनालावण्यस्थानीयस्य व्यङ्ग्यरूपवस्तु-विशेषस्य संस्थापनाकार्यं समुद्घाटितम् । मुक्ताफलच्छायायास्तरलत्वेनेव नियतललनाङ्गविशेषाऽसीमितेनापि तदङ्गव्यक्तेन सौन्दर्यानुप्राणेन सादृश्यं भजमानस्याऽस्य भावविशेषस्य विविधानि नामान्तराणि च निर्धारितानि । यथा युवतिजनमानसस्य प्रथमविकाररूपाणि भाव-हाव-हेलाप्रभृतीनि । कतिचन धर्मदत्त-भोजदेव-भवभूतिप्रभृति-लक्षणकाराः साहित्यचिन्तका वा सहृदयहृदयनिगूढं स्वानुभूतं भावपदार्थविशेषममुमेकमेव रसचमत्कारबीजं निर्धार्य स्वं स्वं रससिद्धान्तमाविश्चक्रुः । यदाह धर्मदत्तः -

रसे सारश्चमत्कारः सर्वत्राऽप्यनुभूयते ।
तच्चमत्कारसारत्वे सर्वत्राऽप्यद्भुतो रसः ।।

यदाह भोजदेवः -

शृङ्गारवीरकरुणाद्भुतरौद्रहास्य-
बीभत्स-वत्सल-भयानक-शान्तनाम्नः ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

आम्नासिषुर्दशरसान् सुधियो वयन्तु
शृङ्गारमेव रसनाद्रसमामनामः ।। (सरस्वतीकण्ठाभरणम्)

यदाह भवभूतिश्च -

एको रसः करुण एवेत्यादि (उत्तररामचरितम्)

ध्वनिकारस्तु -

यत्रार्थः शब्दो वा तमर्थमुपसर्जनीकृतस्वार्थौ ।
व्यङ्क्यः काव्यविशेषः स ध्वनिरिति सूरिभिः कथितः ।।

इत्युक्त्वा वस्त्वलङ्काररसात्मना ध्वनिनाऽस्य नामान्तरस्थापनाञ्चकार । स च व्यङ्ग्यविशेषोऽर्थो भाव एव। वस्त्वलङ्कारध्वन्योश्च रसपरिणामित्वाद्रसस्य च भावपरिपाकवत्त्वान्नास्ति भावध्वन्योर्विदूरता । एवममुमानन्दकन्दस्वरूपं रसचमत्कारबीजरूपं भजनकीर्तनकारणरूपं वा भावाख्यं हृदयस्पन्दं रुचिवैचित्र्यपूर्वकमनुभूय ध्वनिस्थापनादिकार्यैश्चाऽस्य प्रतिष्ठा कृता ।

भावोऽयं स्वप्रकर्षावस्थायामेव चमत्कारजनको रसनीयो वा भवति । अस्यामेवाऽवस्थायामयं ध्वनिनामोत्तमस्थानं लभते । अप्रकर्षावस्थायान्तु गुणीभूतव्यङ्ग्यादिन्यूनप्रतिष्ठामासादयति । विभावादीनां संयोगौचित्येऽस्य चमत्कारवत्त्वं फलति नान्यथा । एवञ्च सति विभावादिभिः कारणकार्यसहकारिभी रसनिष्पत्तिः सिध्यति । रत्यादिप्रकर्षे शृङ्गारादिनामधेयाऽवलम्बनोऽयं तदपकर्षे च केवलमौत्सुक्यादिनामान्तरतामधिगच्छति। विभावेनाऽऽलम्बनाख्येन नायिकादिनाऽवलम्बितोऽनुभावै रोमोद्गमादिभिः प्रतीतिविषयीकृतोऽप्रधानभावविशेषैः सञ्चारिनामधेयैर्हासादिभिश्च सञ्चारितोऽयं सर्वात्मना व्यज्यमानो रत्यादिः स्थायिभावो नाम्ना रस इति व्यपदिश्यते। देवादिविषयिणी रतिरञ्जितो व्यभिचारी च भावनाम्ना निर्धारितः । अनौचित्यप्रवर्तिता रत्यादयः परकान्तादिविषयकाऽऽलम्बनका रसाभासा देवादिविषयिणश्च भावाभासा इति साहित्यशास्त्रीयव्यवस्थानेऽपि भावानामप्रकर्षता हेतुरुच्यते । यस्य कस्यचिद् व्यभिचारिभावस्योद्गमावस्था भावोदय इति, द्वयोर्भावयोः समबलजन्यविमर्दे भावसन्धिरितिस्तथा बहूनां भावानां तुल्यबले मिश्रिताऽवस्था भावशबलतेति प्रोच्यते । भावशबलतायामस्यां पूर्वपूर्वोपमर्दपूर्वकमुत्तरोत्पत्तिर्जायते। यथा क्वाऽकार्यं शशलक्ष्मणः क्व च कुलमित्यादौ विरुद्धरसभावस्पर्शेऽपि धन्योऽधरं धास्यतीति चरमभावौत्सुक्यादिना शृङ्गारो गीयते । सत्यपि शृङ्गारेऽत्र बहुभावानां प्रकर्षतया भावशबलतेति संज्ञा युक्तियुक्तैव सिध्यति। तत्र रसभावयोश्च चमत्कारत्वाऽचमत्कारत्वाभ्यामेव परस्परं भेदो बोध्यः । एवं रुचिविचित्रा विद्वांसः कारणभावभिन्ना अपि कार्यभावेऽभिन्नाः सिध्यन्ति । सर्वेषां हृदयवतामेकस्मिन्नेव भावार्णवे समाहितेरावश्यकता विलसतीति रस्यत आस्वाद्यत इति रसस्य रसनव्यापारप्रवणता सर्वेषु भावपदार्थविशेषेषु समीहिता लक्षणकारैरन्यथाऽनन्तभावानामनन्तरसनव्यापारकल्पनाऽऽवश्यकी च भवेत् । तत् सर्वत्र भावेषु भावपदार्थेषु वा गीतगोविन्दप्रभृतिकाव्यप्रमुखेषु रसनव्यापारप्रवणतैव विलसतीति भावोत्पत्तिभावान्वितिभावविलयनव्यापारनिपुणा विद्वांसो विभावयन्तु निपुणतया । एवं भासकालिदासप्रभृतिभिर्ललितमार्गानुगामिभिः कविभिः प्रेमभावप्रधानमाख्यानं स्वकीयकाव्यविषयतया स्वीकृतम्- यथोदयन-वासवदत्ताप्रेमाख्यानं दुष्यन्त-शकुन्तलाप्रेमाख्यानं वा । एतादृशेषु प्रीतिसान्द्रेषु काव्यप्रपञ्चेष्वेव भावात्मकविस्तारोऽनुभूयते सहृदयैः । स च भावः स्वसामग्रीबलानुरूपाणि नामान्तराणि प्राप्नोति प्रकर्षाऽप्रकर्षत्वसम्पदा। भावानां स्वसामग्रीबलवत्त्वन्तु विभावाऽनुभावव्यभिचारिसंयोगवत्त्वं विरुद्धभावनिरसनपूर्वककृतविरोधपरिहारनिबन्धनत्वञ्च । एवं भावप्रपञ्चे रसविरोधपरिहारस्यापि हेतुत्वं जायते, यत्र विरोधिनो रसस्य स्मर्यमाणतया साम्यविवक्षयाऽङ्गाङ्गित्वव्यपेक्षया च विविधभावानां बाध्यबाधकतापूर्वकपरिष्कारोऽपेक्ष्यते । एवमेकस्यैव भावस्य भवान्तरसम्बन्धनैरनेकरूपतोपतिष्ठति चेन्नवसंख्यानां स्थायिभावानां विभावानुभावव्यभिचारिसंयोगैर्जायमानस्य

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

स्वरूपविस्तारस्य प्रपञ्चनिर्धारणमशक्यमिति रसादिरूपोऽसंलक्ष्यक्रमो ध्वनिरेक एव परिगण्यते सहृदयैः । मुख्यतो भावाः स्थायिनोऽष्टौ, सञ्चारिणश्च त्रयस्त्रिंशदिति लक्षणकारसिद्धान्तः । तत्र च सञ्चारिभावानां निर्वेदादीनां स्वसामग्रीबलवत्त्वे शान्तरसादिनामकरणमुपजायत इति भावानां भावान्तरैः सह सञ्जायमानैः सम्बन्धविशेषैरपि भावसंख्यावृद्धिमेति । वस्तुतस्तु निखिलध्वनिप्रपञ्चो भाव इति च पूर्वमुक्तम् । तदनुसारं ध्वनिवादिभिराचार्यैर्ध्वनिभेदाः सार्द्धसहस्रकल्पा निरूपिताः । एवमेकोऽपि भावः शब्दार्थप्रपञ्चवशादनेकतां भजत इति सहृदयगम्यभावविशेषस्य कल्पतरोरिवाऽनिर्वचनीयता विलसति । प्रकृतमहाकाव्येऽपि तादृशभावसंसर्गगतिर्न दुर्लभा।

शिरःस्पृशं जह्नुसुतां निरीक्ष्य सर्वञ्च शर्वं प्रतिघावशेन ।
उत्सङ्ग आदाय मुदा वहन्ती रेवानदी यत्परिखेव भाति ।। (कार्त. १/११)

इत्यादौ शिवशिरसि निरुद्धगतिं भागीरथीं समीक्ष्य सापत्न्यदृशा सन्दीप्तेर्ष्या रेवानदी समूलमेव शिवं स्ववक्षसि संस्थाप्य प्रसन्ना सती माहिष्मतीपरिखेव मुदा वहतीति रेवाविषयककविनिष्ठेयं रतिः । शिवशिरःस्थिता जाह्नवी निरुद्धवेगतया न मुदमाप्नोति परमियं रेवोत्सङ्गधृतशिवा प्रहर्षेण वहतीति रेवायाः प्रतिघामोदसम्बन्धाऽभावेऽपि तत्सम्बन्धवर्णनादसम्बन्धे सम्बन्धातिशयोक्तिरलङ्कारः । तदत्राऽतिशयोक्तौ भावाऽनुप्राणता विलसति च । तदेवं भावस्य वाक्यार्थताऽलङ्कार्यता च सिध्यति । नाऽयं रसश्चमत्काराभावात् ।

कोदण्डोद्गतचण्डकाण्डदलितप्रत्यर्थिमुण्डावली-
भ्राजत्ताण्डवपण्डिते नरपतावस्मिन् सदा गच्छति ।
युद्धक्षोण्यजिरङ्करालकुटिलव्यावृत्तपिङ्गेक्षणा
स्फीतासृङ्मदपाननिर्भररसा सम्मोदते कालिका ।। (कार्त. १२/१३१)

इत्यादौ कालिकाविषयिण्या रतेरङ्गं वीरो रौद्रश्च रसः। सचमत्कारस्यापि वीररसस्य रौद्ररसस्य च भावाङ्गतया गुणीभूतव्यङ्गता । कालिकाविषयकभावस्य वाक्यार्थीभूततया नृपानुगतसेनापतिद्वयन्यायेनाऽत्र वीररौद्रयोरनुगमनम्। एवम् –

अत्रिजातशिशिरामलपादस्पर्शसौख्यमनुभूय महीन्द्रः ।
सोऽतिबेलमुदितो निजगेहे नो ममौ जलधिवच्च तदानीम् ।। (कार्त. ३/४) ।

इत्यादौ च दत्तात्रेयविषयककृतवीर्यनिष्ठरतौ वाक्यार्थीभूतायामुपमाऽतिशयोक्त्यलङ्कारयोरुपस्कारकता । तथा–

धर्मार्थकामाननुवेलमित्थं परम्पराऽबाधितमाभजन् सः ।
चक्रे प्रजाः स्वाः समशीलभाजो धर्मावनायैव हि सोऽवतीर्णः ।। (कार्त. १६/२१)

इति कार्तवीर्यविषयिणी कविनिष्ठा रतिश्च ।

कार्तवीर्योदयमहाकाव्यं शृङ्गारप्रधानमिति योगिनोऽपि सहस्रार्जुनस्य श्रीकृष्णस्येव स्वसृष्टरमणीभिः सह शृङ्गाररसोपभोगः समुपवर्णितः सुकृतिशक्तिमता कविसुकृतिना च । सकलसिद्धिभाजः कार्तवीर्यमहाराजस्य रमणीविषयकविभावादिवर्णनविस्तारश्च यथा – सुरतविशेषणानुषङ्गे –

रणद्रत्नाद्यमञ्जीरं क्वणत्कनककङ्कणम् ।
चलत्काञ्चीकलकलं सङ्कुजन्नेत्रपङ्कजम् ।।
मिलच्छीत्कारवदनं प्रेङ्खद्वारकदम्बितम् ।
वान्तमल्लिकधम्मिल्लतल्लजं सल्लयान्वितम् ।।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

कपोतपोतभणितानुकुर्वन्मणितोज्ज्वलम् ।
अवाञ्चच्चूचुककुचं बन्धनद्बाहुवल्लरि ।।
खिद्यन्मध्यं त्रुटन्नीवि स्विद्यद्वक्त्रञ्चलत्कचम् ।
धृष्णुवज्जघनं रिङ्गन्नितम्बपृथुबिम्बकम् ।। (कार्त. १५/१०९-११२)

अत्र योगसिद्ध्याऽनेकरूपवैभवं भजतोऽस्य भगवतः कार्तवीर्यस्याऽनेकरमणीजनोपभोगपूर्वकमुपभुक्तस्य रसराजशृङ्गारस्य सम्बद्धानुभावा लभ्यन्त। अत्र रमणीविषयकरतेरवलम्बनजन्या नेत्रसङ्कोचाङ्गस्वेदनवदनशीत्कार-प्रभृतयः कार्यरूपानुभावाः पाठकानां प्रतीतिगोचरा उपजायन्ते। विभावादिषु कस्यचिदभावेऽपि झटित्याक्षेपो दर्पणकृतोक्तः । यथा-

सद्भावश्चेद् विभावादेर्द्वयोरेकस्य वा भवेत् ।
झटित्यन्यसमाक्षेपे तदा दोषो न विद्यते ।। (साहि. ३/१६-१७)

एवमत्र वधूटीत्यादिललितशब्दबन्धेषु च शृङ्गाररसविस्तारः सहृदयहृदयचमत्कारकारी विलसति । शृङ्गार-रसाभासस्तु यथा -

गतवति दिननाथे पद्मिनीं दैवयोगा-
दुपपतिरिव चन्द्रश्छायया पादपाती ।
मधुरतरकराग्रैस्संस्पृशन् मुद्रितास्या-
मनभिमतनिजार्थां वीक्ष्य भीतः प्रयाति ।। (कार्त. ११/८)

अत्र नायिकाविषयण्युपपत्तिनिष्ठा रतिर्व्यज्यते । अत्रोपपतेर्नायिकापादपतनाङ्गस्पर्शपलायनादयश्चानुभावा लभ्यन्ते । उपमाश्लेषालङ्कारौ च रसाभासोपस्कारकाविति । एवं -

अहिपरिवृढबाला दत्ततालां भुजाभ्यां
विकसितनयनाभ्यां तां प्रवृत्तिं निशम्य ।
अपलपितनिजाङ्घ्रीन् सम्प्रसार्य क्षणेन
लयनिलयनिलीना नर्तनं सम्प्रचक्रुः ।। (कार्त. ४/७२)

इत्यादिपद्यबन्धेषु कृतवीर्यनिष्ठाप्सरोरतिर्व्यज्यते । सा च परपुरुषावलम्बित्वाद्रसाभासतां प्राप्नोति । अङ्गितो व्यभिचारी यथा-

वरुणोऽतरुणो न दारुणः करुणश्चारुणसारथिप्रभे ।
कृतवीर्यसुते विषोढवान् नृपकन्यामनुरक्तचेतसम् ।। (कार्त. ११/१०२)

अत्र वरुणस्य कनकप्रभाविषयिणी चिन्ता शृङ्गारव्यभिचारिरूपेणाऽङ्गितेति रतेरपेक्षया तस्या एव प्राधान्यं वाक्यार्थीभूतता वा ।

व्यञ्जनाश्रितविचित्ररसाढ्यं मिष्टभक्तिपरमोदनमच्छम् ।
सत्कवेर्वच इवतरलाभं षष्ठमासि बुभुजे नृपसूनुः ।। (कार्त. ५/९) ।

इत्यादौ कृतवीर्यमहाराजगता मुनिसम्मता वत्सलता । ध्वनिस्तु सामान्यो वस्तुरूपो यथा -

अपारसंसारपयोधिपूरे निमज्जमानस्य जनस्य नूनम् ।
लीलाविहाराय विधिर्व्यधासीत्तारुण्यपूर्णां तरणीं पुरन्ध्रीम् ।। (कार्त. १०/१८) ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

अभिधामूलोऽयं वस्तुरूपो ध्वनिः । अत्र गार्हस्थ्योपयोगिनी नारीमहत्ता निरतिशयकल्याणकारिणीति वस्तु व्यज्यते । एवमन्यदपि व्यङ्ग्यनिबन्धनं स्वयमूह्यम् ।

५. भावान्वितिः

'वाक्यं रसात्मकं काव्यम्' इत्यनुसारं सकलकाव्यकलेवरस्य शब्दार्थकलासन्निवेशमनोहरस्य भाव एव रसध्वन्यादिमहत्तयाऽऽत्मान्वितिं विदधाति । अलङ्काराश्च सर्वेऽपि शब्दार्थसौष्ठवाश्रया अपि गुणीभूतव्यङ्ग्यात्मानो वाच्यार्थमनोहरा भावपदव्यपदेश्या भवन्ति । सादृश्यमूलकेषूपमाप्रभृतिनिखिलालङ्कारेषु च भावस्थितेरात्मभूततयाऽन्वितिर्भवति । तत्रत्यो भावो गुणीभूतव्यङ्ग्यरूप इति ध्वनिवन्न चकास्ति ।

पिककुलाकुलचूतविपोतके भ्रमरगुञ्जितमञ्जुलकुञ्जके ।
ललितलोलितलोलविलोचनः स सुरभौ विबभौ ललनागणः ।। (कार्त. ६/६७) ।

इत्यादिशब्दालङ्कारेषु काचिदस्ति सङ्गीतात्मिकी भावस्थितिर्यया सुरभिरपि शक्तिमान् जायतेऽनङ्गमैत्रीभावेन। अर्थालङ्कारेषु गुणीभूतव्यङ्ग्य एव भावस्थितिनिर्वाहकः ।

६. उपसंहारः

एवममूर्तभावविशेषस्य प्रकृतिरूपतया मूर्तपदार्थरूपतया वा जयन्ति सहृदयहृदयस्पर्शाणि मूर्तिमन्ति च तानि विलसतानि, यैः खलु निखिलकाव्यजगद् विभावादिरूपेण चेतनवृत्तान्तयोजनया वा सरसीक्रियते । चेतन–वृत्तान्तयोजना नाम भावौचित्यम्, तच्च विषय–प्रकृति–रीतिप्रभृतिकाव्यतत्त्वानां सुनियोजनं वाञ्छति । अनौचित्येनैतेन रसभङ्गो भवतीति कविना सर्वदैव भावानामौचित्यमाश्रित्य काव्यरचना कार्या । तदनुसारमत्र कार्तवीर्योदयमहाकाव्ये सकलकाव्यतत्त्वानामुचितसन्निबन्धनं जातमिति कविः स्वयमुल्लिखति । यथा –

भङ्गश्लेषप्रचुरमुदयद्बह्वनुप्रासपद्यं
धीरोदात्तस्मृतिगदिलसन्नायकं पूर्णभङ्गैः ।
वीरप्रायाखिलरसयुतन्नातिसंक्षिप्तसर्गम्
प्रायो व्यङ्ग्यप्रकटितचमत्कारसारप्रचारम् ।। (कार्त. १७/१६) ।

एवमस्य काव्यस्य निखिलवैशिष्ट्यसारोऽनेन निरूपितः । कविसमीहा च स्वकीयकाव्यसम्बन्धिनीयम्। यथा–

चिरञ्जयतु रञ्जयत्वलमिदं सुकाव्यं बुधानिति । (कार्त. १७/३६) ।

सन्दर्भसूची

१. **साहित्यदर्पणः** – श्रीविश्वनाथकृतो लक्ष्मीटीकायुतश्च ।
२. **काव्यप्रकाशः** – श्रीमम्मटभट्टकृतो विश्वेश्वरीहिन्दीव्याख्यायुतश्च ।
३. **ध्वन्यालोकः** – श्रीमदानन्दवर्धनाचार्यकृतः ।
४. **वक्रोक्तिजीवितम्** – राजानककुन्तककृतम् ।
५. **रसगङ्गाधरः** – श्रीपण्डितराजजगन्नाथकृतः ।
६. **नाट्यशास्त्रम्** – श्रीभरतमुनिकृतम् ।
७. **रघुवंशमहाकाव्यम्** – श्रीकालिदासकृतम् ।
८. **सरस्वतीकण्ठाभरणम्** – श्रीभोजदेवकृतम् ।
९. **कार्तवीर्योदयमहाकाव्यम्** – श्रीसुकृतिदत्तपन्तकृतम् ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

श्रीसरस्वत्यै नमः

सुकृतिदत्तकृतकार्तवीर्योदयमहाकाव्यस्थ-चित्रकाव्यविमर्शः

- प्रा.डा. दुर्गादत्तशर्मा उपाध्यायः

सुकृतिदत्तपन्तः

सकलभूमण्डलमण्डनायितस्यास्य नेपालस्योत्तरस्यां परिखीभूय स्थितस्यैतस्य हिमालयपर्वतस्याकाशमूर्धा-(सगरमाथा)काञ्चनशृङ्ग(कञ्चनजङ्घा)धवलागिरि-(धौलागिरी)मत्स्यपुच्छ(माछापुच्छ्रे) प्रभृतिभिर्नामभिः प्रसिद्धान्यत्युच्च-शिखराणि विराजन्ते । सम्प्रति चतुर्दशाञ्चलेषु विभाजितस्यास्य देशस्यान्यतममञ्चलं धवलागिरिहिमशिखरनाम्ना विख्यातमस्ति। तदञ्चलान्तर्वर्तिनो जनपदाश्च मुस्ताङ्-पर्वत-म्याग्दी-वाग्लुङनामधेयाश्चत्वारः सन्ति। मुस्ताङजनपदे धवलागिरिनीलगिरिपार्श्वस्थ-विष्णुशैलकटकवर्तिमुक्तिक्षेत्रान्निःसरन्ती कृष्णगण्डकी तदञ्चलोच्चभागस्थं मुस्ताङजनपदं द्विधा विभज्य: समायान्ती पूर्वतटे पर्वतजनपदं पश्चिमतटे म्याग्दीवाग्लुङौ जनपदौ विधाय मध्ये वहति । दर्शनमनोहरेण द्रुतेन्द्रनीलमणिसन्निभेनास्या: सलिलेनैतेषां जनपदानां प्रान्तभूभागाः प्रक्षालितकल्मषा मनोहरा भान्ति । धवलागिर्यञ्चलमानचित्रदर्शने, उत्तरतो मुस्ताङजनपदः पूर्वतः पर्वतजनपदः पश्चिमे म्याग्दीजनपदो दक्षिणतश्च वाग्लुङजनपदो दृश्यते । अस्मिन्नेव वाग्लुङमण्डले श्रीमद्भागवतमहापुराण-वर्णितयोरिदानीं म्याग्दीजनपदे कृष्णातटे वर्तमानयोर्भरतपुलहाश्रमयोर्नाऽतिदूरे तत्रैव वर्णितस्य कृष्णातटस्थस्य प्रसिद्धस्य वाग्लुङनगरस्थभद्रकालीमन्दिरस्य समीप एव पश्चिमस्यां दिशि पन्तानां वसतिभूतं गभीरग्रामाभिधं मनोहरं स्थलमस्ति। अस्मात् स्थलात् परितो दृष्टौ प्रहितायां सदाहरितैर्देवदारुप्रभृतिभिर्द्रुमैः शोभितं वनमस्ति । यत्र कस्तूरीकृष्णसारप्रभृतयो मृगाः, डाँफेमुनालमयूरप्रभृयो विहगाश्च खेलन्ति । परिसरे च छन्दोलयबद्धां गीतिं गायन्त्य इव कलकलं निनदन्त्यो गिरिणद्यो वहन्ति। अत्र सततलब्धप्रतिष्ठा धीमन्तः सुकृतिदत्ताग्रजसन्ततयः पौत्रप्रपौत्राः सन्ति । सुकृतिदत्तपुत्रौ बृहस्पतिपद्मनाभौ आस्ताम् तयोर्द्वयोरपि पुत्रा नासन् । दुहितृवंशजस्तोयनाथपाण्डेयः । योऽस्मिन् संस्कृताध्ययनसंस्थाने पुरा संस्थानाध्यक्षपदे आसीत्। सुकृतिदत्ताग्रजज्वालादत्तवंश्यः कविवरो भरतराजपन्तमहोदयो वर्तते । कार्तवीर्योदयमहाकाव्ये स्ववंशवर्णनप्रसङ्गे कविनैत-दुल्लिखितमस्ति - कूर्माचलाभिजनस्य वसुपन्तस्य वंशे विख्यातो विद्वन् रमापतिर्जातः । तत्सुतौ हरिरामशिवरामौ उभावपि विद्वांसौ, तयोः शिवरामः कीर्तिबिम्बनृपतेर्गुरुस्तस्य शिवदत्तभवदत्तरुद्रदत्ताख्यास्त्रयोऽपि विद्वांसः सुताः । तेषां मध्ये भवदत्तस्य व्यासदत्तश्रीदत्तज्वालादत्तसुकृति-दत्ताख्याश्चत्वारः पुत्राः । एष एव भवदत्तकनिष्ठसूनुः सुकृतिः ।

विद्याकुशेशयवनीचरराजहंसे संसत्सु वादिगणवादविहीनदंशे ।
कूर्माचलाभिजनके वसुपन्तवंशे जातो रमापतिरिति प्रथितः सुधीन्द्रः ।।
कृष्णातटे प्रतिभटेऽमरविष्टपस्याऽऽगत्यैष पर्वतनरेन्द्रगुरुर्बभूव ।
अस्थापयच्च हृदि सौधवरेऽपि लक्ष्मीनारायणौ विपुलभावनया स विद्वान् ।।
तस्यात्मजौ सकलशास्त्रमतप्रवीणौ ज्येष्ठस्तयोः समभवद् हरिरामसञ्ज्ञः ।
कृष्णारुणान्तरबुधान्प्रतिराजसंसन् निर्जित्य दिग्विजयकौतुकमातनोद् यः ।। (१७/१-३)

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

जयदेवकृतगीतगोविन्दस्याष्टपदीस्तोत्रव्याख्यायाः स्वकृतायाः अन्ते च सुकृतिदत्तेनैतदुल्लिखितमस्ति ।

भवदत्ताभिधधीरसूनवो युगसंख्याश्चरमश्च तेष्वयम् ।
सुकृतीत्यकृत प्रघर्षणं जयदेवीयवचोमणेरिदम् ।।

गौरवपूर्णोऽयं पन्तवंशो वाग्लुङे विराजते । सुकृतिदत्ताग्रजवंशजातो हयग्रीवपण्डितो ज्योतिषशास्त्रकुशलो भूतभविष्यफलादेष्टा विद्वानासीत् सोऽपि दिवङ्गतः । इदानीं तत्पुत्रो यज्ञदत्तोऽस्ति तत्र । पन्तवंश्या अन्ये चेदानीमुपेन्द्र-दुर्गाराजप्रभृतयः सन्ति । एतेषां पन्तकुलोद्भूतानां सर्वेषामपि विदुषां वाक्पटुत्वमकुण्ठितप्रतिभाशालित्वं नानाविधविद्यानु-शीलनव्यसनित्वं चास्माभि-रनुभूतचरमस्ति । विद्वान् कृष्णभक्तो वीरशालिपन्तश्च तद्वंशभव आसीत् । अयं ऋष्यशृङ्ग-श्रमस्थशशिधरस्वामिनः शिष्यः। अस्य सप्तशतपद्यात्मकं श्रीकृष्णचरितं काव्यमस्तीति श्रुतम् । एतस्मिन्नेव पन्तवंशे सप्तदशशतकपूर्वार्धे पर्वतशासकमलयवम्ममल्ल-राजगुरुप्रेमनिधिपन्त आसीत् । अनेन शिवताण्डवतन्त्रस्य मल्लादर्शनाम्नी टीका रचिता । एतद्रचिता कातवीर्यसपर्याकार्तवीर्यदीप-दानपद्धति-ज्वरोत्पत्तिचिकित्साप्रभृतयो भूरिशो ग्रन्थाः सन्ति तेषु तस्य प्रौढपाण्डित्यं जागर्ति । प्रेमनिधिपन्तः कार्तवीर्योपासनाप्रभाव-लब्धविद्य आसीदिति तद्रचनानुशीलनाज्ज्ञायते । तदनन्तरमेतद्वंश्यैः कार्तवीर्यः स्वकुलेष्टदेवत्वेन स्वीकृतः । सुकृतिदत्तस्तारिण्याः कार्तवीर्यस्य च उपासक आसीदिति कार्तवीर्योदयमहाकाव्यस्य मङ्गलाचरणपद्यैरेव ज्ञायते । कार्तवीर्यस्य स्वकुलेष्टदेवत्वादेवास्य कवेः कार्तवीर्योदयमहाकाव्यलेखने प्रवृत्तिर्जातेत्यनुमीयते। विष्णोः सुदर्शनचक्रावतारभूतस्य कार्तवीर्यमहाराजस्योपासना सद्यः सिद्धिदायिनी अस्ति । दुर्गासप्तशत्यादितन्त्रविद्यासु ब्रह्मवसिष्ठविश्वामित्रशापोऽस्ति । कार्तवीर्योपासनायां शापो नास्तीति श्रुतम् । सोऽयं मुपासनाविधिरुड्डामरमेरुतन्त्रे विद्यार्णवादितन्त्रेषु बृहन्नारदीयपुराणे च दृश्यते । चन्द्रवंशोद्भवस्य माहिष्मतीपतेः कार्तवीर्यनृपतेरितिवृत्तं देवीभागवते श्रीमद्भागवते ब्रह्माण्डपुराणे च दृश्यते ।

सुकृतिदत्तरचितग्रन्थाः

अस्यैव कार्तवीर्योदयमहाकाव्यस्य कतिपयेषु सर्गान्तपद्येषूल्लिखिता-सिद्धान्तवाद-स्फोटवाद-गङ्गाप्रसादप्रभृतयः, वृद्ध्याष्टकसूत्रविवृतिप्रभृतयश्च भूरिशो ग्रन्था सन्ति यत्र सुकृतिदत्तकवेरतुलनीयं पाण्डित्यमभिव्यज्यते।

कवेर्मातापितरौ, जन्मसमयः, अध्ययनम्, महाकाव्यरचनासमयश्च

सुकृतिदत्तस्य पिता भवदत्तपन्त इति प्रथममप्युक्तमेव । किञ्चास्य कार्तवीर्योदयमहाकाव्यसर्गान्तपद्येषु कविना मातापितरौ भार्गवीभवदत्ताविति भूयो भूयः समुल्लेखः कृतः । एतन् महाकाव्यसम्पादकप्रपन्नाचार्यस्वामिनाऽस्य भूमिकायां जन्मसमयः १८८० वैक्रमाब्दो निर्धारितः । गुरुश्च वाराणस्यां स्थितः प्रसिद्धो विद्वान् नीलदेवपन्त आसीदिति कथितम् । कविकृतस्य 'अचः परस्मिनपूर्वविधौ' इति सूत्रस्य क्रोडपत्रस्यान्ते रमानाथगुरोर्नाम कविना सादरं गृहीतमिति व्याकरणशास्त्रगुरुस्तु रमानाथ आसीदिति ज्ञायते । इदं काव्यं लिखित्वा कविना १९२८ वैक्रमाब्दे वैशाखशुक्लतृतीयायां समापितमिति - कार्तवीर्योदयमहाकाव्य-सप्तदशसर्गस्थ ३५ तमश्लोकाज्ज्ञायते ।

कार्तवीर्योदयमहाकाव्यपरिचयः

अस्मिन् कार्तवीर्योदयमहाकाव्येऽङ्गभूता अद्भुतशृङ्गारादयो यथावसरमुपयुक्ता प्रधानश्चात्र वीररसः । एतच्च कविना सप्तदशसर्गे 'वीरप्रायाखिलरसयुतम्' इति स्वयमप्युल्लिखितमस्ति । अत्र काव्येऽनुप्रासयमकादीनां शब्दालङ्काराणामुपमोत्प्रेक्षादी-नामर्थालङ्काराणाञ्च यथावसरं सर्वत्र उपयोगो विहितः । सप्तमसर्गस्तु विशेषतः खड्गबन्धचक्रबन्धादिचित्रकाव्यनिधानभूतमवास्ति। अत्र कविनाऽप्रतिहतचित्रकाव्यविन्यासपाटवं दर्शितमस्ति । एतादृशचित्रकाव्यविन्यासः किरातार्जुनीये माघकाव्ये च दृश्यते नान्यत्र । कनकप्रभायाः सौन्दर्यवर्णने स्वयंवरवर्णने च कविना नैषधीयकाव्यशैली अनुसृता दृश्यते ।

आलङ्कारिकभणितिभङ्ग्या कार्तवीर्योदयमहाकाव्यस्थं प्रयोगवैचित्र्यं, विविधनूतनशब्दविन्यासः, उपमया पर्यायोक्त्या वा प्रक्रियास्मारणम्, अनायासं नानाविधालङ्कारविन्यासः, नानाविधदुष्करचित्रकाव्यसर्जनकौशलञ्च कवेः कोशव्याकरणसाहित्य-

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

शास्त्रगतं प्रौढपाण्डित्यं प्रकटयति । वेद-वेदान्त-न्याय-साङ्ख्य-तन्त्र-ज्यौतिषादिशास्त्रस्थानां विषयाणामालङ्कारिकसरण्या काव्ये समावेशः प्राप्तावसराणां धर्मार्थकाममोक्षशास्त्राणां गूढतत्त्वोद्घाटनं यथायथविवेचनं चास्य कवेर्नानाविधशास्त्रधुरन्धरत्वं द्योतयति । नहि ज्ञानलवमात्रदुर्विदग्धा एतादृशप्रौढपाण्डित्यपूर्णं महाप्रबन्धं निर्मातुं क्षमन्त इति विदिततरमेवास्ति प्रेक्षावत्सु। नेपाले सन्ति बहवः सुकृतिदत्तपन्तप्राक्कालभवा अपि यदुवंश-हरिकेलिप्रभृतिमहाकाव्यनिर्मातारः कवयः । एतच्छताब्दीम्भवाश्च कुलचन्द्रमाधवदेवकोटा-दधिराममरासिनि-पूर्णप्रसादप्रभृतयः कवयः । वर्तमानसमये च कृष्णप्रसादभरतमन्थलीयाद्या कवयः। एतेषु ज्यायांसौ सुकृतिकुलचन्द्रावेव। तत्रार्थगौरवकाव्यनिर्माणे सुकृतिः । साहित्यविच्छित्तिमधुरकाव्यनिर्माणे च कुलचन्द्रः । सममेवोल्लिखितानामन्येषां कवीनां काव्येषु गाम्भीर्यं माधुर्यं च नास्तीति न मदीयकथनतात्पर्यम् । अस्ति तेषां कवीनां काव्येष्वपि गाम्भीर्यं माधुर्यं च किन्त्विमौ कवी सुकृतिकुलचन्द्रौ महिम्ना तुलायां गौरवं दधतः ।

अयं कविः स्वप्रबन्धमुद्दिश्य स्वयमेव प्रतिजानीते -

फणिपतिभणितिप्रविष्टचेता, उदयनवाचि विशारदः स्मृतिज्ञः ।
भरतवचनभारतोक्तिविज्ञो मम कृतिदर्शनमातनोतु विद्वान् ।। (१७/१७)

व्याकरण-न्याय-स्मृति-नाट्यशास्त्र-भारतादिग्रन्थाध्ययनव्युत्पन्नचेता विद्वानेवैतत्काव्याध्ययने क्षम इति युक्तमेवैतत् किन्तु -

नलिनपुलिननाकुजन्मभाजोऽनवकवयो विहरन्तु काव्यवाचा ।
कलियुगजनुषां गिरः कवीना सुकृतिरमौ मनुते जरत्तृणानि ।। (१७/१९)

अत्र ब्रह्मव्यासवाल्मीकिभिन्ना अन्ये कलियुगभवाः कालिदासभारविमाघश्रीहर्षादयः कवयः सर्वेऽप्याक्षिप्ता इत्यस्य कवेर्निरतिशय दर्पावेशोऽपि व्यज्यते । पुनश्च -

नासूयामो वयमिह बुधा मत्सरत्यक्तचित्ताः
श्रीहर्षोक्तिः सहृदयहृदां हर्षवर्षन्तनोतु ।
तुल्या हीना मम नु भणितिर्यादृशी चास्ति तस्याः
सत्यं सत्यन्निगदत तथा नानृतात् पापमन्यत् ।। (१७/२०)

अस्मिन्पद्ये श्रीहर्षस्य नैषधीयमहाकाव्येन सह कार्तवीर्योदयमहाकाव्यस्य साम्यं विवक्षितमिति व्याहृतपूर्वापरार्था कवेरुक्तिस्तं निरतिशयदर्पावेशयुतं व्यनक्ति । अथवा स्वसमकालिका दुर्विदग्धा कवय एव कविनाऽत्र कलियुगजनुष इति विवक्षिताः । अथवा तत्पद्यमन्यानि कानिचित्पद्यानि च तद्वंश्यैरन्यै वंशवर्णनपद्यमध्ये रचयित्वा प्रक्षिप्तानि स्युरिति मन्ये ।

कार्तवीर्योदयमहाकाव्यमिदं समग्रतोऽध्ययने क्वचिद् व्याकरणन्यायवेदान्तसाङ्ख्यज्यौतिषादिशास्त्रतत्त्वसंवलितं क्वचिच्च गूढेतिहासनिदर्शनपरं क्वचिच्च निगमागमरहस्यं कठिनं क्वचिच्च यमकखड्गबन्धगोमूत्रिका सर्वतोभद्रादिचित्रकाव्यसङ्घटनादुर्गमं च सन्नारिकेलफलमिव पीलुफलमिव कठोरमन्तर्हितार्थतत्त्वजटिलमाभाति । यमकानुप्राससङ्घटनाव्यग्रता कवेः सर्वत्र दृश्यते। गोमूत्रिकाबन्धादिचित्रकाव्यभेदप्रभेदसमावेशश्चास्य सप्तमसर्गे दृश्यते । तान् अन्यसर्गस्थाञ्च चित्रकाव्यभेदानधिकृत्यात्र चर्चा विधीय मानाऽस्तीति किं तच्चित्रकाव्यमिति प्रथमं तद्विषयेऽलङ्कारशास्त्रिणां विचाराः प्रस्तूयन्ते ।

चित्रकाव्यविषयेऽलङ्कारशास्त्रिणां विचाराः

केचित्सर्वमप्यलङ्कारजातं चित्रसंज्ञया व्यवहरन्ति । केचिच्च यमकखड्गबन्धादिकमेव चित्रकाव्यमिति कथयन्ति। केचन खड्गबन्धादिकाव्यप्रहेलिकादिकाव्ये च चित्रकाव्यमिति व्यपदिशन्ति । तत्रापि चित्रं काव्यलक्षणशून्यमकाव्यमिति केचित्। अधमं काव्यमिति केचन । खड्गबन्धादिकाव्यप्रहेलिकादिकाव्यं नीरसं काव्यान्तर्गडुभूतमिति च वदन्ति । केचिच्च श्रोतृणां मनसि कुतूहलजनकत्वाद् चमत्कारजनकत्वाच्च सुधीभिर्ग्राह्यमेतदिति वदन्ति । अतश्चित्रकाव्यविषये भूयान् मतभेदो दृश्यते ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

तत्र चित्रकाव्यविषये प्रथमपरिच्छेदे दण्डी इष्टार्थव्यवच्छिन्नपदावलीनां काव्यशरीरत्वं काव्यशोभाकराणां धर्माणामलङ्कारत्वं प्रतिपाद्य उपमादीनर्थालङ्कारान् द्वितीयपरिच्छेदे व्याख्यातवान् । अनन्तरं तृतीयपरिच्छेदे आदित ७७ पद्यपर्यन्तयमकभेदप्रभेदा दर्शिताः। तदनन्तरं गोमूत्रसर्वतोभद्रादिबन्धकाव्यभेदाः प्रहेलिकादिकाव्यभेदाश्च सादरं व्याख्याताः । तेषां चित्रसंज्ञाऽपि नदत्ता। एतेन ज्ञायते दण्डिनो विचारे शब्दालङ्कारेषु यमकादिषु अर्थालङ्कारेषु गोमूत्रबन्धादिषु चित्रकाव्येषु प्रहेलिकादिषु क्लिष्टकाव्येषु च समान एवं आदरः प्रतिभाति ।

भोजमतम्

मम्मटात्किञ्चित्कालप्राक्तनो भोजराजराजः सरस्वतीकण्ठाभरणे स्वग्रन्थे द्वितीयपरिच्छेदे यमकस्य पादादिमध्यान्तादिभेदान् समुद्यमकमहायकभेदाँश्च व्यपेताव्यपेतस्थूलसूक्ष्मादिभेदेन बहुधा प्रदर्श्यानन्तरमनुप्रासभेदानु-ट्टङ्कितवान् । तदनन्तरञ्च -

वर्णस्थानस्वराकारगतिबन्धान् प्रतीह यः ।
नियमस्तद्बुधै षोढा चित्रमित्यभिधीयते ।।

षोढा चित्रप्रकारमुद्दिश्य एकद्वित्रिचतुर्व्यञ्जनचित्रं निष्कण्ठ्यनिस्तालव्यादिवर्णचित्रम् । ह्रस्वैकस्वरदीर्घैकस्वरादिचित्रं प्रतिपादितवान् । ततश्चाकारचित्रभेदान् अष्टदलचतुर्दलषोडशदलादिबन्धमुरजबन्ध-चक्रबन्धगोमूत्रिका-बन्धसर्वतोभद्रादीन् बन्धान्, अक्षरमुष्टिविन्दुच्चुतकच्युताक्षरदत्ताक्षरकारकगूढक्रियागूढपादगूढ-बहिःप्रश्नान्तः-प्रश्नादिकाव्यभेदाँश्च भूरिशः सायासं सश्रद्धं च व्याकृतवान् । अनेन शब्दालङ्कारेषु अर्थालङ्कारेषु चित्रकाव्येषु वा न्यूनाधिकभावो नैव दर्शितः ।

त्रयोदशशताब्दीसम्भवो वाग्भटोऽपि स्वग्रन्थे वाग्भटालङ्कारे काव्यलक्षणे स्फुटरीतिरसोपेतमिति काव्यलक्षणविशेषणं दत्त्वा रसपक्षपाती सन्नपि दण्डिभोजसम्मतां सरणिमनुसृत्य चित्रकाव्यं विस्तरशः प्रतिपादयति।

वाग्भटस्य चिकाव्यलक्षणम्

तथाहि वाग्भटो वाग्भटालङ्कारप्रथमपरिच्छेदे हारबन्धच्छत्रबन्धौ चित्रकाव्यनिर्देशनार्थमुद्दिश्य चतुर्थपरिच्छेदे शब्दालङ्कारनिरूपणप्रकरणे -

यत्राङ्गसन्धितद्रूपैरक्षरैर्वस्तुकल्पना ।
सत्यां प्रसत्तौ तच्चित्रं चित्रकृच्च यत् ।। (४/७) ।

इति चित्रकाव्यलक्षणं सामान्यतो निर्दिश्य षोडशदलपद्मबन्धादीन् मात्राच्युतकादीन् प्रहेलिकाभेदान् पादयमकमहा-यमकप्रभृतीन् यमकभेदान् प्रदर्शयति २४ पद्येषु । चित्रकाव्येषु श्रद्धावतामाचार्याणामेते विचाराः प्रदर्शिताः ।

अथ ध्वनिसंप्रदायानुयायिनां चित्रकाव्यसाधकत्वमकाव्यत्वं वा प्रदर्शयतां नव्यमतानुयायिनां विचाराः प्रदर्श्यन्ते।

आनन्दवर्धनमतम्

ध्वनिकार आनन्दवर्धनो व्यङ्ग्यार्थप्राधान्ये ध्वनिकाव्यं व्यङ्ग्यार्थस्य गुणभावे गुणीभूतव्यङ्ग्यमिति द्विधा काव्यभेदं प्रदर्श्य, व्यङ्ग्यार्थविशेषप्रकारशून्यं रसभावादितात्पर्यरहितं केवलं वाच्यवाचकमात्राश्रयेणोपनिबद्धं चित्रम्, तत्र शब्दचित्रं दुष्करयमकादि, अर्थचित्रमुपमोत्प्रेक्षादि । यदि चोक्तेऽपि चित्रकाव्ये रसाद्यपेक्षा तदा तद् गुणीभूतव्यङ्ग्यं नाम काव्यं भवतीति प्रोक्तवान् । तत्र खड्गवन्धमुरजबन्धादिचित्रकाव्यचर्चा नैव विहिता तेन ।

विश्वनाथकविराजमतम्

विश्वनाथकविराजः स्वग्रन्थे साहित्यदर्पणे चतुर्थपरिच्छेदे ध्वनिर्गुणीभूतव्यङ्ग्यं चेति द्विधा काव्यमुक्त्वा तयोर्भेदो-पभेदविवरणानन्तरं केचिच्चित्राख्यं तृतीयं काव्यभेदमिच्छन्तीति काव्यप्रकाशमतं कटाक्षितवान् । अन्ते च-

प्रधानगुणभावाभ्यां व्यङ्ग्यस्यैवं व्यवस्थिते ।
उभे काव्ये ततोऽन्यच्चित्रमित्यभिधीयते ।।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

इति ध्वनिकारमतं प्रमाणीकृत्य शब्दार्थालङ्कारयोरुभयोरपि चित्रकाव्यत्वं स्वीकृतवान् । पुनश्च दशमपरिच्छेदे शब्दालङ्कारनिरूपण-प्रसङ्गे **पद्माद्याकारहेतुत्वे वर्णानां चित्रमुच्यते** इत्यभिधाय खड्गमुरजादिबन्धानां विशिष्टं लक्षणमुक्तवान् । एतेनाभिज्ञायते चित्रकाव्यमकाव्यं वदतोऽपि दर्पणकारस्य मनसि चित्रकाव्यविषयेऽपेक्षाऽस्त्येवेति।

निष्कर्षः

एतान् पूर्वेषां विचारानाकलय्य त्रिधा चित्रकाव्यमिति वक्तुं शक्यते –

१) शब्दचित्रमनुप्रासयमकादिकम्

२) अर्थचित्रमुपमादिकं प्रहेलिकादिचित्रकाव्यञ्च

३) वर्णचित्रं गोमूत्रिकाबन्ध-खड्गबन्ध-सर्वतोभद्रबन्धादिकाव्यं बिन्दुच्युतकाक्षरच्युतकदत्ताक्षरादिकाव्यम्, एकव्यञ्जन-द्विव्यञ्जनैकस्वरं द्विस्वरकादिकाव्यञ्च । यतो ह्येतानि काव्यानि वर्णविन्यासवैचित्र्यादेव सिध्यन्तीति। तथा चोक्तम्-

वर्णस्थानस्वराकारगतिबन्धान् प्रतीह यः ।
नियमस्तद्बुधै षोढा चित्रमित्यभिधीयते ।। (सरस्वतीक. ३/१०९)

अथ कथं प्रहेलिकादिकाव्यमर्थ-चित्रमिति चेदुच्यते –

चक्री त्रिशूली न हरो न विष्णुर्महाबलिष्ठो न च भीमसेनः ।
स्वच्छन्दचारी न नृपो न योगी सीतावियोगी न च रामचन्द्रः ।।

इत्यादिपद्येषु स्फुटमेवार्थवैचित्र्यं लभ्यत इति ।

यमकादिकाव्येषु, चित्रबन्धकाव्येषु प्रहेलिकादिकाव्येषु रसस्पर्शाभावादकाव्यत्वमिति साहित्यदर्पणकारादयो यद् वदन्ति तत्रोच्यते– तेन तत्रैव स्वग्रन्थे साहित्यदर्पणे स्ववृद्धप्रपितामह सहृदयगोष्ठीगरिष्ठकविवरपण्डितनारायण–दत्तोक्तिसम्मता धर्मदत्तोक्तिः प्रमाणीकृत्योद्धृताऽस्ति –

काव्ये(रसे) सारश्चमत्कारः सर्वत्राप्यनुभूयते ।
तच्चमत्कारसारत्वे सर्वत्राप्यद्भुतो रसः।।
तस्माददद्भुतमित्याह कृती नारायणो रसम् ।

एते सर्वेष्वपि रसेषु रसमयेषु सर्वेषु काव्येषु वा चमत्कार एव सारस्तस्मात् सर्वत्रैवाद्भुतो रसो भवतीति निर्वचनं जातम् । अथ कोऽयं चमत्कार इति विषयेऽपि – **चमत्कारश्चित्तविस्ताररूपो विस्मयापरपर्याय** इत्यपि साहित्यदर्पणकारैरुक्तमेव। अथ यदि चित्तविस्ताररूपो विस्मयश्चमत्कारस्तदा कविगोष्ठ्यादिषु प्रयुक्तानीमानि चित्रबन्धप्रहेलिकादिकाव्यान्यपि सहृदयहृदये कमपि कौतूहलमौत्कण्ठ्यञ्चापातत उत्पाद्य ज्ञाते च तत्त्वार्थे पर्यन्ते भवदुक्ते चेतोविस्ताररूपे विस्मयभावे आत्मानं स्थगयन्ति। अतः सर्वेषामपि चित्रकाव्यानामद्भुतरसयुक्तत्वं भवत्कथनादेव प्रतिपन्नम् । पुनश्चात्र भवद्भिरनुप्रासालङ्कारनिरूपण-समयेऽनुप्रासशब्दस्यार्थं व्याकुर्वद्भिरभिहितम् 'रसाद्यनुगुणत्वेन प्रकर्षेण न्यासोऽनुप्रासः' इति अतो रसानुगुणत्वे सत्यनुप्रासस्य स्वीकृतं काव्यत्वम् । यदि तादृशानुप्रासस्य काव्यत्वं स्वीक्रियते तर्हि अर्थप्रसत्तिबाधामकुर्वदेकद्विपदावृत्तिजातं स्वल्पयमकं काव्यत्वेन स्वीकर्तव्यम् । विनिगमनाविरहात् । तथा च – **मृदुलतान्तलतान्तमलोकयत् स सुरभिं सुरभिं सुमनोभरैः** इत्यादि माघकाव्योदाहरणेषु का रसाप्रकृष्टिरिति भवन्त एव पृच्छ्यन्ते । दुष्करबन्धात्मकमहायमकहारबन्धादिकं चित्रकाव्यं यदि माधुर्यप्रचुरान् शृङ्गारादीन्नपुष्णीयात् नास्वादयेद्रसं सम्भाँस्तथापि तत्रस्थमद्भुतरसमास्वादयितुं सहृदयान् को निवारयेत्। अनुभवश्चैष सहृदयानाम् ।

वाग्भटेनाप्युक्तम् –

यत्राङ्गसन्धिस्तद्रूपैरक्षरैर्वस्तुकल्पना ।
सत्यां प्रसत्तौ तच्चित्रं तच्चित्रं चित्रकृच्च यत् ।।

अत्राङ्गसन्धिस्वरूपैरक्षरैर्विहितस्य कस्यापि वस्तुनः परिकल्पनेति चित्रकाव्यलक्षणमुक्त्वा द्वितीयलक्षणे विस्मयजनिकोक्तिश्च

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

चित्रकाव्यत्वेनोक्ता – **आलेख्याश्चर्ययोश्चित्रम्** इत्यमरकोशाच्चित्रशब्दस्यालेख्यमाश्चर्यं चेति द्वावर्थौ, विस्मयोऽद्भुतमाश्चर्यमित्यमरकोशकथनादेवाद्भुतरसस्य च विस्मयः, अद्भुतम्, आश्चर्यम्, चित्रमिति पर्यायाः । अतो वाग्भटोक्त्या चित्रकाव्यमद्भुतरसयुक्तं भवतीति निष्पद्यते । इति चित्रकाव्यमपि न तुच्छत्वेनोपेक्षणीयमिति मदीयो विचारः । अत एव भारविमाघादिकविभिस्तस्य निर्माणे महान् प्रयासो विहितः स्वकाव्ये तेषामेव पूर्वेषां पन्थानमनुसरता सुकृतिदत्तकविनाऽप्यत्र चित्रकाव्यनिर्माणे प्रयत्नो विहितोऽस्ति । अत्र सप्तमसर्गश्चित्रकाव्यानां निधिरेवाऽस्ति । तत्र केषाञ्चिदेव निदर्शनमस्मिन् कार्यपत्रे विदुषां समक्षमुपस्थाप्यते ।

कार्तवीर्योदयमहाकाव्ये चित्रकाव्यचर्चा

अत्र अकारादि ज्ञान्तवर्णान् पद्यादौ पद्यान्ते च संस्थाप्य रचितान्येकपञ्चाशत् पद्यानि सन्ति । तत्र अ आ इ ई प्रभृतयः षोडशवर्णाः, कादिहान्तास्त्रयस्त्रिंशत् प्रचलितवर्णमालाक्रमेण स्मृताः । अन्ते क्षज्ञौ गृहीतौ त्रकारश्च परित्यक्त इति तदानीं तादृशी एव स्थितिरक्षरशिक्षणे स्यादिति बुध्यते । तत्राकाराद्यन्तपद्यं यथा –

अथामराणामधिपः स्मराणामुद्गीतवृत्तान्तमिदन्निशम्य ।
स्वस्थानहानभ्रमजातदैन्यसैन्येन भूयः शतमन्युरास ।। (७/१)

ज्ञकाराद्यन्तपद्यं यथा –

ज्ञातं ससर्वज्ञतया स्वयञ्चारण्योद्भवं वस्तु गुरुं न्ययुङ्क्त ।
संशिक्षयन्तो जगतीं महान्तो ज्ञात्वापि पृच्छन्ति गुरून् हि विज्ञाः ।। (७/५१)

श्लोकगोमूत्रिका (१)

समानयन्मान्यजनं द्विजानां विसारिदैन्यानलकीलजालः ।
निर्वापयन्दानजलप्रवाहैररण्यहस्तीव रराज राज्ये ।। (७/६६)
समापयन्दैन्यवनं प्रजानां विद्धारिसैन्यातुलशीलशालः ।
सर्वाभयज्ञानकलप्रवादैरगण्यकास्तीव रराज राज्ये ।। (७/६७)

प्रतिलोमार्धम्

वायुरोधपरो धीरो रमारासकलोऽरिहा ।
हारिलोकसरामाररोधीरोपधरो युवा ।। (७/६८)

सर्वतोभद्रम् (२)

सा शारदा दारशासाशारसार रसारशा ।
रसावहाहावसार दारहाविविहारदा ।। (७/८०)

दशदलपद्मबन्धः (३)

लब्धपालनविल्लक्षवालकापालनामलः ।
लङ्केशलङ्घनां लप्स्यन् सललौ क्ष्मां लसद्बलः ।। (७/८२)।

षोडशदलपद्मबन्धः (४)

वरवीरपरस्मेरहरसारधरः स्थिरः।
वारम्वारम्मारमारमारन्पारकरम्परः ।। (७/८३)

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

खड्गबन्धः (५)

नवां वीरकलां श्रुत्वा कार्तवीर्य्यस्य वृत्रहा ।
हाजगाम विहस्तत्वं को वा भूपः क्षितौ तु न ।।
नरवीरस्य तस्यासीद्भूमौ साध्यन्न किञ्चन ।
नारायणो नराणां स कारुण्याद्दर्शनङ्गः ।। (७/८४-८५)

त्रिशूलबन्धः (६)

विलेसु तद्यशःस्तोभा मानिनां प्रप्रथागमाः ।
मानिता विविधग्रामा मान्तोवीररसप्रभाः ।। (७/८७)

कविनामाङ्कषडरचक्रबन्धः (७)

तातः सुन्दरकृत्स्नवीरचरितं भव्यप्रवादप्रियम्,
दृष्ट्वा कृत्यमितावधानचरणं तं वात्कृतान्तश्रियम् ।।
वष्टीति स्म स काश्यपी प्रचलितक्षोणीशसञ्ज्ञम्मुदा,
दातारं यमिनां यशस्तव परं दृप्ते कृतान्तं सदा ।। (७/९५)

कविकाव्यनामाङ्कबन्धचित्रम् (८)

सुतं युवानं समभूमिबालिका प्रकृष्टनर्मालयमच्छवार्तकम् ।
सुनीतिवित्कर्तुमियेष वीतभीः वृतं मुदा तैरखिलैर्यशस्विनम् ।।
महर्षिदत्तं प्रतिरागशालिनं त्रिलोकगेहाङ्कजनावविक्रमम् ।
अमात्यवर्य्योऽवविधानमादिशं प्रतोषितार्य्यप्रतिराजमानितः ।।
सुतुष्टसप्रान्तसमाजसम्मतो मुदा चलद्दत्तगणोऽवनिप्रभुः ।
परिप्लवो भव्यपरम्परोर्भिभिस्तं सर्वपौरानुमतिं समागतम् ।। (७/९६-९८)

हारबन्धः

सम्भारान् भानुभासो नरवरशिरसा वन्दितो दिव्यदिव्यः,
मानोत्तानोननोनोऽकृतसुतहितकृल्लोकशोकघ्नकर्म्म ।
धातापाता प्रतापी क्षितिपतिरतिमत्क्षेमधामप्रमग्नः,
संसारासारसाक्षीविकचकजकरामानतानप्रनन्दन् ।। (७/९९)।

उपर्युक्तचित्रकाव्यानां चित्राणि अधः प्रस्तुतानि सन्ति ।

श्लोकगोमूत्रिका बन्धः (सप्तमसर्गे ६६-६७ पद्ययोः)



Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

वि सा रिं दै न्या न ल की ल जा लम्



वि द्वा रि सै न्या न ल की ल जा ल

नि र्वा प यन् दा न ज ल प्र वा है



स र्वा भ य ज्ञा न क ला प्र वा दै

र र व्य ह स्ती व र रा ज रा ज्ये



र र व्य का स्ती व र रा ज रा ज्ये

अत्र द्वयोः पद्ययोः परस्परं प्रथमयोः पादयोः, द्वितीययोः पादयोः तृतीययोः पादयोः चतुर्थयोः पादयोश्च स्थितानां वर्णानां गोमूत्रिका सदृशी गतिर्दृश्यते। तत्रैकस्यां पङ्क्तौ प्रथमपद्यप्रथमपादो लेख्यः। अन्यस्यां पङ्क्तौ द्वितीयपद्यस्य प्रथमः पादः।

सर्वतोभद्रबन्धः (सप्तमसर्गे अशीतितमपद्ये)

सा	शा	र	दा	दा	र	शा	सा
शा	र	सा	र	र	सा	र	शा
र	सा	व	हा	हा	व	सा	र
दा	र	हा	वि	वि	हा	र	दा
दा	र	हा	वि	वि	हा	र	दा
र	सा	व	हा	हा	व	सा	र
शा	र	सा	र	र	सा	र	सा
सा	शा	र	दा	दा	र	शा	सा

सा शारदा दारशासा शारसाररसा रशा ।
रसावहा हावसार दारहावि विहारदा ।। इति पद्यम् ।

अत्र तिर्यग्गता अधोगताश्च नवरेखाः कार्याः । ततश्चतुःषष्टिकोष्ठात्मकं वर्गाकारं यन्त्रं जायते । तस्मिन्यन्त्रे प्रथमद्वितीय-तृतीयचतुर्थपङ्क्तिषु क्रमशः प्रथमद्वितीयचतुर्थपादा लेख्याः । पञ्चमषष्ठसप्तमाष्टमपङ्क्तिषु व्युत्क्रमेण चतुर्थतृतीयद्वितीयप्रथमपादा लेख्याः । इदं सर्वतोभद्रमण्डलजातम् । पठने प्रादक्षिणपश्चिमाभ्यस्तुल्यमेवोच्चारणं भवति । विदिक्षु कर्णगत्या पठने

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

सर्वज्ञापि सा, शाशा, र र र, सा सा, व, हा हा, एतानि वर्णानि सर्वतोभद्रचक्रवद् भवन्तीतीदं सर्वतोभद्रबन्धकाव्यम् ।

दशदलपद्मबन्धः (सप्तमसर्गे ८२ तमपद्ये)



लब्धपालनविल्लक्ष्यबालकापालकामलः ।
लङ्केशलङ्घनां लष्यन्स ललौ क्ष्मां लसद्बलः ।।

षोडशदलपद्मबन्धः (सप्तमसर्गे ८३ तमपद्ये)



अस्मादेव पद्याद् गोमूत्रबन्धोऽपि जायते सोऽन्यस्मिँश्चित्रे दर्श्यते ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

अर्ध-गोमूत्रिकाबन्धः (सर्गः ७, श्लोकम् ८३)



अर्धगोमूत्रिकाबन्धे प्रथमतृतीयपादयोः, द्वितीयचतुर्थपादयोश्च । गोमूत्रिका बन्धो भवति ।



खड्गबन्धः (सप्तमसर्गे ८४-८५ श्लोकौ)



त्रिशूलबन्धः (सप्तमसर्गे ८७ पद्ये)



Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

कविनामाङ्कः षडरचक्रबन्धः (सप्तमसर्गे ९५ तमपद्ये)



कवि-काव्यनामाङ्कबन्धचित्रम् (सप्तमसर्गे ९६-९७-९८)

कार्तवीर्योदयमहाकाव्यसप्तमसर्गस्थानां ९६-९७-९८ एतेषां पद्यानामन्ते विशेषकम् इत्येतावन्मात्रं प्रकाशितपुस्तके लिखितमस्ति । किन्त्वेषां द्वादशपादानां क्रमश एकैकस्यां पङ्क्तौवर्णपङ्क्तिसङ्गतिपूर्वकमुल्लेखे विहिते सति अधस्तन-चित्रानुसारं कविकाव्ययोर्नामनी स्फुटं लभ्यते । तथा च कर्णतया ईशानकोणतो नैर्ऋत्यकोणपर्यन्तकोष्ठस्थितानां वर्णानां संयोजने 'सुकृतिदत्तकविराजनिर्मितम्' इति वाक्यम् । एवमेवाग्नेयकोणतो वायव्यकोणपर्यन्तानां वर्णानां संयोजने च 'कार्तवीर्य-राजवर्यसुचरितम्' इति काव्यनाम स्फुटीभवति । अत इमे त्रय॰ श्लोका कविकाव्यनामाङ्गचित्रबन्धगर्भाः सन्ति।

सु		तं	यु	वा	नं	स	म	भू	मि	वा	लि	का
प्र	कृ	ष्ट	न	र्मा	ल	य	म	च्छ	वा	र्त	कम्	।
सु	नी	ति	वि	त्क	र्तु	मि	ये	ष	वी	त	भीः	
वृ	तं	मु	दा	तै	र	खि	लै	र्य	श	स्वि	नम्	"९६"
म	ह	र्षि	द	त्तं	प्र	ति	रा	ग	शा	लि	नं	
त्रि	लो	क	गे	हाङ्	क	ज	ना	व	वि	क्र	मम्	।
अ	मा	त्य	व	र्यो	व	वि	धा	न	मा	दि	शं	
प्र	तो	षि	ता	र्य	प्र	ति	रा	ज	मा	नि	तः	९९७
सु	तु	ष्ट	सु	प्रा	न्त	स	मा	ज	सं	म	तो	
मु	दा	च	लद्	द	त्त	ग	णो	व	नि	प्र	भुः	।
प	रि	प्ल	वो	भ	व्य	प	रं	प	रो	र्मि	भिस्	
तं	स	र्व	पौ	रा	नु	म	तिं	स	मा	ग	तम्	

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

हारबन्धः (सप्तमसर्गे ९९ तमे पद्ये)



पर्यन्तवाक्यम्

इत्थं मया विचारपत्रेऽस्मिन् प्रतिनिधिमूलकतया केषाञ्चन चित्राणि प्रस्तुतानि । येषां चित्रकाव्यानां लक्षणानि अत्र न दत्तानि तानि सरस्वतीकण्ठाभरणादौ विलोकनीयानि । केषाञ्चन चित्रकाव्यानां लक्षणानि सुधीभिश्चित्रं दृष्ट्वा स्वयमूह्यानि इति वदन् विरमामि ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

कार्तवीर्योदयमहाकाव्ये प्रतिबिम्बिता सनातनसंस्कृतिः

- उपप्रा. ध्रुवप्रसादज्ञवाली

काव्यगुणैरोतप्रोतं शास्त्रीयवैशिष्ट्यानुप्राणितञ्च कार्तवीर्योदयमहाकाव्यं सनातनसंस्कृतेः संवाहकमनुपमं ग्रन्थरत्नमस्तीति आरम्भतोऽवसानपर्यन्तं परिशीलनाद् ज्ञायते । यद्यपि प्रत्यक्षतया महाकाव्यमिदं सनातनसंस्कृतिव्याख्यानोद्देश्येन न प्रणीतम्, तथापि धर्मावनाय धृतविग्रहस्य हरेश्चक्रावतारस्य कार्तवीर्यस्य उदयलीलावर्णने प्रयुक्ततत्वात् पदे पदे सनातनसंस्कृतेः सुरभिरनुभूयते। वस्तुतः सनातनसंस्कृतिर्वेदवेदाङ्गप्रमुखेषु शास्त्रेषु दर्शनेषु भगवदतवतारेषु भगवद्विभूतिषु भगवल्लीलासु महापुरुषचरितेषु, धर्माचरणेषु सदाचरणेषु सदाचारेषु शिष्टाचारेषु संस्कारेषु साधनासु आराधनासु च अभिव्यक्तिमेति । अस्मिन् महाकाव्ये उक्तविषयाणां न्यूनाधिकतया वर्णनानि सन्तीति तन्माध्यमेन सनातनसंस्कृतिरपि काव्येऽस्मिन् निजं निर्मलं स्वरूपं प्रकाशयति।

भगवतः कार्तवीर्यस्य ध्यानं दुर्भावनाया दुश्चिन्तनस्य चापहारकं चित्तशुद्धेश्च कारकं भवतीति तथ्यं विशदीकृतं कविना।[1] भगवान् कार्तवीर्यो राजभये, विषभये अग्निभये, चौरभये, उपसर्गभये, युद्धभये, रोगभये च संस्मरणेन स्मरतां कल्याणं तनोतीति तथ्यमस्मिन् महाकाव्ये प्रकाशितमस्ति ।[2]

प्राच्यगुरुकुलेषु वेदवेदाङ्गादिविषयाध्ययनशीलानां छात्राणां रूपरेखा शब्दतूलिकया चित्रिता कविना।[3] यज्ञैर्देवानां तुष्टिर्भवति । देवतुष्ट्या जीवनं दुःखत्रयाद् विमुक्तं भवति । तस्माद् देवतुष्टये यज्ञाः सम्पादनीया भवन्तीति तथ्यं महाकाव्येऽस्मिन् अनेकप्रसङ्गेषु प्रकाशितमस्ति ।

श्रीगुरुचरणयोर्दण्डवत्प्रणामः कर्तव्य इति शिष्टाचारः । एष शिष्टाचारो महाकाव्येऽस्मिन् कृतवीर्यस्य दत्तात्रेयदर्शनावसरे प्रकाशितः ।[4] भगवान् भक्तिप्रियो भवति । जनैर्भगवत्प्रीतये भक्तिसाधना कर्तव्या। एषः शास्त्राणां सन्देशः कार्तवीर्योदये महाकाव्येऽपि प्रकाशितो वर्तते ।[5] यदि साधको वर्षदिनपर्यन्तं भक्त्या मुरारेराराधनां कुरुते चेत् स स्वमनोरथप्राप्तये समर्थो भवतीति तथ्यं कार्तवीर्योदयमहाकाव्ये वर्णितमस्ति ।[6] गुरुमुखाल्लब्धस्य मन्त्रस्य जपः कर्तव्यः, गुरुमुखात् श्रुतेन

---

१. *यच्चिन्तनं हरति चेतसि जातमात्रं दुर्ध्यानमाशु वितरत्यपि चित्तशुद्धिम् ।*
संशोधयेन्निह गिरं निज कीर्तिनीम्मे स्वेच्छामयो हि स हरिः कृतवीर्य्यजन्मा ।। का.म. १/४ ।

२. *भवच्चरित्रं त्रिजगत्पवित्रं विगाह्य चित्तं लभतामपापम् ।*
सरो यथा ग्रीष्म-ऋतौ मनुष्यो वर्षासरो वापि सदा सदम्भः ।। का.म. ७/४० ।

३. *पठन्ति यत्र द्विजवर्यबालाः शाला अधिष्ठाय गुरोर्विशालाः ।*
ऐकान्यिकत्वे कृतहस्ततालास्त्रिपुण्ड्रभाला धृतशास्त्रजालाः ।। का.म. १/२४ ।

४. *जन्मनः प्रभृति चानुसूयया लालितं हृदयहारि जन्मिनाम् ।*
तस्य दर्शनमुपेयिवान्नृपो दण्डवत्प्रणिपपात पादयोः ।। का.म. ३/३ ।

५. *भक्तिरेव हरयेऽपि रोचते न श्रियो गणयते सविभ्रमम् ।*
तोयपूर्णघनमध्यसंलसच्चञ्चलातिचपलोदयप्रभम् ।। का.म. ३/५० ।

६. *वर्षमेकमुपधाव मुरारिं तीव्रभक्तिसचिवस्संहदारः ।*
सेत्स्यते तव मनोरथ एष त्वत्प्रमाणपथगा यदि च स्मः ।। का.म. ३/४१ ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

विधिना च भगवदर्चना कर्तव्येति सन्दिशति कविः ।[७] करेऽर्काक्षमालामाधाय हरिमन्त्रराजस्य 'ॐ नमो भगवते वासुदेवाय' इति प्रथितस्य जपेन लक्ष्यसिद्धिर्भवतीति प्रतिपादितं कविना ।[८]

एकान्तवासी, जनसमूहविरतः, पथ्यं मितं सात्त्विकं च भोजनं कुर्वाणः, मितसत्यभाषी, श्रुतिवचनेषु स्मृतिवचनेषु च श्रद्धावान् विशुद्धात्मा साधको भगवद्दर्शने सति स्वमनोरथसिद्धये समर्थो भवतीति तथ्यं प्रकाशितं कविना ।[९]

साधकः समीकृताङ्गं योगासनमङ्गीकृत्य प्राणायामं कृत्वा हृदि नारायणस्वरूपं विचिन्त्य नासाग्रे दृष्टिं स्थिरीकृत्य कामक्रोधलोममोहादिकञ्च विजित्य भगवत ऊर्ध्वरेखाम्, वज्रम्, चक्रञ्च ध्यायन् हृदयकर्णिकायां हरेर्मूर्तिं कल्पयित्वा प्राणप्रतिष्ठां विधाय भद्रासने संस्थाप्य मानसपूजाक्रमे अर्घ्येण मधुपर्केण पञ्चामृतेन च स्नपनं पूजनञ्च कुर्यात् । ततो विविधावतारेषु जातानां भगवतो लीलानां संस्मरणपूर्वकं स्तवनं कुर्यादिति तथ्यं कविना कार्तवीर्योदयमहाकाव्ये कृतवीर्यकृताया भगवदाराधनाया वर्णनमुखेन प्रत्यपादि ।[१०] नित्यं भगवदाराधनायां निरतः साधक एकस्मिन् दिने नवनीरधराभिरामां श्यामां हरेर्मूर्तिं नयनगोचरीकर्तुं प्रभवतीति तथ्यं कविना प्रकाशितम् ।[११] भक्तानां कल्याणाय धर्मरक्षणाय दुष्कृतां दमनाय च हरिः समये समयेऽवतरतीति शास्त्रप्रतिपादितं तथ्यं सत्यापयन् कविः कृतवीर्याराधितो भगवान् कृतवीर्यमहिष्यां प्रादुर्भूत इति वर्णितवान् ।[१२]

कृतवीर्यपुत्रजन्मानन्तरं निगमविधानाद् जातकर्मादिसंस्कारसम्पादनाय कुलगुरुर्दत्तात्रेय तत्रागत इति वर्णनमुखेन सनातनसंस्कृतौ संस्काराणां निरतिशयं महत्त्वं भवतीति तथ्यं कविना सत्यापितम् ।[१३] बालकजन्मनः षष्ठे दिने षष्ठीपूजनं विधेयम्। सा च तदा बालकस्य भाग्यं लिखतीति तथ्यं प्रकाशयति कविः कृतवीर्यपुत्रजन्मनः षष्ठदिवसीयकृत्यवर्णनविधौ।[१४] **'एकादशेऽहनि नाम कुर्यात्'** इति शास्त्रनिर्देशमङ्गीकृत्य पिता कृतवीर्य एकादशे दिवसे पुत्रस्य नामकरणसंस्कारं सम्पादयामासेति वृत्तं कविना प्रकाशितम् ।[१५] षष्ठे मासि अन्नप्राशनसंस्कारः कर्तव्य इति शास्त्रनिर्देशमनुसृत्य कार्तवीर्यार्जुनोऽन्नप्राशनं कृतवानित्यपि कविना सादरं निरूपितम् ।[१६] तृतीये वर्षे दत्तात्रेयः कार्तवीर्यस्य चूडासंस्कारं सम्पादयामासेति कविनेत्थं निरूपितम् ।[१७] पञ्चमे वर्षे दत्तात्रेयः शारदाहरिगणेशपूजनपूर्वकं विधिपूर्वकं वर्णपङ्क्तिं विलिख्य कार्तवीर्यं ग्राहयामासेति वृत्तं वर्णितं सुकृतिदत्तेन ।[१८]

---

७. *का.म. ३/५५ ।*

८. *का.म. ४/२ ।*

९. *निर्णिक्तदेशवसतिर्विरतिर्जनौघे पथ्यं मितं सदशनं वचनञ्च तादृक् ।*
श्रद्धा श्रुतिस्मृतिवचस्सु मनो-विशुद्धिः शौचं द्विधा रुरुचिरे नृपनायकाय ।। का.म. ४/३ ।

१०. *का.म. ४/४, ६, ९, ११, १२ ।*

११. *का.म. ४/२४ ।*

१२. *समभवदभवार्थं भक्तिभाजां प्रजानाममृतविशदकीर्त्या सेचनार्थं त्रिलोक्याः ।*
अरुणकमलकान्त्या भासयन्दिग्वितानं हरिरवनिमहेन्द्राच्चारुकीर्त्याम्महिष्याम् ।। का.म. ४/६२ ।

१३. *का.म. ४/७४ ।*

१४. *षष्ठे दिने तस्य लिलेख षष्ठी लक्षातिपातं खलु मार्गणानाम् ।*
तथायुषोऽव्याहतयोगसिद्धिं व्यलीकहीनं ह्यलिकेऽनलीकम् ।। का.म. ५/५ ।

१५. *दिने व्यतीते दशमे पिताऽस्य स्मरन् गिरं लोकगुरोः पुरोक्ताम् ।*
समर्ज्जनादर्ज्जुनकीर्तिराशेर्युक्तश्चकाराज्र्जुननाम पुण्यम् ।। का.म. ५/६ ।

१६. *व्यञ्जनाश्रितविचित्ररसाद्यं मिष्टभक्तिपरमोदनमच्छम् ।*
सत्कवेर्वच इवातरलाभं षष्ठमासि बुभुजे नृपसूनुः ।। का.म. ५/९ ।

१७. *का.म. ५/४७ ।*

१८. *पञ्चमे मुनिरुपेत्य वत्सरे शारदाहरिगणेशपूजनम् ।*
संविधाय लिखितामजीग्रहद् वर्णपङ्क्तिममुनाऽऽगमाध्वना ।। का.म. ५/५० ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

अष्टमे वर्षे गुरुर्दत्तात्रेयः कार्तवीर्यं वैदिकेन विधिनोपनीतवानिति वर्णनेन कविः सनातनसंस्कृतौ प्रमुखसंस्कारस्योपनयनस्य महत्तां प्रकटीकृत्य गायत्रीमन्त्रदीक्षानन्तरं बालको निजमातुः सन्निधौ भिक्षार्थं गच्छेदिति शास्त्रनिर्देशस्य रौरवाजिनवृतेन कार्तवीर्येण कृतमनुसरणमपि निरूपितवान् ।[१९] कार्तवीर्यो वेदारम्भानन्तरं गुरुकुलं गत्वा ब्रह्मचर्यव्रतपूर्वकं त्रयीमधीतवानिति तथ्यं प्रकाशितं कविना ।[२०]

अस्मिन् महाकाव्ये गुरुकृपया जनोऽखिलवाङ्मयज्ञाता सम्पद्यते इति तथ्यं प्रकाशितमस्ति ।[२१] अस्य महाकाव्यस्य षष्ठसप्तमसर्गयोः कार्तवीर्यतपोवर्णनप्रसङ्गे सनातनसंस्कृतौ गौरवपूर्णं स्थानं धारयन्त्याः तपस्याया विस्तरेण वर्णनं जातम्। कार्तवीर्यस्य तपस्यायाः परा काष्ठैव प्रदर्शिता कविना।[२२]

तपसा प्रसन्नेन ब्रह्मणा वरदानेन कृतार्थीकृतः कार्तवीर्यो गुरुणा साकं गुरुकुलमेव जगाम । ततः स गुरुः कार्तवीर्यस्य द्वितीयाश्रमसिद्धये मुण्डनपूर्वकं समावर्तनसंस्कारं संपाद्य गृहं प्रेषितवानिति वृत्तं कविना वर्णितम् ।[२३]

महाकविः कालिदासो रघुवंशे वर्णाश्रमसंस्कृतेरुज्ज्वलां सरणिं वर्णयन्नाह –

शैशवेऽभ्यस्तविद्यानां यौवने विषयैषिणाम् ।
वार्धके मुनिवृत्तीनां योगेनान्ते तनुत्यजाम् ।।

अनेन कालिदासनिर्दिष्टवर्त्मना पुरा राजानः पुत्रं सुयोग्यं वीक्ष्य तदुपरि राज्यभारं विन्यस्य तपसे वनं गच्छन्ति स्म। वर्णाश्रमव्यवस्थाप्राणायाः सनातनसंस्कृतेरेषा सरणिः कार्तवीर्योदयमहाकाव्येऽपि कृतवीर्यवनगमनविधौ कविना वर्णिता ।[२४] राजसिंहासनं कामयमानानां राज्याभिषेकसंस्कारः सनातनसंस्कृतौ निर्दिष्टः । कृतवीर्यः कार्तवीर्यस्य राज्याभिषेकोचितं प्रबन्धं कृतवान् । तदा विप्रैश्च कार्तवीर्योऽभिषिक्त इति महाकाव्ये वर्णितम् ।[२५]

कृतवीर्यस्य कार्तवीर्यायोपदेशदानप्रसङ्गे राजधर्मस्योदात्ता विचाराः कविना प्रकाशिताः सन्ति।[२६] सनातनसंस्कृतिः

---

१९. *तं द्विषट्शरदमाश्रमागतो विभ्रमं त्रिभुवनोदरश्रियाम् ।*
अश्रमाधिगतवाङ्मयो मुनिर्वैदिकेन विधिनोपनीतवान् ।।
रौरवाजिनवृतः सगौरवो गौरवेण वचसा समग्रहीत् ।
वेदमातरमनारतोत्थिते वल्लकीजलजवाद्यनिःस्वने ।।
वेदमातरमवाप्य मातरं भिक्षितुं स वटुरागमत्ततः ।
ते उभे अपि वसूच्चयं गुरोः तोषणाय दिशतः स्म वर्णिने ।। का.म. ५/५९-६१।

२०. *का.म. ५/६४ ।*

२१. *का.म. ६/१ ।*

२२. *चलति नापि पदं स्म विमुञ्चति न च पुरा नियतासुमसौ वशी ।*
न पुनरत्ति फलं स्म दलञ्जलं विरमति स्म न चापि समाधितः ।।
अधिशिरोऽस्य तडिल्लतिकोपमाः कनकभङ्गपिशङ्गजटा बभुः ।
भुवनमध्यविलीनतमोग्रहा ग्रहदिनेशरुचः स्फुरिता यथा ।। का.म. ६/२६-२७ ।

२३. *का.म. ७/४७-४८ ।*

२४. *राज्याभिषेकपदसम्भृतिमारचय्य पुत्रं विधित्सुरवनीतलसार्वभौमम् ।*
राजा जगाद जगदाहितकीर्तिमूर्तिर्दत्तं गुरुं गुरुमिवामरलोकराजः ।। का. म. ८/२ ।

२५. *राजन्यशेखरमणिर्यदुतुङ्गवंशभ्राजिष्णुमौक्तिकफलं द्विजदेवशाखी ।*
शौर्याद्यगण्यगुणरत्नसुमेरुरुर्वीकान्तानुकूलदयितो निरसेचि विप्रैः ।। का. म. ८/३१ ।

२६. *भूमीभुजां किमिह कार्य्यमिहार्य्यसङ्गः सेव्यं किमङ्घ्रियुगलञ्जगदीश्वरस्य ।*
प्रेक्ष्यं किमाश्रितवनीयकभोजनादि रक्ष्यं किमिन्दुकरनिर्मलकीर्तिवृन्दम् ।। का.म. ८/६७ ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

सत्कर्मफलरूपेण पुण्योत्पत्तिं स्वीकरोति । एतत्तथ्यं कार्तवीर्योदयेऽपि विवृतमस्ति।[२७] सनातनसंस्कृतौ सन्ध्याचरणं द्विजानां कर्तव्यत्वेन निर्दिष्टम् । इदमस्मिन् महाकाव्ये सूर्योदयवर्णनावसरे काव्यवाचा प्रकाशितम् ।[२८]

गृहस्थाश्रमो नराणां सौख्यदायकं विश्रामस्थलम् । स चाश्रमोऽनुकूलया पतिव्रत्या वामाङ्गिन्या विना फलदायको न भवति । तादृशी वामाङ्गिनी पूर्वपुण्यैरेव लभ्यते । तादृशानि पुण्यानि कठिनेन तपसैव करतलगतानि भवन्तीति सनातनसंस्कृतेर्विशेषाधायकानि तत्त्वानि कविना प्रकाशितानि सन्ति।[२९] गृहिणां गृहेषु गृहलक्ष्मीपदं दधानाः पतिव्रताः सुन्दर्यो लक्ष्म्या आवाहनार्थं प्रातःकाले गृहलेपनादिकं कुर्वन्तीति एष आचारो लोकशास्त्रसिद्धो वर्तते । नारीणां प्रातःकालिकं गृहशृङ्गाररूपं कर्म कार्तवीर्योदये कविना वर्णितम् ।[३०]

विवाहः सनातनसंस्कृत्यनुयायिनां जन्मजन्मान्तरसम्बन्धयोजकः संस्कारः । कनकप्रभाकार्तवीर्ययोर्विवाह-संस्कारनिरूपणमुखेन कविरस्य संस्कारस्य महिमानं प्रदर्शितवान् ।[३१]

कार्तवीर्योदयमहाकाव्ये पुण्यनदीषु स्नानं पुण्यदायकं भवतीति बहुषु स्थलेषु वर्णितम् । तासु नदीषु कृष्णाया गण्डक्याः सर्वोपरि स्थानं वर्तते । तदीयं तटन्तु स्वर्गप्रतिस्पर्धि पावनं स्थानमिति कविना प्रतिपादितम् ।[३२]

कार्तवीर्योदयमहाकाव्यस्य द्वादशे सर्गे कविना चन्द्रकलामुखेन कनकप्रभायाः स्वयंवरसमारोहे सहभागितया सम्प्राप्तानां राज्ञां वर्णनविधौ तेषां देशनिरूपणावसरे अयोध्यामथुरावृन्दावनगोवर्धनकाञ्ची-काशी-अवन्तीप्रभृतीनां प्रातःस्मरणीयानां पुरीणां तीर्थानाञ्च महत्त्वगानं कृतम् ।[३३]

अस्मिन् काव्ये विभिन्नसर्गेषु ब्रह्मविष्णुमहेशानाम्, महाकालिकायाः, महालक्ष्म्याः, महासरस्वत्याः, भगवत्या

---

२७. *अये किमस्माभिरकारि पुण्यं भवान्तरे वा जनुषीह यस्य ।*
फलं प्रजातं भवता सहास्याः सुभाषितस्तोमवता सहास्या ।। का.म. १०/३ ।

२८. *रविनिगलननिस्सन्देहमन्देहदेहाचलभिदुरसदृक्षाँस्तोयपूर्णाञ्जलींस्त्रीन् ।*
अभिषवतिमिताङ्गा सान्ध्यकर्मप्रवृत्ता इह विदधति विप्रा वेदमात्रापवित्रान् ।।
नियमितकरणैषा धौतकौशेयवासा दरचलरदवस्त्रा कौशवृण्यान्निषण्णा ।
हृदि धृतविधिशक्तिस्सङ्गृहीताक्षमाला जपति किमपि गुह्यं संसदद्य द्विजानाम् ।। का.म. ११/४२-४३ ।

२९. *न शर्म्म गार्हस्थ्यमृते नराणान्तच्चानुरूपां गृहिणीं विना न ।*
न सापि पुण्योत्करमन्तरेण न सोऽपि दुस्तीर्णतपो विनैव ।। का.म. १०/१५ ।

३०. *घनतरमुपगुह्याचुम्ब्य पादौ प्रणम्य प्रियतमविनियोगाद् गेहकार्य्यार्थमार्य्याः ।*
कति कति नहि साध्व्यः पस्त्यपूजाविधानं विदधति करपद्मैर्दीप्तदीपैः प्रभाते ।। का.म. ११/३० ।

३१. *अथ प्रशस्तेऽभ्युदिते मुहूर्ते हस्तेऽभिशस्ते गलहस्तिते च ।*
आकारयामास पुरोहितेन भोजोऽर्ज्जुनं दारसुतादियुक्तः ।।
श्रुतिस्मृतिप्रोक्तविधानविज्ञः स्मरन्विधातुर्वचनं सुतोक्तम् ।
ददौ स तस्मै पुरुषोत्तमाय पद्मां स्वसद्मोद्भवमात्रभिन्नाम् ।। का.म. १४/६२-६३ ।

३२. *कृष्णातटे प्रतिभटेऽमरविष्टपस्याऽऽगत्यैष पर्वतनरेन्द्रगुरुर्बभूव ।*
अस्थापयच्च हृदि सौधवरेऽपि लक्ष्मीनारायणौ विपुलभावनया स विद्वान् ।। का. म. १७/२ ।

३३. *एतन्नृपाभिजनभूरहितैरयोध्या योध्यापरेण तपसा विदुषापि बोध्या ।*
यो ध्यायति प्रतिदिनं स विमुच्यते तामध्यायतो गदितवानिति शक्तिनप्ता ।। का.म. १२/८ ।
अये मृगाधीश्वरमध्यदेशे ! वाराणसी राजति मध्यदेशे ।
या काशनान्मुक्तिपुरी पुरस्तात् काशीति सञ्ज्ञां लभते सदर्थाम् ।। का.म. १२/३० ।
विमुक्तिलक्ष्मीप्रियरत्नकाञ्ची काञ्ची कला नाञ्चति काचिदन्या ।
पूरञ्चिताप्येतदलङ्क्रियायै किं वा विधात्रा विहितासि भद्रे ।। का.म. १२/५८ ।
यदाश्रयात्फल्गुरपीह पूज्या यत्पादपङ्केरुहसन्निधाने ।
प्रदत्तपिण्डैः पितरो लभन्ते मुक्तिं स देशेऽस्य गदाधरोऽस्ति ।। का.म. १२/८७ ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

ताराया:, साम्बसदाशिवस्य, सीतारामयोः, राधाकृष्णयोः, हरिहरात्मकस्य भगवतः, भगवतो नृसिंहस्य, अन्येषां भगवदवताराणाम्, गणेशस्य, इन्द्राग्नियमनिर्ऋतिवायुवरुणकुबेराणाम्, हनुमन्नारदध्रुवप्रह्लादादीनाञ्च भगवद्भक्तानां पावनानि संस्मरणानि लभ्यन्ते। पुनरत्र सनातनधर्मानुयायिनां प्रमुखप्रयोजनानां धर्मार्थकाममोक्षाणां सफलतया प्रयोगाय कविना पाठका उपदिष्टाः ।[३४]

कविना वर्णाश्रमाचारविधानेन निर्मलान्तःकरणैर्जनैः सद्गुरोरुपनिषदध्ययनेनाप्रतिकूलतर्कैरात्मानं निश्चित्य सच्चिदानन्दरूपाया मुक्तेरधिगमायात्मचिन्तनं कर्तव्यमिति महनीयं तथ्यं काव्यवाचा प्रकाशितम् ।[३५] यच्च वस्तुतः सनातनसंस्कृतेश्चरमं परमञ्च लक्ष्यमस्ति ।

काव्यस्यावसाने षोडशसर्गे कविनाऽखिलदुःखसम्भेदिन्या मुक्त्यवस्थायाश्चित्रणं कृतम् ।[३६]

पर्यन्ते एष जनः सविनयम् -

योऽभवल्लोकरक्षार्थमंशाच्चक्रं हरेर्भुवि ।
तं नमामि महावीर्यमर्जुनं कृतवीर्यजम् ।।

इति भगवत्कार्तवीर्यसहस्रार्जुनचरणारविन्दस्मरणपूर्वकं वाग्व्यापाराद् विरमति । इति शम् ।



३४. *कामेन सार्द्धमुपयोजय धर्ममार्ग शौर्य्यं भजस्व घृणया सह वित्तराशिम् ।*
धर्मेण साकमभिवाञ्छ विहाय सर्वमन्ते रमस्व निरपायविमुक्तिवध्वा ।। का. म. ८/७५ ।

३५. *वर्णाश्रमाचारविधानशुद्धाः श्रुत्वा श्रुतिभ्योऽप्रतिकूलतर्कैः ।*
निश्चित्य चात्मानमभिन्नमीशाद् ध्यायन्ति धन्यास्सततं विमुक्त्यै ।। का.म. १६/९६ ।

३६. *वेत्तुश्च वेद्यस्य विदोऽविभागविद् न विद्यते यत्र विदि श्रुतौ श्रुता ।*
आनन्दसन्दोहखनीजनिस्सदा सा मुक्त्यवस्थाऽखिलदुःखनाशिनी ।। का.म. १६/९७ ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

कार्यशालागोष्ठीप्रभागः

कार्तवीर्योदयमहाकाव्यस्य - शास्त्रीयं साहित्यिकञ्च विश्लेषणं ग्रन्थिभेदनञ्च

इत्यभिधानायां कार्यशालागोष्ठ्यां विभिन्नेष्वधिवेशनेषु वाल्मीकि-विद्यापीठस्थसाहित्यशिक्षणविभागेन प्रस्तुतानि कार्यशाला-पत्राणि, विद्वत्समूहद्वयप्रस्तुते ग्रन्थिभेदननिष्कर्षपत्रे चात्र समावेशितानि ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

ग्रन्थिभेदनकार्यशालापत्राणि

प्रथमकार्यशालापत्रम्

१. कथा भागीरथ्या जगति बहुपथ्यापि न तथा सतां रथ्यामध्ये विलसति कलिन्दाचलभुवः ।
भवेद्वार्ता का वा हरदयितरेवास्तुतिपदैः त्रिलोके संव्याप्तेऽर्जुनपुरि सदेयं विजयते ।। (१/२१)
प्रसङ्गः - माहिष्मतीवर्णनम् । **पाठः** - सर्वासु मातृकासु समानः । **समस्या** - अर्थबोधविषयिणी

२. जनता न नता न भूपतेरहिता नो रहिता न संपदा । नहिताः सहिता न च श्रिया नरमाना च रमा रमारतम् ।।(२/३)
प्रसङ्गः - कृतवीर्यसुशासनवर्णनम् । **पाठः** - सर्वासु मातृकासु समानः । **समस्या** - अर्थबोधविषयिणी ।

३. समयो विनयोदयोदयः स्मरतां यः स्मरतां रुचागतः । शिवदोऽशिवदो वदः श्रुतेरभवद्भावविभावनो नृणाम् ।। (२/४)
प्रसङ्गः - कृतवीर्यसुशासनवर्णनम् । **पाठः** - सर्वासु मातृकासु समानः । **समस्या** - अर्थबोधविषयिणी ।

४. स कृती प्रकृतीः शुभाकृतिः प्रशमय्याविकृतीः सदुक्तिभिः ।
चतुरङ्गबलान्वितो बली हरितो जेतुमनाः प्रतस्थिवान्।। (२/१७)
प्रसङ्गः- कृतवीर्यसुशासनवर्णनम् । **पाठः** - सर्वासु मातृकासु समानः परं **प्रशमय्याविकृतीः** इति पाठे सन्देहः।
समस्या - अर्थबोधविषयिणी

५. अपि वंशभवो गुणान्वितः धृतकोटीयुगलोऽपि तृष्णया ।
मृगयां धनुरस्य लक्षकः क्वचिदेवाप बहुप्रदान्नृपान् ।। (२/३४)
प्रसङ्गः - कृतवीर्यविजयाभियानम् । **पाठः** - सर्वासु मातृकासु समानः । **समस्या** - अर्थबोधविषयिणी ।

६. सर्वशः कुशलमस्ति मदीयं यस्य चेत्थमनिशं गुरुपादाः ।
संस्मरन्ति भविकं कथमस्य स्यान्न नव्यमतिभव्यमिह द्राक् ।। (३/१४)
प्रसङ्गः - कृतवीर्यस्य गुरुसन्निधौ प्राप्तौ तयोर्मध्ये सम्वादः ।
पाठः - क) **सर्वशः** इति अभिलेखालयस्थमातृकायाः, प्रज्ञाप्रतिष्ठानप्रकाशिनपुस्तकस्य च पाठः
ख) **सर्वराट्** इति जोहान्नेसमहोदयसम्पादितपुस्तकपाठः ।
समस्या - उचितपाठनिर्णयाधारिता ।

७. कौशिकोऽपि शतमन्युरजैषीद् भास्वतो बलिमुखानपि शत्रून् ।
भास्वतो बलिमुखोऽपि सुदृष्ट्या कौशिकीयपदमाप तदैव ।। (३/१६)
प्रसङ्गः - दत्तात्रेयाश्रमं प्राप्तस्य कृतवीर्यस्य दत्तात्रेयेण साकं संवादः
पाठः - क) **तवैव** इति प्रज्ञाप्रतिष्ठानप्रकाशितपुस्तकपाठः
ख) **तदैव** इति जोहान्नेसमहोदयसम्पादितपुस्तकपाठः;
समस्या - अर्थबोधविषयिणी, उचितपाठनिर्णयाऽऽधारिता च ।

८. इत्थमुक्तवति भूमिमहेन्द्रे प्रेमवारिधितरङ्गसदृक्षा ।
दृक्पपात विमलात्रिसुतस्य प्राक्पपात तदनूक्तिसुयुक्तिः ।। (३/२८)
प्रसङ्गः - कृतवीर्यसुशासनवर्णनम्

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

पाठः - क) **तदनूक्तिसुयुक्तिः** इति प्रज्ञाप्रतिष्ठानप्रकाशितपुस्तकपाठः
ख) **तदनूक्तिसुमुक्तिः** इति जोहान्नेसमहोदयसम्पादितपुस्तकपाठः

समस्या - उचितपाठनिर्णयाधारिता

९. श्रीहरेर्जयरवं विमुञ्चते यस्य चैककवपुः परङ्करे । पूर्वदेवपतिसुन्दरीजनाकल्पचित्रकविलोपकल्पकम् ।। (३/३१)
तैजसं वपुरिदं रमापतेश्चक्ररूपमवतीर्य्य ते गृहे । सर्वचक्रमविता न चिरेण वासराननमिवाश्रितपद्मम् ।। (३/३२)

प्रसङ्गः - पुत्रप्राप्तये गुरुं प्रार्थितवते राज्ञे कृतवीर्याय गुरोर्वरप्रदानम् । **पाठः** - सर्वासु मातृकासु समानः ।

समस्या - अर्थबोधाश्रिता

१०. श्रीहरेरभिधया घटिताख्यं धारयन् हरिणपोतमवाप । शंम्भुशीर्षवसतिं द्विजराजस्त्वत्कुलप्रथमजो नृपवर्य्यः ।।३/३९)

प्रसङ्गः - गुरोर्दत्तात्रेयस्य कृतवीर्यं प्रत्युपदेशः । **पाठः** - सर्वासु मातृकासु समानः । **समस्या** - अर्थबोधाश्रिता।

११. सन्तु चोढबलयोऽखिला नृपाः सन्तु चोढबलयोऽखिला गृहाः ।
सन्तु चोढबलयोऽखिला गृहा अस्तु दर्भवलयः करस्तव ।। (३/४२)

प्रसङ्गः - दत्तात्रेयस्य कृतवीर्यायोपदेशप्रदानम् । **पाठः** - सर्वासु मातृकासु समानः ।

समस्या - **सन्तु चोढबलयोऽखिला गृहा** इति पाठस्य द्वितीयतृतीयपादयोः समस्थितिः ।

विशेषः - तृतीयपादे **सन्तु चोढबलयोऽखिला गुहा** इति विधानं सङ्गतं स्यात्रवेति जिज्ञासा।

१२. भक्तिरेव भगवत्पदसंस्था सर्वमर्थनिवहं परिसूते । यत्र तद्द्विपदसंश्रयशक्तिः पूर्वतन्त्रनिपुणा इदमाहुः ।।(३/४३)

प्रसङ्गः - दत्तात्रेयस्य कृतवीर्यायोपदेशप्रदानम् । **पाठः** - सर्वासु मातृकासु समानः । **समस्या** - भक्तिपरकार्थस्य बोधस्तु समीचीनतया भवति, परं लक्षणापरकस्यार्थस्य बोधः कथंकारं भवतीति समस्या ।

१३. संसारिणां कापथगामिचेतो माद्यन्मतङ्गजबलं दलितुं दधानम् ।
रेखासृणिं सुमसृणामघवृन्दगोत्रप्रध्वंसनाय च पविं निजभक्तिभाजाम् ।। (४/७)

प्रसङ्गः - तपोनिरतस्य कृतवीर्यस्य नारायणमूर्तिध्यानम्

पाठः - क) **पविं निजभक्तिभाजाम्** इति प्रज्ञाप्रतिष्ठानप्रकाशितपुस्तकपाठः ।
ख) **पवित्रितभक्तिभाजाम्** इति जोहान्नेसमहोदयसम्पादितपुस्तकपाठः ।

समस्या - उचितपाठनिर्णयसम्बद्धा

१४. प्रह्लादभक्तिभरवश्यतयाप्यवश्यं कस्याप्यवश्यमुखरस्य विधिं विहस्य ।
कृत्वा मनुष्यमृगराजवपुः प्रपूर्वं तं पूर्वदेवनिवहे हतवान्पुरा त्वम् ।। (४/१८)

प्रसङ्गः - कृतवीर्यकृता भगवत्स्तुतिः

पाठः - क) **कस्याप्यवश्यमुखरस्य विधिं विहस्य** इति प्रज्ञाप्रतिष्ठाप्रकाशितपुस्तकपाठः।
ख) **कस्याप्यवश्यमुपरस्य विधिं विहस्य** इति जोहान्नेसमहोदयसम्पादितपुस्तकपाठः।

समस्या - उचितपाठनिर्णयसम्बद्धा

१५. सम्पद्गुणेन च गुणेन पुलस्त्यपौत्रं मध्येसदः परिभविष्यति ते तनूजः ।
भूतञ्च भाविनमहो कमलापवर्गात् पश्चात्करिष्यति वृषाणमुदग्रवीर्य्यः।। (४/३०)

प्रसङ्गः - कृतवीर्यतपसा प्रसन्नस्य भगवतो नारायणस्य कृतवीर्यं प्रत्युपदेशः। **पाठः** - सर्वासु मातृकासु समानः।

समस्या - अर्थबोधसम्बद्धा ।

१६. निर्याति वासरगणेऽथ मिते दधार गर्भञ्जगत्रिलयगर्भकलाप्रविष्टम् ।
भर्त्राहितञ्चलजगर्भमनोज्ञरूपा राज्ञी समस्तशुभलक्षणलक्षितेऽह्नि ।। (४/३४)

प्रसङ्गः - कृतवीर्यस्य महाराज्या गर्भधारणम्

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

पाठः - १) क) **निर्याति वासरमणेश्च मिते दधार** इति प्रज्ञाप्रतिष्ठानप्रकाशितपुस्तकपाठः ।
ख) **निर्याति वासरगणेऽथ मिते दधार** इति जोहान्नेसमहोदयसम्पादितपुस्तकपाठः।
२) क) **-लक्षितेऽह्नि** इति प्रज्ञाप्रतिष्ठानप्रकाशितपुस्तकपाठः ।
ख) **लक्षिते हि** इति जोहान्नेसमहोदयसम्पादितपुस्तकपाठः ।

समस्या - उचितपाठनिर्णयसम्बद्धा

१७. आकृष्य सर्वजगतो निरमायि किं वा धात्रा सुरूपमिति संशयकारिणी सा ।
प्रागेव चास कमलापतिमादधत्या गर्भेण किन्नु कथये सुषमाममुष्याः ।। (४/३५)

प्रसङ्गः - कृतवीर्यनिहितं वीर्यं गर्भे दधानाया राज्ञ्या वर्णनम् । **पाठः** - सर्वासु मातृकासु प्रज्ञाप्रतिष्ठानप्रकाशितपुस्तके च **सुषमा मनुष्याः** इति पाठः । **समस्या** - **सुषमा मनुष्याः** इति पाठस्यासङ्गतिः । **विशेषः** - **सुषमाममुष्याः** इति विधानं समीचीनं स्यादथवा नेति जिज्ञासा ।

१८. अथ सितसुमवस्त्रैः सिद्धिसिद्धार्थसार्थैः चलदलदलमुख्यैः पल्लवैः पूर्णकुम्भैः ।
प्रसवसमनुकूलां तां गतोऽरिष्टपृष्ठे नरपतिरतिहर्षादैक्षतारिष्टगेहे ।। (४/५३)

प्रसङ्गः - कार्तवीर्यावतारवर्णनम्

पाठः - क) **सिद्धसिद्धार्थसार्थैः** इति प्रज्ञाप्रतिष्ठानप्रकाशितपुस्तकपाठः
ख) **सिद्धिसिद्धार्थसार्थैः** इति जोहान्नेसमहोदयसम्पादितपुस्तकपाठः ।

समस्या - उचितपाठनिर्णयाधारिता

१९. दिनकृति शुचिकोणाच्छौचपत्रं गृहीत्वा गतवति शिववाहं शेखरे चेश्वरस्य ।
मृगयति मृगपृष्ठं मङ्गले मङ्गलार्थं स्थितवति परमोच्चं कर्कमारुह्य जीवे ।। (४/५४)

प्रसङ्गः - कार्तवीर्यावतरणवेलाया ग्रहस्थितिः

पाठः - क) **मृगपङ्कम्** इति प्रज्ञाप्रतिष्ठानप्रकाशितपुस्तकपाठः ।
ख) **मृगपृष्ठम्** इति जोहान्नेसमहोदयसम्पादितपुस्तकपाठः ।

समस्या - क) उचितपाठनिर्णयाधारिता
ख) **दिनकृति शुचिकोणाच्छौचपत्रं गृहीत्वा** इति वाक्यस्यार्थबोधसम्बद्धा च

२०. निमिषतनयनाङ्गैरप्सरोभ्यो विशेषानभिनयपरिवेशात्कुण्डलैः कर्णपाशैः ।
भुजगपतिसुताभ्यो दर्शयन्त्योऽज्जुकास्ताः सरसललितनाट्यन्दर्शयामासुरुच्चैः ।।(४/७३)

प्रसङ्गः - कार्तवीर्येऽवतीर्णेऽज्जुकानां नृत्यम्

पाठः - क) **अभिनयपरिबलात्कुण्डलैः कर्णपाशैः** इति प्रज्ञाप्रतिष्ठानप्रकाशितपुस्तकपाठः।
ख) **अभिनयपरिबलात्कुण्डलैः कर्णपाशैः** इति जोहान्नेसमहोदयसम्पादितपुस्तकपाठश्च।

समस्या - छन्दोलक्षणहीनत्वात् पाठेऽस्मिन् अप्रामाणिकता

विशेषः - **अभिनयपरिवेशात्** इति कर्तुं शक्यतेऽथवा नेति जिज्ञासा

द्वितीयकार्यशालापत्रम्

१. एवमेव उपनीय बालकं पालकं त्रिजगतोऽत्रिजो गतः । तेन साकमनुकूलचेतसा प्रेषितेन पठनाय जन्मदा ।।(५/६३)

प्रसङ्गः - कार्तवीर्यस्य गुरुकुलाय प्रस्थानम् । **पाठः** - सर्वासु मातृकासु समानः । **समस्या** - अर्थबोधसम्बद्धा।

२. तर्ककर्कशकशातिशातनाशातिताखिलपदार्थसंशयः। अक्षिपादकणभक्षपक्षयोर्लक्ष्यलक्षणबुधो न्यलक्षि सः ।। (५/८१)

प्रसङ्गः - कृतवीर्यस्य विद्याध्ययनम्

पाठः - क) **लक्ष्यलक्षणबुधोपलक्षितः** इति प्रज्ञाप्रतिष्ठानप्रकाशितपुस्तकपाठः

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

ख) **लक्ष्यलक्षणबुधो न्यलक्षि सः** इति जोहान्नेसमहोदयसम्पादितपुस्तकपाठः

समस्या - पाठनिर्णयसम्बद्धा अर्थबोधसम्बद्धा च

३. तपनतापमपाकुरुते शशी प्रतिनिशं समुदित्वरदीधितिः ।
तपति तस्य तपो महिमातपो निशिदिवास्म तपो भुवनादिहा ।। (६/३०)

प्रसङ्गः - कृतवीर्यतपोवर्णनम्

पाठः - क) **भुवनादिह** इति प्रज्ञाप्रतिष्ठानप्रकाशितपुस्तकपाठः

ख) **भुवनादिहा** इति जोहान्नेसमहोदयसम्पादितपुस्तकपाठः

समस्या - उचितपाठनिर्णयसम्बद्धा अर्थबोधसम्बद्धा च

४. यदि च जातु न जातुगणेश्वरो वृषविधेर्विदधीत तदा भवेत् ।
प्रथममेव स पुण्यजनाभिधा कनकसन्ततितीव्रतपोहुतिः ।। (६/३९)

प्रसङ्गः - कृतवीर्यतपोवर्णनम् । **पाठः** - सर्वासु मातृकासु समानः । **समस्या** - अर्थबोधसम्बद्धा ।

५. डिण्डीरपिण्डाभयशःकदम्बैर्लोकत्रये पाण्डुरताङ्गते ते ।
पञ्चास्ययुक्त्या पुरहा भवानीमामन्त्र्य विज्ञापयतां सचण्डि ।। (७/२९)

प्रसङ्गः - कार्तवीर्याय ब्रह्मण उपदेशः । **पाठः** - सर्वासु मातृकासु समानः । **समस्या** - अर्थबोधाश्रिता ।

६. थूर्वप्रजानां हृदि जातमात्रं सर्वज्ञतासर्वगरीरताभ्याम् ।
अकार्य्यमेतत्क्षण एव तासां पुरोभवन् किल्विषवृन्दतोऽथूः ।। (७/३३)

प्रसङ्गः - कार्तवीर्याय ब्रह्मण उपदेशः । **पाठः** - सर्वासु मातृकासु समानः । **समस्या** - अर्थबोधाश्रिता ।

७. वर्षन्ति तत्र विबुधाः स्म जलं सुमन्त्रैः पूर्वं ततश्च कनकानि बहूनि तेषु ।
धाराधरा जगति तस्य च जीवनानि तद्वैरिराजवनिताक्षिदितानि च द्राक् ।। (८/३६)

प्रसङ्गः - कार्तवीर्यस्य राज्याभिषेकः

पाठः - क) **तद्वैरिराज वनिताक्षदितानि च** इति प्रज्ञाप्रतिष्ठानप्रकाशितपुस्तकपाठः

ख) **तद्वैरिराजवनिताक्षिदिनानि च द्राक्** इति जोहान्नेसमहोदयसम्पादितपुस्तकपाठः

समस्या - उचितपाठनिर्णयसम्बद्धा अर्थबोधसम्बद्धा च ।

८. हस्तं विहाय तव खड्गलतां प्रयातु तन्मुष्टिबन्धनमुपैतु मनः प्रहाय ।
बाणेषुपक्षपतनोत्थरयश्च लोकं त्यक्त्वा युगातिशरणं श्रयतां भुजौ ते ।। (८/५६)

प्रसङ्गः - कृतवीर्यस्य कार्तवीर्याय नीत्युपदेशः । **पाठः** - सर्वासु मातृकासु समानः । **समस्या** - अर्थबोधसम्बद्धा।

९. आकार्य्यजन्म तव न स्फुटतां प्रयातु मन्त्रः प्रयाति यदि तत्पुरतो मृषोक्त्या ।
आमूलमेव सकलं समलीकयेथाः त्रिश्रीप्रयुक्तिरहिते विहिता यथा स्यात् ।। (८/६०)

प्रसङ्गः - कार्तवीर्याय कृतवीर्योपदेशवर्णनम्

पाठः - क) **तिश्रिप्रयुक्तिरहिते** इति प्रज्ञाप्रतिष्ठानप्रकाशितपुस्तकपाठः

ख) **त्रिश्रिप्रयुक्तिरहिते** इति जोहान्नेसमहोदयसम्पादितपुस्तकपाठः

परं तिसृणां श्रियां बोधकत्वमङ्गीकृत्य **त्रिश्री**ति दीर्घान्तः पाठ उपरि प्रदत्तः

समस्या - उचितपाठनिर्णयसम्बद्धा अर्थबोधसम्बद्धा च

१०. अर्कोपलस्य पयसा स्नपनेऽपि मष्या श्वैत्यं यथा तव नरेन्द्रधुराधरस्य ।
सङ्गे मुहुस्सदसतोरपि न व्यपैतु स्वच्छान्तराविरतखेलनचिद्विलासः ।। (८/८०)

प्रसङ्गः - कार्तवीर्याय कृतवीर्योपदेशवर्णनम्

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

पाठः - क) **स्नपनेऽपि मध्या** इति प्रज्ञाप्रतिष्ठानप्रकाशितपुस्तकपाठः
ख) **स्नपनेऽपि मध्ये** इति जोहान्नेसमहोदयसम्पादितपुस्तकपाठः ।

समस्या - उचितपाठनिर्णयसम्बद्धा अर्थबोधसम्बद्धा च

११. संवर्त्तवर्द्धितपयः पटगुण्ठनाप्तक्षोणीसमुद्वहनसौख्यजडोरुकाण्डः।
प्रालेयशैत्यमिषवारितधातृतर्को भव्यन्तनोतु गिरिराजवपुः<u>किटिस्ते</u> ।। (८/९१)

प्रसङ्गः - कार्तवीर्याय कृतवीर्योपदेशवर्णनम् । **पाठः** - **किरीटी** इति सर्वासु मातृकासु समानः । **समस्या** - परमर्थबोधे **किरीटि**पदस्यान्वयो न भवति । **विशेषः** - अत एव गिरिराजवपुरूपो भगवान् वराह इत्यर्थबोधाय किटिशब्दस्योपरि प्रयोगः कृतः, विद्वांसः यथार्थं निभालयन्तु ।

१२. <u>जलजञ्च</u> तदाननं समं कमलावसतया कथं भवेत् । मधुपैः परिचुम्बितं रसाद्<u>विधिपत्नीप्रियवासभावितम्</u> ।। (९/५७)

प्रसङ्गः - कनकप्रभासौन्दर्यवर्णनम्

पाठः - १) क) **सजलञ्च** इति प्रज्ञाप्रतिष्ठानप्रकाशितपुस्तकपाठः
ख) **जलजञ्च** इति जोन्सनमहोदयसम्पादितपुस्तकपाठः
२) क) **विधिपत्नीप्रियभासभावितम्** इति प्रज्ञाप्रतिष्ठानप्रकाशितपुस्तकपाठः
ख) **विधिपत्रिप्रियवासभावितम्** इति जोहान्नेसनिर्दिष्टं पाठान्तरम्

समस्या - उचितपाठनिर्णयसम्बद्धा

१३. शुकतुण्डमदो मुखाम्बुजं सरसं वर्णयतीति मत्सरि ।
शुकतुण्डमुवास तत्र किं <u>विलसद्गन्धवहाच्छलातपरम्</u> ।। (९/६८)

प्रसङ्गः - कनकप्रभासौन्दर्यवर्णनम्

पाठः - क) **विलसद्गन्धवहाज् छलात् परम्** इति प्रज्ञाप्रतिष्ठानप्रकाशितपुस्तकपाठः
ख) **विलसद्गन्धवहाच्छलात् परम्** इति जोहान्नेसमहोदयसम्पादितपुस्तकपाठः

समस्या - उचितपाठनिर्णयाश्रिता

१४. यातेषु जङ्घाकरिकेषु भोजश्शुद्धान्तशुद्धान्तरचारशुद्धम् ।
मां प्रेषयामास निमन्त्रणार्थं <u>सहेह</u> पुत्रीप्रणयावलोकैः ।। (९/१०९)

प्रसङ्गः - दूतकार्तवीर्यसंवादः

पाठः - क) **सदेहपुत्रीप्रणयावलोकैः** इति प्रज्ञाप्रतिष्ठाप्रकाशितपुस्तकपाठः
ख) **सहेह पुत्रीप्रणयावलोकैः** इति जोहान्नेसमहोदयसम्पादितपुस्तकपाठः

समस्या - उचितपाठनिर्णयाश्रिता

१५. शुद्धान्तप्रणयप्रचारनिपुणक्षोणीसुरेणोहितं दृष्टं भोजकुलावतंसतनुजाप्रत्यङ्गमानोज्ञकम् ।
यत्तत्कानकिभूभुजः <u>श्रुतिपुटद्वारानिपीतात्मनः</u> सौख्यक्षेमपयोधिमग्नमननोत्संख्यावतस्तद्द्विजात् ।। (९/११३)

प्रसङ्गः - कनकप्रभासौन्दर्यश्रवणजन्या कार्तवीर्यतृप्तिः

पाठः - क) **श्रुतिपुटद्वारानिपीतात्मनः** इति प्रज्ञाप्रतिष्ठानप्रकाशितपुस्तकपाठः
ख) **श्रुतिपुटद्वारा निपीतं मनः** इति जोहान्नेसमहोदयसम्पादितपुस्तकपाठः

समस्या - उचितपाठनिर्णयाश्रिता अर्थबोधसम्बद्धा च ।

तृतीयकार्यशालापत्रम्

१. भस्मनो मम पराद्य दुर्दशा <u>का भविष्यति शठेति मा दृपः</u> ।
वायवीयमपि वारुणञ्च किं वेत्ति सोऽस्त्रमवनीपतिः प्रभुः ।। (१०/७८)

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

प्रसङ्गः - वियोगपीडायां कनकप्रभाकृतं मदनतर्जनम्

पाठः - क) **का भविष्यति शठेति मा दृपः** इति प्रज्ञाप्रतिष्ठानप्रकाशितपुस्तकपाठः

ख) **का भविष्यति शठेति मा दृशः** इति जोहान्नेसमहोदयसम्पादितपुस्तकपाठः

संमस्या - उचितपाठसम्बद्धा

२. इत्थमुक्तिमुपहत्य मञ्जुलां प्रस्थितं द्विजमुवाच भूपतिः ।
एवमस्तु भवतामनुग्रहाद् यातभद्रमुभयत्र धत्त भोः ।। (१०/८६)

प्रसङ्गः - भोजदूतस्य कार्तवीर्येण स्वयंवरसम्बद्धसंवादानन्तरं गृहप्रस्थानम्

पाठः - क) **द्विजवरं समुवाच स भूपतिः** इति प्रज्ञाप्रतिष्ठानप्रकाशितपुस्तकपाठः

ख) **प्रस्थितं द्विजमुवाच भूपतिः** इति जोहान्नेसमहोदयसम्पादितपुस्तकपाठः

समस्या - पाठनिर्णयसम्बद्धा

३. दानवारिपदमावहन्मुदा मस्तकेन मणि भाति भास्वता ।
कालनागनिकरः ससैन्यको देशमाप रमणन्ततः शनैः ।। (१०/९५)

प्रसङ्गः - कार्तवीर्यस्य कनकप्रभायाः स्वयंवरसमारोहे सहभागितायै माङ्गलिकं प्रस्थानम्

पाठः - क) **मस्तकेन मणि भाति भास्वता** इति प्रज्ञाप्रतिष्ठानप्रकाशितपुस्तकपाठः

ख) **मस्तकेन मणिभातिभास्वता** इति जोहान्नेसमहोदयसम्पादितपुस्तकपाठः

समस्या - उचितपाठनिर्णयसम्बद्धा अर्थबोधसम्बद्धा च

४. गगनतलसुतल्पे रात्रिचन्द्रै यथेच्छङ्गलदुडुसुममालज्ञातसर्वाङ्गसङ्गम् ।
रतिसुखमनुभूय क्षीणशुक्रेऽद्य काले द्रुतमुदसितहस्ते निष्प्रभौ सम्प्रयातः ।। (११/११)

प्रसङ्गः - कार्तवीर्यस्य यात्राकाले समुपस्थितायाः सायंसन्ध्याया वर्णनम् । **पाठः - द्रुतमुदसितहस्ते निष्प्रभौ सम्प्रयातः** इति सर्वासु मातृकासु समानः पाठः । **समस्या -** पाठे एव सन्देहः । **विशेषः -** अत्र **द्रुतमुदसितहस्तौ निष्प्रभौ सम्प्रयातः** इति रूपेण पाठपरिस्कारः कर्तुं शक्यतेऽथवा नेति जिज्ञासा ।

५. क्षिपति मृदुपदानि प्रेक्षते रम्यभावं वितरति ससुवर्णां भूरिशो गामिदानीम् ।
विरचयति कलापं मुक्तकञ्चातिशिल्पात्त्रपति निकुरुम्बं काव्यकर्ता च धीरः ।। (११/४७)

प्रसङ्गः - कार्तवीर्ययात्रायां समुपस्थितायाः प्रातःसन्ध्याया वर्णनक्रमे काव्यकर्तुर्भूपस्य च वर्णनम् । **पाठः -** निकुरुम्बम् इति सर्वासु मातृकासु समानः पाठः । **समस्या - निकुरुम्बम्** इति पाठे सन्देहः ।

६. मनसार्जुनमेव मेनिरे भयतोऽपार्थमिमे नराधिपाः । युधि भीममहो सदागतिं ननु नासत्यभवं मनोरमम् ।। (११/८६)

प्रसङ्गः - स्वयंवरसमारोहे समागतस्य कार्तवीर्यस्य दर्शनेन तद्विषये राज्ञां मनसि समुत्पन्नानां विचाराणां वर्णनम्

पाठः - क) **भयतोऽपार्थमिमे नराधिपाः** इति प्रज्ञाप्रतिष्ठानप्रकाशितपुस्तकपाठः

ख) **भयतो पार्थमिमे नराधिपाः** इति जोहान्नेसमहोदयसम्पादितपुस्तकपाठः

समस्या - उचितपाठनिर्णयसम्बद्धा

७. कुलशीलवपुर्वयोगुणैरनवद्यैः कनकप्रभोचितम् । प्रविलोक्य जहुस्स्वयंवरं नतमाशालतिकान्विता नृपाः ।। (११/८७)

प्रसङ्गः - स्वयंवरसमारोहे समागतस्य कार्तवीर्यस्य दर्शनेन तद्विषये राज्ञां मनसि समुत्पन्नानां विचाराणां वर्णनम्

पाठः - क) **नतमाशालतिकान्विता नृपाः** इति प्रज्ञाप्रतिष्ठानप्रकाशितपुस्तकपाठः

ख) **नतमाशालतिकासिता नृपाः** इति जोहान्नेसमहोदयसम्पादितपुस्तकपाठः

समस्या - उचितपाठनिर्णयसम्बद्धा

८. बहुमानमुवाह संस्पृशन् पवमानः कनकप्रभावपुः। परभावविदर्जुनोद्भवाद्भयतस्साधुधिया स्वयंवरे ।। (११/१०३)

प्रसङ्गः - कनकप्रभासौन्दर्यदर्शनेन तत्र सतृष्णः पवनोऽपि कार्तवीर्यभिया कनकप्रभावपुः सम्मानितवानिति विषये

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

आधारितः

पाठः - १) वहमानमुवाह इति सर्वासु मातृकासु समानः पाठः

२) क) **भरभाववविदर्जुनोद्धवाद्** इति प्रज्ञाप्रतिष्ठानप्रकाशितपुस्तकपाठः

ख) **परभाववविदर्जुनोद्धवाद्** इति जोहान्नेसमहोदयसम्पादितपुस्तकपाठः

समस्या - उचितपाठनिर्णयाधारिता

विशेषः - प्रथमपादे **बहुमानमिति** प्रयोगः समुचितोऽथवा नेति जिज्ञासा

तृतीयपादे **परभाववविदर्जुनोद्धवाद्** इति जोहान्नेसमहोदयसम्पादितपुस्तकपाठः समुचितोऽथवा नेति जिज्ञासा ।

९. दमयति दमयन्ती स्वच्छभासां वितानैस्तरलयति गुणानां सम्पदा शैलजा ताम् ।

श्लथयति परगर्वं वेदवत्या अखेदाद् दलयति मदमिद्धं साधु मन्दोदरीस्थम् ।। (११/१११)

प्रसङ्गः - कनकप्रभासौन्दर्यवर्णनम्

पाठः - क) **श्लथयति हानसर्वं वेदवत्या अखेदात्** इति प्रज्ञाप्रतिष्ठानप्रकाशितपुस्तकपाठः

ख) **श्लथयति यमगर्वं वेदवत्या अखेदात्** इति जोहान्नेसमहोदयसम्पादितपुस्तकपाठः

समस्या - पाठद्वयमेव दोषग्रस्तम्, तत्समाधानाय परगर्वं करणीयमथवा अन्यत् किमपि ?

१०. सम्पन्नभोगसुभगान्नु भूरिसेनान्नित्यं भुनक्त्यपयथायमुदग्रवीर्यः ।

दृष्टार्थकान्नियमतः प्रधनावतारे तारेशजिष्णुमुखि ! भोस्सखि पश्यसि त्वम् ।। (१२/१९)

प्रसङ्गः - स्वयंवरप्रसङ्गे मधुराधीशवर्णनम्

पाठः - क) **भूरिसेनान्नित्यं भुनक्त्यपयथायमुदग्रवीर्यः** इति प्रज्ञाप्रतिष्ठानप्रकाशितपुस्तकपाठः

ख) **शूरिसेनान्नित्यं भुनक्त्युपयथायमुदग्रवीर्यः** इति जोहान्नेसमहोदयसम्पादितपुस्तकपाठः

समस्या - पाठद्वयमेव दोषग्रस्तम् । **नित्यं भुनक्त्यपयथायमुदग्रवीर्यः** इति वाक्यस्य स्थाने **नित्यं भुनक्त्युभयथायमुदग्रवीर्यः** इति पाठ उपयुक्तः स्यादिति जिज्ञासा ।

चतुर्थकार्यशालापत्रम्

१. अस्मै नृपाः प्रवितरन्ति करंद्विषन्तः सेवा रता अपि सदा समितिस्थिताय ।

हारावयुक्तगलकान् विदधातिचैतान् एष क्षणात्क्षितिपतेः कृतसर्वपक्षः ।। (१२/३२)

प्रसङ्गः - वाराणसीपतिवर्णनम्

पाठः - क) **असौ नृपाः......समितिस्थितायाः। हारावयुक्तगलकान्** इति प्रज्ञाप्रतिष्ठानप्रकाशितपुस्तकपाठः

ख) **अस्मै नृपाः ...... समितिस्थिताय। हारावयुक्तगलकान्** इति राष्ट्रियाभिलेखालयस्थ-मातृकापाठः

ग) **अस्मै नृपाः .... समितिस्थिताय। हाराव्ययुक्तगलकान्** इति जोहान्नेसमहोदयसम्पादितपुस्तकपाठः

समस्या - उचितपाठनिर्णयसम्बद्धा

२. त्वया प्रतिज्ञेयमकारि किंवा नालोकनीयोऽन्ययुवा मयेति ।

जातो न भेदप्रतियोगितावान् मया ततः खेदमिमं वहामि ।। (१२/१२६)

प्रसङ्गः - स्वयंवरविधौ महेन्द्रभूपवर्णनम्

पाठः - क) **जातो न भेदप्रतियोगितानाम्** इति प्रज्ञाप्रतिष्ठानप्रकाशितपुस्तकपाठः

ख) **ज्ञातो न भेदप्रतियोगितावान्** इति राष्ट्रियाभिलेखालयस्थमातृकापाठः

ग) **ज्ञाता न भेदप्रतियोगिता वाम्** इति जोहान्नेसमहोदयसम्पादितपुस्तकपाठः

समस्या - उचितपाठनिर्णयसम्बद्धा

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

३. सरोजकोशाभमुरोजमाप्ता तस्या उरः स्पर्शनिदेशिमन्त्रम् ।
विचारयामास विशेषविज्ञो यथार्थतः स्वार्थपरत्वमेव।। (१४/८०)
प्रसङ्गः – कार्तवीर्यकनकप्रभाविवाहः । **पाठः** – सर्वत्र समानः पाठः । **समस्या** – अर्थबोधसम्बद्धा ।

४. अबालबालाच्चसपत्नजाया पयस्सरस्तीरमुपेत्य केचित् ।
सिताचलच्छायवृतं सुखेन भुजिक्रियां मिष्टतरां प्रचक्रुः ।। (१४/९५)
प्रसङ्गः – वैवाहिकभोजनवर्णनम् । **पाठः** – सर्वासु मातृकासु समानः पाठः । **समस्या** – अर्थबोधसम्बद्धा ।

५. आलोक्यालिकुचं राजालिकुचन्ते पचेलिमम् । स्मरति स्मरतीहाग्रे स्मरतीत्ररतिः क्षणम् ।।
इत्युक्त्वाह क्षितिमिलत्स्वयमश्वत्थपत्रकम् । राज्ञःकृते त्वमुत्थाप्य वदेति नृपभोगिनी ।। (१५/९१-९२)
प्रसङ्गः – द्वीपद्वीपान्तरभ्रमणक्रमे कार्तवीर्यस्य सुन्दरीभिः सह विहारः । **पाठः** – सर्वासु मातृकासु समानः पाठः। **समस्या** – अर्थबोधाश्रिता ।

६. व्याहरन्तीमिति प्राह कलिकाकेलिकामधुक् । मतान्ता रजसा बाह्या रजसा यूथिकेतिनः । (१५/९५)
प्रसङ्गः – पूर्ववत् । **पाठः** – सर्वासु मातृकासु समानः पाठः । **समस्या** – अर्थबोधाश्रिता ।

७. द्विडीवधासप्तजिह्वस्य पुरो माहिष्मतीपतेः । इष्मजिह्वो नृपो जातः प्रह्व आह्वानमात्रतः ।। (१५/१४४)
प्रसङ्गः – कार्तवीर्यस्य सुभद्रवर्षयात्रा । **पाठः** – सर्वासु मातृकासु समानः पाठः । **समस्या** – अर्थबोधविषयिणी।

८. एतत्पूर्वादिकाष्ठास्थपुराधीशाः सुरा अमी । समाजयन्ते मा पश्य मन्दारकुसुमोत्करैः ।। (१५/२०४)
प्रसङ्गः – कार्तवीर्यस्य द्वीपद्वीपान्तरभ्रमणम् । **पाठः** – सर्वासु मातृकासु समानः पाठः । **समस्या** – अर्थबोधाश्रिता।

९. सवाजपेयं ससवाजपेयं ध्यायन्ति चक्रे कृतवीर्यसूनुः ।
सपुण्डरीकाक्षनिविष्टचेताः सत्पुण्डरीकान्यमितानि चक्रे ।। (१६/४५)
प्रसङ्गः – कार्तवीर्यस्य यज्ञसम्पादनम् । **पाठः** – सर्वासु मातृकासु समानः पाठः । **समस्या** – अर्थबोधाश्रिता।

१०. संबिभ्रतोऽजातनयाँश्च शृङ्गं सुधारसास्वादकृतोऽनुवेलम् ।
वृषानुकूलस्थितिमादधानान् न मन्यते को विबुधान्न मादृक् ।। (१७/२४)
प्रसङ्गः – कुकविनिन्दा । **पाठः** – सर्वासु मातृकासु समानः पाठः । **समस्या** – अर्थबोधाश्रिता ।

उक्तानां चतुर्णां कार्यशालापत्राणां समस्यामादाय सहभागिभिर्विद्वद्भिर्वर्गद्वये स्थित्वा ग्रन्थिभेदनं कृतम् । ग्रन्थिभेदनस्य निष्कर्षोऽधोनिर्दिष्टो वर्तते ।

ग्रन्थिभेदनम्

'क'समूहेन कृतं ग्रन्थिभेदनम्

कार्यशालागोष्ठ्यां विदुषां समयद्वयं क्रियाशीलमासीत् । 'क'समूहस्य संयोजकः डा. टीकारामपन्थिमहोदयः, 'ख'समूहस्य संयोजकः प्रा. सिद्धिनाथगौतममहोदयश्चास्ताम् । अत्र 'क'समूहस्य संयोजकेन डा. टीकारामपन्थिमहाभागेन प्रतिनिधिमूलकतया प्रस्तुतो ग्रन्थिभेदननिष्कर्ष उपस्थाप्यते ।

प्रथमकार्यशालापत्रस्य ग्रन्थिभेदनम्

१. कथा भागीरथ्या जगति बहुपथ्यापि न तथा सतां रथ्यामध्ये विलसति कलिन्दाचलभुवः ।
भवेद्वार्ता का वा हरदयितरेवास्तुतिपदैः त्रिलोके संव्याप्तेऽर्जुनपुरि सदेयं विजयते ।। (१/२१)

अर्जुनपुरि – अर्जुनस्य पूः, तस्याम् । समासान्तविधेरनित्यत्वात् – अप्रत्ययो न भवति । संव्याप्ते इति- अर्जुनपुरि- इत्यस्य न विशेषणम् । **इयं विजयते** = रेवा सर्वोत्कृष्टा वर्तते ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

२. **जनता न नता न भूपतेरहिता नो रहिता न संपदा ।**
नहिताः सहिता न च श्रिया नरमाना च रमा रमारतम् ।।(२/३)

जनता = प्रजा, **ननता** = नम्रतारहिता, **न** = नासीत्, **भूपतेः** = राज्ञः, **अहिता** = अहितकारिणी, **नो** = नासीत्, **संपदा रहिता** = ऐश्वर्येण हीना नासीत्, **श्रिया**= सम्पदा, सहिता सा, **नहिता**= जनानामहितकारिणी, **न**= नासीत्, **नरमाना**= नरैः पूजिता, **चरमा रमा** = सर्वोत्कर्षसम्पन्ना अन्तिमा राजश्रीः, **तम्** = भूपालम्, **आर**= गता । अत्र जनता इति एकवचनं प्रयुक्तम्, बहुवचनान्तमपि, अनेकप्रदेशनिवासिनां कृते प्रयोक्तुं शक्यते ।

३. **समयो विनयोदयोदयः स्मरतां यः स्मरतां रुचागतः ।**
शिवदोऽशिवदो वदः श्रुतेरभवद्भावविभावनो नृणाम् ।। (२/४)

विनयोदयोदयः – विनयस्य उदयः – विनयोदयः, विनयोदयस्य उदयो यस्मात् सः = नम्रतोदयप्रकाशकः, **समयः**= आचारो नियमो वा, **स्मरताम्** = स्मरणकर्तॄणाम्, **स्मरताम्** = कन्दर्पताम्, **रुचा** = कान्त्या, **आगतः**= प्राप्तः । **नृणाम्** = जनानाम्, **भावविभावनः** = हार्दाभिप्रायविचारणशीलः, **श्रुतेः** = वेदस्य, **वदः** = वक्ता, **अशिवदः- अशिवम्** = अकल्याणम्, **द्यति** = खण्डयति (दो अवखण्डने) इति अशिवदः, **शिवम्** = कल्याणम्, ददातीति शिवदः, अभवत् ।

४. **स कृती प्रकृतीः शुभाकृतिः प्रशमय्याविकृतीः सदुक्तिभिः ।**
चतुरङ्गबलान्वितो बली हरितो जेतुमनाः प्रतस्थिवान् ।। (२/१७)

अविकृतीः – अविद्यमाना विकृतयो यासां ताः – अविकृतयः, ताः = विकाररहिताः, **प्रकृतीः** = प्रजाः (जनान्) **सदुक्तिभिः** = सत्यवाग्भिः, **प्रशमय्य**= शमयित्वा, शान्तिप्रदानपूर्वकं सान्त्वयित्वा, **हरितः** = दिशः, **जेतुमनाः** = विजिगीषुः, **प्रतस्थिवान्** = प्रतस्थे ।

५. **अपि वंशभवो गुणान्वितः धृतकोटीयुगलोऽपि तृष्णया ।**
मृगयां धनुरस्य लक्षकः क्वचिदेवाप बहुप्रदान्नृपान् ।। (२/३४)

वंशभवः - वंशाद् भवः उत्पत्तिर्यस्य सः = वंशनिर्मितः, **गुणान्वितः** - गुणेन अन्वितः = मौर्वीयुक्तः, **धृतकोटीयुगलः**- धृतं कोटीयुगलं येन सः = अटनीद्वितयसंवलितः, **तृष्णया** = पिपासया, **मृगयाम्** = मृगव्यताम्, **लक्षकः** = लक्ष्यकृत्, **अस्य**= नृपस्य, **धनुः** = चापः, धनुशब्दः, उकारान्तः पुंसि वर्तते । **धनुषा च धनुं विदुः** इति द्विरूपेषु विश्वकोशः, **धनुर्वंश-विशुद्धोऽपि निर्गुणः किं करिष्यति** (धन्वन्तरिरित्याहुर्विद्वांसः)। मृगयां लक्षयिष्यन् (निकटोत्तरकाले अभिमानं करिष्यन्) नृपधनुः, बहुप्रदान् काँश्चन नृपान् प्राप । भविष्यदर्थे ण्वुलो विधानात् **मृगयां लक्षकः** इति द्वितीया विभक्तिः । सामान्यार्थे ण्वुलि तु **मृगयायाः लक्षकः** इति भवितुमर्हति । विजयाभियानोन्मुखे भूपे कृतवीर्ये केचन स्वल्पा नृपा आत्मसमर्पणं कृतवन्तः, करप्रदत्वं स्वीकृत्य रूप्यकाणि ददुः । अस्मिन्नभिप्राये **मृगयां लक्षकः** इत्यत्र द्वितीयाविभक्तेः साधुता । **धनुरिवाजनि चक्रः** इति श्रीहर्षः ।

६. **सर्वशः कुशलमस्ति मदीयं यस्य चेत्थमनिशं गुरुपादाः ।**
संस्मरन्ति भविकं कथमस्य स्यात्र नव्यमतिभव्यमिह द्राक् ।। (३/१४)

जोन्सनमहोदयसम्पादितपुस्तके **सर्वराट्** इति पदे वर्तमानेऽपि राष्ट्रियाभिलेखालयस्थमातृकायां वर्तमानः **सर्वशः** इति पाठः समुचितः ।

७. **कौशिकोऽपि शतमन्युरजैषीद् भास्वतो बलिमुखानपि शत्रून् ।**
भास्वतो बलिमुखोऽपि सुदृष्ट्या कौशिकीयपदमाप तदैव ।। (३/१६)

प्रज्ञाप्रतिष्ठानप्रकाशितपुस्तके तदैव इति पाठे वर्तमानेऽपि जोहान्नेसमहोदयसम्पादितपुस्तके वर्तमानः **तवैव** इति पाठः समुचितः ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

८. इत्थमुक्तवति भूमिमहेन्द्रे प्रेमवारिधितरङ्गसदृक्षा ।
दृक्पपात विमलात्रिसुतस्य प्राक्पपात तदनूक्तिसुयुक्तिः ।। (३/२८)

विमला = निर्मला, प्रेमवारिधितरङ्गसदृक्षा - प्रेमवारिधेः तरङ्गेण - सदृक्षा = प्रणयसागरोर्मितुल्या, अत्रिसुतस्य= दत्तात्रेयस्य, दृक्, प्राक्= पूर्वं प्रपात, तदनु= तदनन्तरम्, उक्तेः सुयुक्तिः = वाक्सुयोगः, पपात। अतोऽत्र सुयुक्तिरिति पाठः समुचितः ।

९. श्रीहरेर्जयरवं विमुञ्चते यस्य चैककवपुः परङ्करे ।
पूर्वदेवपतिसुन्दरीजनाकल्पचित्रकविलोपकल्पकम् ।।
तैजसं वपुरिदं रमापतेश्चक्ररूपमवतीर्य्य ते गृहे ।
सर्वचक्रमविता न चिरेण वासराननमिवाश्रितपद्मम् ।। ३/३१-३२)

यस्य चक्रस्य परम्= श्रेष्ठम्, एककवपुः = एकं शरीरम्, श्रीहरेः = श्रीविष्णोः, करे = हस्ते, जयरवम्= जयध्वनिं विमुञ्चते, सर्वचक्रम् = सर्वं राष्ट्रम्, अविता = पालयिता ।

१०. श्रीहरेरभिधया घटिताख्यं धारयन् हरिणपोतमवाप ।
शम्भुशीर्षवसतिं द्विजराजस्त्वत्कुलप्रथमजो नृपवर्य्यः ।।३/३९)

हरिणपोतशब्दो विष्णुवाचकहरिशब्दघटितो वर्तते । हरिणपोतम् = शशम्, धारयन्, द्विजराजः = चन्द्रः, शम्भु-शीर्षवसतिम् = शिवशिरोनिवासं प्राप ।

११. सन्तु चोढबलयोऽखिला नृपाः सन्तु चांढबलयोऽखिला गृहाः ।
सन्तु चोढबलयोऽखिला गृहा अस्तु दर्भवलयः करस्तव ।। (३/४२)

१) ऊढबलयः - ऊढाः = गृहीता बलयो भागधेया येषान्ते = गृहीतभागधेया नृपाः ।
२) ऊढबलयः - सम्पादितभूतयज्ञाः, गृहाः = प्रजागृहाः ।
३) ऊढबलयः - सञ्चितपूजोपकरणाः, गृहाः = देवालयाः ।

१२. भक्तिरेव भगवत्पदसंस्था सर्वमर्थनिवहं परिसूते ।
यत्र तद्द्विपदसंश्रयशक्तिः पूर्वतन्त्रनिपुणा इदमाहुः ।। (३/४३)

व्याकरणशास्त्रे प्रकृतिप्रत्ययौ अपि अर्थबोधकत्वात् पदत्वेन व्यवह्रियेते, भज् + ति - भक्तिः, अत्र द्विपद-संश्रयशक्तिः- भजनकृतिरूपा वर्तते ।

१३. संसारिणां कापथगामिचेतो माद्यन्मतङ्गजबलं दलितुं दधानम् ।
रेखासृणिं सुमसृणामघवृन्दगोत्रप्रध्वंसनाय च पविं निजभक्तिभाजाम् ।। (४/७)

अस्मिन् पद्ये जोन्सनमहोदयसम्पादितपुस्तकपाठे पवित्रितनिजभक्तिभाजाम् इति पदे वर्तमानेऽपि अभिलेखालयस्थ-मातृकायां वर्तमानः पविं निजभक्तिभाजाम् इति पाठः समुचितः । पविम् = वज्रमित्यर्थः ।

१४. प्रह्लादभक्तिभरवश्यतयाप्यवश्यं कस्याप्यवश्यमुखरस्य विधिं विहस्य ।
कृत्वा मनुष्यमृगराजवपुः प्रपूर्वं तं पूर्वदेवनिवहे हतवान्पुरा त्वम् ।। (४/१८)

अस्मिन् पद्ये कस्याप्यवश्यमुपरस्य इतिपाठस्य स्थाने कस्याप्यवश्यमुखरस्य इति पाठः समुचितः ।

१५. सम्पद्गुणेन च गुणेन पुलस्त्यपौत्रं मध्येसदः परिभविष्यति ते तनूजः ।
भूतञ्च भाविनमहो कमलापवर्गात् पश्चात्करिष्यति वृषाणमुदग्रवीर्य्यः ।। (४/३०)

सम्पद्गुणेन = ऐश्वर्यनयशौर्यप्रज्ञाराज्यलक्ष्म्यादिगुणसमूहेन, गुणेन = मौर्व्या च, कमलापवर्गात् = राजलक्ष्मीरूपफल-प्राप्तेः पश्चात् भूतं भाविनञ्च वृषाणम् = इन्द्रं करिष्यति ।

१६. निर्याति वासरगणेऽथ मिते दधार गर्भञ्जगन्निलयगर्भकलाप्रविष्टम् ।
भर्त्राहितञ्चलजगर्भमनोज्ञरूपा राज्ञी समस्तशुभलक्षणलक्षितेऽह्नि ।। (४/३४)

अत्र वासरगणेऽथमिते इति, लक्षितेऽह्नि इति च पाठौ समुचितौ ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

१७. **आकृष्य सर्वजगतो निरमायि किं वा धात्रा सुरूपमिति संशयकारिणी सा ।**
प्रागेव चास कमलापतिमादधत्या गर्भेण किन्नु कथये सुषमाममुष्याः ।। (४/३५)

जोन्सनमहोदयसम्पादितपुस्तके वर्तमानः **सुषमा मनुष्याः** इति पाठे वर्तमानेऽपि अभिलेखालयस्थमातृकायां वर्तमानः सुषमाममुष्याः इति पाठः समुचितः ।

१८. **अथ सितसुमवस्त्रैः सिद्धिसिद्धार्थसार्थैः चलदलदलमुख्यैः पह्लवैः पूर्णकुम्भैः ।**
प्रसवसमनुकूलां तां गतोऽरिष्टपृष्टे नरपतिरतिहर्षादैक्षतारिष्टगेहे ।। (४/५३)

सिद्धसिद्धार्थसार्थैः - **सिद्धेन** = सम्पन्नेन, **सिद्धार्थेन** = श्वेतसर्षपेण, **सार्थाः** = सफलाः, **श्वेतसर्षपप्रयोगप्राप्तसाफल्यैः** । **पूर्णकुम्भैः** इत्यस्य विशेषणं पदमिदं बोध्यम् ।

१९. **दिनकृति शुचिकोणाच्छौचपत्रं गृहीत्वा गतवति शिववाहं शेखरे चेश्वरस्य ।**
मृगयति मृगपृष्ठं मङ्गले मङ्गलार्थं स्थितवति परमोच्चं कर्कमारुह्य जीवे ।। (४/५४)

दिनकृति = सूर्ये, **शुचेः कोणात्** = ईशानकोणात्, आग्नेयकोणात् वा, **शौचपत्रम्** = अग्नेर्वाहनम्, मेषराशिम्, **गृहीत्वा** = आदाय, **गतवति** = पूर्वदिशं प्रयाते, प्रभाते इत्यर्थः; **ईश्वरस्य शेखरे** = चन्द्रमसि, **शिववाहम्** - शिवं वहतीति शिववाट्, तम् = वृषभम्, **गतवति** = प्राप्ते, चन्द्रे वृषराशिम् स्वकीयोच्चराशिं गते सति, **मङ्गले मृगपृष्ठं मृगयति** = भौमे मकरपृष्ठं मृगयति, मङ्गलग्रहेऽपि स्वकीयोच्चराशिं प्राप्ते सतीत्यर्थः । अत्र चत्वारो ग्रहा उच्चराशिस्थाः प्रदर्शिताः ।

२०. **निमिषतनयनाङ्गैरप्सरोभ्यो विशेषानभिनयपरिवेशात्कुण्डलैः कर्णपाशैः ।**
भुजगपतिसुताभ्यो दर्शयन्त्योऽज्जुकास्ताः सरसललितनाट्यन्दर्शयामासुरुच्चैः ।।(४/७३)

अत्र **अभिनयपरिवेशात्** इति पाठः समुचितः । पुनरत्र **निमिषितनयनाङ्गैः** इति पाठः समुचितः प्रतिभाति। (नेपाली- झिम्क्याइएका आँखा अङ्गहरूले) । अप्सरोभ्योऽपि विशेषान् अभिनयपरिवेशान् दर्शयन्त्यो नर्तक्यो गणिका इत्यर्थो भवितुं शक्नोति । श्लाघ्यकर्णैः, कर्णवेष्टनैश्च ताः गणिका अदर्शयन् ।

द्वितीयकार्यशालापत्रस्य ग्रन्थिभेदनम्

१. **एवमेव उपनीय बालकं पालकं त्रिजगतोऽत्रिजो गतः ।**
तेन साकमनुकूलचेतसा प्रेषितेन पठनाय जन्मदा ।। (५/६३)

जन्म ददातीति जन्मदाः क्विप्प्रत्ययान्तः, तेन जन्मदा, तृतीयान्तं पदम्, जनकेनेत्यर्थः, **प्रेषितेन** इत्यत्र **प्रैषि, तेन** इति पाठः प्रकल्प्यः ।

२. **तर्ककर्कशकशातिशातनाशातिताखिलपदार्थसंशयः ।**
अक्षिपादकणभक्षपक्षयोर्लक्ष्यलक्षणबुधो न्यलक्षि सः ।। (५/८१)

यः अक्षिपादमुनेः कणादमुनेश्च लक्ष्यलक्षणयोरभिज्ञः सः - **निलक्षितः** = समीक्षितः, इति। अतो **न्यलक्षि** इति पाठः समुचितः ।

३. **तपनतापमपाकुरुते शशी प्रतिनिशं समुदित्वरदीधितिः ।**
तपति तस्य तपो महिमातपो निशिदिवास्म तपो भुवनादिहा ।। (६/३०)

एकतः, उदयशीलकिरणसम्पन्नः, शशी प्रतिनिशं सूर्यतापमपाकुरुते, अपरतश्च रात्रिदिवम् आतपः तपोमहिमानं तपति स्म । **तपोभवनादिह** = तपः स्थलादत्र, **आतपः** = घर्मः, **तस्य** = तापसस्य, **तपोमहिम** = तपोमहिमानम्, **तपति** = सन्तप्तं दुःखवन्तं कष्टकरं विदधाति ।

४. **यदि च जातु न जातुगणेश्वरो वृषविधेर्विदधीत तदा भवेत् ।**
प्रथममेव स पुण्यजनाभिधा कनकसन्तततितीव्रतपोहुतिः ।। (६/३९)

अत्र विदधीत इत्यस्य कर्म मार्गणीयम् ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

५. **डिण्डीरपिण्डाभयशःकदम्बैर्लोकत्रये पाण्डुरताङ्गते ते ।**
पञ्चास्ययुक्त्या पुरहा भवानीमामन्त्र्य विज्ञापयतां सचण्डि ।। (७/२९)

ते = तव, **डिण्डीरपिण्डाभयशःकदम्बैः** - समुद्रफेनपिण्डदीप्तितुल्यदीप्तिमद् - यशः समुदायैः, **लोकत्रये** = लोकत्रितये, **पाण्डुरताङ्गते**= समुज्ज्वलतां प्राप्ते, **पुरहा**= त्रिपुरान्तकः शिवः, **पञ्चास्ययुक्त्या**- स्वकीयानां पञ्चानां मुखानाम्, **युक्त्या** = पञ्चसरणिकथनरीत्या, **भवानीम्** = स्वप्रियां पार्वतीम्, **आमन्त्र्य** = आहूय, स्वसमीपे निधाय वा, **सचण्डि** = चण्ड्या सक्रोधया युद्धशीलया महाकाल्या सह यथा स्यात् तथा, **विज्ञापय** = युद्धाय आदिश । दिग्विजयप्रसङ्गप्रारम्भे सयुक्ति पद्यमेतद् रचितम् ।

६. **थूर्वप्रजानां हृदि जातमात्रं सर्वज्ञतासर्वशरीरताभ्याम् ।**
अकार्य्यमेतत्क्षण एव तासां पुरोभवन् किल्विषवृन्दतोऽथूः ।। (७/३३)

३०-३१-३२ तमपद्यैर्दिग्विजयाशीर्वादान् प्रदाय, ३३ तमपद्येन प्रजाशासनरीतिं विधाता उपदिशति - **हे राजन् ! प्रजानाम्** = जनानाम्, **हृदि** = हृदये, **जातमात्रम्** = समुदितमात्रम्, **अकार्यम्** = अकृत्यम्, पापात्मकं कार्यम्, अपराधं वा, **थुर्व** = जहि, कथम् ?, भवान् **किल्विषवृन्दतः** = पापसमूहेभ्यः, **अथूः** = थूर्व्यते असौ इति थूः, न थूः, अथूः (कर्मणि क्विप्) अहतः, अर्थात् पापेभ्यो दूरस्थितः सन्, एतत्क्षण एव - इदानीमेव । तासां प्रजानाम्, पुरः = अग्रे, भवन् । प्रजानां हृदये जातस्य अकृत्यस्य निरसने, दूरीकरणे युक्तिः - **सर्वज्ञताशरीरताभ्याम्** - सर्वज्ञता च अशरीरता च सर्वज्ञताशरीरते, ताभ्याम् (करणे तृतीया), आत्मा सर्वज्ञोऽस्ति, सर्वेषामात्मा एक एव, आत्मा च शरीरात् पृथक् वर्तते, सर्वेऽपि जना स्वसदृशा एव द्रष्टव्याः, न कोऽपि जनः लुण्टन-पीडन-हननादिकुकृत्येन शत्रुतां नेयः ।

७. **वर्षन्ति तत्र विबुधाः स्म जलं सुमन्त्रैः पूर्वं ततश्च कनकानि बहूनि तेषु।**
धाराधरा जगति तस्य च जीवनानि तद्वैरिराजवनिताक्षिदितानि च द्राक् ।। (८/३६)

अत्र **वर्षन्ति** इत्यस्य क्रियापदस्य चतुर्षु वाक्येषु सम्बन्धः । **तस्य जगति** = कार्तवीर्यस्य राष्ट्रे भूमण्डले, **जीवनानि**= जलानि, **तद्वैरिराजवनिताक्षिदितानि** = कार्तवीर्यारातिभूपातवनिता(राज्ञी)नयनस्रुतानि, **जीवनानि**= जलानि, अश्रूणि वा, वर्षन्ति ।

८. **हस्तं विहाय तव खडगलतां प्रयातु तन्मुष्टिबन्धनमुपैतु मनः प्रहाय ।**
बाणेषुपक्षपतनोत्थरयश्च लोकं त्यक्त्वा युगातिशरणं श्रयतां भुजौ ते ।। (८/५६)

अस्य पद्यस्य नीतिशास्त्रमवेक्ष्य अर्थो मार्गणीयः ।

९. **आकौर्य्यजन्म तव न स्फुटतां प्रयातु मन्त्रः प्रयाति यदि तत्पुरतो मृषोक्त्या ।**
आमूलमेव सकलं समलीकयेथाः त्रिश्रीप्रयुक्तिरहिते विहिता यथा स्यात् ।। (८/६०)

अत्र पादत्रये स्फुटं दृश्यन्ते त्रयो विषयाः -

१) कार्यकरणात्पूर्वं कार्यगोप्यता ।
२) गोप्यताभङ्गः ।
३) भग्नगोप्यताया वितथीकरणम् ।

अन्तिमपादार्थः - **त्रिश्रीप्रयुक्तिः** - तिसृणां श्रियां प्रयुक्तिः, तिस्रश्च ताः श्रियः -त्रिश्रियः, त्रिश्रीणां प्रयुक्तिः - त्रिश्रीप्रयुक्तिः, श्रीशब्दस्य प्राधान्यात् तस्य ह्रस्वान्तता नैव सम्भवति, अतो दीर्घपाठ एव शुद्धः । **अहिते** = रिपौ, त्रिश्रीप्रयुक्तिर्विहिता यथा स्यात् तथा प्रयतनीयम् । **एतत्कार्यं महाराजो विधास्यति** इति या वार्ता बहिः प्रसारिता, सा नितराम् असत्येति श्रीश्रीश्रीमन्महाराजो विज्ञापयति' इति रीत्या श्रीत्रयप्रयोगः । परमत्र सहभागिनः केचन विद्वांसः त्रिश्रीप्रयुक्तिरिति पदस्य उत्साहशक्तिः, मन्त्रशक्तिः, प्रभुशक्तिरिति त्रिश्रीणां शक्तीनामर्थमादाय उत्साहशक्तिप्रयोगः, मन्त्रशक्तिप्रयोगः, प्रभुशक्तिप्रयोगश्च यथा सफलः स्यात् तथा कर्तव्यमित्यर्थं स्वीकुर्वन्ति ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

१०. अर्कोपलस्य पयसा स्नपनेऽपि मष्या श्वैत्यं यथा तव नरेन्द्रधुराधरस्य ।
सङ्गे मुहुस्सदसतोरपि न व्यपैतु स्वच्छान्तराविरतखेलनचिद्विलासः ।। (८/८०)

अत्र मष्या स्नपनेऽपि अर्कोपलस्य श्वैत्यं यथा पूर्ववत् तिष्ठति तथैव तव चिद्विलासः कदापि न व्यपयितु इति भावः। अत्र मष्या स्नपनेऽपि इति पाठ एव समुचितः ।

तृतीयकार्यशालापत्रस्य ग्रन्थिभेदनम्

१. भस्मनो मम पराद्य दुर्दशा का भविष्यति शठेति मा दृपः ।
वायवीयमपि वारुणन्न किं वेत्ति सोऽस्त्रमवनीपतिः प्रभुः ।। (१०/७८)

का भविष्यति शठेति मा दृपः अयमेव पाठः शुद्धः । **माङि लुङ्** इति लुङि दृप् धातोः - **मा दृपः** इति पुषादित्वाद् अङ्प्रत्ययेन सिध्यति, दृश् धातोस्तु **ऋदृशोऽङि गुणः** इति गुणेन **मा दर्शः** इति रूपम् । तस्मादत्र कापि शङ्का नास्ति । **मा दृपः** इति साधुः।

२. इत्थमुक्तिमुपहृत्य मञ्जुलां प्रस्थितं द्विजमुवाच भूपतिः ।
एवमस्तु भवतामनुग्रहाद् यातभद्रमुभयत्र धत्त भोः ।। (१०/८६)

अत्र - **यात भद्रमुभयत्र धत्त** इति च्छेदः । **यात** इति पृथग् वाक्यम् - यात - गमनं कुरुत । **द्विजवरं समुवाच स भूपतिः** इत्यत्र छन्दोभङ्गोऽस्ति। अतः - **प्रस्थितं द्विजमुवाच भूपतिः** इति पाठः कवेः । अत्र **प्रस्थितम्** इति आदिकर्मणि क्तः । वर्तमानकालस्य आद्यक्षणवृत्तिक्रियाश्रयत्वमादिकर्मत्वम्, **प्रस्थितम्** = प्रस्थानम् कुर्वन्तम् (नेपाली - प्रस्थान गर्नै आँटेका, हिंड्नका लागि उठी - पाइला सार्न लागेका) ।

३. दानवारिपदमावहन्मुदा मस्तकेन मणि भाति भास्वता ।
कालनागनिकरः ससैन्यको देशमाप रमणन्ततः शनैः ।। (१०/९५)

मणिभातिभास्वता इति पाठः समुचितः । **मणेः** = रत्नस्य, **भातिः** = दीप्तिः, **तया भास्वता** = भासमानेन, मस्तकेन (करणतृतीया), मुदा = हर्षेण, दानवारिपदम् = दैत्यारिपदम्, श्रीविष्णुपदं वा ।

४. गगनतलसुतल्पे रात्रिचन्द्रे यथेच्छङ्गलदुडुसुममालञ्ञातसर्वाङ्गसङ्गम् ।
रतिसुखमनुभूय क्षीणशुक्रेऽद्य काले द्रुतमुदसितहस्ते निष्प्रभौ सम्प्रयातः ।। (११/११)

रात्रिचन्द्रौ निष्प्रभौ सम्प्रयातः इति वाक्यम् । **अघकाले** इति पाठः समुचितः । **क्षीणशुक्रे** इति अर्थान्तरे - 'क्षीणशुक्र (मलिनशुक्र)युक्ते' काले। **उदसितहस्ते** = उद्दीप्तहस्तनक्षत्रयुक्ते, काले, अथवा- **द्रुतमुदसितहस्ते'** इति समस्तपदम्- **द्रुतमुद्** = क्रूरतासम्पन्नः, **असितः** = शनैश्चरः, तदाश्रितहस्तनक्षत्रयुक्ते काले । द्रुतमुच्चासौ असितः, द्रुतमुदसितः, द्रुतमुदसितः हस्ते यस्मिन् सः, तस्मिन् काले । सर्वासु मातृकासु समानपाठदर्शनात् - **द्रुतमुदसितहस्ते** इत्येव स्थापयितुं शक्यमित्येकः पक्षः । परमपरपक्षे केचन सहभागिनो विद्वांसः **द्रुतमुदसितहस्तौ** - परस्परहस्तपाशबद्धौ रात्रिचन्द्रौ प्रभातकाले **द्रुतम्** = शीघ्रम्, **उदसितहस्तौ** - **उद्** = उपरि, **असितौ** = बन्धनमुक्तौ हस्तौ ययोस्तौ तथा भूतौ शिथिलालिङ्गनहस्तपाशौ जातौ इत्यर्थो भवितुमर्हतीति कथयन्ति ।

५. क्षिपति मृदुपदानि प्रेक्षते रम्यभावं वितरति ससुवर्णां भूरिशो गामिदानीम् ।
विरचयति कलापं मुक्तकञ्चातिशिल्पान्नरपति निकुरुम्बं काव्यकर्ता च धीरः ।। (११/४७)

निकुरम्बम्, नरपतिनिकुरम्बम्' निकुरम्बम् = समुदायः, द्व्यर्थकं पद्यम् ।

६. मनसर्जुनमेव मेनिरे भयतोऽपार्थमिमे नराधिपाः ।
युधि भीममहो सदागतिं ननु नासत्यभवं मनोरमम् ।। (११/८६)

भयतोऽपार्थम् इति पाठः समुचितः । एकोऽर्थः - **अपार्थम्** = पार्थभिन्नम्, अपरोऽर्थः - अपगतोऽर्थो यस्मात् सः- अपार्थः, तम् - **अपार्थम्** = निवृत्तप्रयोजनम्, समाप्तप्रयोजनं वा (नेपाली - अब हामीहरू यहाँ

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

आउनाको प्रयोजन कुनै रहेन । यिनी अर्जुनबाट हाम्रो उद्देश्य समाप्त भयो ।)

७. **कुलशीलवपुर्वयोगुणैरनवद्यैः कनकप्रभोचितम् ।**
प्रविलोक्य जहुस्स्वयंवरं न तमाशालतिकान्विता नृपाः ।। (११/८७)

न, तम् - इमे पृथक् पदे ।

क) **आशालतिकान्विताः** इति पाठे - **आशालतिका नृपान् अनुजगाम** (पछि लाग्यो) इति भावः ।

ख) **आशालतिकासिताः** इति पाठे - **आशालतिका नृपान् आसयत्** इति भावः, तान् गन्तुम् अवरुरोध । (तिनीहरूलाई घर जानबाट रोक्यो, त्यहीं बसाल्यो, आशारूपी लहराले बाँधिएर त्यो स्वयंवर छोडेनन्) अयमेवार्थः कविना अभिप्रेतः ।

८. **बहुमानमुवाह संस्पृशन् पवमानः कनकप्रभावपुः ।**
परभावविदर्जुनोद्भवाद्भयतस्साधुधिया स्वयंवरे ।। (११/१०३)

बहुमानम् - बहुश्चासौ मानः सत्कारः - बहुमानः तं - बहुलसत्कारम्, उवाह इति क्रियायाः कर्म । **परभावविद्** इति पवमानः इत्यस्य विशेषणम्, उद्भवतीति उद्भवम्, अर्जुनाद् उद्भवम्, तस्मात् कार्तवीर्याद् उदीयमानात् भयात् । उद्भव इत्यत्र कर्तरि प्रत्ययः, शब्दोऽयं विशेषणतया प्रयुज्यते लिङ्गत्रये - 'उद्भवः, उद्भवा, उद्भवम्' इति । बहुमानमुवाह = महान्तमादरं धृतवान्, ऊढवान् ।

९. **दमयति दमयन्ती स्वच्छभासां वितानैस्तरलयति गुणानां सम्पदा शैलजा ताम् ।**
श्लथयति परगर्वं वेदवत्या अखेदाद् दलयति मदमिद्धं साधु मन्दोदरीस्थम् ।। (११/१११)

यमगर्वम् - पदमिदं दोषपूर्णम्, अनुचितमिति सहसा न स्वीकार्यम् । वेदवत्याः कथा देवीभागवते वर्तते, तामधीत्यैव निश्चयः करिष्यते । **यमाः** - अहिंसा सत्याचौर्यब्रह्मचर्यापरिग्रहा यमाः । (यिनले वेदवतीको 'म ब्रह्मचर्यमा छु, संयमिनी छु' भन्ने **यमगर्वलाई** खुकुलो पार्छिन् । अखेदात् - सजिलैसँग, विना दिग्दारी । कनकप्रभाको क्रियाकलाप देखेकी भए वेदवती पनि यम (संयम, ब्रह्मचर्य (आफ्ना पतिसँग नियत समयमा मात्र विलास गर्ने प्रवृत्ति) छोडेर जथाभावी विलासिनी बन्न चाहँदी हुन् । **वेदवती** लक्ष्मीकी अवतार थिइन् । यिनी अर्को जन्ममा जानकी सीता भएकी छन् । तसर्थ वेदवतीका लागि **यमगर्वम्** पाठ नै उचित हुन्छ । तर केही सहभागीहरूले यहाँ **परगर्वम्** पाठ नै उचित हुन्छ भनेका छन् ।)

१०. **सम्पन्नभोगसुभगान्ननु भूरिसेनान्नित्यं भुनक्त्यपयथायमुदग्रवीर्यः ।**
दृष्टार्थकान्नियमतः प्रधनावतारे तारेशजिष्णुमुखि ! भोस्सखि पश्यसि त्वम् ।। (१२/१९)

उभयथा इत्यर्थः कथं संगच्छते इति निश्चयं कृत्वैव स पाठः स्वीकार्यो भवेद् नान्यथा । जोन्सनस्य **उपयथा** इति पाठे य - प विधेयः **उपपथा** इति । उपगतः (आदृतः व्यापको वा) पन्थाः उपपन्थाः - तेन **उपपथा** = आदरणीयवर्त्मना, वा व्यापकमार्गेण, इत्यर्थः समुचितः । **उपपथिन्** = संमान्यमार्गः, समासान्तप्रत्ययः सम्मानार्थे न भवति - सुपन्थाः, अधिपन्थाः, उपपन्थाः, इत्यादिषु ।

चतुर्थकार्यशालापत्रस्य ग्रन्थिभेदनम्

१. **अस्मै नृपाः प्रवितरन्ति करंद्विषन्तः सेवारता अपि सदा समितिस्थिताय ।**
हारावयुक्तगलकान् विदधातिचैतान् एष क्षणात्क्षितिपतेः कृतसर्वपक्षः ।। (१२/३२)

अस्मै, समितिस्थिताय, हारावयुक्तगलकान् इत्येते पाठाः समीचीनाः । **हारावयुक्तगलकान्** इत्यत्र हा इति रावः- हारावः, हारावेण युक्ताः गलाः येषान्ते हारावयुक्तगलाः, **शेषाद्विभाषा** इति कप् । परमत्र केचन हाराग्र्युक्तगलकान् इति पाठं स्वीकुर्वन्ति ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

२. **त्वया प्रतिज्ञेयमकारि किंवा नालोकनीयोऽन्ययुवा मयेति ।**
जातो न भेदप्रतियोगितावान् मया ततः खेदमिमं वहामि ।। (१२/१२६)

ज्ञातो न भेदप्रतियोगितावान् इत्येव साधुः, **भेदप्रतियोगितावान्** = भिन्नः, अन्यः, न ज्ञातः।

३. **सरोजकोशाभमुरोजमाप्ता तस्या उरः स्पर्शनिदेशिमन्त्रम् ।**
विचारयामास विशेषविज्ञो यथार्थतः स्वार्थपरत्वमेव।। (१४/८०)

विवाहमण्डपे वरः वध्वा उरसि हस्तं निदधाति । तदा उरः स्पर्शनाय मन्त्रः प्रयुज्यते । तन्मन्त्रस्यार्थं समीक्ष्यैव अस्य पद्यस्य सम्पूणार्थो ज्ञास्यते । उरःस्पर्शं निदिशतीति उरःस्पर्शनिदेशी, स चासौ मन्त्रः, तम् । **सरोजकोशम्** - सरसि जातम्, सरोजम्, सरोजस्य **कोशः** = कुड्मलः, सरोजकोशस्य आभा इव आभा यस्य स तम् । **उरोजम्** - उरसि जातः - उरोजः- कुचः, तम् । कमलकुड्मलप्रभं कुचम् आप्तम्, उरः स्पर्शनिदेशिमन्त्रम्, स्वार्थपरत्वमेव विचारयामास । **आप्ता** = प्रापकः। उरः स्पर्शनिदेशिमन्त्रः कथं कुचं प्राप्नोति ? अस्यार्थस्य ज्ञानाय स एव मन्त्रो द्रष्टव्यः ।

४. **अबालबालाच्चसपत्नजाया पयस्सरस्तीरमुपेत्य केचित् ।**
सिताचलच्छायवृतं सुखेन भुजिक्रियां मिष्टतरां प्रचक्रुः ।। (१४/९५)

स्थानपरिचयः आवश्यकः । आबालबालाश्च इति पाठः समीचीनः ।

५. **आलोक्यालिकुचं राजालिकुचन्ते पचेलिमम् ।**
स्मरति स्मरतीहाग्रे स्मरतीव्ररतिः क्षणम् ।।
इत्युक्त्वाह क्षितिमिलत्स्वयमश्वत्थपत्रकम् ।
राज्ञःकृते त्वमुत्थाप्य वदेति नृपभोगिनी ।। (१५/९१-९२)

क्रीडन्त्यो बह्व्यो युवत्यः आसन् । कनकप्रभया आश्लिष्टो राजा नर्मवाचः **अश्रृणोत्** = वार्तालापप्रसङ्गे एका स्वकीयामालिमन्यां वदति- अयं राजा सखीस्तनं दृष्ट्वा तव (अन्यस्याः) कुचं लिकुचं (स्वयं शीलम्, फलविशेषम् (बडहर)) स्मरति । अथ नृपभोगिनी स्वयमेव भूमौ स्थितं पिप्पलपत्रं राजस्वभावं वर्णयितुमादिशति।

६. **व्याहरन्तीमिति प्राह कलिकाकेलिकामधुक् ।**
मतान्ता रजसा बाह्या रजसा यूथिकेतिनः । (१५/९५)

पूर्वपद्येन (१५/९४) संयोज्यैव अस्यार्थो द्रष्टव्यः । मल्लिका (बेली, पुष्पविशेष), यूथिका (जुही, फूलविशेष), अनयोः सरागां यूथिकाकलिकां विहाय कथम् अपरागां सतीं मल्लिकां कलिकामिच्छति ? इति वदन्तीं कलिकाकेलिकामधुक् अन्या वदति- 'न रजसा यूथिका बाह्या, **रजसा** = रजोगुणेन, **रजसा** = धूल्या वा। **यूथिका** - इति - नः, इति पदत्रयं बोध्यम् ।

७. **द्विडीवधासप्तजिह्वस्य पुरो माहिष्मतीपतेः।**
इध्मजिह्वो नृपो जातः प्रह्व आह्वानमात्रतः ।। (१५/१४४)

अत्र **द्विडिध्मसप्तजिह्वस्य** इति शुद्धः पाठः ।

८. **एतत्पूर्वादिकाष्ठास्थपुराधीशाः सुरा अमी ।**
समाजयन्ते मा पश्य मन्दारकुसुमोत्करैः ।। (१५/२०४)

अत्र एतत् इत्यनेन हिमाद्रिशृङ्गं (गङ्गोत्री नाम पर्वतकूटम्) मतम् । **सभाजयन्ते** इति शुद्धः पाठः । मन्दारपुष्पपुञ्जैः मां **सभाजयन्ते** = सस्नेहं सेवन्ते, इत्येतत् त्वं पश्य । **पश्य** इति क्रियापदस्य सर्वं वाक्यं कर्मीभूतम् ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

९. **सवाजपेयं ससवाजपेयं ध्यायन्ति चक्रे कृतवीर्यसूनुः ।**
सपुण्डरीकाक्षनिविष्टचेताः सत्पुण्डरीकान्यमितानि चक्रे ।। (१६/४५)

स पुण्डरीकाक्षनिविष्टचेताः इति स पृथक्पदम्, **पुण्डरीकाक्षनिविष्टचेताः** = कमलनयनविष्णुभक्तः, सः= कार्तवीर्यः, **अमितानि**= अपरिमितानि, सन्ति च तानि पुण्डरीकाणि - **सत्पुण्डरीकाणि** = पुण्डरीकनामक-शुभयज्ञकर्माणि, चक्रे । **सवाजपेयम्** = वाजपेयनामकयज्ञविशेषसहितम् । **ससवः** - सवेन सहितः = यज्ञसहितः, अजपानामकगायत्रीसम्बद्धमन्त्र आजपेयः, ससवश्चासौ आजपेयः (मन्त्रः) **तम्** = ससवाजपेयम् । वापेययज्ञम्, अन्यान् यज्ञान्, अजपामन्त्रम्, एतत्सर्वमपि **ध्यायन्ति** = चिन्तनसम्बद्धानि यज्ञकर्माणि चक्रे कार्तवीर्यः ।

१०. **संबिभ्रतोऽजातनयाँश्च शृङ्गं सुधारसास्वादकृतोऽनुवेलम् ।**
वृषानुकूलस्थितिमादधानान् न मन्यते को विबुधान्न मादृक् ।। (१७/२४)

अत्र प्रथमपादार्थो निश्चेयः । अन्यत् सर्वं सरलमेव । मुद्रिते - **संबिभ्रतो जातनयाँश्च शृङ्गम्** इति पाठः। अत्रान्यरूपेणोद्धृतः पाठः संशोधनीयः । अजातनयनान् श्वशृङ्गं सबिभ्रतः । **संबिभ्रतः** = धारयतः ।

{कुकविहरू- (१) बाख्राका पाठाहरू लिन्छन् - व्यर्थका हास्यास्पद कुरा लेख्छन् । (२) कुकुरको शीङ लिन्छन्- असम्भव नमिल्दा कुरा लेख्छन् । **अजातनयाश्वशृङ्गम्** - यस्तो पाठ भएमा समाहारमा द्वन्द्वसमास मान्ने । बाख्राका पाठा र घोडाको सिंग भन्ने अर्थ लगाउने । तृतीय पाउमा **वृष** (साँढे)को विन्यासले पनि प्रथम पाउमा प्राणी बुझाउँछ ।}

'ख'समूहेन कृतं ग्रन्थिभेदनम्

अत्र 'ख'समूहस्य प्रतिनिधिना प्रा.डा. दुर्गादत्तशर्मोपाध्यायमहोदयेन प्रस्तुतः प्रथमादिषष्ठसर्गपर्यन्तस्थितपद्यानां ग्रन्थिभेदननिष्कर्ष उपस्थाप्यते ।

कथा भागीरथ्या जगति बहुपथ्याऽपि न तथा
सतां रथ्यामध्ये विलसति, कलिन्दाचलभुवः ।
भवेद्वार्ता का वा, हरदयितरेवा स्तुतिपदैः
त्रिलोके संख्यातेऽर्जुनपुरि सदेयं विजयते ।। (१/२१)

जगति सतां बहुपथ्या अपि भागीरथ्या कथा रथ्यामध्ये न **विलसति** = संसारे सज्जनानाम् अतिपथ्या अपि भागीरथ्या कथा प्रतोलीमध्ये तथा न विलासं कुरुते । **बहुपथ्या** - बहुषु पथिषु अनपेता **बहुपथ्या** = स्वर्गमर्त्यपातालगामिन्यपि, भागीरथ्याः कथेत्ययमर्थोऽपि निष्पद्यते । **कलिन्दाञ्चलभुवः** = यमुनायाः, का वार्ता, इयं **हरदयितरेवा** = शिवप्रिया नर्मदा, त्रिलोके **संख्याते** = विख्याते, **अर्जुनपुरि** = माहिष्मतीनगर्याम्, सदा विजयते । अत इयमेव सर्वासु नदीषु प्रशस्येति भावः ।

जनता न नता न भूपतेरहिता नो रहिता न सम्पदा ।
नहि ताः सहिता न च श्रिया नरमानाऽचरमा रमाऽऽर तम् ।। (२/३)

जनता **भूपतेः** = राज्ञः प्रति न नता इति न, किन्तु नता एव, **अहिता** = द्वेषभावयुक्ता अपि, **न सम्पदा रहिता च न** = सर्वाऽपि सश्रीकेत्यर्थः । **नरमाना** = पुरुषैः पूज्या, **अचरमा** = उत्कृष्टा, **रमा**, **तम्** = राजानम्, **आर** = प्रापेत्यर्थः।

समयो विनयोदयोदयः स्मरतां यः स्मरतां रुचागतः ।
शिवदोऽशिवदोवदः श्रुतेरभवद् भावविभावनो नृणाम् ।। (२/४)

समयः = समीचीनोऽयः शुभावहो विधिर्यस्य सः, **विनयोदयोदयः** = विनयस्य उदयेन प्रादुर्भावेन उदयः

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

समृद्धिर्यस्य सः, **यः** = कृतवीर्यः, **स्मरताम्** = स्मरणं कुर्वतां जनानां प्रति **रुचा** = कान्त्या स्मरतां गतः, **शिवदः** = कल्याणप्रद :, **अशिवदः** = अकल्याणनाशकः, **श्रुतेः** = वेदस्य, **वदः** = वक्ता, **नृणाम्** = नराणाम्, **भावविभावनः**= अभिप्रायज्ञः, अभवत् । '**वदो वदावदो वक्ता**' इत्यमरः ।

स कृती प्रकृतीः शुभाकृतिः प्रशमय्याविकृतीः सदुक्तिभिः ।
चतुरङ्गबलान्वितो बली हरितो जेतुमनाः प्रतस्थिवान् ।। (२/१७)

शुभाकृतिः = सुन्दराकारः, **कृती** = विद्वान्, **सः** = कृतवीर्यः, **आविकृतीः** = ईषद्विकृतियुक्तः, **प्रकृतीः** = राज्याङ्गानि, **सदुक्तिभिः** = सदुपदेशैः, **प्रशमय्य** = प्रकर्षेण शमयित्वा, '**स्वाम्यमात्यसुहृत्कोशराष्ट्रदुर्गबलानि च राज्याङ्गानि प्रकृतयः**' इत्यमरः, चतुरङ्गबलैः अन्वितः = हस्त्यश्वरथपादातचतुरङ्गसैन्ययुक्तः, अतएव बली = बलवान्, हरितः = दिशः, जेतुमनाः = जेतुं मनो यस्य सः, प्रतस्थिवान् । यद्यपि प्रकृतिषु विकृतिर्नासीत् तथाऽपि क्वचित् कार्यवशतो दृष्टा ईषद्विकृतयोऽपि स्वस्मिन् दिग्विजययात्रायां निर्गते सति अपायं जनयेयुरिति दूरदर्शितया प्रकृतिस्थविकृतीयर्थावत् प्रशमय्य दिग्विजययात्रायां निर्गत इति भावः । '**हस्त्यश्वरथपादातं सेनाङ्गं स्याच्चतुष्टयम्**' '**दिशस्तु हरितः काष्ठा**' इति चामरः । जेतुमना इत्यत्र '**तुंकाममनसोरपि**' इति मकारलोपः ।

अपि वंशभवो गुणान्वितो धृतकोटीयुगलोऽपि तृष्णया ।
मृगयां धनुरस्य लक्षकः क्वचिदेवाप बहुप्रदान्नृपान् ।। (२/३४)

अस्य = राज्ञः, **वंशभवः** = वंशवृक्षजातः, अन्यत्र कुलीनः, **गुणान्वितः** = ज्यागुणसहितः, अन्यत्र दाक्षिण्यादिगुणान्वितः, **धृतकोटीयुगलः** = युगलकोटीसहितः, अन्यत्र कोटिद्वयमुद्रायुक्तोऽपि, **तृष्णया** = पिपासया, **लक्षकः** =लक्षान्वेषी, अन्यत्र लक्षमुद्राऽभिलाषी, **क्वचिदेव** = कुत्रचिदेव, **बहुप्रदान्** = बहुशो जनानां पीडकान्, **नृपान्** = राज्ञः, अन्यत्र बहुप्रदान् बहुदातॄन् राज्ञश्च, **आप** = प्राप । तस्य प्रतिद्वन्द्वी कोऽपि नासीत्, कदाचिदेव तादृशान् दुष्टराज्ञो लब्ध्वा तान् दमयामासेति भावः ।

अत्र श्लिष्टो द्वितीयोऽर्थः शब्दशक्तिमूलकध्वनिगम्यः । स चार्थः कञ्चिदपि कुलीनं गुणवन्तं कोटियुगलमुद्राधिपं महाधनिनं किन्तु तृष्णालोलुपतया लक्षमुद्रायाः कृते धावन्तं कृपणं ध्वनयति । धनुशब्द उकारान्तः, उस् अन्तः, उकारान्तश्च कोशे पठितः, अत्र चोकारान्त उसन्तो वा ग्राह्यः । तस्य पुँस्त्वं च '**धनुश्चापौ धन्वशरासनकोदण्डकार्मुकम्**' इत्यमरकोशादेव लभ्यते । यतो हि तत्र ग्रन्थकारेण परिभाषाप्रकरण एव प्रतिज्ञातमस्ति 'न सङ्करः । कृतोऽत्र भिन्नलिङ्गानाम्' इत्यतो 'धनुश्चापौ' द्वयोः पदयोः समासः । नपुंसक पुंशब्दयोः समासे तु प्रतिज्ञाहानिः स्यात् । पुनश्च सिद्धान्तकौमुद्यां नपुसंकलिङ्गे पाठस्तु तस्य नपुंसकत्वमपि ज्ञापयति । तत्र उदन्तो धनुशब्दो मेदिन्यां धनुर्वाचकः पुंसि कथितः 'धनुः पुमान् प्रियालद्रौ राशिभेदे शरासने' इति नान्तवर्गे । पुनश्च उसन्तो धनुस्-शब्दस्तु पुंनपुंसकयोः कथितः । '**धनुः प्रियाले ना नस्त्री राशिभेदे शरासने**' इति सान्तवर्गे, इत्युसन्तस्य पुंनपुंसकत्वमुदन्तस्य च पुंस्त्वं सिध्यति ।

सर्वशः कुशलमस्ति मदीयं यस्य चेत्थमनिशं गुरुपादाः ।
संस्मरन्ति भविकं कथमस्य स्यान्न नव्यमतिरम्यमिह द्राक् ।। (३/१४)

राज्ञः कृतवीर्यस्य गुरुं प्रति कथनम् – **सर्वशः** = सर्वप्रकारेण, मदीयं कुशलमस्ति, **यस्य** = मम कृतवीर्यस्य च इत्थमनेनप्रकारेण गुरुपादा भविकं स्मरन्ति, **अस्य**= मम, नव्यम् अति **रम्यम्**= अतिकल्याणम्, इह **द्राक्**= शीघ्रम्, कथं न स्यादिति। अवश्यमेव कल्याणं स्यादेवेति भावः।'**भावुकं भविकं भव्यं कुशलं क्षेममस्त्रियाम्**' इत्यमरः । अस्मिञ्छ्लोके कुशलशब्दपर्यायास्त्रयः प्रयुक्ताः कुशलम्, भविकम्, भव्यञ्चेति, अतोऽस्य पौनरुक्त्यं सहृदयानामीषद् वैरस्यमावहति ।

कौशिकोऽपि शतमन्युरजैषीत् भास्वते वलिमुखानपि शत्रून् ।
भास्वतो वलिमुखोऽपि सुदृष्ट्या कौशिकीयपदमाप तवैव ।। (३/१६)

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

कृतवीर्यो दत्तमुनिं स्तौति - **शतमन्युः** = शतक्रतुरिन्द्रः, **'मन्युर्दैन्ये क्रतौ क्रुधि'** इत्यमरः, **कौशिकोऽपि** = उलूकोऽपि सन् **'महेन्द्रगुग्गुलूलकव्यालग्राहिषु कौशिकः'** इत्यमरः, **भास्वतः** = प्रकाशमानान्, सूर्यसदृशान्; **वलिमुखान्**= वलिप्रभृतीन् दानवान्, **शत्रून्** = विद्विषः, **तवैव** = दत्तात्रेयस्यैव, **सुदृष्ट्या** = कृपादृष्ट्या, **अजैषीत्** = व्यजेष्ट, उलूकः सूर्यं कथमजैषीत् इति विरोधः, कौशिक इन्द्र एवेति विरोधपरिहारः, **भास्वतः** = भास्वतोऽपत्यम् सुग्रीवः, **वलिमुखः** = वानरोऽपि, तवैव सुदृष्ट्या **कौशिकीयपदम्** = इन्द्रपदम्, स्वर्गं प्राप । अत्र दत्तात्रेयवरदानेन इन्द्रो वलिप्रभृतीन् दानवान् विजितवान् । दत्तात्रेयवरेणैव सुग्रीवोऽपीन्द्रासनमापेति पौराणिकी कथानुसन्धेया । अत्रापि शब्दो विरोधार्थद्योतकः। विरोधाभासोऽलङ्कारः।

इत्थमुक्तवति भूमिमहेन्द्रे प्रेमवारिधितरङ्गसदृक्षा ।
दृक्पपात विमलात्रिसुतस्य प्राक्पपात तदनूक्तिसुयुक्तिः ।। (३/२८)

इत्थं प्रशंसावाक्यमुक्तवति, **भूमिमहेन्द्रे** = कृतवीर्ये, प्रेमसमुद्रतरङ्गतुल्या निर्मला दत्तात्रेयदृष्टिः प्राक्पपात । तत्पश्चात् उक्तेः सुयुक्तिः प्रवृत्ता इत्यर्थः । प्रथमं कृपादृष्ट्या विलोक्य पुत्रोत्पत्त्युपायं प्रोवाचेति भावः । अत्र नास्ति कोऽपि संशयः । पाठश्च 'तदनूक्तिसुयुक्तिः' इति स्फुट एव ।

श्रीहरेर्जयरवं विमुञ्चतो यस्य चैककवपुः परं करे ।
पूर्वदेवपतिसुन्दरीजनाकल्पचित्रकविलोपकल्पकम् ।।३।३१
तैजसं वपुरिदं रमापतेश्चक्ररूपमवतीर्य ते गृहे ।
सर्वचक्रमविता न चिरेण वासराननमिवाश्रितपद्मम् ।। ३।३२

यस्य च परमं श्रेष्ठम् एककवपुः = एकं शरीरम्, जयशब्दं विमुञ्चतः श्रीहरेः करे वर्तते, तत् कीदृशं पूर्वदेवपतीनां दानवराजानां यः **सुन्दरीजनः** = सुन्दरीसमूहस्तस्य **आकल्पः** = वेषरचना, **चित्रकम्** = तिलकम् च, तयोर्विलोपे, **कल्पकम्**= समर्थम्, रमापतेरिदं **तैजसम्** = तेजोमयम्, **चक्ररूपम्** = सुदर्शनरूपम्, वपुः = शरीरम्, ते गृहे **नचिरेण**= शीघ्रम्, **अवतीर्य** = अवतारं धृत्वा, **सर्वचक्रम्** = सर्वं स्वपक्षीयराज्यमण्डलम्, **वासराननम्** = प्रभातम्, स्वाश्रितपद्मम् **इव** = स्वाश्रितं कमलमिव, **रक्षिता** = रक्षिष्यति, वासराननमत्र कर्तृ पदम्, पद्मपदञ्च कर्म । पद्ये विमुञ्चते इति चतुर्थ्यन्तं न, विमुञ्चत इति षष्ठ्यन्तम् ।

श्रीहरेमिधया घटिताख्यं धारयन् हरिणपोतमवाप ।
शम्भुशीर्षवसतिं द्विजराजस्त्वत्कुलप्रथमजो नृपवर्यः ।। (३/३९)

मुनिः कथयति – त्वत्कुलप्रथमजो **नृपवर्यः** = द्विजराजचन्द्रमाः, **श्रीहरेरभिधया** = श्रीहरेर्नाम्ना, हरिशब्देनेत्यर्थः, **घटिताख्यम्** = घटिता आख्या यस्य तम्, हरिशब्दघटितनामानम्, **'हरिणपोतम्'** = यतो हरिणपोतशब्दे आदौ हरिरिति विष्णोर्नामास्ति तद् धारयन्, स चन्द्रः, **शम्भुशीर्षवसतिम्** = शिवशिरोवासम्, **अवाप** = प्राप, हरिनामघटितं हरिणपोतं धारयँश्चन्द्रः शिवशेखरमणिर्जातः, ईदृशोऽस्त्ययं हरिप्रभावः । त्वं तु सत्यमेव तद्भक्तोऽसि कथं त्वामुन्नतिपथं नानयेद्धरिः, अतस्त्वं निश्चिन्तो भवेत्यर्थः, **ते** = त्वद्गृहे, भगवान् अवतरिष्यति भक्तिर्वर्धनीया विविध उत्सवो विधेयः, आमोदप्रमोदैर्दिवसा नेया इति ।

सन्तु चोढवलयोऽखिला नृपाः सन्तु चोढवलयोऽखिला गृहाः ।
सन्तु चोढवलयोऽखिला गृहा अस्तु दर्भवलयः करस्तवः ।। (३/४२)

अखिला नृपाः = सर्वे राजानस्त्वद्वशवर्तिनः, **ऊढवलयः** = दत्तकराः सन्तु, सर्वे गृहाः परिमार्जिता दत्तदेववलयः सन्तु, तादृशा विधीयन्तां सर्वे **गृहाः** = दाराः, दारेषु च गृहाः इत्यमरः, **ऊढवलयः** = धृतनवाम्बराः परिहितनवभूषणाः सन्तु, तव करश्च **दर्भवलयः** = कुशवलयसहितः (भगवत्पूजार्थम्) अस्तु, इति सर्वमवदातम् ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

अधः श्लोके भगवद्भक्तिरेव सर्वार्थदात्री भवतीति भक्तिं स्तौति, श्लेषेण **भक्तेः** = लक्षणाया माहात्म्यं च प्रस्तौति काव्यशास्त्रदृशा –

भक्तिरेव भगवत्पदसंस्था सर्वमर्थनिवहं परिसूते ।
यत्र तद्द्विपदसंश्रयशक्तिः पूर्वतन्त्रनिपुणा इदमाहुः ।।(३/४३)

यत्र = कर्मणि, **तद्द्विपदसंश्रयशक्तिः** =तस्य विष्णोः पदद्वयाश्रये शक्तिर्भवति तादृशी भगवत्पदसंस्था भक्तिरेव **सर्वम्** = निखिलम्, **अर्थनिवहम्** = धर्मार्थकाममोक्षाख्यं चतुर्वर्गम्, **परिसूते** = उत्पादयति, **पूर्वतन्त्रनिपुणाः** = शाण्डिल्यभक्तिसूत्र – नारदभक्तिसूत्रानुशीलितचित्ता विद्वांसः, **इदम्** = अदः, सिद्धान्तम्, **आहुः** = कथयन्ति ।

तथा च पदसंस्था भक्तिर्लक्षणैव लक्ष्यार्थं व्यङ्ग्यार्थं च नानाविधं सूते, यत्र **तद्द्विपदसंश्रयशक्तिः** = तस्य वाचकपदस्य द्विपदाश्रये शक्तिर्भवति, यथा – **गङ्गायां घोषः** इत्यत्र गङ्गाशब्दस्य द्विपदसंश्रया शक्तिरस्ति प्रवाहसंश्रया तीरसंश्रया च, सा च शीतत्वपावनत्वादिकं व्यङ्ग्यमर्थनिवहं सूते इति भावः ।

संसारिणां विषयकापथगामिचेतोमाध्यमतङ्गजबलं दलितुं दधानम् ।
रेखासृणिं सुमसृणामघवृन्दगोत्रप्रध्वंसनाय च पविं निजभक्तिभाजाम् ।। (४/७)

भगवच्चरणपङ्कजं वर्णयति –

निजभक्तिभाजां संसारिणां विषयकुमार्गगामि यच्चेतस्तदेव माद्यन्मतङ्गजः, तस्य बलं दलितुं सुमसृणाम् अङ्कुशरेखां दधानम्, **अघवृन्दगोत्रप्रध्वंसनाय** = पापसमूहपर्वतविध्वंसनाय, **पविम्** = वज्रं च दधानम्, भगवच्चरणारविन्दं ध्यायन् परां मुदमवाप महीमहेन्द्र इत्युत्तरवाक्येनान्वयः । **'कुलिशं भिदुरं पविः'** इत्यमरः ।

प्रह्लादभक्तिभरवश्यतयाप्यवश्यं कस्याप्यवश्यमुखरस्य विधिं विहस्य ।।
कृत्वा मनुष्यमृगराजवपुस्त्वपूर्वं तं पूर्वदेवनिवहे हतवान्पुरा त्वम् ।। (४/१८)

प्रह्लादस्य भक्तेर्भरस्तस्य वंशगततया हि हेतौ, **अवश्यम्** = निश्चयेन, **अवश्यस्य** = कस्यापि अवशवर्तिनः, **मुखरस्य** = प्रसिद्धस्य, अथवा मुखं सृष्टेरादिरस्यास्तीति मुखरस्य सृष्ट्यादौ स्थितस्य, **कस्य** = ब्रह्मणः, **विधिम्** = विधानम्, नियममिति वा, **विहस्य** = उपहस्य, न हि विधेः सृष्टौ स्तम्भात् प्राणिनामुत्पत्तिर्न वा तादृशानां नरस्य सिंहस्य च लक्षणैः सङ्कीर्णानां प्राणिनामुत्पत्तिरिति ब्रह्मणो विधेरुपहासः स्पष्ट एव । तादृशं **मनुष्यमृगराजवपुः** = नृसिंहशरीरम्, **तु** = अपि, **कृत्वा** = विधाय, **पूर्वदेवनिवहे** = दैत्यसमूहे, **अपूर्वम्** = नास्ति पूर्वो यस्मात्स अपूर्वस्तम्, **आदिदैत्यम्**= हिरण्यकशिपुम्, पुरा त्वं हतवान्, पुरि लुङ् चास्मेति वैकल्पिको लुङ् भवति । तदर्थे चात्र निष्ठेति सुवचम् ।

सम्पद्गणेन च गुणेन पुलस्त्यपौत्रं मध्येसदःपरिभविष्यति ते तनूजः ।
भूतञ्च भाविनमहो कमलापवर्गात् पश्चात्करिष्यति वृषाणमुदग्रवीर्यः ।।(४/३०)

भगवान् कृतवीर्याय वरं ददत् कथयति – **उदग्रवीर्यः** = उत्कटपराक्रमः, ते **तनूजः** = भवदात्मजः, **सम्पदां गणेन** = प्रभुमन्त्रोत्साहादिसम्पदां गणेन, **गुणेन** = शौर्यौदार्यादिगुणेन च, **मध्येसदः** = सदसो मध्ये, **पुलस्त्यपौत्रम्**= रावणम्, **परिभविष्यति** = तिरस्करिष्यति, जेष्यति, अहो ! **कमलापवर्गात्** = लक्ष्मीफलप्राप्तेः, **अपवर्गः फलप्राप्तिरिति** भट्टोजिदीक्षितः, **भूतम्** = अतीतम्, **भाविनम्** = भविष्यन्तम्, **'भविष्यति गम्यादयः'** इति णिनिः, **वृषाणम्** = इन्द्रम्, **पश्चात्करिष्यति** = अधः करिष्यति, जेष्यति, **'वासवो वृत्रहा वृषा'** इत्यमरः । अस्य काव्यस्य २/४१ पद्येऽपि भूवृषा इति वृषन्शब्दः कविना प्रयुक्तोऽस्ति तत्र भूमिपतिरित्यर्थः ।

निर्याति वासरगणेऽथ मिते दधार गर्भञ्जगन्निलयगर्भकलाप्रविष्टम् ।
भर्त्राऽऽहितञ्जलजगर्भमनोज्ञरूपा राज्ञी समस्तशुभलक्षणलक्षितेऽह्नि ।।(४/३४)

राज्या गर्भधारणं वर्णयति कविर्निर्यातीति– **अथ** = विष्णोर्वरदानानन्तरम्, **मिते** = अल्पे, कतिपये एव, **वासरगणे**=

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

दिनसमूहे, **निर्याति**= गच्छति सति, जलजगर्भमनोज्ञरूपा- जलजस्य **गर्भः** = अन्तर्भाग इव, **मनोज्ञम्**= मञ्जुलं शोभायुक्तं रूपं सौन्दर्यं यस्याः सा, कमलगर्भमसृण-शोभाधायकशरीरावयवा इति भावः, **राज्ञी** = राजमहिषी, **समस्तशुभलक्षण-लक्षितेऽह्नि** = ज्योतिर्विदादिष्टशुभलक्षणलक्षिते मुहूर्ते, **भर्त्रा** = कृतवीर्यनृपेण, **आहितम्** = स्थापितम्, **जगन्निलयगर्भ-कलाप्रविष्टम्**- जगतां निलयम् = आवासभूतो भगवान् विराट्, स गर्भे यस्य सः, अनन्तकोटिब्रह्माण्डनायको भगवान् महाविष्णुः, तस्य कलया अंशेन प्रविष्टम्, **गर्भम्** = भ्रूणम्, **दधार** = धृतवतीत्यर्थः ।

आकृष्य सर्वजगतो निरमायि किं वा धात्रा सुरूपमिति संशयकारिणी सा ।
प्रागेव चास कमलापतिमादधत्या गर्भेण किन्नु कथये सुषमाममुष्याः ।। (४/३५)

गर्भधारणान्तरं राज्ञीसौन्दर्यं वर्णयति कविः - **सा** = राज्ञी कृतवीर्यमहिषी, सर्वजगतः सुरूपमाकृष्य, **धात्रा** = ब्रह्मणा, निरमायि, किं वेति, **संशयकारिणी**= आश्चर्यकारिणी, अत्र संशयशब्द आश्चर्येऽर्थे लक्ष्यते, **प्रागेव च**= पूर्वमपि, **आस** = बभूव, पुनर्गर्भेण कमलापतिं धारयन्त्या अस्याः, **सुषमाम्** = परमां शोभाम्, **किन्नु कथये** = किं कथयामि, प्रथममपि महासुन्दरी सा गर्भे कमलापतिमादधाना अतिसुषमां बभारेति भावः ।

अथ सितसुमवस्त्रैः सिद्धिसिद्धार्थसार्थैश्चलदलदलमुख्यैः पल्लवैः पूर्णकुम्भे ।
प्रसवसमनुकूलामङ्गनामृष्टपृष्ठां नरपतिरतिहर्षादैक्षतारिष्टपृष्ठे । (४।५३)

अथ = गर्भमासपूर्तेरनन्तरम्, **सितसुमवस्त्रैः** = सितानि सुमानि पुष्पाणि वस्त्राणि च तैः, **सिद्धिसिद्धार्थसार्थैः**= सिद्धिः काचिदौषधी सिद्धार्थाः सर्षपाः तै सार्थैः सहितैः, **चलदलदलमुख्यैः** = चलदलोऽश्वत्थस्तद्दलानि मुख्यानि येषु तादृशैरन्यदलैरपि सहितैः, **पूर्णकुम्भे** = पूर्णाः कुम्भा यस्मिँस्तादृशे, **अरिष्टगेहे** = सूतिकागृहे, स्थिताम्, **प्रसवसमनुकूलाम्**= प्रसवां सम्यगनुकूलाम्, तत्पराम्, **अङ्गनामृष्टपृष्ठाम्** = अङ्गनाभिरामृष्टं पृष्ठं यस्यास्तां राज्ञीम्, **नरपतिः** = कृतवीर्यः, **अतिहर्षाद्**= अतिप्रमोदात्, **ऐक्षत**= दृष्टवान् । विशेषः - अत्र प्रसवसमनुकूलामङ्गनामृष्टपृष्ठामिति पाठः समुचित आभाति।

दिनकृति शुचिकोणाच्छौचपत्रं गृहीत्वा
गतवति शिववाहं शेखरे चेश्वरस्य ।
मृगयति मृगपङ्कं मङ्गले मङ्गलार्थं
स्थितवति परमोच्चे कर्कमारुह्य जीवे ।। (४/५४)

कार्तवीर्यजन्मसमयग्रहस्थितिं वर्णयति कविः - **दिनकृति** = सूर्ये, **शुचिकोणात्** = शुचिकोणान्त्याद् द्वादशभावात्, **शौचपत्रम्** = अग्निवाहनम्, मेषराशिं गृहीत्वा **गतवति** = (लग्नं) प्राप्ते सति, **ईश्वरस्य शेखरे** = चन्द्रे च, **शिववाहम्**= शिववाहनं वृषभं गतवति सति, मङ्गले, **मङ्गलार्थम्** = जातकर्मरूपमङ्गलकर्मणे, **मृगपङ्कम्** = मृगमदं मृगयति सति, अर्थान्मङ्गले मकरराशिं गतवति सति, ज्योतिषशास्त्रे मृगशब्देन मकरराशिर्गृह्यते, '**मकरो मृगास्यः**' इति स्वरूपवर्णनात् तस्य मुखे मृगरूपत्वमन्यशरीरावयवस्य च नक्रत्वं दर्शितं तथाऽपि मृगशब्देन मकरराशिर्गृह्यते, कर्कमारुह्य जीवे परमोच्चे स्थितवति सति । अत्र श्लोके सूर्यसोमभौमगुरव उच्चस्था दर्शिताः, यतः सूर्यो मेषस्थ उच्चः, एवं चन्द्रो वृषस्थः, भौमो मकरस्थः, गुरुश्च कर्कस्थ उच्चो भवति, तथा चोक्तम् - '**अज-वृषभ-मृगा-ङ्गना-कुलीरा झषवणिजौ च दिवाकरादि-तुङ्गाः**' इति ।

अत्र शुचिकोणे आयव्ययभावौ तिष्ठत इति ज्योतिषशास्त्रप्रसिद्धिः, शुचिकोणाद्यदि सूर्यो यात्रां करोति तदा पूर्वस्यां दिशि लग्ने गच्छति, लग्नगमनवेलायां च सूर्येण शौचपत्रं गृहीतम्, शुचिरित्यग्निनाम प्रसिद्धमेव, शुचेरिदं शौचम्, शौचं च तत्पत्रं शौचपत्रम् अग्निवाहनं मेषस्तं गृहीत्वा इति पर्यायोक्तिगम्योऽर्थोऽत्र कविना लक्षितः '**पत्रं वाहनपक्षयोः**' इत्यमरः। लग्नादिभावानां पूर्वादिस्थितिस्तु ज्योतिषशास्त्रादवगन्तव्येति दिक् ।

निमिषितनयनाङ्कैरप्सरोभ्यो विशेषा
नभिनयपरिवल्गत्कुण्डलैः कर्णपाशैः ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

भुजगपतिसुताभ्यो वर्धयन्त्योऽज्जुकास्ताः
सरसललितनाट्यन्दर्शयामासुरुच्चैः ।। (४/७३)

निमिषितनयनाङ्कैः = निमिषितनयनलक्षणैः, **अप्सरोभ्यः** = स्वर्वेश्याभ्यः, **विशेषान्** = वैशिष्ट्यान्, सुराङ्गनानामनिमिषलक्षणत्वं भवतीत्यतस्ताभ्यो विशेषता, **अभिनवैः** = नूतनैः, **परिवल्गत्कुण्डलैः** = चलत्कुण्डलैः, **कर्णपाशैः**= कर्णशष्कुलीभिः, **भुजगपतिसुताभ्यो विशेषान्** = नागकन्याभ्यो विशेषान्, यतो हि ता नागकन्याः श्रवणहीना भवन्ति, मानुष्यस्तु श्रवणयुतास्तत्र कुण्डलधारणम्, वल्गत्कुण्डलानां तासामन्यैव शोभा तां वर्धयन्त्यस्ता माहिष्मतीभवा अज्जुका उच्चैः सरसं ललितं च नाट्यं **दर्शयामासुः** = दर्शयाञ्चक्रिरे, निमिषितनयनत्वादप्सरोभ्यो विशिष्टा एताः, श्रवणयुतत्वाच्च नागकन्याभ्योऽपि विशेषाः, अत एतासां मानुषीणामाङ्गिकान्यभिनयानि ताभ्यो विलक्षणानि शोभावहानि, अनिमिषितनयनानां मूकेव भाति दृष्टिः, श्रवणहीनानां च विकलाङ्गत्वमिवाभाति दर्शकानामिति न मनोज्ञस्तासामभिनयः, एतासां च रोचते निमिषितनयनत्वात् श्रवणयुतत्वाच्चेति स्थाने कविर्वैशिष्ट्यं विवेचितवान्। एषैव कविता यद् भुवनगतानां पदार्थानां स्वर्गीयपातालीयभौमादिभेदेन प्रदर्शनकौशलमिति । अत्र काव्यलिङ्गव्यतिरेकालङ्कारयोः संसृष्टिः।

एवमेव उपनीय बालकं पालकं त्रिजगतोऽत्रिजो गतः ।
तेन साकमनुकूलचेतसा प्रैषि तेन पठनाय जन्मदा ।। (५/६३)

सङ्क्षिप्तविवरणम् – अस्मिन् कार्यपत्रे कार्यपत्रप्रस्तोत्रा विदुषा कार्तवीर्योदयमहाकाव्यस्य तान्त्रिकदृष्ट्या विवेचनं कुर्वता महाकाव्यस्य तान्त्रिकसिद्धान्तप्रतिपादनं यद्यपि प्रयोजनं नास्ति तथापि महाकविरसौ भगवत्या ताराया उपासकः, ताराकरुणयैव महाकाव्यं सम्पूर्णमिति तत्रोल्लेखाद् अस्मिन् काव्ये तन्त्रशास्त्रस्य प्रचुरः प्रभावो वर्तत इति प्रतिपादितम् । पुनश्च तत्रभवता तारादेव्याः कार्तवीर्यस्य च उपासनाविषये तन्त्रसिद्धान्तस्य सङ्क्षिप्तया चर्चया सह महाकविः पन्तो महान् तन्त्रसाधक आसीदिति प्रमाणैः प्रमाणितम् । कार्यपत्रवाचनान्ते सहभागिभिरस्य कार्यपत्रस्य विभिन्नान् विषयानादाय प्रश्नाः प्रस्तुताः। कार्यपत्रलेखकेन च तेषामुत्तराणि प्रत्तानि ।

अष्टमकार्यपत्रप्रस्तुतिः

कार्यपत्रशीर्षकम् – **कार्तवीर्योदयमहाकाव्ये दार्शनिकं चिन्तनम्** –

कार्यपत्रप्रस्तोता – प्रा.डा. दुर्गाप्रसाददवाडी

सङ्क्षिप्तविवरणम् – अस्मिन् कार्यपत्रे दवाडीमहाभागेन पौरस्त्यदर्शनानां चर्चया साकं कार्तवीर्योदयमहाकाव्ये प्रयुक्तानां दार्शनिकसन्दर्भाणां समुचितं विवेचनं कृतम् । कार्यपत्रवाचनान्ते सहभागिभिरस्य कार्यपत्रस्य विभिन्नान् विषयानादाय प्रश्नाः प्रस्तुताः । कार्यपत्रलेखकेन च तेषामुत्तराणि प्रत्तानि ।

नवमकार्यपत्रप्रस्तुतिः

कार्यपत्रशीर्षकम् – **कार्तवीर्योदयमहाकाव्येऽनुस्यूतं काव्यशास्त्रम्**

कार्यपत्रप्रस्तोता – प्रा.डा. वेणीमाधवढकालः

सङ्क्षिप्तविवरणम् – अस्मिन् कार्यपत्रे कार्यपत्रलेखकेन कार्तवीर्योदयमहाकाव्ये कविना स्वारस्येन प्रयुक्तानां महाकाव्यलक्षण-काव्यप्रयोजनकाव्यकारणादिशास्त्रीयतत्त्वानां सङ्क्षिप्तं सोदाहरणं विवेचनं प्रस्तुतम् । कार्यपत्रवाचनान्ते सहभागिभिरस्य कार्यपत्रस्य विभिन्नान् विषयानादाय प्रश्नाः प्रस्तुताः । कार्यपत्रलेखकेन च तेषामुत्तराणि प्रत्तानि ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

दशमकार्यपत्रप्रस्तुतिः

कार्यपत्रशीर्षकम् – कार्तवीर्योदयमहाकाव्ये प्रतिबिम्बिता सनातनसंस्कृतिः

कार्यपत्रप्रस्तोता – उपप्रा. ध्रुवप्रसादज्ञवाली

सङ्क्षिप्तविवरणम् – अस्मिन् कार्यपत्रे कार्यपत्रलेखकेन कार्तवीर्योदयमहाकाव्ये प्रतिबिम्बितानां सनातनसंस्कृतिसम्बद्धानां विषयाणां सोदाहरणं निरूपणं कृतम् । कार्यपत्रवाचनान्ते सहभागिभिरस्य कार्यपत्रस्य विभिन्नान् विषयानादाय प्रश्नाः प्रस्तुताः। कार्यपत्रलेखकेन च तेषामुत्तराणि प्रत्तानि ।

एकादशकार्यपत्रप्रस्तुतिः

कार्यपत्रशीर्षकम् – नेपालस्य संस्कृतमहाकाव्येषु कार्तवीर्योदयमहाकाव्यस्य स्थानम्

कार्यपत्रप्रस्तोता – सहप्रा. रामहरिदाहालः

सङ्क्षिप्तविवरणम् – अस्मिन् कार्यपत्रे कार्यपत्रलेखकेन विदुषा कार्तवीर्योदयमहाकाव्यस्य महाकाव्यीयदृष्ट्या परिचयं प्रदाय हरिकेलि–यदुवंश–चन्द्रसम्भव–सत्यहरिश्चन्द्र–महेन्द्रोदय–गोरक्षशाहवंश–नेपालसाम्राज्योदय–श्रीकृष्णचरितामृत–नाचिकेतस–ययातिचरित–वृत्रवध–गौरीगिरिश–जगदम्बिकावैभव–जगदीश्वरवैभव–सत्यसाईचरिताभिधानां नेपालीयकविनिर्मितानां संस्कृतमहाकाव्यानां कार्तवीर्योदयमहाकाव्येन साकं तुलनात्मकमध्ययनं प्रस्तुत्य तेषु सर्वोत्तममिदं काव्यमिति निर्णयः सप्रमाणं प्रस्तुतः । कार्यपत्रवाचनान्ते सहभागिभिरस्य कार्यपत्रस्य विभिन्नान् विषयानादाय प्रश्नाः प्रस्तुताः । कार्यपत्रलेखकेन च तेषामुत्तराणि प्रत्तानि ।

कार्यशाला (०५९/३/४ भौमवासरे ४:००–५:००)

केषाञ्चन कार्तवीर्योदयीयपद्यानां ग्रन्थिभेदनात्मिका कार्यशाला

'ग्रन्थिभेदनार्थं प्रस्तुतानि कानिचन कार्तवीर्योदयमहाकाव्यान्तर्गतानि पद्यानि' इति शीर्षके साहित्यविभागेन तृतीयदिवसीयं कार्यशालापत्रं निर्माय तत्र सहभागिनां विदुषां सन्निधौ प्रस्तुतम् । कार्यशालायामुक्तकार्यशालापत्रस्य वर्गद्वये विभक्तैर्विद्वभिर्ग्रन्थिभेदनं कृतम् ।

चतुर्थदिवसे (०५९/३/५ बुधवासरे ११:००–३:००)

द्वादशकार्यपत्रप्रस्तुतिः

सभापतिः – प्रा. सिद्धिनाथगौतमः

विशेषज्ञः – डा. टीकारामपन्थी

कार्यपत्रशीर्षकम् – कार्तवीर्योदयस्थविषयेषु पौराणिकः प्रभावः

कार्यपत्रप्रस्तोता – प्रा.डा. वावुरामपोखेलः

सङ्क्षिप्तविवरणम् – अस्मिन् कार्यपत्रे कार्यपत्रप्रस्तोत्रा विदुषा कार्तवीर्योदयमहाकाव्ये प्रयुक्तानां पौराणिकसन्दर्भानां विस्तृतं विवेचनं विधाय महाकाव्यमिदं पौराणिकधरातले विकसितं पौराणिकसंस्कृतिविस्तारकं चास्तीति प्रतिपादितम् । कार्यपत्र–वाचनान्ते सहभागिभिरस्य कार्यपत्रस्य विभिन्नान् विषयानादाय प्रश्नाः प्रस्तुताः । कार्यपत्रलेखकेन च तेषामुत्तराणि प्रत्तानि।

त्रयोदशकार्यपत्रप्रस्तुतिः

कार्यपत्रशीर्षकम् – कार्तवीर्योदयमहाकाव्यस्य प्रबन्धविधानम्

कार्यपत्रप्रस्तोता – प्रा. नीलमणिढुङ्गाना

सङ्क्षिप्तविवरणम् – अस्मिन् कार्यपत्रे कार्यपत्रलेखकेन विदुषा कार्तवीर्योदयमहाकाव्ये लक्षणशास्त्रनिर्दिष्टानां प्रबन्धविधानलक्षणानां

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

कथङ्कारं समायोजनं जातमिति सविस्तरं वर्णितम् । अत्र कार्यपत्रलेखकेन पञ्चसन्धीनां कथङ्कारं प्रयोग इति विषयमादाय उदाहरणानि प्रत्तानि । कार्यपत्रवाचनान्ते सहभागिभिरस्य कार्यपत्रस्य विभिन्नान् विषयानादाय प्रश्नाः प्रस्तुताः । कार्यपत्रलेखकेन च तेषामुत्तराणि प्रत्तानि ।

चतुर्दशकार्यपत्रप्रस्तुतिः

कार्यपत्रशीर्षकम् - कार्तवीर्योदयमहाकाव्ये चित्रकाव्यस्य प्रयोगः

कार्यपत्रप्रस्तोता – प्रा.डा. दुर्गादत्तशर्मा उपाध्यायः

सङ्क्षिप्तविवरणम् – अस्मिन् कार्यपत्रे कार्यपत्रलेखकेन विदुषा महाकवे सुकृतिदत्तपन्तस्य परिचयं प्रस्तुत्य चित्रकाव्यविषये लक्षणशास्त्रकाराणां विभिन्नानि मतमतान्तराणि विवेचितानि । तदनन्तरं कार्तवीर्योदयमहाकाव्ये प्रयुक्तानां गोमूत्रिका–सर्वतोभद्रबन्ध–दशदलबन्ध–खड्गबन्धादीनां चित्रकाव्यसम्पृक्तानां पद्यानां सचित्रं विवेचनं विहितम् । कार्यपत्रवाचनान्ते सहभागिभिरस्य कार्यपत्रस्य विभिन्नान् विषयानादाय प्रश्नाः प्रस्तुताः । कार्यपत्रलेखकेन च तेषामुत्तराणि प्रत्तानि ।

पञ्चदशकार्यपत्रप्रस्तुतिः

कार्यपत्रशीर्षकम् – कार्तवीर्योदयमहाकाव्ये वैदिकसंस्कृतेः प्रभावः

कार्यपत्रप्रस्तोता – प्रा.डा. हरिप्रसादगौतमः

सङ्क्षिप्तविवरणम् – अस्मिन् कार्यपत्रे कार्यपत्रलेखकेन विदुषा अस्मिन् महाकाव्ये वैदिकसंस्कृतेः पूर्णः प्रभावो वर्तते इति तथ्यं प्रमाणयितुं वैदिकसंस्कारसम्बद्धानि अष्टविकृतिनिर्देशकानि च पद्यानि प्रस्तुतानि । कार्यपत्रवाचनान्ते सहभागिभिरस्य कार्यपत्रस्य विभिन्नान् विषयानादाय प्रश्नाः प्रस्तुताः । कार्यपत्रलेखकेन च तेषामुत्तराणि प्रत्तानि ।

कार्यशाला (०५९/३/५ बुधवासरे ४:००-५:००)

केषाञ्चन कार्तवीर्योदयीयपद्यानां ग्रन्थिभेदनात्मिका कार्यशाला

'ग्रन्थिभेदनार्थं प्रस्तुतानि कानिचन कार्तवीर्योदयमहाकाव्यान्तर्गतानि पद्यानि' इति शीर्षके साहित्यविभागेन चतुर्थदिवसीयं कार्यशालापत्रं निर्माय तत्र सहभागिनां विदुषां सन्निधौ प्रस्तुतम् । कार्यशालायामुक्तकार्यशालापत्रस्य वर्गद्वये विभक्तैर्विद्वभिर्ग्रन्थिभेदनं कृतम् ।

पञ्चमदिवसे (०५९/०३/०६ गुरुवासरे ११:००-१:३०)

षोडशकार्यपत्रप्रस्तुतिः

सभापतिः – प्राचार्यः, सहप्रा. श्रीश्रीकृष्णोऽधिकारी

विशेषज्ञः – प्रा.डा. वावुरामपोखरेलः

कार्यपत्रशीर्षकम् – कार्तवीर्योदयमहाकाव्यस्य कलापक्षपरिशीलनम्

कार्यपत्रप्रस्तोता – उपप्रा. मुकुन्दलामिछानेः

सङ्क्षिप्तविवरणम् – अस्मिन् कार्यपत्रे कार्यपत्रप्रस्तोत्रा विदुषा कलापक्षपरिशीलनविषये स्वकीया विचारा उपस्थापिताः । कार्यपत्र–वाचनान्ते सहभागिभिरस्य कार्यपत्रस्य विभिन्नान् विषयानादाय प्रश्नाः प्रस्तुताः । कार्यपत्रलेखकेन च तेषामुत्तराणि प्रत्तानि।

सप्तदशकार्यपत्रप्रस्तुतिः

कार्यपत्रशीर्षकम् – कार्तवीर्योदयमहाकाव्य-नैषधमहाकाव्ययोस्तुलनात्मकमध्ययनम्

कार्यपत्रप्रस्तोता – उपप्रा. श्रीरामसापकोटाः

सङ्क्षिप्तविवरणम् – अस्मिन् कार्यपत्रे कार्यपत्रलेखकेन विदुषा कार्तवीर्योदयमहाकाव्य–नैषधमहाकाव्ययोस्तुलनात्मकमध्ययनमिति

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

विषये साम्यसूचकानां पद्यानां दिग्दर्शनपूर्वकं निजा धारणा प्रकाशिता । कार्यपत्रवाचनान्ते सहभागिभिरस्य कार्यपत्रस्य विभिन्नान् विषयानादाय प्रश्नाः प्रस्तुताः । कार्यपत्रलेखकेन च तेषामुत्तराणि प्रत्तानि ।

कार्यशाला (०५९/३/६ गुरुवासरे १:३०-२:३०)

केषाञ्चन कार्तवीर्योदयीयपद्यानां ग्रन्थिभेदनात्मिका कार्यशाला

'ग्रन्थिभेदनार्थं प्रस्तुतानि कानिचन कार्तवीर्योदयमहाकाव्यान्तर्गतानि पद्यानि' इति शीर्षके साहित्यविभागेन पञ्चमदिवसीयं कार्यशालापत्रं निर्माय तत्र सहभागिनां विदुषां सन्निधौ प्रस्तुतम् । कार्यशालायामुक्तकार्यशालापत्रस्य वर्गद्वये विभक्तैर्विद्वद्भिर्ग्रन्थिभेदनं कृतम् । अस्या गोष्ठ्याः सर्वेष्वेव सत्रेषु कार्यक्रमसञ्चालक उपप्रा. श्रीजीवनोऽधिकारी आसीत् ।

समापनसमारोहः (०५९/३/६ गुरुवासरे २:००-२:३०)

सभापतिः - प्रा.डा. वेणीमाधवढकालः (अध्यक्षः, साहित्यशिक्षणविभागस्य)

प्रमुखातिथिः - **माननीयो भौतिकयोजनानिर्माणमन्त्री चिरञ्जीवीवाग्लेः**

विशिष्टातिथिः - प्रा.डा. होमनाथभट्टराईः (सदस्यसचिवः, विश्वविद्यालयानुदानायोगस्य)

विशिष्टातिथिः - श्रीश्रीभद्रशर्मा, (अध्यक्षः, जयतु संस्कृतम् संस्थायाः)

अतिथिः - प्रा.डा. माधवशरण उपाध्यायः (शिक्षाध्यक्षः, म.सं.वि.)

अभिनन्दनीयाः -
क) **सम्माननीयो डा. स्वामी रामकृष्णप्रपन्नाचार्यः**
ख) **प्रा. सिद्धिनाथगौतमः**
ग) **प्रा.डा. माधवभट्टराईः (नायबबडागुरुज्यू)**

वक्ता - प्रा.डा. टीकारामपन्थी, ग्रन्थिभेदनस्य निष्कर्षप्रस्तुतिः

वक्ता - प्रा.डा. वावुरामपोखरेलः, सहभागिप्रतिनिधिमन्तव्यम्

वक्ता - प्रा. नीलमणिढुङ्गानाः, गोष्ठ्युपलब्धिनिष्कर्षप्रस्तुतिः, प्रस्तावप्रस्तुतिश्च

वक्ता - प्रा.डा. टीकारामोऽधिकारी, स्वागतमन्तव्यम्

वक्ता - प्रा.डा. दुर्गादत्तशर्मोपाध्यायः, कवितात्मकं धन्यवादज्ञापनम्

वक्ता - उपप्रा. धनेश्वरनेपालः (महासचिवः, म.सं.वि. प्राध्यापकसंघस्य) मन्तव्यम्

वक्ता - श्रीमोदनाथखनालः (सचिवः, वाल्मीकिविद्यापीठप्राध्यापकसङ्घस्य) मन्तव्यम्

वक्ता - प्रा.डा. टीकारामोऽधिकारी, डा. स्वामिप्रपन्नाचार्यमहोदयाय दीयमानस्याभिनन्दनपत्रस्य वाचनम्

वक्ता - सहप्रा. रामहरिदाहालः, प्रा. सिद्धिनाथगौतममहोदयाय दीयमानस्याभिनन्दनपत्रस्य वाचनम्

वक्ता - उपप्रा. मुकुन्दलामिछानेः, नायबबडागुरुज्यू प्रा.डा. माधवभट्टराईमहोदयाय दीयमानस्याभिनन्दनपत्रस्य वाचनम्

वक्ता - उपप्रा. नन्दनभट्टराईः, गोष्ठीनिष्कर्षप्रस्तुतिः ।

वक्ता - उपप्रा. जीवनोऽधिकारी, धन्यवादज्ञापनम्

कार्यक्रमसंचालनम् - उपप्रा. शान्तिकृष्णोऽधिकारी ।

समापनकार्यक्रमस्य संक्षिप्तं विवरणम्

महेन्द्रसंस्कृतविश्वविद्यालयस्य विश्वविद्यालयलयानुदानायोगस्य च सहयोगे वाल्मीकिविद्यापीठसाहित्यशिक्षणविभागेन समायोजितायाः **'कार्तवीर्योदयमहाकाव्यस्य शास्त्रीयमेवं साहित्यिकं विश्लेषणं तथा ग्रन्थिभेदनम्'** इति शीर्षकान्वितायाः पञ्चदिवसीयायाः कार्यशालागोष्ठ्या वाल्मीकिविद्यापीठे समापनसमारोहः सुसम्पन्नः । तत्र प्रमुखातिथिना

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

माननीयेन मन्त्रिण वाग्लेमहाभागेन नायबबडागुरुज्यू प्रा.डा. माधवभट्टराईमहोदयः प्रा. सिद्धिनाथगौतममहोदयश्च उत्तरीयपरिधापनपूर्वकमभिनन्दनपत्रप्रदानेन सम्मानितौ। म.सं.वि.शिक्षाध्यक्षेण प्रा.डा. माधवशरणमहाभागेन च तेनैव रूपेण सम्माननीयो डा. स्वामिप्रपन्नाचार्यमहाभागः सम्मानितः । अस्मिन् समारोहे माननीयो मन्त्री चिरञ्जीवीवाग्लेमहाभागः संस्कृतस्य संस्कृतेश्च समुत्कर्षाय नेपालवासिभिः संस्कृतविद्वद्भिः कठोरः प्रयासो विधेय इति मन्तव्यं प्रस्तुतवान् । संवेदनहीने साम्प्रतिके वातावरणे संस्कृतजगत् सर्वत्र संवेदनशीलतायाः सञ्चारविधौ गतिशीलं भवेदिति सर्वानभिप्रेरितवान् । समारोहस्य विशिष्टातिथिः प्रा.डा. होमनाथभट्टराईमहोदयो युगानुसारेण नवीनज्ञानमादाय नवीनामनुसन्धानक्रियाकलापान् विकसय्य विश्वविद्यालयस्य प्राज्ञिकोत्कर्षाय विद्वद्भिर्यतनीयमिति अभिप्रेरयन् वाल्मीकिविद्यापीठसाहित्यविभागस्य प्रशंसां कृतवान् । विश्वविद्यालयस्य शिक्षाध्यक्षः प्रा.डा. माधवशरणोपाध्यायमहोदयश्च विश्वविद्यालय एतादृशे प्राज्ञिके क्रियाकलापे सर्वदा तत्परो भविष्यति कार्तवीर्योदयमहाकाव्यस्य च पुनः सम्पादनं प्रकाशनञ्च कर्तुं प्रयतिष्यते इत्युक्तवान् । नायबबडागुरुज्यू प्रा.डा. माधवभट्टराईमहोदयो वाल्मीकिविद्यापीठसाहित्यशिक्षणविभागेन एतादृशप्राज्ञिककार्यसमायोजनापूर्वकं एष जनः सम्मानित इति कथयन् साहित्यविभागाय साहित्यविभागाध्यक्षाय च भूरि भूरि साधुवादान् प्रायच्छत् ।

सम्माननीयः स्वामी डा. प्रपन्नाचार्यमहोदयः संस्कृतं राष्ट्रियैकताया राष्ट्रियाऽखण्डतायाश्च कारकतत्त्वमस्ति । मया कार्तवीर्योदयमहाकाव्यस्य सम्पादनं कृतम्, अत्रत्यैर्विद्वद्भिरपि राष्ट्रगौरवसंवर्द्धकप्राज्ञिकक्रियाकलापेषु संलग्नतां प्रदर्श्य राष्ट्रस्य कीर्तिविस्तारः कर्तव्यः । अद्य वाल्मीकिविद्यापीठसाहित्यशिक्षणविभागेन ममाभिनन्दनं कृतम् । एतदर्थं साहित्यविभागाय विशेषतो मम सतीर्थ्याय प्रा.डा. वेणीमाधवढकालमहोदयाय हार्दिकं साधुवादं समर्पये इत्युक्तवान् ।

तस्मिन्नेव समारोहे अभिनन्दितेन पूर्वविभागाध्यक्षेण प्रा. सिद्धिनाथगौतममहाभागेन उक्तम् - इदानीं वाल्मीकिविद्यापीठसाहित्यशिक्षणविभागेन यन्महनीयं कार्यं कृतं तत् मम विचारे न भूतो न भविष्यति इति प्रतीयते । इदृशी उपलब्धिमूला गोष्ठी संस्कृताध्ययनसंस्थानेन नैव कृतं नापि च महेन्द्रसंस्कृतविश्वविद्यालयेन । अद्य विभागेन ममाभिनन्दनं कृतमेतदर्थमहमस्या गोष्ठ्या आयोजकाय साहित्यशिक्षणविभागाय विभागाध्यक्षाय ढकालमहोदयाय च हार्दिकं कार्तज्ञ्यं प्रकाशयामि ।

एतस्मिन्नेव समारोहे प्राज्ञेन डा. टीकारामपन्थिमहाभागेन ग्रन्थिभेदनकार्यक्रमस्य निष्कर्षं प्रस्तुवता अस्या गोष्ठ्या प्रशंसा विहिता । सहभागिप्रतिनिधिभूतेन पूर्वशिक्षाध्यक्षेण प्रा.डा. वावुरामपोखरेलमहानुभागेन गोष्ठ्याः साहित्यविभागस्य च प्रशंसा कृता । अस्मिन्नवसरे गोष्ठीसंयोजनसमितेः सदस्येन प्रा. नीलमणिढुङ्गानामहोदयेन प्रस्तुताः षट् प्रस्तावाः सभया पारिताः । सुकृतिदत्तपन्तविरचितस्य कार्तवीर्योदयमहाकाव्यस्य विभिन्नान् पक्षानादाय विश्लेषणपूर्वकं विद्वद्भिर्निर्मितानि १७ कार्यपत्राणि ४ ग्रन्थिभेदनकार्यशालापत्राणि च गोष्ठ्यां प्रस्तुतानि । तेषां विषये पञ्चदिवसपर्यन्तं सहभागिभिः कार्यपत्रलेखकैर्विशेषज्ञैश्च ऊहापोहः कृत । एकं महाकाव्यमादाय आयोजिता एषा प्रथमा गोष्ठी वर्तते इति तत्रत्यैः सहभागिभिरुक्तम् । कार्यक्रमस्यान्ते सभाध्यक्षेन प्रा.डा. वेणीमाधवढकालमहाभागेन तत्रागतानां प्रमुखातिथीनाम्, विशिष्टातिथीनाम्, अतिथीनाम्, अभिनन्दितविदुषाम्, विश्वविद्यालयस्य पदाधिकारिणाम्, कार्यपत्रलेखकानाम्, विशेषज्ञानाम्, सहभागिनां विदुषाञ्च कृते हार्दिकं धन्यवादज्ञापनं कृतम् ।

उक्तसमारोहे प्रा.डा. टीकारामोऽधिकारिमहाभागः स्वागतमन्तव्यं प्रस्तुतवान् । उपप्रा. जीवनोऽधिकारी च धन्यवादज्ञापनं कृतवान् । उपप्रा. नन्दनभट्टराईः गोष्ठ्यां प्रस्तुतानां कार्यपत्राणां सारसङ्क्षेपमुपस्थापितवान् । प्रा.डा. दुर्गादत्तशर्मोपाध्यायमहोदयः काव्यवाचा धन्यवादज्ञापनं कृतवान् ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

धन्यवादज्ञापनम्

प्रा. डा. दुर्गादत्तशर्मा उपाध्यायः

कार्यक्रमाणां व्यस्तत्वेऽपि चास्माननुगृह्य हि । समायाता मन्त्रिवराश्चिरत्र्जीवीति विश्रुताः ।।१।।
इत्यस्माकं मनोमोदविस्तारो याति नो तनौ । प्रथमं ते सभाज्यन्ते धन्यवादपुरःसरम् ।।२।।
येषामार्थिकसाहाय्याद् गोष्ठीयं सफलाऽजनि । दिगन्तव्यापिनी येषां राजते कीर्तिकौमुदी ।।३।।
श्रीपूर्णचन्द्रनामानो नानाशास्त्रेषु धूर्वहाः । सभाज्यन्ते भूरिशस्ते म.सं. व्युपकुलाधिपाः ।।४।।
प्रस्तुतं यैः कार्यपत्रं संक्षिप्तं सारसंभृतम् । यैश्चानुदिनमागत्य श्रद्धावहितमानसैः ।।५।।
श्रुतानि कार्यपत्राणि, गोष्ठीसञ्चालनाय च । द्रव्यस्य सहयोगार्थं विश्वविद्यालयश्च यैः ।।६।।
प्रेरितस्ते धन्यभाजः शिक्षाध्यक्षमहोदयाः । माधवा माधवार्चासु दीक्षिताः क्षीणकल्मषाः ।।७।।
निवृत्ता अपि ते धन्याः कुलसाचिव्यतोऽधुना । सभाज्यन्ते भोजराजा, गोष्ठ्या अर्थव्यवस्थितिम् ।।८।।
कारयित्वैव ते याता इति सौजन्यभावतः । अनुदानाख्य आयोगो धन्यो येन पुनः पुनः ।।९।।
गोष्ठीसञ्चालनार्थाय वितीर्णो द्रव्यसञ्चयः । अनुदानाख्य आयोगे साचिव्यपदमास्थिताः ।।१०।।
गीर्वाणवाङ्मयोत्थाने श्रद्धयैधितमानसाः । होमनाथमहाभागा भट्टराय्युपनामकाः ।।११।।
उदारचित्ताा विद्वांसः सभाज्यन्ते हि भूरिशः । राईकुलसमुत्पन्नैरपि यैर्बहुयत्नतः ।।१२।।
समुज्ज्वला ज्ञानदीप्तिराप्ता दिविषदां गवि । श्रुतिस्मृतिपुराणानि श्रद्धयाधीत्य तत्र च ।।१३।।
किमस्तीति समुद्घाट्य स्थापितं विदुषां पुरः । कवेः सुकृतिदत्तस्य ग्रन्थरत्नानि भूरिशः ।।१४।।
सम्पाद्य विदुषामग्रे स्थापितानि तथा पुनः । यै राजपर्षत्समितौ स्थानमाप्तं सुगौरवम् ।।१५।।
यैश्चाद्य विदुषां मध्ये प्राप्तं समभिनन्दनम् । सभाज्यन्ते प्रपन्नाख्याः स्वामिनस्ते हि भूरिशः ।।१६।।
द्वितीयपाणिनिरिति ख्याता वाराणसीपुरि ये चान्येष्वपि शास्त्रेषु सर्वेषामास्थिता धुरि ।।१७।।
यैश्च भाष्याम्बुधिः पीतोऽगस्तिनेव महार्णवः । ये विद्वत्कुलमूर्धन्या धन्याश्च विदुषां कुले ।।१८।।
यैर्विद्वत्तापूर्णकार्यपत्रं प्रस्तुतमत्र च । विशेषज्ञपदे स्थित्वा गोष्ठी सञ्चालितान्वहम् ।।१९।।
डा. टीकारामपन्थ्याख्यान् महाभागाँश्च तान्पुनः । सभाजयामः सततं धन्यवादपुरःसरम् ।।२०।।
येऽत्र प्राचार्यस्य पदे बहुकालं स्थिताः पुनः । विद्यापीठस्य संवृद्धौ प्रयासो भूरि यैः कृतः ।।२१।।
सत्यसाईमहाकाव्यं येषामतिमनोहरम् । ज्ञातकाव्यार्थसर्वस्वा व्युत्पत्तिप्रतिभोज्ज्वलाः ।।२२।।
इदानीं वर्तमानाश्च शुभे राजगुरोः पदे । अद्यैव येषां, विदुषामग्रे समभिनन्दनम् ।।२३।।
माधवाख्या महाभागा भट्टराय्युपनामकाः । सादरं ते सभाज्यन्ते बहुशः कृतिनां वराः ।।२४।।
साहित्यसाधनासिद्धिसाधिताखिलवैभवाः । सोमनाथादिविदुषां शिष्यत्वेनानुशासिताः ।।२५।।
कृतमद्यैव सपदि येषां समभिनन्दनम् । सादरं ते सभाज्यन्ते सिद्धिनाथमहोदयाः ।।२६।।
येषां षड्दर्शनी सर्वा जिह्वाग्रेऽस्तीति मन्यते । विद्वल्लोकोऽनुयोगेषु संलभ्योचितमुत्तरम् ।।२७।।
पुराणतन्त्रादिषु च येषामव्याहता गतिः । ते ज्ञातसर्वशास्त्रार्था दवाडीत्युपनामकाः ।।२८।।
दुर्गाप्रसादा अस्माभिः सभाज्यन्तेऽत्र सादरम् । येषां तर्के च तन्त्रे च प्रतिभा स्फुरति ध्रुवा ।।२९।।
अन्येष्वपि च शास्त्रेषु येषां गतिरकुण्ठिता । दक्षिणं मार्गमाश्रित्य शिवशक्त्योरुपासकाः ।।३०।।
विद्यानाथाः सभाज्यन्ते धन्यास्ते कृतिनां वराः । येषां पुराणशास्त्रेषु वर्ततेऽव्याहता गतिः ।।३१।।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

गुरुभक्तौ देवभक्तौ श्रद्धापूरितमानसाः । यैरत्रागत्य गोष्ठ्यां च विशेषज्ञपदे स्थितम् ।।३२।।
श्रद्धया विहितं कार्यं ते वाबुरामनामकाः । विद्वद्वराः सभाज्यन्ते धन्यवादैः पुनः पुनः ।।३३।।
ये साहित्यविभागस्याध्यक्षाः सर्वार्थकोविदाः । सर्वशास्त्रार्थनिष्णातास्तथाशुकवयश्च ये ।।३४।।
उपन्यासमहाकाव्यकथाप्रभृतिभूरिशः । येषाममरभारत्यां ग्रन्थरत्नकदम्बकम् ।।३५।।
ग्रन्थसम्पादनं व्याख्या तथा ग्रन्थानुसंहितिः । एतैः कार्यैरिव येषां समयः सुष्ठु गच्छति ।।३६।।
येषां महाप्रयासेन गोष्ठीयं सफलाऽजनि । श्रीवेणीमाधवा भूरि सभाज्याः सन्ति नः सदा ।।३७।।
ये चान्ये सन्ति विद्वांसोऽस्यां गोष्ठ्यां सहभागिनः । सभाजयामस्तान् सर्वान् धन्यवादपुरःसरम् ।।३८।।
येषामायासमाहात्म्यादियं गोष्ठी सुचालिता । प्रशस्यास्ते कार्यपत्रलेखका विदुषां वराः ।।३९।।
ये बुभुक्षां च निद्रां च नैव जानन्ति कर्मणि । सततं व्यापृता सर्वं रात्रिन्दिवमतन्द्रिताः ।।४०।।
यावान् प्रयास एतस्या गोष्ठ्याः सञ्चालनेऽभवत् । कश्चिद् भारस्तु तैरेव गृहीत इति मन्यते ।।४१।।
लेखका बहुग्रन्थानां दक्षाः शिक्षणकर्मणि । प्राध्यापका नीलमणिढुङ्गाना इति विश्रुताः ।।४२।।
सततं धन्यवादार्हाः सन्ति ते भूरिभूरिशः । विद्यापीठस्य प्राचार्या अधिकार्युपनामकाः ।।४३।।
श्रीकृष्णनाम्ना विख्याताः सभाज्यन्ते हि भूरिशः । गोष्ठी सञ्चालकत्वं च सहभागित्वमेव च ।।४४।।
उभयं कार्यमपि यैः श्रद्धया साधितं सदा । गोष्ठीसञ्चालने यावदार्थिकं भारमस्ति तत् ।।४५।।
सर्वं सम्पादयन्तस्ते धन्या हरिहराभिधाः । अधिकार्युपनामानोऽधिकृताश्चार्थकर्मणि ।।४६।।
सदा प्रसन्नवदना व्यापृता निजकर्मसु । अहंपूर्विकया कार्यं कर्तुं सततमुद्यताः ।।४७।।
अस्यां गोष्ठ्यामविरलं तन्द्रालस्यविवर्जिताः । अधिकार्युपनामानः शान्तिकृष्णाभिधाः पुनः ।।४८।।
सततं धन्यवादार्हा गतिस्फूर्तिसमुज्ज्वलाः । अन्यैश्च सर्वैर्यत्किञ्चित् सहयोगोऽस्ति कल्पितः ।।४९।।
गोष्ठीसञ्चालने कार्ये श्रद्धया कर्मणाऽथवा । वचसा मनसा वाऽपि ते सर्वे सहयोगिनः ।।५०।।
भूरिशो धन्यवादार्हा अत्रानुल्लिखिता अपि । नवपञ्चवियन्नेत्रमिते वैक्रमवत्सरे ।।५१।।
शुचेर्द्वितीयदिवसादारभ्य परिचालिता । षष्ठे च दिवसे गोष्ठी सायं परिसमापिता ।।५२।।
पञ्चभिर्दिवसैरत्र बहु कार्यं कृतं बुधैः । अत्रासन्नपञ्चविंशकार्यपत्राणि तेषु च ।।५३।।
पत्राणि कार्यशालाया मूल्यवन्तीति निश्चितम् । तान्यत्र प्रतुतान्येषां कृतं सुष्ठु समीक्षणम् ।।५४।।
यतः सुकृतिदत्तस्य भारवेरिव दुर्गमम् । कार्तवीर्योदयं काव्यं तत्रत्यग्रन्थिभेदनम् ।।५५।।
एतत्सुदुष्करं कार्यं विद्वद्भिरिह साधितम् । काव्ये सौकृतिदत्तेऽस्मिन् कठिनाः बहुग्रन्थयः ।।५६।।
तेषां भेदनकार्यं तु वज्रवेधसमं मतम् । समयस्य न्यूनतया यथाशक्ति कृतं बुधैः ।।५७।।
अवशिष्टाश्च सन्त्यत्र बहवो ग्रन्थयस्त्विह । तेषां भेदे महायत्नः कुशाग्रधिषणैः पुनः ।।५८।।
कर्तव्योऽस्ति ततः पश्चाच्छुद्धपाठो भवेद्यदि । कार्तवीर्योदयं काव्यं जगति ख्यातिमेष्यति ।।५९।।
दृश्यन्ते यानि काव्यानि जगत्यामपि संप्रति । विलक्षणमिदं काव्यं मन्येरँस्ते बुधा अपि ।।६०।।
यतो हीदं महाकाव्यं पराशक्तेः पदाम्बुजम् । संसेव्य शुद्धचित्तेन कविना ग्रथितं त्विति ।।६१।।
मन्येऽहमिति वाक्यानि विद्वत्सु विनिवेदयन् । दुर्गादत्तो विरमति हरिदत्तसुधीसुतः ।।६२।।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

सं.डा. स्वामिरामकृष्णप्रपन्नाचार्यमहोदयाय समर्पितस्याभिनन्दनपत्रस्य प्रतिरूपम् -

विद्वन्मुकुटचूडामणिस्व.पद्मप्रसादभट्टराईसदृशमहापुरुषाणां यशोलतालवालानां
भारतीयोपमहाद्वीपविजयिनां शास्त्रार्थमहारथानां नेपालगौरवास्पदीभूत-
श्रीकार्तवीर्योदयमहाकाव्यसम्पादकानां विद्यावारिध्युपाधिसनाथानां
वेदान्ताचार्याणां सम्माननीयानां राजसभास्थायिपरिषत्सदस्य-
पदजुषां डा. स्वामिरामकृष्णप्रपन्नाचार्यमहाभागानां कर-
कमलयोर्वाल्मीकिविद्यापीठसाहित्यशिक्षणविभागेन
सादरं समर्पितम्

अभिनन्दनपत्रम्

मेचीक्षेत्रविभूषकाः स्वजनुषा कैरातवंशश्रियः
श्रीधम्बेतनुजाः प्रदीप्तवपुषो वेदान्तिनः साधकाः ।
शौर्यश्रीयुतरामकृष्णसदृशाः श्रीरामकृष्णाभिधा
आचार्या विलसन्ति संसदि सतां स्वामिप्रपन्नोपधाः ।।

श्रीमद्भागवतप्रसादमहिताः सारस्वतोर्जस्विनः
पाण्डित्याञ्चितसर्वशास्त्रसमरे सर्वोच्चनिश्शत्रवः ।
श्रीसारस्वतदीप्तिदीपितहृदो मूर्धन्यविद्वद्वरा
नेपालेऽत्र जयन्ति ते यतिवराः श्रीरामकृष्णा बुधाः ।।

विद्यावारिधिनामकं शुभपदं लब्ध्वा बुधैरादृताः
पद्मस्मारकग्रन्थरत्नमतुलं सम्पाद्य ख्यातिङ्गताः ।
श्रीयोगेश्वरशीलशक्तिललिताः पद्मप्रसादोपमाः
ते वेदान्तमहारथाः कृतिरता भूपालसम्मानिताः ।।

ते शास्त्रार्थगवेषणायतधियः साहित्यहंसाः सदा
वाग्देव्याश्च कृपाकटाक्षकुसुमैर्दीव्यन्तु दीर्घायुषा ।
अस्माकं सुकृतैः स्थिता नयनयोः श्रद्धाप्रसूनैः शुभै-
र्मान्यन्तेऽद्य पदावलीकलरवैः साहित्यिकैः शिक्षकैः ।।

आशंसकाः
वाल्मीकिविद्यापीठसाहित्यविभागस्था वयम्
अध्यक्षः
प्रा.डा. वेणीमाधवढकालः
सदस्याः

प्रा.डा. टीकारामोऽधिकारी — प्रा.डा. दुर्गादत्तशर्मोपाध्यायः
सहप्रा. रामहरिदाहालः — उपप्रा. श्रीरामसापकोटाः
उपप्रा. जीवनोऽधिकारी — उपप्रा. मुकुन्दलामिछानेः

दिनाङ्काः २०५९/३/६

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

नायवबडागुरुज्यू प्रा.डा. माधवभट्टराईमहाभागाय समर्पितस्याभिनन्दनपत्रस्य प्रतिरूपम्-

विद्वत्तल्लजानां स्व. शेषराजरेग्मी- स्व. हरिदेवमिश्रसदृशानां सद्गुरूणां सुयोग्योत्तराधि-कारिणां धर्मसंस्कृतिसाहित्यसंवर्धकानां विद्यावारिध्युपाधिसनाथानां संस्कृतसाहित्य-महाकविवराणां नायबबडागुरुज्यूपदजुषां प्राध्यापकमाधवभट्टराईमहाभागानां करकमलयोर्वाल्मीकिविद्यापीठसाहित्यशिक्षणविभागेन सादरं समर्पितम्

अभिनन्दनपत्रम्

धीमन्तः प्रतिभान्विताः सुरवचोव्यासक्तचित्ताङ्कुराः
खोटाङाभिधमण्डलाप्तजनुषः कृष्णप्रसादात्मजाः ।
विद्यावारिधिसंज्ञकोज्ज्वलपदं लब्ध्वा बुधैः सत्कृता
धन्या भूसुर-भट्टराइविदुषां वंशश्रियां वर्धकाः ।।

सम्मानैर्विविधैः स्वदेशमहितैस्तैस्तैः प्रतिष्ठाङ्गता-
स्तां साहित्यविभागजां प्रमुखतां संश्रित्य लब्धादराः ।
विद्यापीठमुखा महाकविवराः साहित्यप्राध्यापका
नेपाले विलसन्ति राजगुरवो विद्याप्रिया माधवाः ।।

काव्यं संसदि सत्यसाइचरितं तद् दिव्यवाचाञ्चितं
भक्त्याऽऽप्लावितशब्दसौष्ठवमयं संसेव्यते नूतनम् ।
साहित्याजिरगामिनी रसमयी सा लेखनी हारिणी
संमोदाय यथा तथाऽस्तु सुहृदां नः शब्दपुष्पावली ।।

साहित्यस्य विभागोऽयं भवत्सम्मानतत्परः ।
सम्मानयति वाक्पुष्पैः श्रीमतः काव्यकोविदान् ।।

प्रमुखातिथिः

चिरञ्जीवी याग्लेः
(भौतिकयोजनानिर्माणमन्त्री)

दिनाङ्कः २०५९/३/६

आशंसकाः
वाल्मीकिविद्यापीठसाहित्यविभागस्था वयम्
अध्यक्षः
प्रा.डा. वेणीमाधवढकालः
सदस्याः
प्रा.डा. टीकारामोऽधिकारी प्रा.डा. दुर्गादत्तशर्मोपाध्यायः
सहप्रा. रामहरिदाहालः उपप्रा. श्रीरामसापकोटाः
उपप्रा. जीवनोऽधिकारी उपप्रा. मुकुन्दलामिछानेः

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

प्रा. श्रीसिद्धिनाथगौतममहाभागाय समर्पितस्याभिनन्दनपत्रस्य प्रतिरूपम् -

पुण्ययशसां स्व. पण्डितराजसोमनाथसिग्देलसदृशानां विद्वन्मूर्धन्यानां मध्यांग्योत्तराधिकारिणां संस्कृतशिक्षाविकासदृढव्रतानां पूर्वविभागप्रमुख-प्राचार्य-संस्कृताध्ययनसंस्थान-सहायकाध्यक्षादिपदमहितानां राष्ट्रियप्राज्ञिककार्येषु कृतावदानानां प्राध्यापक-सिद्धिनाथगौतममहाभागानां करकमलयोर्वाल्मीकिविद्यापीठ-साहित्यशिक्षणविभागेन सादरं समर्पितम्

अभिनन्दनपत्रम्

मान्याः काव्यविलासिनः स्मितधनाः श्रीगौतमोपाभिधा
धीरा धादिङ्मण्डलाप्तजनुषो ज्ञानेश्वरस्यात्मजाः ।
नित्यं वंशसमुन्नतिव्रतधराः श्रीशौर्यवन्तोऽमलाः
स्वे राष्ट्रेऽमरवाग्विकासनपराः प्रख्यातवाक्कौशलाः ।।

शिष्टैर्धीरितरैश्च तैर्गुरुजनैः श्रीसोमनाथादिभि-
राबाल्यात् परिशिक्षिता नततरा साहित्यप्राध्यापकाः ।
स्वैश्छात्रैश्च निषेविताः श्रुतिधरा मित्रप्रियाः सक्रिया
नेपाले विलसन्ति ते बुधवराः श्रीसिद्धिनाथाभिधाः ।।

सम्मानैरपि शैक्षिकैः सुमहितास्तैस्तैश्च विद्वद्वराः
शिक्षाक्षेत्रगता प्रशासनकला लोकप्रिया वः सदा ।
नानाप्राज्ञिककार्यपद्धतिरियं स्तुत्या भवत्साधिता
सत्यादर्शगवेषका ! जयति वः सा शेमुषी सद्व्रता ।।

साहित्याध्वनि भावसङ्गतहृदोऽलङ्कारशब्दावली-
व्याख्यानोचितबुद्धिवैभवबलाः सद्भावसंवाहकाः ।
विद्यापीठमुखाः सदा सुरगिरां संवर्धने तत्परा
मान्यास्ते कृतिनो जयन्ति सततं गीर्वाणवाणीप्रियाः ।।

साहित्यस्य विभागोऽयं संविधत्तेऽभिनन्दनम् ।
भूयाद् वो विमला कीर्तिर्वागीश्वर्याः प्रसादतः ।।

प्रमुखातिथिः

चिरञ्जीवी वाग्ले:
(भौतिकयोजनानिर्माणमन्त्री)

आशंसकाः
वाल्मीकिविद्यापीठसाहित्यविभागस्था वयम्

अध्यक्षः
प्रा.डा. वेणीमाधवढकालः

सदस्याः
प्रा.डा. टीकारामोऽधिकारी — प्रा.डा. दुर्गादत्तशर्मोपाध्यायः
सहप्रा. रामहरिदाहालः — उपप्रा. श्रीरामसापकोटाः
उपप्रा. जीवनोऽधिकारी — उपप्रा. मुकुन्दलामिछानेः

दिनाङ्कः २०५९/३/६

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

कार्तवीर्योदयमहाकाव्यसम्बद्धाया गोष्ठ्या उद्घाटनसमारोहे समवेतानां विदुषां चित्रावली

समुद्घाटनसमारोहे दक्षिणभागतः क्रमशः – कुलसचिवः – प्रा.डा. भोजराजपन्तः, प्रमुखातिथिः उपकुपतिः – आचार्य-पूर्णचन्द्रढुङ्गेलः, सभापतिः – डा. वेणीमाधवढकालः, शिक्षाध्यक्षः- प्रा.डा. माधवशरण उपाध्यायः, विशिष्टातिथिः – प्रा. डा. होमनाथ-भट्टराईश्च

समुद्घाटनसमारोहे सभाकक्षस्य प्रतीचीभागे समवेताः प्रा. विद्यानाथोपाध्यायप्रभृतयो विद्वांसः

सभाकक्षस्य प्राचीभागे समवेता डा. टीकारामपन्थीप्रभृतयो विद्वांसः



समुद्घाटनसभां सम्बोधयन् उपकुलपतिः – आचार्य-पूर्णचन्द्रढुङ्गेलः, तदीय दक्षिणभागे शिक्षाध्यक्षः – प्रा.डा. माधवशरण उपाध्यायः, वामभागे च नायववडागुरुज्यू प्रा.डा. माधवभट्टराईः, कुलसचिवः प्रा.डा. भोजराजपन्तश्च

सभाकक्षस्य अवाच्यां समवेता विद्वांसः

समुद्घाटनसमारोहे गोष्ठ्या उद्देश्यं प्रयोजनञ्च प्रतिपादयन् म.सं.वि. शैक्षिकमहाशाखाप्रमुखः सहप्रशासकः – श्रीहरिहरोऽधिकारी

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri



समुद्घाटनसमारोहे स्वमन्तव्यं प्रकाशयन् स्व.वि.यू. सभापतिः - विष्णुपन्थी



समुद्घाटनसमारोहे स्वमन्तव्यं प्रकाशयन् कुलसचिवः प्रा.डा. भोजराजपन्तः

समुद्घाटनसमारोहे स्वमन्तव्यं प्रकाशयन् पूर्वशिक्षाध्यक्षः प्रा.डा. वावुरामपोखरेलः

समुद्घाटनसमारोहे स्वमन्तव्यं प्रकाशयन् प्रा. नीलमणिढुङ्गानाः

समुद्घाटनसमारोहे समवेता विद्वांसः

समुद्घाटनसमारोहे समवेता विद्वांसः

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

कार्तवीर्योदयमहाकाव्यसम्बद्धायां गोष्ठ्यां कार्यपत्रप्रस्तावकानां विदुषां चित्रावली

कार्यपत्रवाचनं कुर्वाणः प्रा.डा. माधवशरण उपाध्यायः



कार्यपत्रवाचनं कुर्वाणः प्रा.डा. वेणी-माधवढकालः

कार्यपत्रवाचनं कुर्वाणः प्रा.डा. वावुरामपोखरेलः

कार्यपत्रवाचनं कुर्वाणः डा. टीकारामपन्थी

कार्यपत्रवाचनं कुर्वाणः प्रा.डा. साम्बराज आचार्यः



कार्यपत्रवाचनं कुर्वाणः प्रा.डा. रामचन्द्रगौतमः

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri



कार्यपत्रवाचनं कुर्वाणः प्रा.डा.
टीकारामोऽधिकारी



कार्यपत्रवाचनं कुर्वाणः प्रा. श्रीविद्यानाथ
उपाध्यायः



कार्यपत्रवाचनं कुर्वाणः प्रा.डा.
दुर्गाप्रसाददवाडी



कार्यपत्रवाचनं कुर्वाणः उपप्रा.
श्रीध्रुवप्रसादज्ञवाली

कार्यपत्रवाचनं कुर्वाणः सह.प्रा.
श्रीरामहरिदाहालः

कार्यपत्रवाचनं कुर्वाणः प्रा.
श्रीनीलमणिढुङ्गानाः

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri



कार्यपत्रवाचनं कुर्वाणः प्रा.डा.
दुर्गादत्तशर्मोपाध्यायः



कार्यपत्रवाचनं कुर्वाणः प्रा.डा.
हरिप्रसादगौतमः



कार्यपत्रवाचनं कुर्वाणः उपप्रा.
श्रीमुकुन्दलामिछाने:

कार्यपत्रवाचनं कुर्वाणः उपप्रा.
श्रीश्रीरामसापकोटाः

गोष्ठ्यां स्वमन्तव्यं प्रकाशयन् शारदाविद्यापीठस्य
प्राध्यापकः श्रीश्रीधरपन्तः

गोष्ठ्यां स्वमन्तव्यं प्रकाशयन् वाल्मीकिविद्यापीठस्य
पूर्वसाहित्यविभागाध्यक्षः प्रा. श्रीसिद्धिनाथगौतमः

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

कार्तवीर्योदयमहाकाव्यसम्बद्धाया गोष्ठ्याः समापनसमारोहे समवेतानां सहभागिनां चित्रावली

समापनसमारोहे अभिनन्दनीयव्यक्तित्वं सं.डा. स्वामी प्रपन्नाचार्यः, प्रमुखातिथिः - माननीयो मन्त्री श्रीचिरञ्जीविवाग्लेः, समारोहस्य सभापतिः प्रा.डा. वेणीमाधवढकालश्च



समापनसमारोहे समुपस्थिताः श्रीश्रीभद्रशर्मप्रभृतयो विशिष्टातिथयः

समापनसमारोहे समुपस्थिताः प्रा.डा. होमनाथभट्टराईप्रभृतयो विद्वांसः

समापनसमारोहे स्वागतमन्तव्यं प्रकाशयन् सहप्रा. श्रीरामहरिदाहालः

समापनसमारोहे समुपस्थिता विद्वांसः

समापनसमारोहे समवेता विद्वांसः

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

समापनसमारोहे समुपस्थिता विद्वांसः

सं.डा. स्वामिप्रपन्नाचार्यमहोदयमभिनन्दयन् शिक्षाध्यक्षः प्रा.डा. माधवशरण उपाध्यायः

प्रा. श्रीसिद्धिनाथगौतममहाभागं सम्मान्य नायवबडागुरुज्यू प्रा.डा. माधवभट्टराईमहाभागं सम्मानयन् माननीयो मन्त्री श्रीचिरञ्जीविवाग्लेमहोदयः



सभायां स्वमन्तव्यं प्रकाशयन् प्रा. श्रीसिद्धिनाथमहोदयः

सभायां स्वमन्तव्यं प्रकाशयन् नायवबडागुरुज्यू प्रा.डा. माधवभट्टराईमहोदयः

प्रमुखातिथेरासनतः स्वमन्तव्यं प्रकाशयन् माननीयो मन्त्री श्रीचिरञ्जीविवाग्लेमहोदयः

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

कार्यशालागोष्ठ्या पारिताः प्रस्तावाः

१. एषा सभा कार्तवीर्योदयमहाकाव्यसम्बद्धाया गोष्ठ्या आयोजनायां सहयोगिनौ महेन्द्रसंस्कृतविश्वविद्यालय-विश्वविद्यालयानुदानायोगौ धन्यवादवचोभिः सभाजयते ।

२. एषा सभा अस्यां गोष्ठ्यां सम्मानितेभ्यो डा. स्वामिप्रपन्नाचार्य – प्रा. सिद्धिनाथगौतम – प्रा. डा. माधवभट्टराईमहोदयेभ्यो हार्दिकं वर्धापनज्ञापनं कुरुते ।

३. एषा सभा गोष्ठीसाफल्याय सहयोगिभ्यः, कार्यपत्रलेखकेभ्यः, विशेषज्ञभ्यश्च हृदयतो धन्यवादज्ञापनं कुरुते ।

४. यथा वाल्मीकिविद्यापीठसाहित्यशिक्षणविभागः प्राज्ञिकक्रियाकलापेषु अग्रेसरतां प्रदर्शयति तथैवान्यैर्विभागैरपि एतादृशाः प्राज्ञिकक्रियाकलापाः प्रवर्तनीया इति गोष्ठीयं विश्वविद्यालयं तत्तद्विभागाँश्च अनुरुणद्धि ।

५. प्रतिवर्षं विद्यापीठेषु विभागीयकार्यक्रमसञ्चालनाय विश्वविद्यालयेन तत्तद्विभागेभ्य आर्थिकानुदानप्रदानस्य परम्परा प्रवर्तनीयेति समनुरुणद्धि सभेयम् ।

६. राष्ट्रियगौरवसंवाहकस्य उच्चस्तरीयस्य च कार्तवीर्योदयमहाकाव्यस्य पुनः सम्पादनम्, टिप्पणीकार्यम्, व्युत्पत्तिमूलकं व्याख्यानम्, नेपालीभाषायमनुवादः, आङ्ग्लभाषायाञ्चानुवादश्चेत्यादिकार्याणि सम्पादयितुं गोष्ठीयं विश्वविद्यालयमनुरुणद्धि।

७. गोष्ठीयं साधारणमाध्यमिकविद्यालयेषु दशमकक्षापर्यन्तं संस्कृतशिक्षामनिवार्यरूपेण सञ्चालयितुं सम्बद्धक्षेत्रस्य ध्यानाकर्षणं कुरुते ।

कार्यशालागोष्ठ्या उपलब्धिः

साहित्यशिक्षणविभागेन प्रस्तुत उपलब्धिमूलको निष्कर्षो निम्ननिर्दिष्टो वर्तते –

१. नेपालीयेन विदुषा महाकविना च सुकृतिदत्तपन्तेन प्रणीतस्य कार्तवीर्योदयमहाकाव्यस्य शास्त्रीयेन साहित्यिकेन च विश्लेषणेन साकं कृतेन ग्रन्थिभेदनेन सहभागिनो विद्वांसो विभागाश्च लाभान्विताः ।

२. अस्यां कार्यशालागोष्ठ्यां कृतेन ग्रन्थिभेदनप्रयासेन महाकाव्यगता जटिलता प्रायो निरस्ता ।

३. एकं महाकाव्यमादाय विभिन्नशास्त्रीयदृष्टिकोणेन साहित्यिकदृष्टिकोणेन च कृतेन बहुकोणीयविश्लेषणेन नेपालस्य ऊनविंशशताब्द्या सामाजिकजीवनम्, परम्परा, प्रथा, धर्मः, विद्या, संस्कृतिः, कला, दर्शनम्, इतिहासः, सामाजिक-स्वरूपञ्चेति समग्रमेव तत्त्वं विशदीकृतमिति राष्ट्रं लाभान्वितम् ।

४. कार्तवीर्योदयमहाकाव्यमुच्चस्तरीयं महाकाव्यमपि निगूढरूपेण स्थितमासीत् । अनया गोष्ठ्या एतन्महाकाव्यं नेपालीयविदुषां दृष्टौ समानीतमिति महत्युपलब्धिः ।

५. एतादृश्या गोष्ठ्या आयोजनेन महेन्द्रसंस्कृतविश्वविद्यालयस्य प्राज्ञिकक्रियाकलापभास्वरो जातः, वाल्मीकिविद्यापीठ-साहित्यशिक्षणविभागश्च निजया सक्रियतया गतिशीलतया च यशस्वी निष्पन्नः ।

६. अनया गोष्ठ्या अन्ये विभागा अपि प्राज्ञिकक्रियाकलापसञ्चालनाय सविशेषमभिप्रेरिता इति महत्युपलब्धिः ।

७. साहित्यविभागे क्रियाशीलैः प्राध्यापकैरन्यविभागस्थैश्च प्राध्यापकैः कार्यपत्रलेखनसदृशविशिष्टप्राज्ञिकक्रियाकलापे सहभागितया क्षमताप्रदर्शनस्य अवसरो लब्ध इत्यपि महत्युपलब्धिः ।

८. कार्यपत्राणां विवेचने कार्यशालापत्राणाञ्च ग्रन्थिभेदने प्रस्तुतैस्तीक्ष्णैरूहापोहैष्टिप्पणिकार्यैश्च सहभागिनां शास्त्रविश्लेषणक्षमता संवर्धितेत्यपि महत्युपलब्धिः ।

९. अनया गोष्ठ्या प्राज्ञिकक्रियाकलापैरेव विश्वविद्यालयस्य गम्भीरता उतुङ्गता च समेधते इत्यनुभावितम् । निष्कर्षरूपेण कथने समग्रदृष्ट्या गोष्ठीयं प्रभूतोपलब्धिविशिष्टेति कथयितुं शक्यते ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

वाल्मीकिविद्यापीठसाहित्यविभागान्तर्गता गोष्ठ्यायोजनसमितिः

१. **आयोजकः -** प्रा.डा. वेणीमाधवढकालः
२. **सदस्यः -** प्रा.डा. टीकारामोऽधिकारी
३. **सदस्यः -** प्रा.डा. दुर्गादत्तशर्मोपाध्यायः
४. **सदस्यः -** सहप्रा. श्रीरामहरिदाहालः
५. **सदस्यः -** उपप्रा. श्रीश्रीरामसापकोटाः
६. **सदस्यः -** उपप्रा. श्रीजीवनोऽधिकारी
७. **सदस्यः -** उपप्रा. श्रीमुकुन्दलामिछानेः

गोष्ठीसंयोजनसमितिः

१. **संयोजकः -** प्रा.डा. वेणीमाधवढकालः
२. **सदस्यः -** प्रा. श्रीनीलमणिढुङ्गाना
३. **सदस्यः -** सहप्रशासकः श्रीहरिहरशर्मा अधिकारी
४. **सदस्यः -** उपप्रा. श्रीध्रुवप्रसादज्ञवाली
५. **सदस्यः -** उपप्रा. श्रीशान्तकृष्णोऽधिकारी

गोष्ठीसहभागिनः

१.	प्रा.डा. दुर्गाप्रसाददवाडी -	कार्यपत्रलेखकः
२.	प्रा. श्रीविद्यानाथ उपाध्यायः -	कार्यपत्रलेखकः
३.	डा. टीकारामपन्थी -	कार्यपत्रलेखकः
४.	प्रा.डा. वावुरामपोखरेलः -	कार्यपत्रलेखकः
५.	प्रा. श्रीसिद्धिनाथगौतमः -	विशेषः
६.	प्रा. डा. माधवशरण उपाध्यायः -	कार्यपत्रलेखकः
७.	प्रा.डा. वेणीमाधवढकालः -	कार्यपत्रलेखक एवं आयोजकः
८.	प्रा. श्रीनीलमणिढुङ्गानाः -	कार्यपत्रलेखक एवं संयोजनसमितेः सदस्यः
९.	प्रा. डा. साम्बराज आचार्यः -	कार्यपत्रलेखकः
१०.	प्रा.डा. रामचन्द्रगौतमः -	कार्यपत्रलेखकः
११.	प्रा.डा. टीकारामोऽधिकारी -	कार्यपत्रलेखक एवं आयोजकः
१२.	प्रा.डा. दुर्गादत्तशर्मोपाध्यायः -	कार्यपत्रलेखक एवं आयोजकसमितिसदस्यः
१३.	प्रा.डा. हरिप्रसादगौतमः -	कार्यपत्रलेखकः
१४.	प्रा. श्रीलेखनाथ आचार्यः -	सहभागी, केन्द्रीयविद्यापीठस्य, दाङस्थितस्य
१५.	प्रा. श्रीश्रीधरपन्तः -	सहभागी, शारदाविद्यापीठस्य, कञ्चनपुरस्थितस्य
१६.	सहप्रा. श्रीश्रीकृष्णोऽधिकारी -	सहभागी, प्राचार्यः, वाल्मीकिविद्यापीठस्य
१७.	सहप्रशासकः- श्रीहरिहरशर्मा अधिकारी -	सहभागी, शैक्षिकविभागप्रमुखः, महेन्द्रसंस्कृतविश्वविद्यालयस्य, दाङस्थितस्य ।
१८.	सहप्रा. श्रीरामहरिदाहालः -	कार्यपत्रलेखक एवं आयोजकसमितिसदस्यः

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

१९.	उपप्रा. श्रीश्रीरामसापकोटाः -	कार्यपत्रलेखक एवं आयोजकसमितिसदस्यः
२०.	उपप्रा. श्रीध्रुवप्रसादज्ञवाली -	कार्यपत्रलेखक एवं संयोजकसमितिसदस्यः
२१.	उपप्रा. श्रीजीवनोऽधिकारी -	सहभागी, वाल्मीकिविद्यापीठस्य
२२.	उपप्रा. श्रीमुकुन्दलामिछानेः -	कार्यपत्रलेखक एवं आयोजकसमितिसदस्यः
२३.	उपप्रा. श्रीशान्तिकृष्णोऽधिकारी -	सहभागी एवं संयोजकसमितिसदस्यः
२४.	उपप्रा. श्रीनूरापतिपोखरेलः -	सहभागी, हजारीजनकविद्यापीठस्य, जनकपुरस्थितस्थ
२५.	उपप्रा. श्रीनन्दनभट्टराईः -	सहभागी, विन्दवासिनीविद्यापीठस्य, पोखरास्थितस्य
२६.	उपप्रा. श्रीपराशर आचार्यः -	सहभागी, रुरुसंस्कृतविद्यापीठस्य, रिडीस्थितस्य
२७.	उपप्रा. श्रीध्रुवभट्टराईः -	सहभागी, वाल्मीकिविद्यापीठस्य, नेपालीशिक्षणविभागस्य
२८.	सहप्रा. श्रीसनतकुमारवस्ती -	सहभागी, वाल्मीकिविद्यापीठस्य, काठमाडौंस्थितस्य ।
२९.	श्रीप्रेमचौलागाईं: -	सहभागी, शिक्षकः, रानीपोखरीसंस्कृतमाध्यमिकविद्यालयस्य, काठमाडौंस्थितस्य ।

३. प्रा.डा. दुर्गाप्रसाददवाडीमहोदयस्याभिनन्दनम्

नेपालप्राध्यापकसंघमहेन्द्रसंस्कृतविश्वविद्यालयीयवाल्मीकिविद्यापीठसमित्या २०५९ विक्रमवर्षीयश्रावणमासस्य अष्टमे दिवसे, गुरुपूर्णिमायामायोजिते कार्यक्रमे, तात्कालिको राजगुरुः केशरीराजपाण्डेयो वरिष्ठप्राध्यापकाय डा. दुर्गाप्रसाददवाडीमहोदयाय उत्तरीयपरिधापनपुरस्सरमभिनन्दयन् अभिनन्दनपत्रं प्रादात् ।

समारोहं सम्बोधयन् राजगुरुः श्रीपाण्डेयः प्रा. डा. दुर्गाप्रसाददवाडीसदृशस्य विद्वद्वरगुरोरभिनन्दनेन गुरुपूर्णिमाया वास्तविकं मर्म सार्थकं सम्भूतमस्तीति विचारमुदैरयच्चेद् वाल्मीकिविद्यापीठस्य तात्कालिकः प्राचार्यः श्रीश्रीकृष्णोऽधिकारी गुरुसेवया सन्ततावपि सेवाभावादिसद्गुणानां सञ्चारो जायत इति प्राभाषत ।

अभिनन्दितो गुरुः श्रीदवाडी विहितस्याभिन्दनस्य कृते प्रसन्नतां व्याहरन् अनेनाभिनन्दनेन आगामिदिनेषु इतोऽपि गभीरतया अध्ययनानुसन्धानकार्येषु संलग्नतायै स्वात्मनि ऊर्जः प्राप्तमस्तीति न्यगदत् ।

नेपालप्राध्यापकसंघवाल्मीकिविद्यापीठसमितेरध्यक्षस्य सहप्रा. श्रीगोविन्दाचार्यस्य साभापत्ये आयोजिते तस्मिन् समारोहे प्राध्यापका विद्यानाथोपाध्याय-मधुसूदनरिसाल-शिवहरिमरहठ्ठाः, नेपालप्राध्यापकसंघ-केन्द्रीयसमितेः सभापतिः श्रीखगेन्द्रभट्टराईः, नेपालप्राध्यापकसंघ-महेन्द्रसंस्कृतविश्वविद्यालयीय-केन्द्रीयसमितेः सभापतिः प्रा.डा. ऋषिरामपोखेलः, महासचिव उपप्रा. श्रीधनेश्वरनेपालः, नेपालप्राध्यापकसंघ-त्रिभुवनविश्वविद्यालयीयकेन्द्रीयसमितेः सभापतिः श्रीवसन्ताबुढाथोकी, राष्ट्रियसमाचारसमितेः तात्कालिको महाप्रबन्धकः श्रीपुरुषोत्तमदाहालश्च अभिनन्दितगुरोर्गुणगणानामनुसरणपूर्वकं स्वस्य दक्षताभिवर्धनविषये बलं प्रादुः ।

४. म.सं.वि. शैक्षिकव्यवस्थापकीयसमस्यासमाधानविषयिणी विचारगोष्ठी

नेपालप्राध्यापकसंघ-महेन्द्रसंस्कृतविश्वविद्यालयकेन्द्रीयसमिति-म.सं..वि.कर्मचारिसंघकेन्द्रीयसमिति-स्वतन्त्रविद्यार्थिसमितीनां संयुक्ततत्त्वावधाने आयोजिताम् 'महेन्द्रसंस्कृतविश्वविद्यालय-शैक्षिक-व्यवस्थापकीय-समस्यासमाधानम्' इत्यभिधेयां द्विवसद्वयव्यापिनीं कार्यशालागोष्ठीं सम्माननीयः सभामुखः श्रीतारानाथ रानाभाटमहोदयः २०५९ तमवैक्रमाब्दीयश्रावणमासस्य ऊनत्रिंशे दिवसे काष्ठमण्डपवर्तिनि वाल्मीकिविद्यापीठे समुदघाटयत्।

समुद्घाटनानन्तरं समारोहे प्रमुखातिथेरासनतो भाषमाणः सभामुखः श्रीरानाभाटमहोदयः संस्कृतवाङ्मये सन्निहितं ज्ञानं मानवजीवनोपयोगि विधातुं महेन्द्रसंस्कृतविश्वविद्यालयं सबलं कर्तुञ्च गोष्ठीयं सफला भविष्यतीति

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

विश्वासमभिव्यक्तवान् ।

समारोहस्य विशिष्टातिथिना महेन्द्रसंस्कृतविश्वविद्यालयस्योपकुलपतिना आचार्येण श्रीपूर्णचन्द्रढुङ्गेलमहाभागेन पदाधिकारि–प्राध्यापक–कर्मचारि–विद्यार्थिनां संयुक्तसहयोगादेव विश्वविद्यालयोऽग्रगतिं प्राप्तुं समर्थो भवतीति चर्चयता विश्वविद्यालयस्य सर्वपक्षीयविकासाय मया सर्वदैव प्रतिबद्धता प्रदर्शितास्तीति विचारः प्रकटितः ।

गोष्ठ्याम्, नेपालप्राध्यापकसंघ–केन्द्रीयसमितेः सभापतिः श्रीखगेन्द्रभट्टराईः, महेन्द्रसंस्कृतविश्वविद्यालयस्य पूर्वोपकुलपतिः प्रा. माधवराजगौतमश्च संस्कृतवाङ्मयस्य विश्वविद्यालयस्यास्य चोन्नत्याः सम्बन्धे मन्तव्यं प्राकटयताम्।

तस्मिन् कार्यक्रमे, म.सं.वि. नेपालप्राध्यापकसंघकेन्द्रीयसमितेः सभापतिः प्रा.डा. ऋषिरामपोखेलः, नेपालप्राध्यापकसंघस्य पूर्वसभापतिः श्रीभीमसेनदासप्रधानः, प्रा. श्रीदुर्गाप्रसादभण्डारी, सहप्रा. श्रीपुरुषोत्तमदाहालः, नेपालप्राध्यापकसंघस्य सचिवः श्रीशान्तिकृष्णोऽधिकारी, म.सं.वि.–कर्मचारिसंघकेन्द्रीयसमितेः सभापतिः श्रीनारदप्रसादपौडेलः, महासचिवः श्रीविष्णुप्रसाददाहालः, स्वतन्त्रविद्यार्थिसमितिपरिषदध्यक्षः श्रीविष्णुपन्थी च महेन्द्रसंस्कृतविश्वविद्यालयस्य हितमाधृत्य सविशेषमचर्चयन् ।

कार्यक्रमोऽसौ महेन्द्रसंस्कृतविश्वविद्यालयप्राध्यापकसंघकेन्द्रीयसमितेर्महासचिवस्य, गोष्ठीसंयोजनसमितेः संयोजकस्य च श्रीधनेश्वरनेपालस्य साभापत्ये सम्पन्न आसीत् ।

गोष्ठ्यां विविधैर्विद्वद्भिरनेकेषु विषयेषु कार्यपत्राणि प्रस्तुतानि, येषामुपरि सहभागिभिर्विद्वद्भिः सारपूर्णाष्टिप्पण्यो विहिताः। गोष्ठयाः सहभागिभिर्विश्वविद्यालयस्य सर्वाङ्गीणविकासाय सहयोगप्रदानसम्बन्धे प्रतिज्ञाप्रस्तावश्च पारितः ।

५. संस्कृतनाट्यविषयिणी विचारगोष्ठी

महेन्द्रसंस्कृतविश्वविद्यालयस्योपकुलपतेराचार्यपूर्णचन्द्रढुङ्गेलमहोदयस्य प्रमुखातिथ्ये नेपालराजकीयप्रज्ञाप्रतिष्ठानस्य नाट्यसङ्गीतविभागेनायोजिता संस्कृतनाट्यसम्बद्धा विचारगोष्ठी गतविक्रमाब्दीयाश्विनमासस्य चतुर्दशदिवसे प्रतिष्ठानस्य सभाकक्षे काष्ठमाण्डपे सम्पन्ना ।

कार्यक्रमस्य प्रमुखातिथिर्महेन्द्रसंस्कृतविश्वविद्यालयस्योपकुलपतिराचार्यपूर्णचन्द्रढुङ्गेलमहोदयो नाटकस्योत्पत्तिविकासयोर्विषये पौरस्त्यपाश्चात्यजगतोः प्रचलिता नैकविधा मान्यताश्चर्चयन्, ज्ञानविज्ञानयोर्विशिष्टग्रन्थस्य ऋग्वेदस्य संवादसूक्तमेव नाटकस्योत्पत्तेर्मूलाधारोऽस्तीति विषये पाश्चात्यपौरस्त्यविद्वांसः सहमताः सन्तीति विचारमुपस्थापयन् नाटकं वस्तुतः सामाजिकविकृतीनां परिष्करणात्मकस्य, सत्पक्षाणां विश्लेषणात्मकस्य च काव्यस्य एकशाखारूपेण स्थितमिति प्रावोचत् ।

नेपालराजकीयप्रज्ञाप्रतिष्ठानस्य प्राज्ञस्य डा. टीकारामपन्थीमहोदयस्य साभापत्ये सम्पन्ने तस्मिन् कार्यक्रमे नाट्यसङ्गीतविभागस्य संयोजकः प्राज्ञः डा. केशवप्रसादोपाध्यायः स्वागतमन्तव्यं धन्यवादज्ञापनञ्च व्याहरत् ।

नाट्यसम्राजः स्वर्गीयस्य बालकृष्णसमस्य शतवार्षिक्या अवसरे आयोजिते तस्मिन् व्याख्यानकार्यक्रमे महेन्द्रसंस्कृतविश्वविद्यालयस्य प्रा.डा. वेणीमाधवढकालो **नेपालस्य संस्कृतनाटकपरम्परा** इतिशीर्षकं समाश्रित्य विचारपत्रं प्रस्तुवन् नेपाले प्राचीनकालादेव संस्कृतनाटकलेखनस्य, तदभिनयेन प्रस्तुतेश्च परम्पराऽवर्तत इति तथ्यं सविशेषं प्रकाशयन्, लिच्छवि–मल्ल–शाहकालेषु राजमहाराजैः सर्वसाधारणसंस्कृतविद्वद्भिश्च संस्कृतभाषायां नाटकरचनायाः प्रमाणप्रस्तुतिपूर्वकं केषाञ्चन नाटकानां संक्षिप्तविवेचनामपि व्यधात् ।

प्रस्तुतविचारपत्रस्योपरि टिप्पणीं कुर्वता प्राध्यापकेन नीलमणिढुङ्गानामहोदयेन विचारपत्रेण सन्दर्शिता संस्कृतनाट्यपरम्परा शातिशयं व्यापिका महत्त्वपूर्णा च वर्तते इत्युल्लिखता प्रस्तुते विचारपत्रे समावेशार्हानां कतिपयांशानां विषये स्वकीयः परामर्शः प्रस्तुतः ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

तदवसरे नेपाले संस्कृतनाटकस्योत्पत्तिविकासयोर्विषयमाधृत्य विहितं व्याख्यानं सातिशयम् उपलब्धिपूर्णं संभूतमिति विचारः सहभागिभिर्विद्वद्भिः सहर्षं प्रकटितः ।

६. प्राज्ञं प्रति श्रद्धाञ्जलिसमर्पणम्

संस्कृतवाङ्मयस्य मर्मज्ञविदुषः, इतिहासविदः, विशिष्टानुसन्धातुः, ज्यौतिषशास्त्रस्य मनीषिणः, वाल्मीकिविद्यापीठस्य पूर्वरूप-नेपाल-राजकीयसंस्कृतमहाविद्यालयस्य प्राध्यापकस्य, प्राज्ञस्य नयराजपन्तस्य नवतितमवर्षात्मक वयसि २०५९ वैक्रमाब्दीयकार्तिकमासस्य अष्टादशदिवसे जातं निधनं प्रति महेन्द्रसंस्कृतविश्वविद्यालयस्य पक्षतः कार्यकारिपरिषदः २०५९ तमे वैक्रमाब्दे मार्गमासस्य तृतीयेऽहनि उपविष्टेन उपवेशेन हार्दी समवेदना प्रकटिता।

तेनोपवेशेन, स्वर्गीयेण पन्तेन इतिहासानुसन्धानयोः क्षेत्रे विहितस्यापूरणीय-योगदानस्य संस्मरणं राष्ट्रियकृतज्ञताज्ञापनमिति विश्वासेन सह दिवंगतात्मनः सामुज्यमुक्तये श्रीपरमेश्वरः प्रार्थितः ।

एवमेव स्वर्गीय पन्तं प्रति हार्दं श्रद्धाञ्जलिं प्रकटयितुं वाल्मीकिविद्यापीठे एका शोकसभा आयोजिता, यस्यां विविधवक्तृभिः स्वर्गीयपन्तस्य वैदुष्यपूर्णं योगदानं विचर्चितम् ।

७. महायज्ञस्य समुद्घाटनम्

२०५९ तमवैक्रमाब्दीयचैत्रमासस्य सप्तविंशतितमे दिनाङ्के प्यूठानमण्डलस्थे खैराग्रामे म.सं.वि. उपकुलपतिना आचार्यपूर्णचन्द्रढुङ्गेलमहोदयेन शिवपुराणादिवैदिकमहायज्ञस्य समुद्घाटन विहितम् ।

समारोहस्य प्रमुखातिथेरासनतो भाषमाण उपकुलपतिराचार्यपूर्णचन्द्रढुङ्गेलमहोदयो धर्मस्याभिप्रायं धारणमस्ति, सर्वजनोपयोगिकर्मणां धारणं धर्मोऽस्ति तद्विपरीतोऽधर्मोऽस्ति, संप्रति देशे विविधामिर्विकृतिभिरशान्तिः प्रसृता विद्यते, शान्तिकामनामात्रेण शान्तिलाभो न भवति, चिरन्तनशान्तिप्राप्तये शास्त्रनिर्दिष्टमार्गेण धर्मानुसरणं कर्तव्यम्, एतादृशेन महायज्ञेन धार्मिकभावनाभिवृद्धये शान्तिस्थापनाय च महदवदानं भवतीति वदन् स्वकीयान् विचारान् उपस्थापितवान्।

तस्मिन् समारोहे राजपरिषत्सदस्यः सम्माननीयः श्रीचिन्ताबहादुरबस्नेतो मानवजीवनं परोपकारेण, परसेवया च सफलं भवति न तु परहिंसयेति वदन् धर्मसंस्कृतेराचरणाय सर्वान् समुत्प्रेरितवान् । शिक्षामन्त्रालयस्य सचिवः श्रीचुमानसिंहबस्नेतः सम्प्रति देशे शान्तिस्थापनाया आवश्यकता वर्तते तस्य कृते सर्वेषां मनसि धार्मिकचेतना-यारुद्बोधनमावश्यकमस्तीति प्रत्यपादयत् ।

वैदिकमहायज्ञसञ्चालकसमितेरध्यक्षस्य श्रीलोकनाथाधिकारिणः सभापतित्वे सञ्चालिते तस्मिन् कार्यक्रमे प्रा. डा. हरिप्रसादाचार्य-झषेन्द्राचार्य-नीमनारायणनकर्मीप्रभृतिभिर्वक्तृभिः स्वकीया यज्ञसम्बन्धितो विचाराः प्रकटिता । श्रीलोकबहादुरबस्नेतद्वारा सञ्चालिते तस्मिन् समारोहे कुलसचिवस्य प्रा. श्रीस्थानेश्वरगौतमस्यापि उपस्थितिरासीत् ।

८. कालिकामाध्यमिकविद्यालयस्य वार्षिकोत्सवसमुद्घाटनम्

म.सं.वि. उपकुलपतिना आचार्यपूर्णचन्द्रढुङ्गेलमहोदयेन २०६० तमवैक्रमाब्दीयवैशाखमासस्य पञ्चमदिनाङ्के नवलपरासीमण्डलान्तर्गतगैंडाकोटग्रामस्थस्य कालिकामाध्यमिकविद्यालयस्य प्राङ्गणे तस्य विद्यालयस्य वार्षिकोत्सवसमारोहस्य समुद्घाटनं विहितम् ।

प्रमुखातिथेरासनत उद्घाटनभाषणं विदधन् उपकुलपतिः श्रीढुङ्गेलः शिक्षायाः प्रचारप्रसारयोः कृते कालिकामाध्यमिकविद्यालयेन कृतमवदानं संस्मरन् कर्मशीलैः शिक्षकैः सर्वतोभावेन सहयोगिभिरभिभावकैश्च संवर्द्धितोऽयं विद्यालयोऽवश्यमेव प्रगतिपथं प्राप्य उच्चशिक्षाध्ययनस्य केन्द्रं भविष्यतीति शुभेच्छां प्रकटितवान् । विद्यालयतः प्रस्तावितां संस्कृतविद्यापीठस्थापनाया योजनां हृदयतः समर्थयन् तस्य कृते महेन्द्रसंस्कृतविश्वविद्यालयेन करणीयं सर्वमपि साहाय्यं करिष्यतीति वचनं प्रादात् ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

तस्मिन् कार्यक्रमे प्रधानाध्यापको विद्यालयस्य वार्षिकं प्रतिवेदनं प्रस्तुवन् प्रवेशिकायां प्रतिशतं नवत्यधिकानां छात्राणामुत्तीर्णताया विवरणेन सह विद्यालयस्य शैक्षिकार्थिकभौतिकावस्थानां चित्रणं कृतवान् । तदवसरे स्थानीयानामभिभावकानां विशेषसक्रियतायां संस्कृतविद्यापीठस्थापनायै संघटितायाः समितेर्विवरणमपि प्रस्तुतमासीत्।

विद्यालयव्यवस्थापनसमितेरध्यक्षस्य सभापतित्वे सम्पन्ने तस्मिन् समारोहे वाल्मीकिविद्यापीठस्य सहायकप्राचार्यः सहप्रा. श्रीध्रुवप्रसादज्ञवाली, म.सं.वि. उपप्रकाशको हरिकाफ्ले:, अभिभावकानां प्रतिनिधिः, छात्राणां प्रतिनिधिश्च तस्य विद्यालयस्य प्रस्तवितसंस्कृतविद्यापीठयोजनाविषये च स्वकीयान् विचारान् प्रकटितवन्तः ।

९. वाल्मीकिविद्यापीठसाहित्यशिक्षणविभागेनायोजिता संस्कृतभाषाविज्ञान-गोष्ठी

उद्घाटनसमारोहः (२०६०/१/८ प्रातः ११:००-१:००)

विश्वविद्यालयानुदानायोगस्य सहयोगे म.सं.वि. वाल्मीकिविद्यापीठसाहित्यशिक्षणविभागेन २०६०/१/८ दिनाङ्कतः द्विदिवसीया संस्कृतभाषाविज्ञानविषयिणी गोष्ठी वाल्मीकिविद्यापीठे समायोजिता । तस्या गोष्ठ्याः समुद्घाटनसमारोहे प्रमुखातिथिपदमलङ्कुर्वता उपकुलपतिना आचार्यपूर्णचन्द्रढुङ्गेलमहोदयेन दीपप्रज्ज्वालनपूर्वकं वाग्देव्याः सरस्वत्याः प्रतिमायां माल्यार्पणं विधाय समारोहस्य समुद्घाटनं विहितमासीत् । गोष्ठीं सम्बोधयता आचार्यवरेण उपकुलपतिना भाषाविज्ञानं कस्या अपि भाषाया व्यावहारिकपक्षोद्घाटकं प्रायोगिकं शास्त्रमस्ति, अत एव व्याकरणशास्त्रभाषाविज्ञानयोः पारस्परिकसम्बन्धो दृश्यते । व्याकरणेन निर्मितानां शब्दानां प्रयोगकौशलार्जने भाषाविज्ञानस्य महत्त्वमस्ति । तस्माद्धेतोरस्माभिर्विद्यापीठेषु व्याकरणभाषाविज्ञानयोः समन्वयात्मकमध्ययनमध्यापनं कर्तव्यमिति स्वकीयान् विचारानुद्भाव्य गोष्ठीसंयोजकाय साहित्यशिक्षण-विभागाय धन्यवादज्ञापनं व्यधायि ।

गोष्ठीसञ्चालनस्योद्देश्यविषये चर्चयता प्रा. नीलमणिढुङ्गानामहोदयेन ज्ञानविज्ञानयोः स्रोतोभूतानां शास्त्रीयविषयाणां प्रयोगकौशलं विना अधुनातनसमाजे संस्कृतस्य उपयोगित्वसाधनं कर्तुं न शक्यते, अतो व्याकरण-न्याय-साहित्यमीमांसादिशास्त्रेषु निहितानां वाक्यसम्बन्धिविषयाणामत्र ऊहापोहो भविष्यति । संस्कृत आधारवाक्यानि कति सम्भवन्ति तेषामाधारत्वं केन प्रकारेण निर्धारिणीयमिति विषयेऽत्र विशेषेण चर्चा भविष्यति । एवमेव भाषाविज्ञानस्यान्वेषु पक्षेष्वपि क्रमेण तादृशः कार्यक्रमः सञ्चालयिष्यते इति वदन् संस्कृतभाषाविज्ञानविषये सहभागिविदुषां ध्यानाकर्षणं विहितम् ।

वाल्मीकिविद्यापीठसाहित्यशिक्षणविभागाध्यक्षस्य प्रा.डा. वेणीमाधवढकालमहोदयस्य सभापतित्वे सम्पन्ने तस्मिन् समारोहे विद्यापीठस्य प्राचार्यः प्रा.डा. रामचन्द्रगौतमः, म.सं.वि. कार्यकारिपरिषदः सदस्यः प्रा. दुर्गाप्रसाददाहालः, ने.प्रा.सं. वाल्मीकिविद्यापीठसमितेरध्यक्षो डा. गोविन्दप्रसादाचार्यः, न्यायविभागाध्यक्षः प्रा. विद्यानाथोपाध्यायः, प्रा. शिवहरिमरहट्टाः, पद्मकन्याविद्यापीठस्य सहप्रा. चेतोनाथगौतमः, सहायकप्राचार्यः सहप्रा. ध्रुवप्रसादज्ञवालीप्रभृतयो वक्तारो भाषाविज्ञानव्याकरणयोः सम्बन्धः, संस्कृते वर्तमाना भाषावैज्ञानिकी दृष्टिः, संस्कृतवाङ्मयनिबद्धज्ञानविज्ञानयोर्वर्तमानसमाजोपयोगित्वस्थापनम्, इत्यादिविषयवस्तून्यधिकृत्य विस्तृतविवेचनं कृतवन्तः । साहित्यशिक्षणविभागस्य सदस्यः उपप्रा. मुकुन्दलामिछानेमहाभागस्य स्वागतमन्तव्येन आरब्धेयं गोष्ठी तस्यैव विभागस्यापरसदस्येन उपप्रा. जीवनाधिकारिणा सञ्चालिता आसीत् ।

प्रथमकार्यपत्रप्रस्तुतिः

सभापतिः - प्रा. विद्यानाथ उपाध्यायः

विशेषज्ञः - प्रा. शिवहरिमरहट्टाः

कार्यपत्रशीर्षकम् - संस्कृत वाङ्मयमा वाक्यतत्त्व चिन्तन (संस्कृतवाङ्मये वाक्यतत्त्वचिन्तनम्)

कार्यपत्रप्रस्तोता - प्रा. टीकारामपन्थी

सङ्क्षिप्तविवरणम् - संस्कृतवाङ्मये वाक्यतत्त्वचिन्तनपरम्पराया विषये विदुषा कार्यपत्रलेखकेन निजा गवेषणापूर्णा विचारा

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

प्रस्तुताः । तान् आदाय विशेषज्ञत्वेन प्रा. शिवहरिमरहट्टामहाभागः, अन्ये सहभागिनो महाभागाश्च कार्यपत्रविषये टिप्पणीं प्रस्तुतवन्तः।

द्वितीयकार्यपत्रप्रस्तुतिः

विशेषज्ञः - प्रा. डा. विष्णुप्रसाददेवकोटाः

कार्यपत्रशीर्षकम् - वाक्यार्थबोध विधि (वाक्यार्थबोधविधिः)

कार्यपत्रप्रस्तोता - सहप्रा. ध्रुवप्रसादज्ञवाली

सङ्क्षिप्तविवरणम् - कार्यपत्रलेखकेन विदुषा संस्कृतवाङ्मये वर्तमानां सर्वामेव वाक्यविषयिणीमवधारणां प्रस्तुत्य वाक्यार्थबोधप्रकार उपस्थापितः । तत्र विशेषज्ञत्वेन प्रा.डा. विष्णुप्रसाददेवकोटामहाभागेन अन्यैः सहभागिभिश्च कार्यपत्रस्य न्यूनतापूर्त्यर्थं निजा मूल्यवन्तो विचाराः प्रस्तुताः ।

द्वितीयदिवसे (२०६०/१/९ दिनाङ्के प्रातः ११ वादने)

तृतीयकार्यपत्रप्रस्तुतिः

सभापतिः - प्रा. शिवहरिमरहट्टाः

विशेषज्ञः - प्रा. विद्यानाथ उपाध्यायः, डा. टीकारामपन्थी च

कार्यपत्रशीर्षकम् - संस्कृतभाषाका आधारभूत वाक्यको निर्धारण (संस्कृतभाषायामाधारभूतवाक्यनिर्धारणम्)

कार्यपत्रप्रस्तोता - प्रा. नीलमणिढुङ्गानाः

सङ्क्षिप्तविवरणम् - कार्यपत्रलेखकेन विदुषा स्वकीये कार्यपत्रे संस्कृतवाङ्मये नूतनचिन्तनधारायाः प्रवेशार्थमाधुनिकभाषाविज्ञाने प्रचलितमाधारभूतवाक्यनिर्धारणं मनसिकृत्य तदाधारतया निजेन अध्ययनेन संस्कृतभाषायामाधारभूतवाक्यनिर्धारणमित्थं कर्तुं शक्यत इति पन्था निर्दिष्टः । प्रा. विद्यानाथोपाध्यायमहोदयेन डा. टीकारामपन्थीमहोदयेन च कार्यपत्रनिर्दिष्टविषये निजा मूल्यवन्तो विचारा उपस्थापिताः । सहभागिभिश्च तत्र तत्र न्यूनतास्थलानि निर्दिश्य परामर्शाः प्रत्ताः ।

चतुर्थकार्यपत्रप्रस्तुतिः

विशेषज्ञः - प्रा.डा. टीकारामोऽधिकारी

कार्यपत्रशीर्षकम् - अग्रिम शब्दशक्ति अभिधाका सम्बन्धमा साहित्यशास्त्रीय दृष्टिकोण (अग्रिमशब्दशक्तिविषये साहित्यशास्त्रीया दृष्टिः)

कार्यपत्रप्रस्तोता - प्रा.डा. वेणीमाधवढकालः

सङ्क्षिप्तविवरणम् - कार्यपत्रलेखकेन विदुषा निजे कार्यपत्रे साहित्यशास्त्रदृष्ट्या अभिधाया स्वरूपदिग्दर्शनपूर्वकं तद्भेदाः प्रकटीकृताः । विशेषज्ञेन प्रा.डा. टीकारामाधिकारिणा कार्यपत्रगतेषु विषयेषु निजा विचाराः प्रस्तुताः ।

समापनसमारोहः (२०६०/१/९, दिवा ३:०० - ५:००)

अस्या गोष्ठ्याः समापनसमारोहः म.सं.वि. पूर्वशिक्षाध्यक्षस्य प्राज्ञ डा. टीकारामपन्थिमहोदयस्य प्रमुखातिथित्वे समपन्ने जातः । तस्मिन् कार्यक्रमे प्रा. विद्यानाथोपाध्यायः, प्रा.डा. विष्णुप्रसाददेवकोटामहोदयः, अन्ये सहभागिनश्च मन्तव्यं प्रकटीकृतवन्तः । प्रमुखातिथिना डा. टीकारामपन्थिमहाभागेन संस्कृतभाषाया आधारवाक्यानां विश्लेषणे अनया गोष्ठ्या महत्त्वपूर्णं दिङ्निर्देशं कृतम्, एतादृशी गोष्ठी विद्याविकासाय प्रज्ञोत्कर्षाय च प्रभवति, वाल्मीकिविद्यापीठसाहित्यविभागोऽनेन कार्येण धन्यवादार्हो जात इत्युक्तम् ।

वाल्मीकिविद्यापीठस्य प्राध्यापकस्य नीलमणिढुङ्गानामहोदयस्य अध्यक्षतायां सम्पन्ने तस्मिन् समारोहे साहित्यविभागाध्यक्षेण प्रा.डा. वेणीमाधवढकालमहोदयेन सर्वेषां सहभागिनां सहयोगिनाञ्च कृते धन्यवादवचनं विज्ञापितम् । सभाध्यक्षेण प्रा. नीलमणिढुङ्गानामहोदयेन विश्वविद्यालयानुदानायोगस्य सहयोगे सम्पन्नायामस्यां गोष्ठ्यां सहभागिभिर्विद्वद्भिर्यत्कृतं तदभूतपूर्वमित्यभिधाय सभा विसर्जिता ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

संस्कृतभाषाविज्ञानगोष्ठ्यां समवेतानां विदुषां चित्रावली

गोष्ठ्यां सहभागिभिर्विद्वद्भिः साकं विद्योतमानः प्रमुखातिथिः - उपकुलपतिः - आचार्यपूर्णचन्द्रढुङ्गेलमहोदयः

गोष्ठ्यां विद्वद्भिः साकं वर्तमानः शिक्षाध्यक्षः प्रा.डा. माधवशरणोपाध्यायमहोदयः

गोष्ठ्यां समवेताः प्रा.विद्यानाथोपाध्यायप्रभृतयो विद्वांसः



गोष्ठ्यां समवेताः प्रा.डा. टीकारामपन्थीप्रभृतयो विद्वांसः

गोष्ठ्यां समवेताः प्रा.दुर्गाप्रसाददाहालप्रभृतयो विद्वांसः



गोष्ठ्यां समवेताः प्रा.डा. टीकारामाधिकारिप्रभृतयो विद्वांसः

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

कार्यशालागोष्ठ्या पारिता: प्रस्तावा:

१. एषा सभा विश्वविद्यालयानुदानायोगाय तदीयसहयोगसंस्मरणपूर्वकं कृतज्ञताज्ञापनं कुरुते ।

२. संस्कृतभाषाविज्ञानविषये एषा प्रथमा गोष्ठी सम्पन्ना, आगामिदिनेषु महेन्द्रसंस्कृतविश्वविद्यालय: संस्कृतभाषाविज्ञानस्य विविधक्षेत्रेषु एतादृशीर्गोष्ठी: समायोज्य प्रज्ञासंवर्धनं विदध्यादिति एषा सभा अनुरुणद्धि ।

३. यथा वाल्मीकिविद्यापीठस्य साहित्यशिक्षणविभाग: सक्रियतापूर्वकं प्राज्ञिकक्रियाकलापसंवर्धने सर्वात्मना समर्पितस्तथैव अन्येऽपि विभागा एतादृशकर्मसु अभिप्रेरणीया: ।

४. संस्कृतभाषाविज्ञानगोष्ठीसञ्चालनावसरे महेन्द्रसंस्कृतविश्वविद्यालयस्य सर्वेषु आङ्गिकेषु विद्यापीठेषु कार्यरता: सम्बद्धशिक्षकास्तथैव त्रिभुवनविश्वविद्यालयादिषु कार्यरता: सम्बद्धा विद्वांसश्च सहभागित्वेन आमन्त्रणीया: ।

५. संस्कृतभाषायां न्याये, मीमांसायाम्, व्याकरणे च भाषाविज्ञानस्य प्रचुरा सामग्री उपलभ्यते । महेन्द्रसंस्कृत-विश्वविद्यालयस्तदाधारेण विशेषानुसन्धानविद्यावारिध्यनुसन्धानादिकार्याणि सञ्चालयेदिति एषा सभा अनुरुणद्धि।

६. संस्कृतभाषायामाधारभूतवाक्यनिर्धारणविधौ प्रस्तुतं कार्यपत्रमधिकृत्य विश्वविद्यालय: संस्कृतभाषायामाधारवाक्यनिर्माणविधौ गतिशीलतां कलयेदिति सभेयं संस्तौति ।

कार्यशालागोष्ठ्या उपलब्धि:

भाषाविज्ञानगोष्ठ्या उपलब्धयो निम्ननिर्दिष्टा: सन्ति –

१. दिवसद्वयव्यापिन्यामस्यां गोष्ठ्यां जातैर्वाक्यबोधविधिसम्बद्धैरूहापोहै: सहभागिनो वाक्यर्थबोधसम्बन्धे उपकृता: ।

२. संस्कृतसाहित्येऽभिधाशक्तिविषये सञ्जातेन विशिष्टेन चिन्तनेन सर्वे सहभागिनो लाभान्विता जाता: ।

३. सर्वप्रथमं संस्कृतभाषायामाधारवाक्यनिर्माणमित्थं कर्तुं शक्यते इति दिग्दर्शनाय प्रस्तुतेन कार्यपत्रेण सहभागिन: संस्कृतेऽपि आधुनिकभाषास्विव आधारभूतवाक्यनिर्माणेन वाक्यर्थज्ञानविधौ यज्जाटिल्यं तत् परिहर्तुं शक्यते इति बोधेन उपकृता: ।

४. वाल्मीकिविद्यापीठस्य नेपालीशिक्षणविभागान्तर्गता:, साहित्यशिक्षणविभागान्तर्गता:, व्याकरणशिक्षणविभागान्तर्गताश्च सहभागिन: शिक्षका वाक्यार्थबोधसम्बन्धे सञ्जातया अनया गोष्ठ्या आगामिसमयेषु प्राज्ञिककार्यसञ्चालनाय दीक्षिता इति एषाऽपि महत्त्वपूर्णा प्राप्ति: ।

५. कार्यपत्रलेखका: कार्यपत्ररचनायां कृतेन प्राज्ञिकप्रयासेन लाभान्विता:, टिप्पणीकर्तार: सहभागिन: शिक्षका: कार्यपत्राधारितचिन्तनेन तच्चिन्तनपरिपुष्टये कृतेन निजेन प्राज्ञिकप्रयासेन च लाभान्विता इति गोष्ठीयं दिवसद्वयव्यापिन्यपि प्राज्ञिकजागरणविधौ महत्त्वपूर्णा जातेति वयं भावयाम: ।

वाल्मीकिविद्यापीठसाहित्यविभागान्तर्गता गोष्ठ्यायोजनसमिति:

१. **आयोजक: -** प्रा.डा. वेणीमाधवढकाल:
२. **सदस्य: -** प्रा.डा. टीकारामोऽधिकारी
३. **सदस्य: -** सहप्रा. श्रीरामहरिदाहाल:
४. **सदस्य: -** उपप्रा. श्रीश्रीरामसापकोटा:
५. **सदस्य: -** उपप्रा. श्रीमुकुन्दलामिछाने:
६. **सदस्य: -** उपप्रा. श्रीनन्दनभट्टराई:
७. **सदस्य: -** उपप्रा. श्रीपराशर आचार्य:

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

गोष्ठीसंयोजनसमितिः

१. **संयोजकः** - प्रा.डा. वेणीमाधवढकालः
२. **सदस्यः** - प्रा. श्रीनीलमणिढुङ्गाना
३. **सदस्यः** - उपप्रा. श्रीध्रुवप्रसादज्ञवाली
४. **सदस्यः** - उपप्रा. श्रीशान्तकृष्णोऽधिकारी

गोष्ठीसहभागिनः

१.	**डा. टीकारामपन्थी** -	कार्यपत्रलेखकः
२.	**प्रा. श्रीविद्यानाथ उपाध्यायः** -	विशेषज्ञः
३.	**प्रा. श्रीशिवहरिमरहट्ठाः** -	विशेषज्ञः
४.	**प्रा.डा. वेणीमाधवढकालः** -	संयोजकः, कार्यपत्रलेखकः
५.	**प्रा.डा. टीकारामोऽधिकारी** -	विशेषज्ञः, संयोजकसमितेः सदस्यः
६.	**प्रा.डा. विष्णुप्रसाददेवकोटाः** -	विशेषज्ञः
७.	**प्रा. श्रीनीलमणिढुङ्गानाः** -	संयोजकसमितेः सदस्यः, कार्यपत्रलेखकः
८.	**प्रा. श्रीदुर्गाप्रसाददाहालः** -	विशेषज्ञः
९.	**सहप्रा. श्रीध्रुवप्रसादज्ञवाली** -	संयोजकसमितेः सदस्यः, कार्यपत्रलेखकः
१०.	**सहप्रा. श्रीरामहरिदाहालः** -	सहभागी, संयोजकसमितेः सदस्यः
११.	**सहप्रा. श्रीमोतीलालरिजालः** -	सहभागी
१२.	**उपप्रा. श्रीश्रीरामसापकोटाः** -	सहभागी, संयोजकसमितेः सदस्यः
१३.	**उपप्रा. श्रीनवराजकट्टेलः** -	सहभागी
१४.	**उपप्रा. श्रीभागवतप्रसादढकालः** -	सहभागी
१५.	**उपप्रा. श्रीध्रुवभट्टराई** -	सहभागी
१६.	**उपप्रा. श्रीशान्तिकृष्णोऽधिकारी** -	सहभागी
१७.	**उपप्रा. श्रीजीवनोऽधिकारी** -	सहभागी, संयोजकसमितेः सदस्यः
१८.	**उपप्रा. श्रीमुकुन्दलामिछानेः** -	सहभागी, संयोजकसमितेः सदस्यः
१९.	**उपप्रा. श्रीनन्दनभट्टराईः** -	सहभागी, संयोजकसमितेः सदस्यः
२०.	**उपप्रा. श्रीपराशर आचार्यः** -	सहभागी, संयोजकसमितेः सदस्यः
२१.	**उपप्रा. श्रीभीमप्रसादकण्डेलः** -	सहभागी
२२.	**सहाप्रा. श्रीदेवीप्रसादसुवेदी** -	सहभागी
२३.	**सहाप्रा. श्रीअच्युतशर्मा** -	सहभागी
२४.	**सहाप्रा. श्रीमोदनाथखनालः** -	सहभागी

१०. वाल्मीकिविद्यापीठसाहित्यशिक्षणविभागेनायोजिता अनिवार्यसंस्कृतविषयककार्यशालागोष्ठी

उद्‌घाटनसमारोहः (२०६०/२/१२ प्रातः ११:००-२:००)

महेन्द्रसंस्कृतविश्वविद्यालयस्यायोजनायां वाल्मीकिविद्यापीठसाहित्यशिक्षणविभागेन अनिवार्यसंस्कृतविषयिणी कार्यशालागोष्ठी

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

वैक्रमाब्दस्य २०६० ज्येष्ठमासस्य १२ दिनाङ्कादारभ्य १६ दिनाङ्कपर्यन्तं सञ्चालिता आसीत् । अस्यां गोष्ठ्या विश्वविद्यालयस्य विविधेभ्यो विद्यापीठेभ्यो द्विचत्वारिंशत् शिक्षकाः सहभागिनो भवन् । अस्य विश्वविद्यालयस्योपकुलपतिना आचार्यपूर्णचन्द्रदुङ्गेल-महोदयेन उद्घाटितेऽस्मिन् कार्यक्रमे अनिवार्यसंस्कृतपत्रसम्बद्धानि दशसंख्यकानि कार्यपत्राणि प्रस्तुतान्यासन्। पञ्चदिवसव्यापिन्यां तस्यां गोष्ठ्यां प्रत्येकस्मिन् कार्यपत्रे सहभागिनां विदुषां व्यापकविचारविमर्शेन कार्यशालया च पाठ्यक्रम-पाठ्यांश-पाठ्यपुस्तक-पाठ्यविधिसम्बद्धा उपयोगिनो विचाराः समुद्भाविता आसन् ।

ज्येष्ठमासस्य १२ दिनाङ्के वाल्मीकिविद्यापीठसाहित्यविभागाध्यक्षस्य प्रा.डा. वेणीमाधवढकालस्य साभापत्ये सञ्चालिते समुद्घाटनसमारोहे भाषमाणेनोपकुलपतिना अनिवार्यसंस्कृतविषयिव्याः कार्यशालायाः तत्सम्बद्धानां शिक्षकाणां शिक्षणकौशलाभिवृद्धये पाठ्यक्रमपरिष्काराय च विश्वविद्यालयस्य कृते महत्साहाय्यं भविष्यतीति प्रतिपादितम् । तथैव पूर्वोपकुलपतिः प्रा. श्रीमाधवराजगौतमः, प्रा. श्रीनीलमणिढुङ्गानाः, प्रा. श्रीलेखनाथाचार्यश्चेत्यादिभिर्वक्तृभिः पाठ्यक्रमे निर्धारितोद्देश्यपूर्तये पाठ्यांशसमीक्षणं विधाय समुचिता उपायाः प्रकाशनीया इति सहभागिनः समुत्प्रेरिताः ।

प्रथमकार्यपत्रप्रस्तुतिः (२०६०/२/१२ सोमवासरे २:००-४:००)

सभापतिः – प्रा.डा. टीकारामोऽधिकारी

कार्यपत्रशीर्षकम् – उत्तरमध्यमप्रथमखण्डीयसंस्कृतरचनापाठ्यांशसमीक्षणम्

कार्यपत्रप्रस्तोता – सहप्रा. श्रीरामहरिदाहालः

सङ्क्षिप्तविवरणम् – कार्यपत्रलेखकेन निजे कार्यपत्रे उत्तरमध्यमप्रथमखण्डे निर्धारितस्य संस्कृतरचनापाठ्यांशस्य न्यूनतां निर्दिश्य गुणाधानाय उपायाः प्रतिपादिताः । सहभागिभिर्विद्वद्भिर्विशेषज्ञपदासीनैः प्रा. विद्यानाथोपाध्याय-प्रा. शिवहरिमरट्टा-प्रा.डा. विष्णुप्रसाददेवकोटा-प्रा. दिनेशराजपन्तमहोदयैश्च निजाः परामर्शाः प्रत्ताः ।

द्वितीयदिवसे (२०६०/२/१३ दिनाङ्के ११:००-५:००)

द्वितीयकार्यपत्रप्रस्तुतिः

सभापतिः – प्रा. श्रीशिवहरिमरहट्टा

कार्यपत्रशीर्षकम् – अ.सं.व्या. उत्तरमध्यमप्रथमखण्डीयपाठ्यांशसमीक्षणम्

कार्यपत्रप्रस्तोता – सहप्रा. श्रीध्रुवप्रसादज्ञवाली

सङ्क्षिप्तविवरणम् – कार्यपत्रलेखकेन विदुषा उत्तरमध्यमस्तरेऽनिवार्यव्याकरणप्रथमपत्रस्य वर्तमानस्थितिं समीक्ष्य तस्य सुधाराय निजा मूल्यवन्तो विचाराः कार्यपत्रे प्रस्तुताः । तत्र सहभागिभिर्विशेषज्ञैश्च विद्वद्भिः कार्यपत्रगतविचाराणां समीक्षां विधाय गुणाधानाय निजा विचाराः प्रकटीकृताः ।

तृतीयकार्यपत्रप्रस्तुतिः

कार्यपत्रशीर्षकम् – अ.सं.व्या. उत्तरमध्यमद्वितीयखण्डीयपाठ्यांशसमीक्षणम्

कार्यपत्रप्रस्तोता – प्रा.डा. विष्णुप्रसाददेवकोटाः

सङ्क्षिप्तविवरणम् – कार्यपत्रलेखकेन विदुषा उत्तरमध्यमस्तरेऽनिवार्यव्याकरणद्वितीयपत्रस्य गहनतया समीक्षा कृता । तां समीक्षामाधारीकृत्य सहभागिभिर्विशेषज्ञैश्च विद्वद्भिः कार्यपत्रस्य प्रशंसा कृता ।

चतुर्थकार्यपत्रप्रस्तुतिः

कार्यपत्रशीर्षकम् – अ.सं.न्या. उत्तरमध्यमद्वितीयखण्डीयपाठ्यांशसमीक्षणम्

कार्यपत्रप्रस्तोता – प्रा. श्रीविद्यानाथ उपाध्यायः

सङ्क्षिप्तविवरणम् – कार्यपत्रलेखकेन विशिष्टेन विदुषा उत्तममध्यमद्वितीयखण्डेऽनिवार्यन्यायविषये पाठ्यपुस्तकरूपेण प्रचलितायाः न्यायसिद्धान्तमुक्तावल्याः स्थाने ग्रन्थान्तरस्य, नव्यन्यायपारिभाषिकशब्दबोधविषयकग्रन्थस्य च स्थापनायै निजो मूल्यवान् परामर्शः प्रत्तः । तद्विषये सहभागिभिर्विशेषज्ञैश्च गहनतया विचारो विहितः ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

तृतीयदिवसे (२०६०/२/१४ दिनाङ्के ११:००-५:००)

पञ्चमकार्यपत्रप्रस्तुतिः

सभापतिः – प्रा. श्रीविद्यानाथ उपाध्यायः

कार्यपत्रशीर्षकम् – अ.वै.सं.र. उत्तरमध्यमप्रथमखण्डीयपाठ्यांशसमीक्षणम्

कार्यपत्रप्रस्तोता – प्रा. श्रीनीलमणिढुङ्गानाः

सङ्क्षिप्तविवरणम् – कार्यपत्रलेखकेन विदुषा प्रस्तुते कार्यपत्रे उत्तरमध्यमप्रथमखण्डे निर्धारितस्य अ.वै.सं.र. पाठ्यांशस्य गुणा दोषाश्च विविक्ताः । सहभागिभिस्तत्र गभीरतया विचारः कृतः । विशेषज्ञैश्च निजा मूल्यवन्तो परामर्शाः प्रत्ताः ।

षष्ठकार्यपत्रप्रस्तुतिः

कार्यपत्रशीर्षकम् – अ.वै.सं.र. उत्तरमध्यमद्वितीयखण्डीयपाठ्यांशसमीक्षणम्

कार्यपत्रप्रस्तोता – प्रा. डा. भागवतप्रसादशर्मा

सङ्क्षिप्तविवरणम् – कार्यपत्रलेखकेन विदुषा गहनविचारपूर्वकं निर्मिते निजे कार्यपत्रे प्रस्तुतपाठ्यांशस्य दोषाहानाय गुणाधानाय च कृतो बौद्धिकप्रयासः सहभागिभिः प्रशस्तः ।

सप्तमकार्यपत्रप्रस्तुतिः

कार्यपत्रशीर्षकम् – अ.सं.र. शास्त्रिस्तरीयपाठ्यांशसमीक्षणम्

कार्यपत्रप्रस्तोता – प्रा. डा. वेणीमाधवढकालः

सङ्क्षिप्तविवरणम् – कार्यपत्रलेखकेन विदुषा निजे कार्यपत्रे सर्वाधिकतया विवेच्यस्यास्य पाठ्यांशस्य प्रकरणानुसारितया गुणान् दोषाँश्च प्रकटीकृत्य एतस्य पाठ्यांशस्य सन्तुलितस्वरूपप्रदानाय विविधप्रकरणानां परिवर्तनविषये निजा विचाराः प्रस्तुताः । सहभागिभिश्च तेषां समर्थनं विहितम् ।

चतुर्थदिवसे (२०६०/२/१५ दिनाङ्के ११:००-५:००)

अष्टमकार्यपत्रप्रस्तुतिः

सभापतिः – प्रा. श्रीदिनेशराजपन्तः

कार्यपत्रशीर्षकम् – अ.वै.सं.र. शास्त्रिप्रथमखण्डीयपाठ्यांशसमीक्षणम्

कार्यपत्रप्रस्तोता – प्रा. श्रीलेखनाथ आचार्यः

सङ्क्षिप्तविवरणम् – कार्यपत्रलेखकेन विदुषा शास्त्रिप्रथमखण्डे निर्धारितस्य अ.वै.सं.र. पाठ्यांशस्य अभिनवरूपसम्पादनविधौ गहनं विचारं विधाय केचन परामर्शा उपस्थापिताः । तत्र सहभागिभिः पुनर्विचारो विहितः । कार्यपत्रमिदं सहभागिभिः प्रशस्तम् ।

नवमकार्यपत्रप्रस्तुतिः

कार्यपत्रशीर्षकम् – अ.वै.सं.र. शास्त्रिद्वितीयखण्डस्तरीयपाठ्यांशसमीक्षणम्

कार्यपत्रप्रस्तोता – प्रा. श्रीनीलमणिढुङ्गानाः

सङ्क्षिप्तविवरणम् – कार्यपत्रलेखकेन विदुषा अ.वै.सं.र. शास्त्रिद्वितीयखण्डीयपाठ्यांशस्य केचन पक्षाः परिहार्यत्वेन प्रतिपादिता। केषाञ्चन विषयाणां समावेशाय च संस्तुतिर्विहिता । कार्यपत्रमिदं सहभागिभिः सविवेचनमनुमोदितम् ।

दशमकार्यपत्रप्रस्तुतिः

कार्यपत्रशीर्षकम् – अ.सं.न्या. उत्तरमध्यमप्रथमखण्डीयपाठ्यांशसमीक्षणम्

कार्यपत्रप्रस्तोता – प्रा. श्रीशिवहरिमरहट्टाः

सङ्क्षिप्तविवरणम् – कार्यपत्रलेखकेन विदुषा न्यायसिद्धान्तमुक्तावलीनामकस्य पाठ्यपुस्तकस्य स्थापनाविषये दार्ढ्येन स्वमतमुपस्थापितम् । न्यायविषयकपारिभाषिकशब्दार्थबोधप्रदानविषये च संस्तुतिर्विहिता । कार्यपत्रमिदं सहभागिभिर्भृशं विविच्य पारिभाषिकशब्दार्थबोधविषये प्रत्तस्य परामर्शस्यानुमोदनं कृतम् ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

पञ्चमदिवसे (२०६०/२/१६ दिनाङ्के ११:००-२:००)

पाठ्यक्रमनिर्माणविषयककार्यशालागोष्ठी

सभापतिः - प्रा. श्रीनीलमणिढुङ्गानाः

पाठ्यक्रमनिर्माणविषयककार्यशालागोष्ठी

सङ्क्षिप्तविवरणम् - प्रा. नीलमणिढुङ्गानामहोदयस्य सभापतित्वे संयोजकत्वे च सञ्चालितायां कार्यशालागोष्ठ्यां सहभागिभिर्नूतनपाठ्यक्रमनिर्माणविधिमनुसृत्य कार्यशालायां कार्यं कृतम् । पाठ्यक्रमनिर्माणक्रमे कथंकारमुद्देश्यनिर्धारणं क्रियते, कथञ्च प्रकरणविभाजनं क्रियते, कथं पाठ्यवस्तुविवरणं प्रस्तूयते । केन प्रकारेण मूल्याङ्कनतालिकानिर्मीयते इत्यादिविषये 'क'-'ख'समूहद्वये विभक्तैः सहभागिभिः संयोजकनिर्देशनमाध्यमेन स्वयमुद्देश्यनिर्धारणादिकं विधाय कश्चन नूतनः पाठ्यक्रमो निर्मितः । तस्य च परस्परं 'क'समूहस्य कार्यं 'ख'समूहेन, 'ख'समूहस्य कार्यं 'क'समूहेन परीक्षितं समीक्षितं संशोधितञ्च । इत्थं कार्यशालायामस्यां समवेतैः सहभागिभिः पाठ्यक्रमनिर्माणप्रविधेः पन्था अवगतः ।

वस्तुतः कार्यपत्रलेखकैः, विशेषज्ञैः, सहभागिभिः शिक्षकैश्च अनिवार्यसंस्कृतक्षेत्रान्तर्गतानां पाठ्यक्रमाणां परिष्काराय, परिवर्तनाय, परिवर्धनाय च समुत्थापितान् विचारान् अङ्गीकृत्य व्याकरण-न्याय-साहित्यविषयसम्बद्धादर्शपाठ्यक्रमनिर्माणाय कार्यशालागोष्ठ्यामस्यां व्याकरणविषये संयोजनं प्रा.डा. विष्णुपसाददेवकोटामहोदयेन, न्यायविषयस्य संयोजनं प्रा. लेखनाथाचार्येण, साहित्यस्य संयोजनं प्रा.डा. भागवतशर्मणा च विहितमासीत् । अस्या कार्यशालागोष्ठ्या माध्यमेन शिक्षणप्रशिक्षणगतकौशलार्जनेन सह पाठ्यक्रमनिर्माणविधावपि सहभागिनः शिक्षकाः प्रशिक्षिताः सञ्जाता इति सर्वैरेव सहभागिभिः सन्तोषः प्रकटित आसीत्।

समापनसमारोहः

समापनसमारोह:(२०६०/२/१६, दिवा ३:०० - ५:००)

अनिवार्यसंस्कृतकार्यशालागोष्ठ्या अन्तिमे दिने ज्येष्ठमासस्य १६ दिनाङ्के अपराह्णद्विवादनतो विशेषसमापनसमारोहः समायोजित आसीत् । वाल्मीकिविद्यापीठसाहित्यविभागाध्यक्षस्य प्रा.डा. वेणीमाधवढकालमहोदयस्य साभापत्ये राजसभास्थायिसमितेः सदस्यस्य सं.डा. स्वामिप्रपन्नाचार्यमहोदयस्य प्रमुखातिथित्वे सुसम्पन्ने तस्मिन् कार्यक्रमे पूर्वशिक्षामन्त्री मोदनाथप्रश्रितमहोदयः, म.सं.वि. उपकुलपतिराचायपूर्णचन्द्रढुङ्गेलमहोदयः, प्राज्ञः डा. टीकारामपन्थीमहोदयश्च विशिष्टातिथिरूपेण समादृता आसन् । उपप्रा. श्रीमत्या अलकायाश्चूडालोपाधिकायाः स्वागतमन्तव्यतः प्रारब्धे कार्यक्रमेऽस्मिन् महेन्द्रसंस्कृत-विश्वविद्यालयस्य विविधेभ्यो विद्यापीठेभ्यः समागतानां सहभागिनां प्रतिनिधिरूपेण जनताविद्यापीठस्य उपप्रा. पोखरेलोपाधिका श्रीमती सरस्वतीदेवी, पिण्डेश्वरविद्यापीठस्य उपप्रा. श्रीरमेशघिमिरेश्च गोष्ठ्यां सहभागितया प्राप्तानां सत्फलानां विषये चर्चां कृतवन्तः । कार्यपत्रलेखकप्रतिनिधिरूपेण प्रा.डा. भागवतशर्ममहोदयोऽनिवार्यसंस्कृतगोष्ठ्या मूल्यवत्तामादाय प्रशंसावचनं व्याहृतवान् । विशेषज्ञाणां विदुषां प्रतिनिधितया प्रा. श्रीदिनेशराजपन्तमहाभागोऽस्य कार्यक्रमस्य महत्युपलब्धिरस्ति, एतादृशेन कार्यक्रमेण विश्वविद्यालयस्य श्रीवृद्धिर्भवति, अन्ये विभागा अपि एतादृशकार्यक्रमसञ्चालनविधौ अभिप्रेरिता भवन्ति, अहमनेन कार्यक्रमेण सन्तुष्टोऽस्मि परमेतादृशकार्यसञ्चालनावसरे छात्राणामध्ययने यथा बाधा न स्यात् तथा कार्यसञ्चालनं कर्तव्यमिति समुदीरितवान् । वाल्मीकिविद्यापीठस्य सहप्राध्यापकः श्रीरामहरिदाहालमहोदयः स्वमन्तव्यप्रकाशनपूर्वकं कार्यशालागोष्ठ्यां पारितानां प्रस्तावानां वाचनं कृतवान् ।

अस्मिन्नेव समारोहे वाल्मीकिविद्यापीठस्य साहित्यविभागाध्यक्षेण प्रा.डा. वेणीमाधवढकालमहोदयेन प्रणीतस्य **'लिच्छविकालिकानामभिलेखानां साहित्यिकमनुशीलनम्'** इति शीर्षकान्वितस्य विद्यावारिधिशोधप्रबन्धस्य लोकार्पणं प्रमुखातिथिना सम्माननीयेन डा. स्वामिप्रपन्नाचार्यमहोदयेन कृतम् । ग्रन्थस्य लोकार्पणानन्तरं महेन्द्रसंस्कृतविश्वविद्यालयस्यो-पकुलपतिराचार्यः पूर्णचन्द्रढुङ्गेलमहोदयः, डा. टीकारामपन्थिमहोदयः, डा. मोदनाथप्रश्रितमहोदयः, प्रा. खेमराजकेशवशरण-महोदयश्च ग्रन्थस्य विषयवस्तुना सह ग्रन्थकारस्य वैदुष्यस्य, संस्कृतवाङ्मयनिष्ठायाः, पठन-पाठनलेखनानुसन्धानादि-क्रियाशीलतायाश्च मुक्तकण्ठेन प्रशंसां कृतवन्तः । एवमेव ते वक्तारो विमोचिते ग्रन्थे नेपालराष्ट्रस्य इतिहास-राजनीति-धर्म-

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

दर्शन-संस्कृतिप्रभृतिविषयजातं सन्निहितमस्तीति प्रत्यपादयन् ।

कार्यक्रमेऽस्मिन् विमोचितस्य **लिच्छविकालिकानामभिलेखानां साहित्यिकमनुशीलनम्** इति नामधेयस्य शोधप्रबन्धस्य प्रकाशिका धर्मप्राणा विदुषी श्रीमती प्रभालक्ष्मीराणामहोदया, वाल्मीकिविद्यापीठसाहित्यविभागस्य पूर्वाध्यक्षः प्रा. खेमराजकेशवशरणमहोदयश्च प्रमुखातिथिना डा. स्वामिमहाभागेन अभिनन्दनपत्रोत्तरीयमाल्यप्रदानपुरस्सरं समभिनन्दितौ।

अभिनन्दनकार्यक्रमानन्तरं गोष्ठीं सम्बोधयता प्रमुखातिथिना डा. स्वामिमहाभागेन डा. वेणीमाधवढकालमहोदयेन साकं नैजस्य छात्रकालिकसम्बन्धस्य विषये आत्मीयतापूर्वकं व्याहृतवता तदीयं वैदुष्यं मुक्तकण्ठं प्राशंसि । तेन महोदयेन उक्तम् - नेपालस्य ऐतिहासिकगौरवगरिमबोधाय ग्रन्थोऽयं नितरामुपयोगी, ग्रन्थोऽयं शोधप्रबन्धरत्नं महेन्द्रसंस्कृत-विश्वविद्यालयस्य च शेवधिरिति । पर्यन्ते सभाध्यक्षस्यासनतः साहित्यविभागाध्यक्षेण ढकालमहाभागेन गोष्ठ्यां समागतेभ्यो विद्वद्भ्यो विदुषीभ्यः कार्यपत्रलेखकेभ्यः सहभागिभ्यो विशेषज्ञभ्यः सहयोगिजनेभ्योऽभिनन्दितजनेभ्यः कृतज्ञतां प्रयच्छता ग्रन्थप्रकाशिकाया धर्मप्राणाया विदुष्याः श्रीप्रभालक्ष्मीराणामहोदयाया मुक्तकण्ठेन प्रशंसा व्यधायि । पर्यन्ते च सरस्वतीकृपया विषमेऽपि समये गोष्ठीयं सफलाऽजनीति हर्षस्य विषयः, अनया गोष्ठ्या म.सं.वि.पाठ्यक्रमपरिष्कारविषये यन्निर्देशनं प्रदत्तं तस्य परिपालनं विश्वविद्यालयेन कर्तव्यम्, अद्यातिथिभिः, विशिष्टातिथिभिः, प्रमुखातिथिभिश्च समागत्य कार्यक्रमस्य गुरुता समेधिता, ग्रन्थस्य विषये व्याहरणेन लेखकस्योत्साहः संवर्धितः, साहित्यविभागश्च विदुषां संस्तुतिभिः प्रशंसावचनैश्च पुनरपि प्राज्ञिककार्यसञ्चालनविषयेऽभिप्रेरितः, भगवती शारदा सर्वदा संस्कृतसमुत्थानविधौ करुणां विदध्यादिति भावनां सभासमक्षे प्रस्तुवता ढकालमहोदयेन समापनसमारोहस्य विसर्जनं कृतम् ।

कार्यशालागोष्ठ्या पारिताः प्रस्तावाः

१. एषा सभा महेन्द्रसंस्कृतविश्वविद्यालयाय तदीयसहयोगसंस्मरणपूर्वकं कृतज्ञताज्ञापनं कुरुते ।

२. अस्यां पञ्चदिवसव्यापिन्यां कार्यशालागोष्ठ्यां प्रस्तुतानां परामर्शानानां कार्यपत्रनिष्कर्षाणां विद्वच्चिन्तनानाञ्च संकलनपूर्वकं कार्यान्वयनाय संस्तुतिं विधातुमेका समितिर्विश्वविद्यालयेन निर्मेया ।

३. पाठ्यक्रमसम्बन्धेऽनिवार्यसंस्कृतविषयस्य उत्तरमध्यमशास्त्रिस्तरयोः पाठ्यांशेषु प्रतिप्रकरणं विचारणा अस्या गोष्ठ्या महत्त्वपूर्णो विषयः । अत्र विद्वद्भिः कार्यपत्रलेखकैर्यत् प्रस्तावितं तस्य विवेकपूर्वकं कार्यान्वयनाय एषा सभा विश्वविद्यालयमनुरुणद्धि ।

४. कार्यपत्रेषु येषां ग्रन्थानां पाठ्यपुस्तकत्वेन संस्तुतिः कृता तेषां निर्माणाय अथवा अनुसन्धानाय अथवा अनुवादाय अथवा प्रकाशनाय च विश्वविद्यालयो यथाशीघ्रं पादचारं विदध्यात् ।

५. आगामिनि समये विश्वविद्यालयः पाठ्यक्रमं समयानुकूलमाधुनिकञ्च सम्पादयितुं पाठ्यक्रमपरिष्कारं कुर्यात् ।

६. आगामिनि पाठ्यक्रमपरिष्कारकर्मणि अनिवार्यसंस्कृतविषये ज्यौतिषम्, वास्तुशास्त्रम्, आयुर्वेदम्, तन्त्रम्, योगादिकञ्च पाठ्यविषयत्वेन निर्धार्य छात्राणां विशिष्टज्ञानार्जनविधौ सहयोगं विदध्यात् ।

७. साहित्यशिक्षणविभागेन गतवर्षे सञ्चालितायाः कार्तवीर्योदयमहाकाव्यसम्बद्धायाः कार्यशालागोष्ठ्या निष्कर्षरूपेण यद् उपस्थापितं तद् विश्वविद्यालयस्य कृते महती उपलब्धिः । तया गोष्ठ्या पुनः सम्पादनपूर्वकं कार्तवीर्योदयमहाकाव्यस्य प्रकाशनं विश्वविद्यालयेन विधेयमिति संस्तुतमासीत् । तस्य कार्यान्वयनं विश्वविद्यालयेन सत्वरं विधेयमिति सभेयं संस्तौति ।

८. यथा अनिवार्यसंस्कृतविषयमादाय एषा गोष्ठी सम्पन्ना तथैव अन्येषु 'क'वर्गीयेषु 'ख'वर्गीयेषु च विषयेषु ये पाठ्यांशा निर्धारिताः सन्ति तेषामपि अनेनैव प्रकारेण विश्लेषणं कर्तुमेतादृश्यो गोष्ठ्य आयोजनीया इति सभेयं विश्वविद्यालयमनुरुणद्धि।

९. एषा सभा एककक्षातो दशमकक्षापर्यन्तं साधारणविद्यालयेषु संस्कृतस्य एकं पत्रमनिवार्यरूपेण निर्धारयितुं पञ्चश्रीसर्वकारं समनुरुणद्धि ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

श्रीमतां देशदेशान्तरप्रथितयशसां विपश्चिदपश्चिमानां विविधधार्मिकसंस्थानजन्मभुवां प्रवचनकोविदानां सुरभारतीप्रियाणां सुकवीनां वाल्मीकिविद्यापीठसाहित्य-विभागपूर्वाध्यक्षाणां सन्तशिरोमणीनामाचार्यप्रवराणां प्राध्यापकानां श्रीखेमराजकेशवशरणमहोदयानां करकमलयोर्वाल्मीकि-विद्यापीठसाहित्यशिक्षणविभागेन सादरं समर्पितम्

अभिनन्दनपत्रम्

विख्याते सुषमालये समतले लेटाङभूमण्डले
दाहालाभिधवंशरत्ननिचये विख्यातधीवैभवे ।
लब्ध्वा कीर्तिजनिं जयन्ति विनयैर्बाल्येऽपि लोकप्रियाः
श्रीमत्केशवपादपद्ममधुपाः श्रीखेमराजाभिधाः ।।१।।
आसामे हरिभक्तवृन्दललिते दीर्घे प्रवासे तदा
श्रीलीलारसमानसैः सुचरितैः प्रोच्चत्किशोरायुषः ।
आबाल्यात् सुरभारतीरतिबला वृन्दावनीवल्लभा
नेपाले विलसन्ति ते बुधवराः साहित्यशास्त्रप्रियाः ।।२।।
तैस्तैः संस्कृतभाषणामृतकणैराकृष्टलोकाः सदा
नेपाले सुरवाक्समुन्नतिविधौ भूभारनिर्वाहकाः ।
विद्वत्संसदि भूतलेऽत्र रचनाप्रावीण्यलब्धादरा-
स्तेऽस्माकं पुरतो लसन्ति रसिकाः साहित्यप्राध्यापकाः ।।३।।
स्वैः काव्यैरपि मित्रसङ्गमसुखैर्भावप्रसूनाञ्जलि-
ख्यातैस्तैः सुरवाग्विलासललितैः प्रोच्चद्यशोवैभवाः ।
गीताभक्तिरसाः सदाप्तशरणाः श्रीकेशवस्य प्रिया
विद्वत्संसदि ते लसन्ति विबुधाः श्रीखेमराजाभिधाः ।।४।।
तेषां प्रीतिरसेन जीवति सदा सोऽयं विभागस्तथा
तेऽस्मान् साधु निभालयन्तु सततं तत्प्रीतिभाजा हृदा ।
पूर्वाध्यक्षवरा ! मुदाऽमरगिरा सद्भावनाप्रेङ्खितां
स्वीकुर्वन्तु पदप्रसूनजनितामस्मच्छुभाशंसनाम् ।।५।।

आशंसकाः
वाल्मीकिविद्यापीठसाहित्यविभागस्था वयम्

....

सं.डा. स्वामी प्रपन्नाचार्यः
प्रमुखातिथिः

अध्यक्षः
प्रा.डा. वेणीमाधवढकालः

सदस्याः

प्रा.डा. टीकारामोऽधिकारी	प्रा.डा. दुर्गादत्तशर्मोपाध्यायः
सहप्रा. रामहरिदाहालः	उपप्रा. श्रीरामसापकोटाः
उपप्रा. जीवनोऽधिकारी	उपप्रा. मुकुन्दलामिछानेः

दिनाङ्कः २०६०/०२/१६

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

धर्मप्राणायै श्रीयुतायै प्रभालक्ष्मीराणामहोदयायै समर्पितमभिनन्दनपत्रम् -

वैदिक सनातन धर्म र सनातन संस्कृतिकी प्रतिमूर्ति, महेन्द्र संस्कृत विश्वविद्यालयको
श्रीवृद्धिमा सहयोगिनी, परोपकारपरायणा, श्री शार्दूलशमशेर ज. ब. रा. स्मृति
कोषका अध्यक्ष श्रीमती प्रभालक्ष्मी राणा महोदयाका करकमलमा
वाल्मीकि विद्यापीठ साहित्य विभागद्वारा सादर समर्पित

अभिनन्दन-पत्र

म्याग्दीको दरबाङभित्र रसिलो त्यो मल्लदर्बारमा
चम्क्यो झल्झल वीर माथवरको सौभाग्यज्योति त्यहाँ ।
हाँस्दै जन्मनुभो त्यहाँ शशिमुखी यौटी कुमारी पनि
जस्को नाम रह्यो प्रभा तर उहाँ आफै प्रभाकी धनी ।।१।।
मुक्तिक्षेत्र चुमेर कल्कल गरी बग्दा त्यहाँ गण्डकी
लाखौं भाव छचल्किएर मुटुमा खेल्थिन् कुनै किन्नरी ।
झट्टै हुर्कनुभो पढेर घरमा श्रीमल्लकन्या त्यहाँ
बन्दै भित्रिनुभो नयाँ कुलवधू राणाहरूकी यहाँ ।।२।।
को जान्दैन प्रतापसूर्य मतिमान् श्रीवीरशम्शेरको ?
को बुझ्दैन छटा प्रतिष्ठित गुणी शार्दूलशम्शेरको ?
श्रीशार्दूलकुटुम्बिनी मतिमती नेपालपुत्री नयाँ
बत्तीझैं करुणार्द्र लोकहितमा देख्छौं प्रभाश्रीकन ।।३।।
हो राणाकुलको प्रतापमहिमा सर्वत्र यो संस्कृत
त्यो आफ्नो कुलधर्मको हिमचुली पार्दै सधैं प्रोन्नत ।
विद्याकी अनुरागिणी गुणमयी हे धर्मसंवाहिनी !
बन्दै जानुहवस् सुदीर्घजयिनी कारुण्यवर्षा बनी ।।४।।
सम्मान्या हे प्रभालक्ष्मी ! राणावंशप्रदीपिका ।
स्वीकार गर्नुहोस् हाम्रो श्रद्धासुमनमालिका ।।५।।

आशंसकाः
वाल्मीकिविद्यापीठसाहित्यविभागस्था वयम्

अध्यक्षः
प्रा.डा. वेणीमाधवढकालः

सदस्याः

प्रा.डा. टीकारामोऽधिकारी — प्रा.डा. दुर्गादत्तशर्मोपाध्यायः
सहप्रा. रामहरिदाहालः — उपप्रा. श्रीरामसापकोटाः
उपप्रा. जीवनोऽधिकारी — उपप्रा. मुकुन्दलामिछानेः

....
सं.डा. स्वामी प्रपन्नाचार्यः
प्रमुखातिथिः

दिनाङ्कः २०६०/०२/१६

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

कार्यशालागोष्ठ्या उपलब्धिः

अनिवार्यसंस्कृतकार्यशालागोष्ठ्या उपलब्धयो निम्ननिर्दिष्टाः सन्ति –

१. पञ्चदिवसव्यापिन्यामस्यां गोष्ठ्यां प्रस्तुतैरनिवार्यसंस्कृतविषयसम्बद्धैर्दशभिः कार्यपत्रैः सर्वे सहभागिनो भृशमुपकृताः।

२. कस्मिन्नपि विषये ये पाठ्यांशा निर्धारिता भवन्ति तेषां प्रतिप्रकरणं नेदृशं विचारगहनं विश्लेषणमध्यावधि महेन्द्रसंस्कृतविश्वविद्यालये जातम् । अस्यां गोष्ठ्यामुत्तरमध्यमशास्त्रिस्तरयोर्निधारितानामनिवार्यसंस्कृतपाठ्यांशानां प्रतिप्रकरणं यद् गहनं विश्लेषणं जातं तन्महती प्राप्तिः ।

३. एतस्यां गोष्ठ्यां नूतनपाठ्यविषयसमावेशाय विद्वद्भिर्यदौचित्यं प्रस्तुतं तेन सर्वे सहभागिनो लाभान्विता जाताः, विश्वविद्यालयश्च मार्गदर्शनं प्राप्तवानिति महती प्राप्तिः ।

४. अविचारितनिर्धारितानां स्थूलानां पाठ्यविषयाणां संशोधनपूर्वकं सूक्ष्मतया निश्चितावधिसमाप्यपाठ्यविषयनिर्धारणविधौ एतया गोष्ठ्या यन्निर्देशनं प्रत्तं तदपि मूल्यवदिति सभेयं विश्वसिति ।

५. अस्यां गोष्ठ्यां विशेषतो व्याकरणविषये, न्यायविषये, साहित्यविषये च सामान्यतोऽन्येषु विषयेषु कार्यरतैर्विद्वद्भिः सहभागिभिर्विशेषज्ञैः, कार्यपत्रलेखकैश्च यत् परामर्शनं कृतं तन्महेन्द्रसंस्कृतविश्वविद्यालयस्य पाठ्यक्रमपरिष्कारविधौ आधारभूमिर्भविष्यतीति सभेयं विश्वसिति ।

६. अनया गोष्ठ्या अनेके शिक्षकाः कार्यपत्रलेखनकर्मणि प्रशिक्षिताः, सहभागिनो विदुषां विशेषज्ञाणां विचारैरुपकृताः, महेन्द्रसंस्कृतविश्वविद्यालयस्य आङ्गिकविद्यापीठेषु कार्यरता देशव्यापिनः प्रतिनिधिभूताः शिक्षकाश्च सहभागित्वेन स्वकीयमनुभवं प्रदाय गन्तव्यनिर्धारणे सहयोगं कृतवन्त इत्यपि महत्युपलब्धिः ।

७. संस्कृतभाषायां सञ्चालितायामस्यां गोष्ठ्यां सहभागिभिः संस्कृतसम्भाषणे, संस्कृतमाध्यमेन विषयविचारणे, संस्कृतमाध्यमेन पाठ्यांशगतत्रुटिदिग्दर्शने, संस्कृतमाध्यमेन पाठ्यांशपरिष्करणे च व्यापृतैर्निजा शक्तिः संवर्धिता ।

८. वस्तुत एषा गोष्ठी नीरसस्य अनिवार्यसंस्कृतपाठ्यक्रमस्य विविधपाठ्यांशानां सरसत्वापादने सफलेति महत्युपलब्धिः।

वाल्मीकिविद्यापीठसाहित्यविभागान्तर्गता गोष्ठ्यायोजनसमितिः

१. **आयोजकः -** प्रा.डा. वेणीमाधवढकालः
२. **सदस्यः -** प्रा.डा. टीकारामोऽधिकारी
३. **सदस्यः -** सहप्रा. श्रीरामहरिदाहालः
४. **सदस्यः -** उपप्रा. श्रीश्रीरामसापकोटाः
५. **सदस्यः -** उपप्रा. श्रीमुकुन्दलामिछानेः
६. **सदस्यः -** उपप्रा. श्रीनन्दनभट्टराईः
७. **सदस्यः -** उपप्रा. श्रीपराशर आचार्यः

गोष्ठीसंयोजनसमितिः

१. **संयोजकः -** प्रा.डा. वेणीमाधवढकालः
२. **सदस्यः -** प्रा. श्रीनीलमणिढुङ्गानाः
३. **सदस्यः -** उपप्रा. श्रीध्रुवप्रसादज्ञवाली
४. **सदस्यः -** श्रीविष्णुपन्थी

गोष्ठीसहभागिनः

१. **प्राचार्यः प्रा.डा. रामचन्द्रगौतमः -** विशेषज्ञः
२. **प्रा. श्रीविद्यानाथ उपाध्यायः -** विशेषज्ञः, कार्यपत्रलेखकः

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

अनिवार्यसंस्कृतविषयककार्यशालागोष्ठ्याः सहभागिनां चित्रावली



गोष्ठीं समुद्घाटयन् प्रमुखातिथिः - उपकुलपतिः - आचार्यपूर्णचन्द्रढुङ्गेलमहोदयः

मङ्गलगानं विदधत्यो वाल्मीकिविद्यापीठस्थाश्छात्राः



गोष्ठ्यां समवेताः - उपकुलपतिः - आचार्यपूर्णचन्द्रढुङ्गेलः, समारोहस्य सभापतिः प्रा.डा. वेणीमाधवढकालः, पूर्वोपकुलपतिः प्रा. माधवराजगौतमः, पूर्वशिक्षाध्यक्षः प्रा. विद्यानाथोपाध्यायश्च



गोष्ठ्यां समवेता विद्वांसः सहभागिनश्च

गोष्ठ्यां समवेता विद्वांसः

गोष्ठ्यां समवेता विद्वांसो विदुष्यश्च

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri



विशिष्टातिथिः - उपकुलपतिः - आचार्यपूर्णचन्द्रढुङ्गेलः, प्रमुखातिथिः सं.डा. स्वामी प्रपन्नाचार्यः, समारोहस्य सभापतिः प्रा. डा. वेणी-माधवढकालः, समारोहस्य विशिष्टातिथिः डा. मोदनाथप्रश्रितश्च



समापनसमारोहे स्वागतं ब्रुवाणा उपप्रा. श्रीमती चूडालोपाधिका अलका



गोष्ठ्यां समवेता विद्वांसो विदुष्यश्च



कार्यपत्रलेखकप्रातिनिध्येन मन्तव्यं प्रकाशयन् प्रा.डा. भागवतशर्मा



सहभागिप्रातिनिध्येन मन्तव्यं प्रकाशयन् उपप्रा. श्रीरमेशघिमिरेः



समारोहे स्वमन्तव्यं प्रकाशयन् उपकुलपतिः - आचार्यपूर्णचन्द्रढुङ्गेलः

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

लिच्छविकालिकानामभिलेखानां साहित्यिकमनुशीलनमिति शीर्षकान्वितस्य शोधप्रबन्धस्य विमोचनं कुर्वाणः सं.डा. स्वामिप्रपन्नाचार्यः

मञ्चे समासीना विशिष्टातिथिप्रमुखातिथिप्रभृतयो विद्वांसः

प्रमुखातिथिनाऽभिनन्द्यमानः प्रा.खेमराजः केशवशरणः



अभिनन्दनपत्रसमर्पणपूर्वकं प्रमुखातिथिनाऽभिनन्द्यमाना शोधग्रन्थप्रकाशिका श्रीयुता प्रभालक्ष्मीराणामहोदया

उत्तरीयसमर्पणद्वाराऽभिनन्द्यमाना श्रीयुता प्रभालक्ष्मीराणामहोदया



विमोचितकृतिविषये स्वमन्तव्यं प्रकाशयन् पूर्वशिक्षामन्त्री डा. मोदनाथप्रश्रितः

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

३.	प्रा. श्रीशिवहरिमरहट्टाः -	विशेषज्ञः, कार्यपत्रलेखकः
४.	प्रा. श्रीदिनेशराजपन्तः -	विशेषज्ञः
५.	प्रा.डा. विष्णुप्रसाददेवकोटाः -	विशेषज्ञः, कार्यपत्रलेखकः
६.	प्रा.डा. वेणीमाधवढकालः -	संयोजकः, कार्यपत्रलेखकः
७.	प्रा. डा. टीकारामोऽधिकारी -	विशेषज्ञः, संयोजकसमितेः सदस्यः
८.	प्रा. श्रीनीलमणिढुङ्गनाः -	संयोजकसमितेः सदस्यः, कार्यपत्रलेखकः
९.	प्रा. श्रीलेखनाथ आचार्यः -	कार्यपत्रलेखकः
१०.	प्रा.डा. भागवतशर्मा -	कार्यपत्रलेखकः
११.	सहप्रा. श्रीरामहरिदाहालः -	संयोजकसमितेः सदस्यः, कार्यपत्रलेखकः
१२.	सहप्रा. श्रीसीतारामढकालः -	सहभागी, वाल्मीकिविद्यापीठम्
१३.	सहप्रा. श्रीध्रुवप्रसादज्ञवाली -	संयोजकसमितेः सदस्यः, कार्यपत्रलेखकः
१४.	सहप्रशासकः श्रीहरिहरोऽधिकारी -	शैक्षिकशाखाप्रमुखः, म.सं.वि. दाङ
१५.	सहप्रा. श्रीमुरलीमोहनवास्तोलाः -	सहभागी, रुरुसंस्कृतविद्यापीठम्, रिडी
१६.	प्राचार्यः श्रीगुरुप्रसादसुवेदी -	सहभागी, देवघाटविद्यापीठम्
१७.	उपप्रा. श्रीश्रीरामसापकोटाः -	सहभागी, संयोजकसमितेः सदस्यः
१८.	उपप्रा. श्रीमती सरस्वतीदेवी पोखरेलोपाधिका -	सहभागिनी, जनताविद्यापीठम्, दाङ
१९.	उपप्रा. श्रीमती अलका चूडालोपाधिका -	सहभागिनी, वाल्मीकिविद्यापीठम्
२०.	उपप्रा. श्रीरमेशघिमिरेः -	सहभागी, पिण्डेश्वरविद्यापीठम्, धरान
२१.	उपप्रा. श्रीचन्द्रमणिनेपालः -	सहभागी, पिण्डेश्वरविद्यापीठम्, धरान
२२.	उपप्रा. श्रीनूरापतिपोखरेलः -	सहभागी, हजारीजनकविद्यापीठम्, जनकपुर
२३.	उपप्रा. श्रीभरतप्रसादसुवेदी -	सहभागी, हजारीजनकविद्यापीठम्, जनकपुर
२४.	उपप्रा. श्रीदेवीप्रसादकाफ्लेः -	सहभागी, या.ल.ना.विद्यापीठम्, मटिहानी
२५.	उपप्रा. श्रीटेकनाथघिमिरेः -	सहभागी, विन्दुवासिनीविद्यापीठम्, पोखरा
२६.	उपप्रा. श्रीधनेश्वरनेपालः -	सहभागी, वाल्मीकिविद्यापीठम्
२७.	उपप्रा. श्रीशान्तिकृष्णोऽधिकारी -	सहभागी, वाल्मीकिविद्यापीठम्
२८.	उपप्रा. श्रीजीवनोऽधिकारी -	सहभागी, संयोजकसमितेः सदस्यः
२९.	उपप्रा. श्रीमुकुन्दलामिछानेः -	सहभागी, संयोजकसमितेः सदस्यः
३०.	उपप्रा. श्रीनन्दनभट्टराईः -	सहभागी, संयोजकसमितेः सदस्यः
३१.	उपप्रा. श्रीपराशर आचार्यः -	सहभागी, संयोजकसमितेः सदस्यः
३२.	उपप्रा. श्रीगोविन्दपौडेलः -	सहभागी, शारदाविद्यापीठम्, महेन्द्रनगरम्
३३.	उपप्रा. श्रीकेशवमणिघिमिरेः -	सहभागी, रुरुसंस्कृतविद्यापीठम्, रिडी
३४.	सहाप्रा. श्रीसुमोदवर्धनकौडिन्न्यायनः -	सहभागी, वाल्मीकिविद्यापीठम्
३५.	सहाप्रा. श्रीदेवीप्रसादसुवेदी -	सहभागी
३६.	सहाप्रा. श्रीमोदनाथखनालः -	सहभागी
३७.	सहा.प्रा. श्रीमतिप्रसादढकालः -	सहभागी, भानुविद्यापीठम्, तनहूँ
३८.	श्रीविष्णुपन्थी -	सहभागी, छात्रप्रतिनिधिः, वाल्मीकिविद्यापीठम्
३९.	श्रीमती निमा के.सी. -	सहभागिनी, म.सं.वि. केन्द्रीयकार्यालयः, दाङ

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

११. वाल्मीकिविद्यापीठन्यायशिक्षणविभागेनायोजिता न्यायविषयिणी कार्यशालागोष्ठी

महेन्द्रसंस्कृतविश्वविद्यालयस्य विश्वविद्यालयानुदानायोगस्य च सहयोगे वाल्मीकिविद्यापीठान्तर्गत – न्यायशिक्षण–विभागेन २०६० वैक्रमाब्दस्य आषाढमासस्य विंशदिवसाद् द्वाविंशदिवसपर्यन्तमायोजिता न्यायविषयिणी दिवसत्रयव्यापिनी कार्यशालागोष्ठी काष्ठमण्डपे सम्पन्ना । न्यायविषये विशेषतो नव्यन्याये अङ्गीकृतपारिभाषिकशब्दावल्याः परिचयप्रदानस्य, न्यायविचारप्रक्रियायाः प्रमुखसिद्धान्तानां शास्त्रान्तरेषु प्रयोगपरिशीलनस्य, न्यायशिक्षणविधेर्ज्ञानाभ्यासयोर्माध्यमेन विषयस्यास्य न्यायेतरशास्त्राणाञ्च पठनपाठनयोः सरलीकरणस्यापि उद्देश्येन आयोजितायामस्यां गोष्ठ्यां महेन्द्रसंस्कृत–विश्वविद्यालयान्तर्गतानां विविधविद्यापीठानां प्राध्यापकाः सक्रियसहिभागितां प्रदर्श्य लाभान्विता अभवन् ।

उद्घाटनसमारोहः (२०६०/३/२० शुक्रवासरे ११:००-१:००)

सभापतिः - प्रा. विद्यानाथोपाध्यायमहोदयः, अध्यक्षः – न्यायविभागः

प्रमुखातिथिः – सं. डा. स्वामिप्रपन्नाचार्यमहोदयः, सदस्यः – राजपरिषत्स्थायिसमितिः

स्वागतवक्तव्यं विषयोपस्थापनञ्च – प्रा. शिवहरिमरहट्टामहोदयद्वारा

समुद्घाटनम् – प्रमुखातिथिकरकमलाभ्याम्

मन्तव्यम् - प्रा. माधवराजगौतममहोदयस्य, डा. टीकारामपन्थिमहोदयस्य, प्राचार्यस्य प्रा.डा. रामचन्द्रगौतममहोदयस्य ।

मन्तव्यम् - प्रमुखातिथेः सं.डा. स्वामिप्रपन्नाचार्यमहाभागानाम्

धन्यवादज्ञापनम् – सहप्रा. पद्मप्रसादभट्टराईद्वारा

समापनभाषणम् – प्रा. श्रीविद्यानाथोपाध्यायमहोदयस्य ।

प्रथमकार्यसत्रम् (२०६०/३/२० शुक्रवासरे दिवा १:३० - ४:००)

सभापतिः – प्रा.डा. दीर्घराजघिमिरेः

कार्यपत्रप्रस्तुतिः – प्रा. विद्यानाथोपाध्यायद्वारा

कार्यपत्रम् – न्यायका पारिभाषिक शब्दार्थपरिचय (न्यायविषयकपारिभाषिकशब्दार्थपरिचयः)

सङ्क्षिप्तविवरणम् – कार्यपत्रलेखकेन विदुषा अस्मिन् कार्यपत्रेऽनुयोगिता–प्रकारता–विशेष्यता–विषयताप्रभृतीनां न्यायशास्त्रस्य पारिभाषिकशब्दानां नेपालीभाषायां सोदाहरणमर्थस्फोरणं कृत्वा सहभागिनां सन्निधौ न्यायशास्त्रबोधप्रकारदिग्दर्शनं विहितम् ।

कार्यशाला – सम्बद्धशब्दानां प्रयोगाभ्यासाधारिता ।

द्वितीयकार्यसत्रम् (२०६०/३/२१ शनिवासरे ११:०० - १:००)

सभापतिः - प्रा. श्रीदामोदरचालिसेः

कार्यपत्रप्रस्तुतिः – सहप्रा. श्रीपद्मप्रसादभट्टराईद्वारा

कार्यपत्रम् – न्यायदर्शनमा विचारप्रक्रिया (न्यायदर्शने विचारप्रक्रिया)

सङ्क्षिप्तविवरणम् – कार्यपत्रलेखकेन विदुषा न्यायदर्शने विचारप्रक्रियाया उपस्थापनविधौ उद्देश–लक्षण–अङ्ग–प्रवृत्ति–प्रयोजन–कथास्वरूप–छल–जाति–निग्रहस्थान–हेत्वाभासादीनां स्वरूपप्रकाशनं कृतम् ।

कार्यशाला – न्यायदर्शने विचारप्रक्रियाया दिग्दर्शनार्थं प्रयोगाभ्यासः ।

तृतीयकार्यसत्रम् (१:३०-४:००)

सभापतिः - प्रा.डा. दुर्गाप्रसाददवाडी

कार्यपत्रप्रस्तुतिः – प्रा. शिवहरिमरहट्टाद्वारा

कार्यपत्रम् – न्याय शिक्षण पद्धति (न्यायशिक्षणपद्धतिः)

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

सङ्क्षिप्तविवरणम् – कार्यपत्रलेखकेन विदुषा न्यायशिक्षणपद्धतिदिग्दर्शनक्रमे पदार्थशिक्षणपद्धति-ननुनचशिक्षणपद्धति-पदकृत्यशिक्षणपद्धति-विचारशिक्षणपद्धति-परम्परागतशिक्षणपद्धतिप्रभृतीनां सोदाहरणं स्वरूपप्रकाशनं विहितम् ।

टिप्पणीकारः – प्रा.डा. दीर्घराजघिमिरेः

कार्यशाला – न्यायशिक्षणपद्धतिमासृत्य शिक्षणाभ्यासाधारिता ।

चतुर्थकार्यसत्रम् (२०६०/३/२२ रविवासरे ११:००-१:००)

सभापतिः – प्रा.डा. रामचन्द्रगौतमः, प्राचार्यः, वाल्मीकिविद्यापीठस्य

कार्यपत्रप्रस्तुतिः – उपप्रा. श्रीजगत्-उपाध्याय'प्रेक्षित'द्वारा

कार्यपत्रम् – न्यायदर्शनका प्रमुख सिद्धान्तहरू (न्यायदर्शनस्य प्रमुखसिद्धान्ताः)

सङ्क्षिप्तविवरणम् – कार्यपत्रलेखकेन विदुषा स्वप्रस्तुते कार्यपत्रे न्यायदर्शनस्य मूलभूतसिद्धान्तपरिचायनविधौ विषयविवेचनासिद्धान्त-प्रमाणसिद्धान्त-प्रमेयसिद्धान्त-कारणसिद्धान्त-आत्मसिद्धान्तप्रभृतीनां सिद्धान्तानां स्वरूपप्रकाशनं कृतम्।

टिप्पणीकारः – प्रा. श्रीदामोदरचालिसेः

विशेषमन्तव्यम् –	**वक्ता**	**विषयशीर्षकम्**
क)	प्राज्ञः डा. टीकारामपन्थी –	व्याकरणमा न्यायसिद्धान्तको प्रयोग (व्याकरणे न्यायसिद्धान्तप्रयोगः)
ख)	प्रा.डा. दीर्घराजघिमिरेः –	वेदान्तमा न्यायसिद्धान्तको प्रयोग (वेदान्ते न्यायसिद्धान्तप्रयोगः)
ग)	सहप्रा. श्रीरामहरिदाहालः –	साहित्यमा न्यायसिद्धान्तको प्रयोग (साहित्ये न्यायसिद्धान्तप्रयोगः)
घ)	प्रा.डा. दुर्गाप्रसाददवाडी –	न्यायेतर दर्शनमा न्यायसिद्धान्तको प्रयोग (न्यायेतरदर्शनेषु न्यायसिद्धान्तप्रयोगः)
ङ)	प्रा.डा. डिल्लीप्रसादगौतमः –	पूर्वमीमांसामा न्यायसिद्धान्तको प्रयोगः (पूर्वमीमांसायां न्यायसिद्धान्तप्रयोगः)
च) १.	उपप्रा.डा. काशीनाथन्यौपानेः –	बौद्धदर्शनमा न्यायसिद्धान्तको प्रयोगः (बौद्धदर्शने न्यायसिद्धान्तप्रयोगः)
२.	उपप्रा. डा. नरेशमानवज्राचार्यः –	बौद्धदर्शनमा न्यायसिद्धान्तको प्रयोगः (बौद्धदर्शने न्यायसिद्धान्तप्रयोगः)

समापनसमारोहः (२०६०/३/२२ रविवासरे १:३०-४:००)

सभापतिः – प्रा.डा. माधवशरण उपाध्यायः, शिक्षाध्यक्षः, म.सं.वि.

प्रमुखातिथिः – आचार्यः पूर्णचन्द्रढुङ्गेलः, उपकुलपतिः, म.सं.वि.

गोष्ठीमन्तव्यम् – सहभागिप्रतिनिधित्वेन – उपप्रा. श्रीमुकुन्दलामिछाने-उपप्रा. श्रीदेवीप्रसादवाशिष्ठ-उपप्रा. श्रीचन्द्रमणिनेपालमहोदयानाम्।

उपलब्धिप्रकाशनम् – उपप्रा. श्रीजगत्-उपाध्याय'प्रेक्षित'द्वारा

विभागीयवक्तव्यम् – प्रा. विद्यानाथोपाध्यायस्य, न्यायविभागाध्यक्षस्य

विशिष्टवक्तव्यम् – प्रमुखातिथेः

कृतज्ञताज्ञापनम् – उपप्रा. श्रीजगत्प्रसादोपाध्यायद्वारा

विवरणम् – उपकुलपतिः आचार्यपूर्णचन्द्रढुङ्गेलो गोष्ठ्याः सहभागि-कार्यपत्रलेखक-टिप्पणीकार-विशेषज्ञ-पर्यवेक्षकेभ्यः प्रमाणपत्राणि प्रादात् । असौ न्यायस्य वैशिष्ट्यानि, एतेषां महत्त्वप्रकाशने गोष्ठ्याः सफलताम्, विश्वविद्यालयेन विहितं विधेयञ्च सहयोगमालक्ष्य मन्तव्यमुपास्थापयत् । शिक्षाध्यक्षः प्रा.डा. माधवशरण उपाध्यायः गोष्ठ्याः सकारात्मकपरिणामे उल्लेखनीयोपलब्धौ च प्रसन्नतां व्याहरन् एवं विधानां गोष्ठीनामायोजनाय अनुसन्धानादिकार्यक्रमेभ्यश्च विश्वविद्यालयस्य तत्परताप्रदर्शनविषये सविशेषं समाश्वासयत् । गोष्ठ्याः सहभागिभिः उपकुलपति-शिक्षाध्यक्षयोः समक्षं कार्यपत्राणां सङ्ग्रहप्रकाशनाय, वारं वारं विषयगतशिक्षणप्रशिक्षणाय एवंविधासु गोष्ठीषु सर्वेषां न्यायविषयशिक्षकाणां सहभागितायै च परामर्शाः प्रस्तुताः सन्ति ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

न्यायविषयककार्यशालागोष्ठ्यां समवेतानां सहभागिनां चित्रावली

गोष्ठीं समुद्घाटयन् सं.डा. स्वामी प्रपन्नाचार्यः

गोष्ठीसमुद्घाटनसमारोहे समुपस्थिता उपकुलपतिकुङ्गेलप्रभृतयो विद्वांसः

गोष्ठ्या एकस्मिन् सत्रे साभापत्यं कुर्वाणो न्यायविभागाध्यक्षः प्रा. श्रीविद्यानाथ उपाध्यायः, मन्तव्यप्रकाशयन् प्रा. श्रीरामेश्वरपोखरेलः, अन्ये विद्वांसश्च

गोष्ठ्यां स्वमन्तव्यं प्रकाशयन् प्रा. श्रीशिवहरिमरहट्टाः



गोष्ठ्या उद्देश्यं प्रकाशयन् उपप्रा. श्रीजगत् उपाध्यायः

गोष्ठ्यां समवेता विद्वांसो विदुष्यश्च

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

समापनसमारोहे प्रमुखातिथेरासनतः स्वमन्तव्यं प्रकाशयन्
उपकुलपतिः - आचार्यपूर्णचन्द्रलुङ्गेलः



समापनसमारोहे सभापतेरासनतः स्वमन्तव्यं प्रकाशयन् शिक्षाध्यक्षः
प्रा.डा. माधवशरण उपाध्यायः

समापनसमारोहे स्वमन्तव्यं प्रकाशयन् न्यायविभागाध्यक्षः
प्रा. विद्यानाथ उपाध्यायः

गोष्ठ्यां प्रा. विद्यानाथमहोदयाय प्रमाणपत्रं वितरन्
उपकुलपतिमहाभागः

गोष्ठ्यां प्रा. रामेश्वरपोखरेलमहानुभावाय प्रमाणपत्रं वितरन्
उपकुलपतिमहाभागः

गोष्ठ्यां प्रा. शिवहरिमरहट्टामहाभागाय प्रमाणपत्रं वितरन्
उपकुलपतिमहाभागः

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

कार्यशालागोष्ठ्या उपलब्धिः

न्यायविषयककार्यशालागोष्ठ्या उपलब्धयो निम्ननिर्दिष्टाः सन्ति –

१. दिवसत्रयव्यापिन्यामस्यां गोष्ठ्यां प्रस्तुतैर्न्यायसम्बद्धैश्चतुर्भिः कार्यपत्रैर्न्यायविषयकवस्तुबोधेन सर्वे सहभागिनो भृशमुपकृताः।

२. अनया गोष्ठ्या विशेषतो न्यायविषयकाः सामान्यतोऽन्यविषयकाः शिक्षका न्यायदर्शनगतपारिभाषिकशब्दार्थबोधेन, न्यायदर्शने विचारप्रक्रियायाः परिज्ञानेन, न्यायशिक्षणपद्धतिबोधेन, न्यायदर्शनस्य प्रमुखसिद्धान्तानामवबोधेन च लाभान्विता जाताः ।

३. अस्यां गोष्ठ्यां वेदान्ते न्यायसिद्धान्तस्य प्रयोगः, साहित्ये न्यायसिद्धान्तस्य प्रयोगः, न्यायेतरदर्शनेषु न्यायसिद्धान्तस्य प्रयोगः, पूर्वमीमांसायां न्यायसिद्धान्तस्य प्रयोगः, बौद्धदर्शने न्यायसिद्धान्तस्य प्रयोगश्चेति शीर्षकेषु तत्तद्विषयकविद्वद्भिरभिव्यक्तैर्मन्तव्यैः सहभागिनो भृशमुपकृता इति सैषा महत्युपलब्धिः ।

गोष्ठीसहभागिनः

१.	प्रा. श्रीविद्यानाथ उपाध्यायः –	वाल्मीकिविद्यापीठस्थः, न्यायविभागाध्यक्षः, कार्यपत्रप्रस्तोता
२.	प्रा. श्रीशिवहरिमरहट्टाः –	वाल्मीकिविद्यापीठस्थः, न्यायविभागसदस्यः, कार्यपत्रप्रस्तोता
३.	सहप्रा. श्रीसीतारामढकालः –	वाल्मीकिविद्यापीठस्थः, न्यायविभागसदस्यः
४.	सहप्रा. श्रीपद्मप्रसादभट्टराईः –	वाल्मीकिविद्यापीठस्थः, न्यायविभागसदस्यः, कार्यपत्रप्रस्तोता
५.	उपप्रा. श्रीजगत् उपाध्यायः –	वाल्मीकिविद्यापीठस्थः, न्यायविभागसदस्यः, कार्यपत्रप्रस्तोता
६.	सहायकप्रा. श्रीअच्युतलामिछाने: –	वाल्मीकिविद्यापीठस्थः, न्यायविभागसदस्यः
७.	प्रा. श्रीदामोदरशर्मा –	विश्वविद्यालयविद्यापीठस्थः
८.	उपप्रा. श्रीदेवीप्रसादवासिष्ठः –	विश्वविद्यालयविद्यापीठस्थः
९.	उपप्रा. श्रीचन्द्रमणिनेपालः –	पिण्डेश्वरविद्यापीठस्थः
१०.	सहायकप्रा. श्रीमाधवोऽधिकारी –	जनताविद्यापीठस्थः
११.	प्रा. श्रीरामेश्वरशर्मपोखरेलः –	दाङस्थः
१२.	प्रा.डा. दुर्गाप्रसाददवाडी –	काष्ठमण्डपस्थः
१३.	प्राज्ञ. डा. टीकारामपन्थी –	नेपालराजकीयप्रज्ञाप्रतिष्ठानस्थः
१४.	प्रा. श्रीमाधवराजगौतमः –	वाल्मीकिविद्यापीठस्थः
१५.	प्रा.डा. दीर्घराजघिमिरेः –	वाल्मीकिविद्यापीठस्थः
१६.	प्रा.डा. रामचन्द्रगौतमः –	प्राचार्यः, वाल्मीकिविद्यापीठस्थः
१७.	सहप्रा. श्रीरामहरिदाहालः –	वाल्मीकिविद्यापीठस्थः
१८.	सहप्रा. श्रीध्रुवप्रसादज्ञवाली –	सहायकप्राचार्यः, वाल्मीकिविद्यापीठस्थः
१९.	उपप्रा. श्रीभीमप्रसादकण्डेलः –	वाल्मीकिविद्यापीठस्थः
२०.	उपप्रा. डा. काशीनाथन्यौपाने –	वाल्मीकिविद्यापीठस्थः
२१.	प्रा.डा. ऋषिरामपोखरेलः –	वाल्मीकिविद्यापीठस्थः
२२.	उपप्रा. श्रीजीवनोऽधिकारी –	वाल्मीकिविद्यापीठस्थः
२३.	उपप्रा. श्रीमती अलका चूडालोपाधिका –	वाल्मीकिविद्यापीठस्था
२४.	उपप्रा. श्रीगोपालप्रसाद उपाध्यायः –	शारदाविद्यापीठस्थः
२५.	शिक्षिका श्रीमती रमाभट्टराईः –	रानीपोखरीसंस्कृतमा.वि.स्था

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

२६. **सहायकप्रशासकः श्रीकपिलदेवशर्मा -** म.सं.वि., केन्द्रीयकार्यालयस्थः
२७. **विद्यार्थी - श्रीकृष्णरिजालः -** वाल्मीकिविद्यापीठस्थः
२८. **विद्यार्थी - श्रीभानुभक्त आचार्यः** वाल्मीकिविद्यापीठस्थः

१२. 'नेपाले संस्कृतशिक्षाया महत्त्वम्' इति विषयाधृता विचारगोष्ठी

वि.सं. २०६० ज्येष्ठमासस्य षोडशदिवसे **तीनधारासंस्कृतछात्रावासछात्रकार्यसमित्या** आयोजनायां तीनधारासंस्कृतछात्रावासे काष्ठमण्डपे **'नेपाले संस्कृतशिक्षाया महत्त्वम्'** इति विषयमादाय एका विचारगोष्ठी सम्पन्ना । श्रीयज्ञराजघिमिरे इति शुभनाम्नः छात्रकार्यसमित्याः सभापतेरध्यक्षतायां म.सं.वि. उपकुलपतेराचार्यपूर्णचन्द्र-ढुङ्गेलमहोदयस्य प्रमुखातिथित्वे, पूर्वमन्त्रिणः श्रीपद्मरत्नतुलाधरमहोदयस्य, नायवबडागुरुज्यू प्रा.डा. माधवभट्टराईमहोदयस्य, सम्माननीयस्य डा. स्वामिप्रपन्नाचार्यमहोदयस्य, पूर्वसांसदस्य प्रा. श्रीविदुरपौडेलमहोदयस्य, पूर्वोपकुलपतेः प्रा. श्रीमाधवराजगौतममहोदयस्य, दलितायोगमहासचिवस्य श्रीपद्मसिंहविश्वकर्ममहोदयस्य तथान्येषाञ्च ख्यातयशसां मनीषिणां समुपस्थितौ समायोजितायामस्यां विचारगोष्ठ्यां वाल्मीकिविद्यापीठसाहित्यविभागाध्यक्षेण प्रा.डा. वेणीमाधवढकालमहाभागेन **'नेपाले संस्कृतशिक्षाया महत्त्वम्'** इति शीर्षकमादायानुसन्धानपूर्णं वैदुष्यविशिष्टञ्च विचारपत्रं तत्र प्रस्तुतम् । प्रस्तुतस्य कार्यपत्रस्य प्रा. श्रीविदुरपौडेलमहाभागेन पाण्डित्यप्रकर्षा समीक्षा कृता ।

तस्यां गोष्ठ्यां समुपस्थितैः सर्वैरेव सहभागिभिः संस्कृतमहत्त्वमादाय निजा भावा अभिव्यक्ताः । पूर्वमन्त्रिणा श्रीपद्मरत्नतुलाधरमहाभागेन, दलितायोगस्य महासचिवेन श्रीपद्मसिंहविश्वकर्ममहाभागेन च संस्कृतमहत्त्वमादाय निजा निजा अवधारणा प्रस्तुता ।

अस्मिन्नेव कार्यक्रमे **तीनधारासंस्कृतछात्रावासस्य छात्रकार्यसमित्या** संस्कृत-संस्कृतिशोधक्षेत्रे विशिष्टं योगदानं कृतवतः **सम्माननीयस्य डा. स्वामिप्रपन्नार्चामहोदयस्य** अभिनन्दनपत्रसमर्पणोत्तरीयपरिधापनमाल्यार्पणादिभिः सश्रद्धम् **अभिनन्दनं** कृतम् ।

१३. 'नेपाले ब्राह्मणेतरमनीषिणां संस्कृतवाङ्मयसंवर्धने योगदानम्' इति विषयाधृता विचारगोष्ठी

वि.सं. २०६० तमस्य वैक्रमाब्दस्य २८ तमे दिवसे सम्माननीयस्य डा. स्वामिप्रपन्नाचार्यमहोदयस्य प्रमुखातिथित्वे, श्रीश्रीभद्रखनालमहोदयस्य साभापत्ये, पूर्वमन्त्रिणः श्रीपद्मरत्नतुलाधरमहाभागस्य च समुपस्थितौ नेपालराजकीयप्रज्ञाप्रतिष्ठानस्य सहयोगे **जयतु संस्कृतम्** इति संस्थया समायोजितायां विचारगोष्ठ्यां वाल्मीकिविद्यापीठस्य साहित्यविभागाध्यक्षेण प्रा.डा. वेणीमाधवढकालमहाभागेन **'नेपाले ब्राह्मणेतरमनीषिणां संस्कृतवाङ्मयसंवर्धने योगदानम्'** इति शीर्षके नैजमनुसन्धानपूर्णं विचारपत्रं प्रस्तुतम् । राजधान्या विशिष्टविदुषाम्, संस्कृतिविदाम्, महेन्द्रसंस्कृतविश्वविद्यालयस्य त्रिभुवनविश्वविद्यालयस्य च पञ्चाशदधिकानां प्राध्यापकानां विदुषाञ्च तत्र सहभागिताऽऽसीत्। संस्कृतिविशेषज्ञेण प्राज्ञेन श्रीसत्यमोहनजोशीमहाभागेन, न्यायाचार्येण प्रा. श्रीबलदेवजुजुमहोदयेन च पूर्वोक्तस्य विचारपत्रस्य तीक्ष्णया मनीषया समीक्षा कृता, विचारपत्रे पूर्णताधानाय च मूल्यवन्तः परामर्शाः प्रत्ताः । तस्यां गोष्ठ्यां स्वीयं मन्तव्यं प्रकाशयता पूर्वमन्त्रिणा श्रीपद्मरत्नतुलाधरमहाभागेन उक्तम् - 'विचारपत्रमिदं श्रुत्वा भृशमहं लाभान्वितः। लोके केचन जना मां संस्कृतविरोधी एष जन इति परिचाययन्ति, नाहं संस्कृतविरोधी अपितु अनिवार्यसंस्कृतशिक्षाया विरोधी अस्मि, संस्कृतमहं सम्मानयामि, संस्कृतभाषा विश्वविजयिनी भाषा वर्तते इत्यपि सुष्ठु जानामि, संस्कृतज्ञानं विना नेपालस्य संस्कृतिः, सभ्यता, इतिवृत्तम्, परम्परा च यथार्थतया ज्ञातुं कोऽपि न शक्नोति । अत एवास्माभिः

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

संस्कृतस्य अधुनातनप्रविधिमवलम्ब्य विकासः कर्तव्यः, संस्कृतवङ्मयरत्नाकरे निहितानां रत्नानां गवेषणया लोकहितं लोकसुखञ्च सम्पादनीयम्' इति । तत्रैव दलितायोगस्य महासचिवेन श्रीपद्मसिंहविश्वकर्ममहाभागेनापि कार्यपत्रं प्रशंसता निजा संस्कृतमहत्त्वाधायका विचारा अभिव्यक्ताः । तत्र प्रमुखातिथिना सं.डा. स्वामिप्रपन्नाचार्यमहाभागेनोक्तम्- 'संस्कृतं संस्कृतेर्मूलमिति विचार्य दुर्भावनामपसार्य संस्कृतविकासाय सर्वैरेव नैपालकजनैः सर्वात्मना सहयोगः कर्तव्यः । प्रा.डा. वेणीमाधवढकालमहोदयेन प्रस्तुतं विचारपत्रं श्रुत्वाऽपि प्रमणितं भवति यत् संस्कृतं सर्वेषामेव भाषा न तु वर्णविशेषस्य, नापि वर्गविशेषस्य, नापि च देशविशेषस्य निजा सम्पत्तिः' इति ।

तस्मिन्नेवावसरे प्रा. विद्यानाथोपाध्याय-श्रीप्रकाश ए.राज- प्रा. श्रीपीताम्बरदाहाल-प्रा. श्रीदैवज्ञराजन्यौपाने-प्रा. श्रीशिवहरिमरहट्ठा-प्रा. श्रीतेजकेशरिशर्म-सहप्रा. श्रीरामहरिदाहाल-उपप्रा. श्रीध्रुवभट्टराई-उपप्रा. श्रीमुकुन्दलामिछाने-उपप्रा. श्रीनवराजकट्टेलप्रभृतिभिर्विद्वद्भिरपि निजा संस्कृतसम्बद्धा विचाराः प्रकटीकृताः । अस्मिन् कार्यक्रमे कार्यपत्रं समालोचयता डा. टीकारामपन्थिमहाभागेन कार्यपत्रप्रस्तोतुर्विद्वद्वरस्य ढकालमहाभागस्य, तत्प्रस्तुतविचारपत्रस्य च भूरि-भूरि प्रशंसा कृता ।

पर्यन्ते जयतु संस्कृतम् इतिसंस्थाया अध्यक्षपदमलङ्कुर्वता तद्दिवसीयसभापतिना श्रीश्रीभद्रशर्ममहाभागेन संस्कृतस्य महत्त्वं परिचाययता सङ्कीर्णभावनां परिहाय विश्वभाषाजनन्या संस्कृतभाषाया विशिष्टमभिज्ञानमङ्गीकृत्य नेपालदेशे संस्कृतस्य विकासः कर्तव्य इति निजाऽवधारणा प्रकटीकृता । विषयमहिम्ना महिमवती गोष्ठीयं सञ्चारसंसारेऽत्यधिकं प्रचारमलभत ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

आवश्यकी सूचना

१. चातुर्मासिकी त्रैभाषिकी चानुसन्धानपत्रिकेयम् 'ऋतम्भरा' प्रत्येकं वर्षे प्रतिचतुर्मासं महेन्द्रसंस्कृतविश्वविद्यालयस्य काष्ठमण्डपस्थादनुसन्धानकेन्द्रात् प्रकाशयिष्यते ।

२. महेन्द्रसंस्कृतविश्वविद्यालयान्तर्गतैर्विद्वद्भिरन्यैर्मनीषिभिश्च संस्कृत-नेपाली-अङ्ग्रेजीभाषासु मध्ये कामप्येकामधिकृत्य प्रणीतानामनुसन्धानमूलकानामन्येषामुपयोगिनां निबन्धानां स्तरीयाणां संस्कृतपद्यानाञ्च प्रकाशनेन संस्कृतज्ञेषु मौलिकानुसन्धानप्रवृत्तेः, सम्यगालोचनाप्रवृत्तेः, सत्काव्यप्रणयनप्रवृत्तेश्च समुत्पादनम्, अन्यभाषाभाषिभ्यो जिज्ञासुभ्यः संस्कृतवाङ्मये निहितानां मूल्यवतां विषयाणां सूचनाप्रदानञ्चास्याः पत्रिकायाः प्रमुखमुद्देश्यम् ।

३. ऋतम्भरायां प्रकाशितानां रचनानां कृते रचनाप्रकृत्यनुसारेण समयोचितं गौरवधनमपि प्रदास्यते ।

४. उपरिनिर्दिष्टगुणविशिष्टानामेव रचनानां प्रकाशनविषये मनीषिभिरधोनिर्दिष्टेन सम्पर्कसङ्केतेन व्यवहारो विधेयः ।

म.सं.वि. अनुसन्धानकेन्द्रम्
दूरभाषसङ्ख्या (फो.नं.) २४७४४५

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal